


GOBHILIYA GRIHYA SUTRA

WITH A

COMMENTARY BY THE EDITOR.

EDITED BY

MAHAMAHOPADHYĀYA
CHANDRA KĀNTA TARKĀLAṄKĀRA

VOL. I.

(Second Edition, revised and enlarged.)



CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS.
1908.

गृह्यसूत्रम्।

गोभिल-प्रणीतम्।

महामहोपाध्याय

श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यकृत-

भाष्यसहितम्।




प्रथमभागरूपम्।

भाष्ये क्वचित् क्वचित् परिवर्त्तितं परित्यक्तं परिवर्द्धितञ्च।

वङ्गदेशीय श्रील श्रीयुक्त एसियातिकसमाजानुमत्या

वाणिज्य मिशनयन्त्रे पुनर्मुद्रितम्।



ॐ

गोभिलीयं

गृह्यसूत्रम् ।

प्रथमप्रपाठके प्रथमखण्डः ।

ॐ नमः सामवेदाय ।

ॐ नमो गोभिलाचार्य्याय ।

वेदान्तप्रतिपाद्यमेकममलं मानैरमेयञ्च यत्
सर्व्वैराश्रमधर्म्मकर्म्मनिकरैराराध्य शुद्धान्तराः ।
यस्मात् प्राप्य यथार्थवस्तुनियतामाचार्य्यवर्य्यान्मतिं
यत्तत्तत् पदमाप्नुवन्ति मुनयः कस्मैचिदस्मै नमः ॥

वन्दे पितृपदद्वन्द्वमरविन्दमिव श्रितम् ।
मकरन्दमिवादातुं शिष्यैर्मधुकरैरिव ॥
महर्षिं गोभिलाचार्य्यं प्रणम्य परमादरात् ।
भाष्यन्तद्गृह्यसूत्राणां यथाबुद्धि विधीयते ॥

इह खलु बुभुत्सितमर्थं विबोधयिषवः सर्व्व एव प्रेक्षापूर्व्व-
कारिणः परानुग्रहपराः सन्तो वाग्व्यापारं प्रतिपद्यन्ते । बुभुत्सवश्च

Goovilagrihya Sūtra, Vol. I., Fasc. I, No. 1161.

तद्वचनतात्पर्य्यमवधार्य्य बुभुत्सितमर्थमवबुध्यन्ते, अवबुध्यमानास्त-मनुतिष्ठन्ति। अनुतिष्ठन्तश्च श्रेयसा समीहितेन संसृज्यन्ते। बुभुत्सितश्चार्थः श्रेयःसाधनमेव सर्व्वेषां प्राणभृद्भेदानाम्। श्रेयः पुनः सुखं, दुःखनिवृत्तिश्चेत्याहुः। प्राणिनः खलु सुखमुत्पिपा-दयिषवः जिहासवश्च दुःखमुपलभ्यन्ते पशवोऽपि, किं पुनर्मनुष्या-विवेकशक्तिमन्तः। तदिदं प्रत्यात्ममभीप्सितमपि सुखं दुःखहानं च निरतिशयमेवाभ्यर्हितमित्यपवर्ग एव तावत् परमोऽर्थः। स खल्वनभिसंहितफलैरीश्वरसमर्पितैर्नित्यनैमित्तिकैः कर्म्मभिः प्रशुद्ध-चित्तस्याधिकारिणः तत्त्वावबोधात् सम्पद्यते इत्याचक्षते। भवति चात्रागमः। "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन—" इति, "तपसा ब्रह्म विजिज्ञासस्व" इति चैवमादिः। मनुरपि,—

"अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्म्मभिः।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम्" ॥

इति स्मरति।

"कषाये कर्म्मभिः पक्वे ततो ज्ञानं प्रजायते"।

इति च स्मर्य्यते पुराणेषु। अतएव भगवान् बादरायण आचार्य्यः शारीरके—"सर्व्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इति सूत्रयाम्बभूव। "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" इति, "समाधि-भावनार्थः क्लेशतनूकरणार्थश्च" इति, तथा, "योगाङ्गानुष्ठाना-दशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः" इति, "यमनियमासन-प्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" इति, "शौच-सन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" इति च पात-

स्खलानि सूत्राणि। "तास्थः पावित्र्यमुपक्रमात्"—इति च शाण्डिल्यसूत्रम्।

तदेवं धर्म्म एव साधनतया प्रथममाश्रयणीय इति स्फुटतरमवगम्यते। येषान्तु, वेदान्ताः कर्त्तृदेवतादिप्रकाशकतयैव प्रमाणमिति दर्शनं, तेषामभ्यर्हितत्वं धर्म्मस्य सुतरामिति सिध्यते। अर्थकामावपि नान्तरेण धर्म्ममुत्पद्येते। न खल्वधार्म्मिकस्यार्थः कामो वाऽस्ति कश्चिदिति धर्म्ममेव तदुपायतया स्मरति भगवान् व्यासः।

"कामार्थौ लिप्समानस्तु धर्म्ममेवादितश्चरेत्।
न हि धर्म्मादपेतोऽर्थः कामो वापि कदाचन"॥

इति। "धर्म्मादर्थश्च कामश्च" इति च महाभारते। तदेवमालोच्य परमकारुणिको गोभिलाचार्य्यो गृह्यधर्म्मं छन्दोगानामुपदिदिक्षुर्मन्त्रब्राह्मण-पठितानां"देव सवितः"—इत्यादिमन्त्राणां विनियोगपरं गृह्यसूत्राख्यमिदं शास्त्रं रचयाञ्चकार। 'सूत्र'मिति हि सूच्यते येनार्थस्तदुच्यते, शास्त्रलक्षणानुशासनादिति शिष्टतरम्।

तदिदं गृह्यसूत्रं गोभिलाचार्य्यप्रणीतमिति आचार्य्यपुत्रकृते 'गृह्यासंग्रहे' स्पष्टम्। स खल्वयमाचार्य्यो राणायनीयानां सूत्रकार इति हेमाद्रिः। कौथुमा अपि राणायनीयप्रभेदा इति तेषामप्येतदेव गृह्यसूत्रम्। तथाच चरणव्यूहपरिशिष्टम्। "तत्र राणायनीया नाम सप्तभेदा भवन्ति राणायनीयाः शाट्यमुग्राः कालोपा महाकालोपा लाङ्गलायनाः शार्दूलाः कौथुमाश्चेति" इति। सामोदधौ कौथुमिशाखाया द्विपञ्चाशद्ग्रन्थगणनायामपि गोभिलगृह्यं

परिगणितम्। कौथुमराणायनीयादीनामेतत् सूत्रमिति भट्ट-नारायणोऽप्याह। "गौतमगोभिलीये (गृह्यसूत्रे) छन्दोगैरेव परिगृह्यीते" इति चोक्तं तन्त्रवार्त्तिके। तदस्य गृह्यसूत्रस्य विशदार्थ वृत्तिरियमारभ्यते। व्याचिख्यासितस्य गृह्यसूत्रशास्त्रस्येद-मादिमं सूत्रम्,—

अथातो गृह्यकर्म्माण्युपदेक्ष्यामः ॥ १ ॥

तत्रायमथशब्दो विशिष्टमानन्तर्य्यं प्रतिपादयति। प्रतियोगि-विशेषापेक्षं ह्यानन्तर्य्यं विशिष्टं भवति। तच्च वेदाध्ययनं तदर्थ-विचारश्चेत्येवमादिकम्। "वेदमधीत्य स्नायात्" इति, "अथातो-धर्म्मजिज्ञासा" इति चैवमादिशास्त्रेभ्यः। तदनेनाथशब्देन शास्त्रस्यादौ मङ्गलमपि कृतं भवति।

"ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ"।

इति गृह्यसंग्रहोक्तेः। न चाथशब्दो मङ्गलार्थः। अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति। अन्यार्थोपनीतमपि दधिदूर्व्वादिकमिवावलोकनमात्रेण गन्तुकामस्येति। सोऽयमथशब्दो-मङ्गलमर्थः प्रयोजनं (न पुनरभिधेयं) यस्येति मङ्गलार्थ उच्यते, न खलु मङ्गलमथस्यार्थोऽभिधेयं वाच्यमित्येतत्। तथा च ब्रह्मचारिणो यथावद्वेदाध्ययनाद्यनन्तरमित्यथशब्दस्यार्थः।

अतःशब्दो हेत्वर्थः। यस्मात्,—

"अतः परं समावृत्तः कुर्य्याद्दारपरिग्रहम्"। इति।

"वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्।
अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममाविशेत्"।

इति चैवमादिस्मरणात्, यथावद्विचारशास्त्राधिगमानन्तरं गार्हस्थ्यानुसरणं शास्त्रार्थः। यस्माच्च—

"यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।
गृहस्थेनैव धार्य्यन्ते तस्मात् ज्येष्ठो गृहाश्रमी"।

इत्येवमादिशास्त्रेभ्यस्तदुत्तमत्वमवगम्यते। 'अतः' एतस्मात् कारणात्— इत्यतःशब्दार्थः।

अयमपरोऽतःशब्दार्थः। यतो वृत्तेन वेदाध्ययनादिना कर्म्मावबोधात्तस्य कर्त्तव्यत्वमिदानीमापतितम्। तथा चाहुः शास्त्रतात्पर्य्यविदः। "दृष्टो हि तस्यार्थः कर्म्मावबोधनं नाम" इति। स्मरन्ति च।

"चरितार्थां न यः कुर्य्यादधीत्य श्रुतिमादितः।
तस्य तद्धारणं व्यर्थमगन्धाया इव स्रजः"।

इति। यतश्चाश्रमान्तरेषु गार्हस्थ्यस्य प्राथम्यं। 'अतः' एतस्मात् कारणात्।

स्मृतिश्चेयमविरक्तविषया द्रष्टव्या। नातो "ब्रह्मचर्य्यादेव प्रव्रजेत्" इति श्रुतिविरोधः। सा हि श्रुतिः— "यदहरेव विरजेत्, तदहरेव प्रव्रजेत्" इत्येवमभिदधाना विरक्तमेव स्पृशति नान्यम्। एतेन "वीरहा वा एष देवानां योऽग्निमुद्वासयते" इति, "एकाश्रम्यन्त्वाचार्य्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्य" इति चैवमाद्याः श्रुतिस्मृतयोऽपि व्याख्याताः। इत्यन्यदेतत्।

अयमप्यपरोऽत:शब्दार्थः। यस्मात् यथोक्तानन्तरं, गृह्यकर्म्म प्रतिपित्सवोऽन्तेवासिनो यथावदुपसन्नाः, 'अतः' एतस्मात् कारणात् —

'गृह्या' छान्दसत्वाद्गृह्याणि,—गृहे गृहस्थाश्रमे साधूनि योग्यानि, 'कर्म्माणि' धर्म्मभूतानि, बहुवचनात् किमप्यन्यत्, 'उपदेच्यामः' कथयिष्यामः।

अत्र च कर्म्मणामुपदेशकर्म्मत्वं प्रतिजानन्नाचार्य्यस्तेषां धर्म्मत्वमभिद्योतयति। अभिमतश्रेयःसाधनवस्तुकथनरूपस्योपदेशस्यान्तरेण धर्म्मत्वममीषामसम्भवात्। न खल्वश्रेयःसाधनमुपदिश्यते। न च श्रेयःसाधनं नाम धर्म्मो न भवति चोदनालक्षणोऽपीत्यनुसन्धेयम्। तथा चोक्तम्। "चोदनालक्षणोऽर्थो धर्म्मः" इति। "यज्ञेन यज्ञमजयन्त देवास्तानि धर्म्माणि—" इति च यजतिशब्दवाच्यमेव धर्म्ममाचक्षते। अतएवोक्तम्। उपसन्नस्यान्तेवासिनः स्वर्गापवर्गादिप्राप्तिसाधकपदार्थकथनमुपदेशः— इति।

अयमपरो गृह्याकर्म्माणीत्यस्यार्थः। गृहे साध्वी: कुशला, योग्या, हिता वेति गृह्या पत्नी, तया सहितस्य यानि कर्त्तव्यानि कर्म्माणि, तानीमानि गृह्याकर्म्माण्युपदेच्यामः। स्मार्त्तोऽग्निर्वा गृह्यशब्देनोच्यते। गृह्यः शालाग्निरावसथ्य औपासन इति पर्य्यायान्तरम्। छान्दसं दीर्घत्वम्। तस्मिन् गृह्ये स्मार्त्तेऽग्नौ यानि कर्त्तव्यानि कर्म्माणि तानीत्यादि पूर्व्ववदर्थः। अथवा गृहस्थस्य व्रतविशेषो गृह्यशब्दार्थः। तथा च श्रावणविधावुक्तम्। "सामवेदे अष्टौ व्रतानि भवन्ति उपनयनं गोदानं व्रातिकमादित्यव्रत-

मौपनिषदं ज्येष्ठसामव्रतं महानाम्निकमिति ब्रह्मचारिणोभौतिकं सार्व्वभौतिकमष्टमं गृह्यमिति गृहस्थस्य" इति। तस्मिन् यानि कर्त्तव्यानि कर्म्माणीत्यादि समानमन्यत्।

गृह्येति वा प्रस्तुतायाः स्मृतेरभिधानम्। गृह्येति स्त्रियमभिधीयते स्मृतिराचार्य्यप्रणीता। तथा चाचार्य्यपुत्रेण कृतोऽस्या एव स्मृतेः संग्रहः "गृह्यासंग्रहः" इत्याख्यायते, न "गृह्यसंग्रहः" इति। तथाचाचार्य्यपुत्र आह।

"पत्न्यः पुत्राश्च कन्याश्च जनिष्याश्चापरे सुताः।
गृह्या इति समाख्याता यजमानस्य दायकाः॥
तेषां संस्कारयोगेन शान्तिकर्म्मक्रियासु च।
आचार्य्यविहितः कल्पस्तस्माद्गृह्या इति स्थितिः"॥

इति। तस्यां यानि कर्म्माण्युपदेष्टव्यानि, तान्युपदेक्ष्याम इत्यर्थः। 'गृह्य आ कर्म्माणीनि त्रीणि पदानि। आ इति शब्दस्योपदेक्ष्यामइत्यनेन सह संबन्ध इति। आ इति शब्द ईषदर्थे। ईषदुपदेक्ष्यामः। ग्रन्थगौरवपरिजिहीर्षयाऽल्पैरेवाक्षरैः' इति भट्टभाष्यम्।

अन्ये त्वाहुः। 'अथशब्दो वेदाध्ययनानन्तर्य्यमभिधत्ते। अतः शब्दो हेत्वर्थम्। यस्मात्, वेदाध्ययनादर्व्वाक् न किञ्चिदध्येतव्यम्,—

"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः"॥

इति स्मरणात्। 'अतः' एतस्मात् कारणात्, वेदाध्ययनानन्तरं, गृह्यकर्म्माणीत्यादि पूर्व्ववदर्थः। इदानीमधीतवेदस्य गृह्यस्मृतेरध्ययनसम्भवात्',-इति। "न वेदमनधीत्यान्यां विद्यामधीयीतान्यत्र

वेदाङ्गस्मृतिभ्यः" इति हारीतेन त्वनधीतवेदस्यापि स्मृत्यध्ययन-मनुज्ञातम् ।

स चायमुपदेशः प्रायशः साक्षादेव । क्वचिदतिदेशादपि । यथा "एषोऽत ऊर्द्धं हविराहुतिषु न्यायः"—इति । क्वचिद्ग्रन्थान्तरापेक्षतया । यथा, "पृथगवैतस्य ज्ञानस्याध्यायो भवति"—-इत्यादौ । क्वचिच्चाङ्गानादरेण प्रधानोक्त्या । यथा, "शुचौ देशे ब्राह्मणाननिन्द्यानयुग्मानुदङ्मुखानुपवेश्य"—इति । वैश्वदेवं चाङ्गत्वाश्रोक्तमित्यादिकमनुसन्धेयम् ।

तदनेन सूत्रेणाभिधेयादीन्यपि शिष्यप्रवृत्त्युपयोगीनि प्रतिपादितानि । तत्राभिधेयं कर्म्म यथोक्तं, श्रेयः प्रयोजनम् । सम्बन्धोऽपि यथायथं सुबोधः प्रतिपाद्यप्रतिपादकभावादिः । अथशब्देन चानन्तर्य्यावगमादधिकारी च प्रतिपादित एवेत्यास्तां विस्तरः ॥ * ॥ १ ॥ * ॥

तत्र तावत् साधारणकर्म्मशेषभूताः केचन धर्म्माः परिभाष्यन्ते सौकर्य्यार्थम् । प्रतिपदं खल्वमीषामुत्कीर्त्तनेऽनर्थकमेव ग्रन्थगौरवमापद्येत, श्रोतारश्च वितुद्येरन्निति । परिभाषितव्येषु खलु कर्म्मशेषभूतेषु धर्म्मेषु कृतिसाध्यत्वात् कर्म्मणां कृतिमतः कर्त्तुरेव धर्म्मांस्तावत् परिभाषते ॥

यज्ञोपवीतिनाऽऽचान्तोदकेन कृत्यम् ॥ २ ॥

यज्ञोपवीतं यस्यास्ति सोऽयं यज्ञोपवीती । आचान्तं, 'चमु भक्षणे'—इति स्मरणात् भक्षितं, उदकं जलं येन, सोऽयमाचान्तो-

दकः। श्राशब्दो भवणस्य वैशिष्ट्यं द्योतयति। गृह्याकर्म्माणीति पूर्व्वस्मादिहानुषञ्जनीयमेकत्वेन विपरिणमय्य—कर्मेति। तदयमर्थः। सर्व्वमेव कर्म्म वक्ष्यमाणं, कर्त्रा यज्ञोपवीतिना, श्राचान्तोदकेन च, सता, कृत्यं कर्त्तव्यमित्येतत्। तदत्रैकमेव कर्त्तारमनूद्य द्वयं परिभाष्यते; यज्ञोपवीतिना,—इति, श्राचान्तोदकेन,—इति च। कथं पुनरेकेन वाक्येन द्वयमिह परिभाष्यते? नैष दोषः। वाक्यानेकत्वोपपत्तेः। वाक्यद्वयमिह विज्ञायते, यज्ञोपवीतिना कृत्यमाचान्तोदकेन कृत्यमित्यर्थभेदात्। परमिह युगपदेव धर्म्मद्वयसम्बन्धसम्भवादेकत्वादवबोधस्यैकमिव वाक्यमवभासते इत्येकत्र सूचितमित्यदोषः।

अत्र च "यज्ञोपवीतं कुरुते" इति।

"वैणवीं धारयेत् यष्टिं सोदकञ्च कमण्डलुम्।
यज्ञोपवीतं वेदञ्च शुभे रौक्मे च कुण्डले"॥

इति। "दाक्षायणी ब्रह्मसूत्री" इति चैवमादिशास्त्रान्तरविहितस्य पुरुषार्थस्यैव यज्ञोपवीतस्य कर्म्मार्थतामात्रमनुजानात्याचार्य्यो, न पुनः पुरुषार्थादन्यदिह विदधाति। कस्मादेवमवगम्यते? यज्ञोपवीतान्तरविधाने गौरवात्। यज्ञोपवीतिनेति सिद्धवदुपदेशाच्च। यज्ञोपवीतीति खलु यज्ञोपवीतं यस्यास्ति सिद्धं, सोऽभिधीयते। यथा स्रग्वीति यस्य स्रगस्ति सिद्धा स एवोच्यते, न यस्य सा विधित्सितेति। तदा हि स्रग्वी भवेदित्येवमादिकं प्रयुञ्जते लौकिकाः। न खल्वत्र यज्ञोपवीती भवेदिति, यज्ञोपवीतिना भाव्यमिति वा, कात्यायनवदाकथयदाचार्य्यः। अपि च। न खल्वेत-

दनेन विधीयते; वाक्यभेदप्रसङ्गात्। कथं? अर्थभेदात्। पुरुषस्तावद् यज्ञोपवीती भवेत्, तेन च सता कृत्यमिति,—यदि द्वावप्यर्थौ विधित्सितौ, भिद्येत तर्हि वाक्यम्। अर्थैक्याद्धि वाक्यमेकं मन्यन्ते तान्त्रिकाः, न चैवमर्थैक्यं भवति। भिन्नौ खल्विमावर्थौ भवतः—यज्ञापूर्व्वस्य यज्ञोपवीतस्य विधिः, यस्य तस्य कर्म्मसंयोगः,—इति।

कथमेकस्य यज्ञोपवीतस्योभयार्थता? इति चेन्न, संयोगभेदोपपत्तेः। न स्यादेकस्योभयार्थता; यद्येक एव संयोगः स्यात्। संयोगद्वयन्त्विह दृश्यते। एकस्य यज्ञोपवीतपुरुषसंयोगः—"यज्ञोपवीतं कुरुते" इत्येवमादिशास्त्रेषु। अपरस्य यज्ञोपवीतकर्म्मसंयोगः—"यज्ञोपवीतिना कृत्यम्" इति। तस्मादिह वाक्यद्वयेन संयोगभेदात् दध्नइवोभयार्थता यज्ञोपवीतस्येतिसिद्धम्। अतएव—

"सदोपवीतिना भाव्यं सदा बद्धशिखेन तु।
विशिखोव्युपवीतस्य च यत् करोति न तत् कृतम्"।

इति पूर्व्वार्द्धप्रक्रान्तं पुरुषार्थमेव यज्ञोपवीतमुत्तरार्द्धे कर्म्मार्थमनुजानानः कात्यायन आचार्य्यस्तवमेवाशयं स्पष्टयाञ्चकार। स खलु—

"अथातोगोभिलोक्तानामन्येषामपि कर्म्मणाम्।
अस्पष्टानां विधिं सम्यग् दर्शयिष्ये प्रदीपवत्"।

इति प्रतिज्ञातवान्। अत्राह। उपवीतपदमिदं विशिष्टमेवाभिधत्ते—"उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे" इति। नैतदेवम्। यज्ञसूत्रमात्राभिधायकत्वादस्य। यज्ञसूत्रमात्रमेव खल्वयमुपवीत-

शब्दोऽवगमयति, न विशिष्टमन्यत्। कस्मात्? सङ्कोचकारणानुपलम्भात्। उपवीत पदन्तावत् यज्ञसूत्रमात्रमभिधत्ते, विशिष्टमप्यभिधत्ते, न पुनर्विशिष्टमेव। "कार्पासमुपवीतं स्यात्" इति, "यज्ञोपवीतं कुरुते" इति चैवमादिशास्त्रेभ्यः। यथा मृगपदं—पशुसामान्यमभिधत्ते, पशुविशेषमप्यभिधत्ते। तथाऽत्रापि। तत्रैवं सति विशिष्टमेवावगमयिष्यत्युपवीतपदं न सामान्यमित्येतस्मिन् सङ्कोचे कारणं नास्ति। तस्मादयुक्तमेतत्।

नन्वाचार्य्यपरिभाषैव—"एवं यज्ञोपवीती भवति" इति कारणमिति चेन्न, उपवीतिपरिभाषाऽभावात्। एवं यज्ञोपवीती भवतीति खल्वाचार्य्यः परिबभाषे, न त्वेवमुपवीती भवतीति। अर्थैक्यमनयोरितिचेत्, तथापि न सङ्कोचे प्रमाणं भवति। उपवीतिपदमेवमभिधत्ते इति परिभाषातोऽवगम्यते चेदवगम्यतां नाम। परन्तत एव सङ्कोच इति प्रमाणं नास्ति। कर्म्मार्था खल्वियं परिभाषा—"एवं यज्ञोपवीती भवति" इति, "एवं प्राचीनावीती भवति" इति च। पुरुषार्थञ्चेदमुपवीतं यज्ञसूत्रमात्रम्,—"सदोपवीतिना भाव्यम्"—इति। "यज्ञोपवीतं कुरुते" इति, "दाक्षायणी ब्रह्मसूत्री" इति चैवमादिशास्त्रेभ्यदत्यवोचाम।

अथास्ति यज्ञोपवीतं विन्यासविशेषविशिष्टं पुरुषार्थन्तदिहानूद्यते। उच्यते। नैतदस्ति—विशिष्टं यज्ञोपवीतं पुरुषार्थमिति। कस्मात्? प्रमाणाभावात्। न खल्वस्ति प्रमाणं विशिष्टं यज्ञोपवीतं पुरुषार्थं इति। यज्ञसूत्रमात्रं पुरुषार्थं इत्यवोचाम। अतएव जैमिनिराचार्य्यः—"अपदेशो वा अर्थस्य विद्यमानत्वात्"

इति सूचयाञ्चकार। व्याख्यातञ्चैतदाचार्य्येण शवरस्वामिना— "अपदेश इतिज्ञायमानस्य वचनं। स एष न विधिः— अनुवाद-एषः। कुतः? अर्थस्य विद्यमानत्वात्। प्राप्त एवार्थो यन्निवीतं मनुष्याणां, निवीतं हि मनुष्याः प्रायशः स्वार्थं कुर्व्वन्ति, तस्मात् अनुवादः"— इति। विशिष्टस्य पुरुषार्थत्वे स्वार्थं निवीतं कुर्व्वाणाः प्रत्यवेयुः।

यद्यपि इदं पूर्व्वपक्षकक्षायामेवाशङ्कासूत्रम्, सिद्धान्ते तु निवीतश्रवणस्योपवीतस्तुत्यर्थतामेव सूचयामास— "अर्थवादोवा प्रकरणात्" इति, "विधिना चैकवाक्यत्वात्" इति च। तथापि नैतावता वस्तुनोऽप्यन्यथात्वं शक्यते वक्तुम्। यद्ययमर्थ एव नास्यास्यत्— नाशङ्किष्यताचार्य्योऽर्थस्य विद्यमानत्वादिति। न खल्व-विद्यमानमपि विद्यमानमुच्यते वादकथायामपि। यदि पूर्व्वपक्ष-इतिकृत्वा अविद्यमानमपि विद्यमानं कथाचिन्मत्या समाचचक्षे, किमित्युत्तरकाले न निराचक्रे— "नायमर्थो विद्यमानः, कथमु-च्यतेऽर्थस्य विद्यमानत्वादिति"। आशङ्कायाः खल्वस्या निराकरण-मित्यसूचयदाचार्य्यः— "विधिस्त्वपूर्व्वत्वात् स्यात्" इति। विवृत-ञ्चैतद्भाष्यकारेण— "विधिरेव भवेत्, तथा प्रयोजनवान्, इतरथा वादमात्रमनर्थकं। पूर्व्ववान् अनुवादो भवति, अयन्त्वपूर्व्वो— यन्नियमेन निव्यातव्यमिति"। न खल्वविद्यमानत्वे निवीतस्य, पुरुषार्थत्वे वा विशिष्टस्योपवीतस्य, एतन्निराकरणं सम्भवति— नियमेन निव्यातव्यमिति। तदनेनावगम्यते—यज्ञसूत्रमात्रं पुरु-षार्थेन विन्यासविशेषविशिष्टमिति।

यदि पुनरविद्यमानमपि विद्यमानमित्युक्त्वाऽशङ्क्यिष्यत, तन्निराकरणमित्यमसूत्रयिष्यत— "नाविद्यमाने विद्यमानत्ववचनात्" इति। यथा भगवानक्षपादः— "अर्थापत्तिरप्रमाणमनैकान्तिकत्वात्"-इत्यस्य निराकरणमित्यमसूत्रयत्— "अनर्थापत्तावर्थापत्त्यभिमानात्"-इति। यथा वा "वाक्छलमेवोपचारच्छलं तदविशेषात्"— इत्यस्य, "न तदर्थान्तरभावात्"— इति। जैमिनिरप्याचार्य्यस्तर्कपादे— "उत्पत्तौ वाऽवचनाः स्युरर्थस्यातन्निमित्तत्वात्"— इत्यस्योत्तरमित्यमसूत्रयत्— "तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्"— इति। तस्मात्र विन्यासविशेषविशिष्टं यज्ञोपवीतमत्रोपवीतशब्दार्थः। आचान्तोदकेन कृत्यमित्यत्र भिद्यते वाक्यमिति चेन्नैष दोषः।

"उपस्पृश्य द्विजो नित्यं शुद्धः पूतोभवेन्नरः"—

इति, "त्रिराचामेत्"— इतिचैवमादिशास्त्रविहितस्य पुरुषार्थस्यैवाचमनस्येहानुवादादिति नास्त्यनुपपत्तिः।

अपिच—

"त्रिवृदूर्द्ध्ववृतं कार्य्यं तन्तुत्रयमधोवृतम्।
त्रिवृतञ्चोपवीतं स्यात्तस्यैकोग्रन्थिरिष्यते।
पृष्ठवंशे च नाभ्याञ्च धृतं यद्विन्दते कटिम्।
तद्धार्य्यमुपवीतं स्यान्नातोलम्बं न चोच्छ्रितम्"॥

इत्यभिधाय, "सदोपवीतिना भाव्यम्"— इत्यभिधानात्, यज्ञसूत्रमात्रमेवास्मिन्नुपवीतपदार्थ इत्यवगम्यते। कस्मात्? उपक्रमे यज्ञसूत्रमात्रे उपवीतशब्ददर्शनात्;— त्रिवृतञ्चोपवीतं स्यादिति, तद्धार्य्यमुपवीतं स्यादिति च। अत्र हि त्रिवृतञ्चोपवीतं स्यादिति

स्वरूपमुपवीतस्याभिधाय, तद्वार्य्यमुपवीतं स्यादिति च परिमाणं, सदोपवीतिना भाव्यमिति पुरुषसंयोगमस्य विधत्ते। न खल्वन्यत्र प्राचीनावीतित्वादावन्यत् स्वरूपं परिमाणञ्चास्ति। न चोपवीत-शब्दस्य सामान्यमर्थं परित्यज्य विशेषमर्थं प्रकल्प्य, तदन्यत्र तयो-रेव स्वरूपपरिमाणयोः सांदृष्टिकन्यायेन परिकल्पनायां किञ्चित् प्रयोजनं वैदग्ध्यं वोपलभामहे। येनैष प्रयासः सफलो भवति।

अतएव—सदोपवीतिना भाव्यमिति सदा-श्रुतिरनुगृह्यते। अन्यथा यदा प्राचीनावीतित्वादिना भाव्यते, तदेयं सदा-श्रुति-रुपरुध्येत। न च गोदोहेन चमसस्येव, कलशचमसेन सोमस्येव च, नैमित्तिकेन नित्यस्य वाधो न दोषाय इति वाच्यम्। वैषम्यात्। न खलु चमसादौ सदा-श्रुतिरस्ति इति विषमोदृष्टान्तः। अन्यथा चोपपत्तेः। अन्यथा चात्रोपपद्यते—यज्ञसूत्रमात्रस्योपवीतशब्दार्थ-तया। न खल्वविरुद्धं सामान्यमर्थमुत्सृज्य, विरुद्धं विशिष्टमर्थं प्रकल्प्य वाधः कल्पयितुमुचितः। न खल्वविरोधेन सम्भवति वच-नार्थे विरोधः कल्पयितुं युक्तः।

तस्मात् यथा—"प्रैतु होतुश्चमसः"—इति होत्रा यत्र चम्यते, तेन पात्रेण होमविधानात्—चमने प्राप्ते सोमस्येव चमनं कल्प्यते,—पवित्रस्य सोमस्य भक्षणेन पात्रस्यानुच्छिष्टत्वात्तेन होमश्च सम्पत्स्यते; शास्त्रान्तरञ्च न विरोत्स्यते इति। न तु द्रव्यान्तरस्यापि चमनं प्रकल्प्य वचनवलादुच्छिष्टेनापि पात्रेण होम-इति शास्त्रान्तरस्य वाधः कल्प्यते। एवमिहापि यज्ञसूत्रमात्र-मुपवीतपदार्थः परिगृह्यते,—सदा-श्रुतिः शास्त्रान्तरेण न विरो-

ल्यते इति। शास्त्रे च यज्ञसूत्रमात्रे यज्ञोपवीतपदं बहुशमुप-लभ्यते प्रयुक्तम्। चमसादौ लनायत्या बाधः कल्प्यते। न हि तत्रान्या गतिरस्ति।

सदा बद्धशिखेन इत्यत्रापि शिखायां सत्यां सदा बन्धनं विधीयते इति यत्र शिखाऽप्युच्यते वचनबलात्, न तत्र वैगुण्यम्। विशिखो-व्युपवीतश्च इति शिखाऽभावेऽपि वैगुण्यं दर्शयति इति चेत्। कामं दर्शयतु वैगुण्यं, न तु सदा बद्धशिखेनेति सदा-श्रुतिरूपरुध्यते, सत्यां शिखायां सदा बन्धनसम्बन्धात्। अपिच। नैतत् शिखाऽभावे वैगुण्यं दर्शयति। कस्मात्? वाक्यभेदप्रसङ्गात्। कथं? विहितन्तावत् शिखा-बन्धनं—सदा बद्धशिखेन,—इति। शिखाऽभावेऽपि चेत् वैगुण्यमभि-प्रेयते, शिखाऽपि तर्हि विधातव्येति भिद्येत वाक्यम्। पूर्व्वशेषत्वा-च्चोत्तरस्य। पूर्वार्द्धशेषतया खल्विहोत्तरार्द्धमाम्नायते—पूर्वार्द्धविहितस्य शिखाबन्धनस्य कर्म्मसंयोग इहोच्यते—इति कथं शिखाऽभावेऽपि वैगुण्यमुच्येत। एवं हि उपक्रमोपसंहारयोर्भिन्नार्थतया इयमप्य-नर्थकमापद्येत। तस्मादुपक्रमानुरोधाद्वा उपसंहारोनेतव्यः—उपसंहारानुरोधाद्वा उपक्रम इत्यवश्यं वक्तव्यम्। तत्र च—"मुख्यं वा पूर्व्वं चोदनात् लोकवत्"—इति न्यायादुपक्रम एवानुग्रहीतव्यः, नोपसंहार इति विशिखो विशिखाबन्धन इति लक्षणया कल्प्यते। यथा — "प्रजापतिर्वरुणायाश्वमनयत्" — इत्युपक्रमवशेन — "योऽश्वं प्रतिगृह्णाति"—इत्युपसंहारो नीतः—योऽश्वं प्रतिपादयति—प्रय-च्छतीति। एवमिहापीत्यदोषः।

अपिच। पूर्व्वार्द्धविहितं शिखाबन्धनमुपवीतस्य व्यतिरेक-

निन्दया स्तौतीदमुत्तरार्द्धमिति सुव्यक्तमुपक्रमानुगतत्वमेतस्य। "न हि निन्दा निन्द्यं निन्दितुं प्रयुज्यते, अपितु निन्दितादितरत् प्रशंसितुम्"—इति हि न्यायः। यदि चोपसंहारानुरोधादुपक्रमोऽत्र नीयेत,—बद्धशिखेनेति सशिखेनेत्यर्थः स्यात्। बद्धपदं तर्हि प्रमादपाठः स्यात्। न चैतदुचितम्। अपिचैवमबन्धनेऽप्यवैगुण्यं स्यात्। शिखाबन्धनस्य पुरुषार्थत्वे शिखामात्रस्य कर्म्मार्थत्वेऽप्येवमेव दोषप्रसङ्गः। तस्मादगत्या विशिख इति लक्षणया विशिखाबन्धन इत्यर्थः कल्प्यते। एवमुपक्रमोऽनुगृह्योष्यते इति। लक्षणाऽपि हि लौकिकी।

एतेन, यदुक्तं परिशिष्टप्रकाशकृता—"विशिखइत्यनेन चासत्यामपि शिखायां शिखाबन्धाभावे कर्म्मवैगुण्यं, न तु सत्यामेवेत्युक्त"—इति। तदसङ्गतं वेदितव्यम्। अवश्यञ्च तेनापि शिखाबन्धनस्यैव पुरुषार्थस्य कर्म्मार्थत्वमभ्युपगम्यते, शिखाबन्धाभावे इत्यभिधानात्। न चासत्यां शिखायां पुरुषार्थं बन्धनमस्ति। येन तदनुद्य कर्म्मार्थत्वमस्य विधायिष्यते। अतएव सम्वर्त्तस्मरणम्।

"अकृत्वा पादशौचन्तु तिष्ठन्मुक्तशिखोऽपि वा।
विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत्"।

इति। यदि चानायत्या तत्रोपरुध्येतापि सदावचनं, तर्ह्यन्यत्रापि सम्भवन्त्यामपि गतौ तदुपरोद्धव्यमिति न किञ्चिन्नियामकमस्ति। तस्मान्न किञ्चिदेतत्। अस्यैव च सूत्रस्य खल्वयं परिशेषः—सदोपवीतिना भाव्यम्—इत्येवमादिः। तदनेन कुत एव विशिष्टमभिधीयेत। न खल्वियं परिभाषा दैवकर्म्ममात्रपरा, गृह्याकर्म्ममात्र-

परत्वात्—इति पितृयज्ञादावस्याभावाद्वैगुण्यं वाऽऽपद्येत बाधा वा अवकल्प्येत! तदुभयमप्यनुचितम्। सेयं यज्ञोपवीतश्रुतिर्यज्ञसूत्र-मात्रं परामृशति, "दाक्षायणी ब्रह्मसूत्री" इत्येवमादिशास्त्रेभ्यः। तस्मात्,—"एवं यज्ञोपवीती भवति" इति, "एवं प्राचीनावीती भवति" इति चैवमादिकायां सर्व्वस्यामेवावस्थायां यज्ञोपवीत-मस्यास्तीति यज्ञोपवीती भवति, इत्यनवद्यम्।

"यज्ञोपवीते द्वे धार्य्ये श्रौतस्मार्त्तेषु कर्म्मसु।
तृतीयञ्चोत्तरीयार्थे वस्त्राभावे तदिष्यते"॥

इति च स्मृत्यन्तरं यज्ञसूत्रमात्रस्य कर्म्मार्थतामाह। कस्मात्? श्रौतस्मार्त्तेषु सर्व्वेष्वेव कर्म्मसु यज्ञोपवीतद्वयधारणाभिधानात्। उत्तरार्द्धे च सर्व्वकर्म्मशेषभूतस्योत्तरीयस्य समाम्नानात्। तदिदं यज्ञसूत्रद्वयमुत्तरीयञ्च खल्विह कर्म्ममात्रशेषतया विधित्सितं, विन्यासविशेषस्तु—उत्तरीयस्येव यज्ञसूत्रस्यापि तत्र तत्र तत्तद्वा-क्यादवगन्तव्य इत्यभिप्रायः। अतएव—

"प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा।
पित्र्यमानिधनात् कार्य्यं विधिवद्दर्भपाणिना"॥

इति कर्म्माङ्गतया प्राप्तं यज्ञसूत्रमनूद्य, तदीयविन्यासविशेषस्य प्राचीनावीतित्वस्य विधिरुपपद्यते। अन्यथा विशिष्टस्य यज्ञोप-वीतस्य कर्म्मार्थत्वे तस्य च शास्त्रान्तरबलात् दैवकृत्यमात्रपरतया पित्र्ये कर्म्मण्यपूर्व्वं विन्यासविशेषविशिष्टं यज्ञोपवीतं विधित्सितं भवति—इति भिद्येत वाक्यम्। भिन्नौ खल्विमावर्थौ—यथापूर्व्वं विन्यासविशेषविशिष्टं यज्ञोपवीतं, यज्ञास्य कर्म्मसंयोग इति।

"यज्ञोपवीतं त्रिपुष्करं ब्रह्मसूत्रमित्यर्थः। तदस्यास्तीति यज्ञोपवीती" इति च भट्टभाष्यम्।

यदि पुनः, 'एवं यज्ञोपवीती भवति' इत्याचार्य्यसूत्रादनन्तरत्वेन यज्ञोपवीतिनेत्यनेन तस्यैव परामर्शो न्याय्य इति यज्ञोपवीतिनेत्यस्य यज्ञसूत्रवत्परत्वे विदुषामपरितोषः। तदा परामृश्यतां स एव यज्ञोपवीती यज्ञोपवीतिनेत्यनेन। "पितृयज्ञे त्वेव प्राचीनावीती भवति" इत्येवमादिकन्तु तदपवादकतया प्रवर्त्तिष्यते। तावताऽपि पुरुषार्थं यज्ञोपवीतं यज्ञसूत्रमात्रमेव, पूर्व्वोक्तयुक्तेः। वस्तुतस्तु विन्यासविशेषविशिष्टस्य यज्ञोपवीतस्यात्र परामर्शे कालपरिभाषायामिवात्रापि "यथाऽऽदेशञ्च"—इति पुनः कुर्य्यात्। तदकरणात् प्रतिपाद्यामहे नात्र विन्यासविशेषविशिष्टस्य यज्ञोपवीतस्य परामर्श इति।

किमिदं यज्ञोपवीतं? कथञ्चाचान्तोदको भवति? इत्येतत् सर्व्वमाचार्य्य एवानुपदं व्युत्पादयिष्यति। अत्र चाचार्य्यानुक्ता अन्येऽपि कर्तृधर्म्माः परिशिष्टकृतः कात्यायनस्य वचनादवगन्तव्याः।

"यत्र दिङ्नियमो न स्याज्जपहोमादिकर्म्मसु।
तिस्रस्तत्र दिशो ज्ञेयाः प्राचीसौम्यापराजिताः॥
तिष्ठन्नासीनः प्रह्वोवा नियमो यत्र नेदृशः।
तदासीनेन कर्त्तव्यं न प्रह्वेन न तिष्ठता"॥

इत्येवमादयः। एवमन्येऽप्यनुसन्धेयास्तन्त्रान्तरेषु॥ * ॥ २ ॥ * ॥

इदानीं कर्म्माङ्गानि वक्तव्यानि। तत्रासाधारणत्वादादौ तावत् कालमेव कर्म्मसाधनं परिभाषते।

उदगयने पूर्व्वपक्षे पुण्येऽहनि प्रागावर्त्तनादह्नः कालं विद्यात् ॥ ३ ॥

उत्तरस्यां सवितुरयनसम्बन्धात् उदगयनं प्रसिद्धं ज्योतिःशास्त्रेषु। तस्मिन्नुदगयने। पूर्व्वपक्षे,—

"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि"।

इत्याद्युक्तेः, शुक्लपक्षे। पुण्ये, शोभने विष्ट्यादिदोषरहिते यथोक्ते, अहनि दिवसे। तदनेन रात्रिं नानुजानात्याचार्य्य इत्यवगम्यते। अह्नो वासरस्य, आवर्त्तनात्—छायायाः परिवर्त्तनात् प्राक् पूर्व्वं, पूर्व्वाह्णे इत्येतत्। कालं विद्यात्, जानीयात्। गृह्यकर्म्मणामिति सम्बध्यते। स्मरन्ति च।

"आवर्त्तनात्तु पूर्व्वाह्णोऽपराह्णस्ततः परम्"। इति।

"अश्वत्थं वन्दयेन्नित्यं पूर्व्वाह्णे प्रहरद्वये"।

इति च। न च पूर्व्वाह्ण इत्येव वक्तुमुचितं, अलं ग्रन्थगौरवेणेति वाच्यम्। स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वात्। "पूर्व्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितॄणाम्" इति श्रुत्युक्तत्रिधाविभक्तदिनप्रथमभागात्मकपूर्व्वाह्णव्यवच्छेदकत्वाच्चेति। यत्तु श्राद्धपूर्व्वकत्वात् कर्म्मणः श्राद्धस्य चोदयसन्निधौ प्रतिषेधात्तयाऽभिधानमिति भट्टभाष्यम्। तच्चिन्त्यम्। उदयसन्निधौ श्राद्धप्रतिषेधेऽपि कर्म्मणः कालपरिभाषायां पूर्व्वाह्णाभिधाने बाधकाभावात्। न खलु पूर्व्वाह्णाभिधानं यथोक्ताभिधानं वा तत्र किमपि विलक्षणमुपलभामहे इति धीमद्भिरनुचिन्तनीयम्।

विसमासकरणमेकैकस्यानुगुण्यद्योतनार्थं, समुदितोपलब्धौ महानभ्युदय इति व्याख्यातारः। अतो न कालविशेषनियतेषु गर्भाधानादिष्वनुपपत्तिः। एकैकानुगुण्यस्य तत्रापि सुलभत्वात्। यद्य-थोदगयनादीनां कर्म्माङ्गतैव परमनुज्ञायते, न तु दक्षिणायनादीनाम्तदनङ्गताऽपि, वाक्यभेदप्रसङ्गात्। तथाप्युपनयनादौ दक्षिणायनादेरनङ्गताऽपि प्रत्येतव्या, स्मृत्यन्तरसंवादात्। स्मर्य्यते च—

"रात्रिभागः समाख्यातः स्वरांशोर्दक्षिणायनम्।
व्रतबन्धादिकं तस्माच्चूडाकर्म्म च वर्ज्जयेत्" ॥

इति—

"निषिद्धं निशि च व्रतम्"—इति चैवमादि। ॥*॥ ३ ॥*॥

एवन्तर्ह्युदगयनाद्यभावे शास्त्रवशादप्यनुष्ठीयमानस्य पिण्डपितृयज्ञादेर्वैगुण्यं स्यादित्यत आह।

यथाऽऽदेशञ्च ॥ ४ ॥

आदिश्यते इत्यादेशस्तस्यानतिक्रमाभावोयथादेशम्। यथा चादेशः शास्त्रस्य, तथा च कालं विद्यादित्यनुवर्त्तते। शास्त्रमेव खल्वेवं विधेष्वर्थेषु नः प्रमाणं, यथा चादिशति शास्त्रं तथा च प्रमेयं प्रमिमीमहे, आदिशति च शास्त्रं किञ्चित् कर्म्मोदगयनाद्यभावेऽपीति तत्रानङ्गतैवामीषामङ्गता च यथोक्तानामित्यभिप्रायः। तदिदं "पदार्थान्तरमाकाङ्क्षविशेषमपहाय तदितरच्च सामान्यमन्वेति" इति न्यायमूलमपि सूत्रं सुखप्रतिपिपादयिषया कारुणिक आचार्य्यः प्रणिनाय—शिष्या न मुह्येयुरिति।

अथवा। पुनरपीदं सूचयन्नाचार्य्यो यथादिष्टस्य कालस्य कर्म्म्याद‌रातिशयं दर्शयति। तथाच सत्यामपि "यथा शक्नुयात् तथा कुर्य्यात्" इति श्रुतौ, सत्यपि च "अपि वाऽप्येकदेशे स्यात् प्रधाने ह्यर्थनिर्वृत्तिर्गुणमात्रमितरत्तदर्थत्वात्" इति सिद्धान्ते, नित्यानामपि कर्म्मणामादिष्टकालव्यतिक्रमेण नानुष्ठानम्। अतएव स्मर्य्यते।

"अकाले चेत् कृतं कर्म्म काले तस्य पुनः क्रिया।
कालातीतन्तु यत् कुर्य्यादकृतं तद्विनिर्दिशेत्"॥

इति।

"अङ्गत्वेऽपि च कालस्य न त्यागोऽन्याङ्गवत् कुतः?
अनुपादेयरूपत्वात् काले कर्म्म विधीयते"॥

इति चाभियुक्तानां वचनम्। केषाञ्चित्तु सायंप्रातर्होमादीनामादिष्टेऽपि कालान्तरे प्रायश्चित्तं कृत्वैवानुष्ठानं भवति।

"आ सायमाहुतेः कालात् कालः स्यात् प्रातराहुतेः"।

इति।

"गौणेषु तेषु कालेषु कर्म्म चोदितमारभेत्।
प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत्"॥

इति चैवमादिवचनात्। येषान्तु कालोनाङ्गमपि तु निमित्तमात्रमितिदर्शनम्। तेषामयमपि पक्षोन्यायावगतएव सूत्रेणो च्यते। न खल्वन्तरेण निमित्तं नैमित्तिकानामात्मलाभः सम्भवति। यथादेशञ्चेति वचनात् सामान्यतः परिभाषितानामुदगयनादीनामेकैकानुगुण्येन न कर्त्तव्यान्युपनयनादीनीत्यपि ज्ञायते इत्यनुसन्धेयम्॥ ४॥

कर्म्मकालमभिधायेदानीमनुष्ठेयानि कर्म्माङ्गान्याह द्वाभ्याम्।

सर्व्वाण्येवान्वाहार्य्यवन्ति ॥ ५ ॥

अनु, पश्चादाह्रियते यस्मात् प्रकृतं कर्म इति, अनु, पश्चादाह्रियते यत् प्रस्तुतात् कर्मण इति चान्वाहार्य्यं नान्दीमुखश्राद्धं दक्षिणा चोच्यते। अतएव गृह्यान्तरम्।

"यत् श्राद्धं कर्मणामादौ या चान्ते दक्षिणा भवेत्।
अमावास्यां द्वितीयं यदन्वाहार्य्यं तदुच्यते"।

इति। तदयमर्थः। सर्व्वाण्येव प्रकृतत्वात् "गृह्याकर्म्माणि" इति सम्बध्यते। "सर्व्वाण्येव वक्ष्यमाणानि कर्म्माणि" इति चैकादशीतत्त्वे। अन्वाहार्य्यवन्ति, अन्वाहार्य्यमुक्तं, तद्विद्यते येषां तानीमान्यन्वाहार्य्यवन्ति, भवन्तीति वाक्यशेषः, विद्यादिति वा वर्त्तते। एवशब्दश्चावधारणार्थः। सर्व्वाणि गृह्याकर्म्माण्यन्वाहार्य्यवन्त्येवेत्यवध्रियते। न त्वन्यत्रान्वाहार्य्यं निषिध्यते। अतो गृह्याकर्म्मणामन्यत्रापि तत्र तत्र शास्त्रान्तरात् श्राद्धं दक्षिणा च न विरुध्यते। तथा श्रौतेष्वपि ज्योतिष्टोमादिषु।

अथवा। सर्व्वाण्येव—आधानसायंप्रातर्होमादीनि, न तु कानिचिदेव विवाहप्रभृतीनि—(येषु स्मृत्यन्तरेण साक्षादन्वाहार्य्यं विहितम्)—गृह्याकर्म्माणि इति यथाश्रुत एवार्थः। "अनेकस्याशेषता सर्व्वशब्दार्थः"—इति हि तान्त्रिका मन्यन्ते।

किमर्थमिदम्?—इति चेत्, अनेकस्याशेषताऽवगतये, इति गृहाण। यथा,—"सर्व्वाणि ह वा इमानि भूतान्याकाशादेव

समुत्पद्यन्ते"—इत्यस्यां श्रुतौ इमानीति समाम्नायापि सर्व्वाणी-त्याम्नातम्। यथा वा,—"खादिरपालाशालाभे, विभीतकतिल्वक-बाधकनीवनिम्बराजवृक्षशाल्मल्यरलुदधित्थकोविदारश्लेष्मातकवर्ज्जं सर्व्ववनस्पतीनामिध्मो यथार्थं स्यात्"—इत्यत्र सर्व्ववनस्पतीना-मित्युक्तम्। एवमिहापीत्यदोषः। लेखशैली खल्वियमाचार्य्यस्य। "आर्षेयं वृणीते, एकं वृणीते, द्वौ वृणीते, त्रीन् वृणीते, न चतुरो वृणीते, न पञ्चातिवृणीते," इत्यत्र—न चतुरो वृणीते न पञ्चातिवृणीते, इतिवन्नित्यानुवादो वा भविष्यति—सर्व्वाण्येवेति।

वाक्यगौरवम्?—इति चेन्नाल्पत्वात्। इति चेद्भवान् पश्यति,—सर्व्ववचनेन वाक्यगौरवमापद्यते इति। तदुच्यते। नैष दोषः। अल्पत्वात् वाक्यस्य। यस्मादेवमपि अल्पमेवेदं वाक्यं भवति,—सर्व्वाण्येवान्वाहार्य्यवन्ति—इति। यद्येवं—किमतो भवति? एतदतो भवति,—सर्व्वकर्म्मशेषभूतस्य श्राद्धस्य दक्षिणायाश्चाल्पीयसा सूत्रेणा-भिधानात् परं वाक्यलाघवं मन्यमानः खल्वाचार्य्योऽन्यद्वाक्यलाघव-मनाद्रियमाणः सर्व्वाणीत्याह। यथा भगवानक्षपादः—"अथ तत्-पूर्व्वकमनुमानं त्रिविधं पूर्व्ववत् शेषवत् सामान्यतोदृष्टञ्च" इति, 'तत् त्रिविधम्'—इति सूत्रयाञ्चकार। तदुक्तं भगवता वात्स्यायनेन न्यायभाष्ये—"विभागवचनादेतत् त्रिविधमिति सिद्धे त्रिविधवचनं, महतोमहाविषयस्य न्यायस्य लघीयसा सूत्रेणोप-देशात् परं वाक्यलाघवं मन्यमानस्यान्यस्मिन् वाक्यलाघवेऽना-दरः"—इति। विधुद्देशेनापि स्तूयते इति च नये, सर्व्वशब्दोऽय-मन्वाहार्य्यस्तुत्यर्थोऽपि भवति। कथम्? इत्थं नामेदमन्वाहार्य्यं

यदनेन सर्व्वाण्येव गृह्याकर्म्माणि—महान्त्यपि उपकृतानि भवन्तीति।

सर्व्वशब्दः श्रौतानामप्युपसंग्रहार्थः—इति भट्टभाष्यम्। नैतदेवम्। अथातो गृह्याकर्म्माण्युपदेक्ष्याम इति प्रतिज्ञायैतत्सूत्रणात्। अन्यशास्त्रपरिभाषायाश्चान्यत्रानुपयोगात्। श्रौतसामान्येष्वेव चाविशेषेण प्रसङ्गात्। न च सर्व्वशब्दोऽपि शक्नोति श्रौतमर्थमभिवदितुम्। कस्मात्? "सर्व्वत्वमाधिकारिकम्"—इति सिद्धान्तविरोधात्। गृह्याकृतिः खल्वियमाचार्य्येणारब्धेत्येतच्च प्रस्मर्त्तव्यम्। सोऽयं सर्व्वशब्दः सर्व्वं गृह्याकर्म्मैवावगमयति, न जातुचिदन्यद्वैदिकं लौकिकं वा किञ्चिदिति। अनर्थकं सर्व्ववचनमिति चेत्,—काममनर्थकं भवतु, न तु शक्नोत्यन्यदभिधातुम्। "आम्नायस्यार्थं वक्तुं प्रभवामो नाम्नायं पर्य्यनुयोक्तुम्"—इति हि पदवाक्यप्रमाणकुशलानां समयः। तस्मात्—"पूर्णाहुत्या सर्व्वान् कामानाप्नोति" इति वदाधिकारिकमेव सर्व्ववचनम्।

अपिच। न वयमेतद्विचारयामः—सर्व्ववचनं कर्त्तव्यं, न वा कर्त्तव्यमिति। किन्तर्हि?—कृते सर्व्ववचने किमतः प्रतिपत्तव्यम्;—सर्व्वाणि श्रौतानि, उत, सर्व्वाणि गृह्याकर्म्माण्येवेति। तत्र च सर्व्वाणि गृह्याकर्म्माण्येव—इति व्यवस्थापितम्। अन्यच्च पुरस्तादुक्तम्। न च वाक्यमिदं प्रकरणाद्बलवद्भविष्यति—इति वाच्यम्। यतो न खल्वत्र किमप्यस्ति प्रकरणं यस्माद् वाक्यं बलवद्भविष्यतीति मन्यसे। "कर्त्तव्यस्येतिकर्त्तव्यताऽऽकाङ्क्षस्य वचनं प्रकरणं, प्रारम्भो हि स तस्या वचनक्रियायाः, स एष विध्यादिर्विध्यन्ता-

पेक्षः"—इति खल्वाहुः प्रकरणलक्षणमाचार्य्याः शवरस्वामिनः पूर्व्वस्यां मीमांसायाम्। न चेह किञ्चित् कर्त्तव्यं विहितम्। न चाविहितं नामाकाङ्क्षति काञ्चिदितिकर्त्तव्यताम्! विधौ खल्वियमाकाङ्क्षा भवति। तत्र हि कर्त्तव्यतया चोदनाऽवगम्यते। "यत्र हि कर्त्तव्यतया चोदना—इति गम्यते; तत्र इतिकर्त्तव्यता ऽऽकांक्ष्यते"—इति हि तन्त्रस्थितिः। प्रतिज्ञैव खल्वियमाचार्य्यस्य— "अथातो गृह्याकर्म्माण्युपदेक्ष्यामः"—इति। न च वाक्यमपि साधारणं, सर्व्वस्याधिकारिकत्वादित्यवोचाम।

अपिच। सर्व्वाणीति तावद्विशेषणम्। न चात्र किञ्चिद्विशेष्य-मुच्यते। भवितव्यन्तु तेन। अन्यथा विशेष्यमाकाङ्क्षं खल्विदं वाक्यमपर्य्यवसितमेव स्यात्। तस्मादस्य निराकाङ्क्षप्रतिपत्तये— गृह्याकर्म्माणीत्यनुषज्यते। तदिदं सर्व्वाणि गृह्याकर्म्माणीत्येवं पर्य्य-वस्यति। न खल्वेवं पर्य्यवसितं सद्वाक्यं गृह्याकर्म्मणामन्यद्विषयी-करोति—येन वाक्यमिदं प्रकरणाद्बलवदिति कथमसि! स खल्वय-मस्थान एवोपालम्भो—वाक्यमिदं प्रकरणाद्बलवद्भविष्यति—इति।

आह। व्यवेतत्वान्नास्त्यनुषङ्गो गृह्याकर्म्माणीति। नैतदेवम्। वाक्यस्यास्य साकाङ्क्षत्वात्, वाक्यशेषस्य चान्यस्यानुपलम्भात्, गृह्या-कर्म्माणीत्यस्य च वाक्यशेषीभवितुं योग्यत्वात्। उपक्रमश्चैवमनु-गृहीतो भवति। इतरथाऽत्र सम्भवन्नप्ययमर्थोऽन्यत्रापि नीयेत! कल्पयितव्येऽपि कस्मिंश्चिद्वाक्यशेषे—गृह्याकर्म्माणि इत्येतदेव कल्प-यितुमुचितम्। कस्मात्? उपक्रमानुग्रहात्। "प्रकृतप्रत्ययश्च न्याय्यः"—इति हि तन्त्रयुक्तिः।

अपिच। न खलु व्यवेतमनुषज्यते—गृह्याकर्म्माणीति। कस्मात्? प्रतिसूत्रं तत्सम्बन्धावगमादलुप्तसंस्कारत्वात्। प्रतिसूत्रं खल्वन्वीयते गृह्याकर्म्म, तत्र तत्र यथायथं विपरिणाम एव परं विशेषः। न चैतावता किञ्चित् हीयते। बुद्ध्यारोहमेव खल्वस्माकं गृह्याकर्म्म। तस्मादलुप्तसंस्कारत्वादिहापि तदेव संबन्धुमर्हति। अथातो गृह्या-कर्म्माण्युपदेक्ष्यामः,—इति च प्रतिज्ञानात्। प्रतिज्ञा खल्वियमिद-मर्थैवाचार्य्यस्य— यद् वक्ष्यमाणाः सर्व्वाः परिभाषा गृह्याकर्म्मपरा-भवेयुरिति।

यदि च—भिन्नविभक्तिवचनतया निर्द्देशादनन्तरेष्वपि योगेषु गृह्याकर्म्म नानुषज्येत,—नानुषज्येत चात्रापि व्यवेतत्वात्। तथापि निराकाङ्क्षत्वप्रतिपत्तये वचनानामवश्यमेषु वाक्यशेषः कल्पयितव्यो-भवति,—इति गृह्याकर्म्मैव वाक्यशेषतया कल्पयितुमुचितम्। आचार्य्यप्रतिज्ञानात् खल्वागतमेव हृदयं—तत्,—न युज्यते विना कारणमुत्स्रष्टुम्। कल्पयितव्ये हि कस्मिंश्चित् कस्यचिन्निराकाङ्क्ष प्रतिपत्तये, बुद्ध्यारोहमेव तावत् कल्पयितुमुचितं—तेन चेन्निरा-काङ्क्षं क्रियते। भूतस्योपेक्षानर्हत्वात्। अन्यच्च पुरस्तादुक्तम्।

दृश्यते खल्वाचार्य्याणामेवमपि सम्बन्धोऽनुमतः प्रस्तुतेन पदा-र्थेन सूत्रेषु—“अभ्युपेत्य कालभेदे दोषवचनात्” इति, “अनुवा-दोपपत्तेश्च” इति चैवमादिषु। अतएव व्याख्यातं भगवता वात्स्या-यनेन, “न व्याघातो हवने इत्यनुवर्त्तते”—इति पूर्व्वस्मिन्, “पुन-रुक्तदोषोऽभ्यासे नेतिप्रकृतम्”—इति चोत्तरस्मिन् सूत्रे। “तद-प्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः” “न कर्म्मकर्तृसाधनवैगुण्यात्”

"अभ्युपेत्यकालभेदे दोषवचनात्" "अनुवादोपपत्तेश्च" इति न्याय-चरणानि सूत्राणि । तस्मात् तथा "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं"—इति धर्म्म एवानिमित्तमिति कल्प्यते—"आमनं वा सर्व्वञ्चैवम्भूत" इति च स्वग्रास्तोक एव व्यवतिष्ठते। एवमिहापि सर्व्वाणि गृह्याकर्म्माणि इत्येवार्थः मन्यद्यते ।

न खलु श्रौतानीत्यस्य वाक्यशेषतायां किञ्चित् प्रमाणमस्ति । न खल्वेवं गृह्याकर्म्मस्वन्वाहार्य्यं प्राप्नोति । न चैवमाचार्य्यस्य सम्यग् वादित्वं भवति । स खल्वेवमन्यत् प्रतिजानानोऽन्यथाभिदधानः प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत! न चैवं सति कात्यायनस्य वचनानि—गृह्याकर्म्मविशेषेष्वेव श्राद्धनिषेधकानि—

"नाष्टकासु भवेत् श्राद्धं न श्राद्धे श्राद्धमिष्यते ।
न सोष्यन्तीजातकर्म्मप्रोषितागतकर्म्मसु" ॥

इत्येवमादीन्युपपद्यन्ते । नापि कर्म्मसामान्यमेव वाक्यशेषतया कल्पयितुं शक्यते । कस्मात्? सन्ध्यास्नानदानादिषु, लौकिकेषु चाविशेषेण प्रसङ्गात् ।

तदेवं सिद्धे गृह्याकर्म्मभिः सम्बन्धेऽप्यस्य वाक्यस्य, सर्व्वशब्दश्चेत् श्रौतसंग्रहार्थं कल्पयसि—भेत्स्यसि तर्हि वाक्यम्! —कल्पयिष्यसि चान्यद्विशेष्यं सर्व्वाणीत्यस्य निराकाङ्क्षप्रतिपत्तये । कथम्? गृह्या-कर्म्माण्यन्वाहार्य्यवन्ति,—सर्व्वाणि श्रौतान्यन्वाहार्य्यवन्ति,—इति वचन-व्यक्तिभेदात् । तस्मादस्मदुक्त एवार्थं धीमद्भिर्यत्न आस्थेयः ।

तदिदं श्राद्धं मातृपूजादिपूर्व्वकमेव भवति । कस्मात्?

"अनिष्ट्वा तु पितॄन् श्राद्धैः कर्म्म कुर्य्यान्न वैदिकम्।
तत्रापि मातरः पूर्व्वं पूजनीयाः प्रयत्नतः"।

इत्येवमादिकर्म्मप्रदीपदर्शनात्।

अत्र प्रत्यवस्थीयते। नन्विदमेव कात्यायनवचनं वैदिकेषु श्राद्धं दर्शयति। अत्रोच्यते। यदि नामेदं वचनं वैदिकेषु श्राद्धं दर्शयति, तत् किमस्माकमपचीयते? न खल्ववैदिकानि गृह्याकर्म्माणि आचार्य्यः समुपदिदेश। ननु न ब्रूमोऽवैदिकानि गृह्याकर्म्माण्याचार्य्यः समुपदिदेश—इति। सत्यं वैदिकान्येवैतानि। परमेभ्योऽप्यन्यानि सन्ति वैदिकानि कर्म्माणि। सन्तु नाम, किमतो भविष्यति? यद्येवम्, एतदतो भविष्यति,—सर्व्वशब्दस्य सामान्यार्थतामनेन वचनेन कात्यायनः स्पष्टयाञ्चकार—इति

उच्यते। नैतावता मिषेण वैदिकसामान्यपरता सर्वशब्दस्य शक्यतेऽध्यवसातुम्। कस्मात्? क्रमपरत्वाद्वचनस्य। कात्यायनवचनं खल्विदमनूद्य श्राद्धं, वैदिकञ्च कर्म्म, क्रममनयोर्विधत्ते, न वैदिकेषु श्राद्धम्। कस्मादवगम्यते? साचादेव समाम्नानात्। पितॄन् श्राद्धैरनिष्ट्वा वैदिकं कर्म न कुर्य्यात्—इति श्राद्धं सिद्धवदनूद्य वैदिकञ्च, क्रममात्रमेव साचादिह समाम्नायते। तत्रैवं सति यथाप्राप्तमेवानूद्यते इति न किञ्चिदनुचितम्। अन्यैव वचनव्यक्तिराचार्य्यस्य—सर्वाणि श्राद्धवन्तीति। अन्यैव च वचनव्यक्तिः कात्यायनस्य—श्राद्धैः पितॄनिष्ट्वा वैदिकं कुर्य्यादिति। तदत्र विधीयते श्राद्धमेकस्याम्, अनूद्य च तत्, क्रममात्रमन्यस्याम्। दर्शितञ्चास्माभिरन्यथा वैदिकसामान्येषु श्राद्धप्रसक्तिरिति, तदपि न

प्रस्मर्त्तव्यम्। वैदिकपदस्य साक्षात् श्रुत्युक्तकर्मपरतायामपि प्राचीन-एव दोषः परावर्त्तते इत्यास्तां विस्तरः।

श्राद्धश्चेदं केषुचित् प्रथमप्रयोग एव, केषुचित् प्रतिप्रयोगमेव, केषुचिच्च नैव कर्त्तव्यमित्याचक्षते। तदेतत् सर्व्वं परिशिष्टकृत' कात्यायनस्य वचनादवगन्तव्यम् ॥ ५ ॥ * ॥

अपवर्गेऽभिरूपभोजनं यथाशक्ति ॥ ६ ॥

क्रियायाः परिसमाप्तिरपवर्ग इत्युच्यते। तस्मिन्नपवर्गे। अभि-रूपो विद्वान् कृतबुद्धिरनुष्ठाता चेत्याहुः।

"यत्र विद्या च वित्तञ्च सत्यं धर्म्मः शमो दमः।

अभिरूपः स विज्ञेयः स्वाश्रमे यो व्यवस्थितः" ॥

इति गृह्यासंग्रहोक्तस्तु ग्राह्यः। तदस्याभिरूपस्याभिरूपयोरभि-रूपाणां वा, भोजनमशनं, यथाशक्तिः यथा शक्यते तथैव न पुनर्वित्तशाठ्येनेत्येतत्। कारयितव्यमिति वाक्यशेषः। गृह्याकर्म्मसु विद्यादिति वा सम्बध्यते। यथा शक्यते, तथाऽभिरूपभोजनं गृह्या-कर्म्मणामङ्गं जानीयादिति तत्रार्थः। यथाशक्तीति सूत्रयन्नाचार्य्यः शक्त्यपेक्षयाऽभिरूपभोजनं कर्म्माङ्गमिति दर्शयति। तेन सत्यामपि शक्तौ यत्राभिरूपस्य भोजनं—तत्र वैगुण्यमवगम्यते। स्मरति च भगवान् मनुः,—

"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।

न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम्" ॥

इति ॥ ६ ॥ * ॥

सेयं संक्षेपेणाभिहिता सर्व्वकर्मसाधारणी परिभाषा। इदानीन्तानि कर्माणि वक्तव्यानि। तत्र प्रायेणाग्निसाध्यत्वात् कर्मणामग्न्याधानकालन्तावदाह।

ब्रह्मचारी वेदमधीत्यान्त्यां समिधमभ्याधास्यन् ॥ ७ ॥

ब्रह्म वेदः, तच्चरति प्राप्नोति यथोक्तव्रतादिभिरिति ब्रह्मचारी प्रथमाश्रमीत्याचक्षते। स चोपकुर्व्वाणक एवार्थात्। इतरस्यामरणमेव गुरुकुलावस्थानाभ्यनुज्ञानात्। स खल्वयं ब्रह्मचारी,—

"वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्"।

इति स्मरणात्—वेदान्, वेदौ, वेदं, वा अधीत्य यथावदधिगम्येत्यर्थः। तद्वचानुपादेयतया "ग्रहं सम्मार्ष्टि" इतिवत् सङ्ख्या न विवक्षिता। "सर्व्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम्"—इति सिद्धान्तात्। न खल्वत्र "पशुना यजेत" इत्यादाविव वेदस्याध्ययनं विधित्सितम्, किन्त्वनूदितम्, अनुवादश्च प्राप्तस्यैव भवति,—इति यथाप्राप्तमेवानूद्यते इत्यदोषः। तदयमर्थः। सायम्प्रातर्विहितसमिदाधानो ब्रह्मचारी, वेदमधीत्य ब्रह्मचर्य्यपरिसमाप्तिसमये अन्त्यां—अन्ते अवसाने भवां—पश्चिमाम्,

"आचार्य्येणाभ्यनुज्ञात आचार्य्याग्नौ विधिर्यथा।
प्रणीतेऽग्नौ समिद्दद्यादन्त्या सा ब्रह्मचारिणाम्" ॥

इति गृह्यासंग्रहपरिभाषिताम्। समिधम्,—

"नाङ्गुष्ठादधिका ग्राह्या समित् स्थूलतया क्वचित्।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥

प्रादेशमात्राधिका नोना न तथा स्यादिशाखिका।
न सपर्णा न निर्वीर्य्या होमेषु च विजानता" ॥

इति कर्म्मप्रदीपोक्तलक्षणाम्। अभ्याधास्यन्, आभिमुख्येन प्रातराधास्यन्—अग्नौ प्रक्षेप्स्यन्,—"अग्निसमाधानं कुर्व्वीत"—इति परस्मात् सिंहावलोकितन्यायेन सम्बध्यते। तथा च ब्रह्मचर्य्य-परिसमाप्तिसमये, ब्रह्मचारिणा गृहस्थाश्रमं प्रविविक्षुणा या पश्चिमा समिदाधेया, सा तु,—

"न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम्।
स्वगर्भसंस्क्रियार्थाश्च यावन्नासौ प्रजायते" ॥

इति कर्म्मप्रदीपदर्शनात्,—सत्यप्यन्यस्मिन् होमसाधने पित्रा-चार्य्यसमाहितेऽग्नौ, तदानीमेव वक्ष्यमाणवैश्यकुलादियोनिमन्य-मग्निमाधाय, तस्मिन्नाधातव्या,—इति। सत्यप्यन्यस्मिन्नग्नाविदानी-मन्यस्याग्नेराधानफलन्तूपरिष्टादुपदर्शयिष्यत्याचार्य्यः— "स एवास्य गृह्योऽग्निर्भवति" इति। अत्र च,—

"अनाश्रमी न तिष्ठेत्तु क्षणमेकमपि द्विजः"।

इत्यादिस्मरणात् स एवादधीत—यस्मै पूर्व्वमेव काचित् कन्या केनचिद्वाग्दत्ताऽऽसीदित्येतत् स्पष्टयति कात्यायनः।

"यस्य दत्ता भवेत् कन्या वाचा सत्येन केनचित्।
सोऽन्त्यां समिधमाधास्यन्नादधीतैव नान्यथा" ॥

इति ॥ ७ ॥ * ॥

आधानकालान्तरमाह।

जायाया वा पाणिं जिघृक्षन् ॥ ८ ॥

यस्यामात्मा जायते सेयं पाणिग्रहणादिसंस्कारसंस्कृता नारी जायेत्युच्यते। तस्या जायायाः। भाविनि भूतवदुपचारेण जायाया इत्याह। पाणिं हस्तं, जिघृचन्—यथाविधि ग्रहीतुमिच्छन्नित्येतत्। "अग्निसमाधानं कुर्व्वीत"—इति सम्बध्यते। वाशब्दः पूर्व्वकल्पापेक्षया विकल्पार्थः। तदुक्त "भार्य्यादिरग्निः" इति शास्त्रान्तरदर्शनात् भार्य्यासम्बन्ध एक एव निमित्तमाधानस्य। तस्य च कालद्वयमुक्तं—अभ्याधास्यन्निति, जिघृचन्निति च॥ ८॥ *॥

अत्र चाधानं लक्षणपूर्व्वकं समन्त्रकमग्नेः स्थापनमुच्यते। आङ्पूर्व्वस्य दधातेरारोपणवाचित्वात्। तथा प्रसिद्धेश्च। तत्, किं नाम लक्षणं?—कथञ्चाग्नेः स्थापनम्?—इतीदमिदानीं त्रिभिः सूत्रैराह।—

अनुगुप्ता अप आहृत्य, प्रागुदक्प्रवणं देशꣳसमं वा परिसमूह्योपलिप्य, मध्यतः प्राचीं रेखामुल्लिख्योदीचीञ्च सꣳहतां पश्चात्, मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षेत्॥ ९॥

अनुगुप्ता अनुरक्षिताः—आच्छादिताः, पतितादिभिरदृष्टा इत्येतत्। अप उदकं, आहृत्य—अनिषिद्धजलाशयादानीय, "ताभिः प्रक्षालितपाणिपादवदन आचम्य"—इति भट्टभाष्यम्। प्रागुदक्प्रवणम्—प्राग्वा, उदग्वा, क्रमनिम्नम्, देशं भूमिभागम्। समं, प्रान्नीचादिरहितमित्येतत्। वाशब्दो विकल्पार्थः। तत्फलवादमाह गृह्यासंग्रहः।

"प्राङ्नीचं ब्रह्मवर्चस्यमुदङ्नीचं यशोत्तमम्।
पित्र्यं दक्षिणतो नीचं प्रतिष्ठालम्भकं समम्"।

इति। परिसमूह्य, परि—परितः सर्व्वत इत्यर्थः। समूह्य—"कुशैः समार्ज्जयेद्भूमिम्"—इति दर्शनात्—कुशैः पांश्वादिकं सम्यगुत्सार्य्य, उपलिप्य, "गोमयेन समन्तं पर्य्युपलिम्पति"—इति दर्शनात्—

"भूमेः समूहनं कृत्वा गोमयेनोपलिप्य च"।

इति च गृह्यासंग्रहस्मरणात्, योग्यत्वाच्च, गोमयोदकेनेति वाक्यशेषः। देशमिति सम्बध्यते। मध्यतः,—स्थण्डिलाभ्यन्तरे, दक्षिणांश एव, न तु मध्यांश एवेत्यर्थः। कस्मात्? हस्तमात्रस्थण्डिलेऽप्युदग्गतैकविंशत्यङ्गुलरेखाऽनुरोधात्। सप्तसप्ताङ्गुलान्तरितप्राग्गतरेखात्रयस्योदग्गतरेखाऽनुषक्तस्यानुरोधाच्च। पठन्ति च।

"अङ्गुष्ठमात्रं भूभागं त्यक्त्वा दक्षिणतः सुधीः।
उत्तरे द्व्यङ्गुलं त्यक्त्वा पश्चिमेऽप्यङ्गुलद्वयम्"।

इति।—प्राचीं, प्राग्गतां, रेखां द्वादशाङ्गुलप्रमाणां दक्षिणहस्तेन—कुशेन,—उल्लिख्य। उदीचीञ्च, उदग्गताञ्च रेखामेकविंशत्यङ्गुलप्रमाणामुल्लिख्य।—चकारो रेखामुल्लिख्येत्यनुषङ्गार्थः। तामिमामुदीचीं रेखां विशिनष्टि। संहतां, संलग्नां प्राग्गताया इत्येतत्। पश्चात्, पश्चिमायां। 'मध्ये'—उदग्गतायाः, तत्सम्ना—इति यावत्। 'प्राचीः,—प्राग्गताः, 'तिस्रः' रेखाः प्रादेशप्रमाणाः सप्तसप्ताङ्गुलान्तरिताः—दक्षिणत उपक्रमदर्शनादुत्तरोत्तराः, उल्लिख्येत्यन्वयः। तदाह कात्यायनः।

"लक्षणे प्रागतायास्तु प्रमाणं द्वादशाङ्गुलम् ।
तन्मूललग्ना योदीची तस्या एवं नवोत्तरम् ।
उदग्गतायाः संलग्नाः शेषाः प्रादेशमात्रिकाः ।
सप्तसप्ताङ्गुलांस्त्यक्ता कुशेनैव समुल्लिखेत्" ।

इति । प्रकारान्तरमाह गृह्यासंग्रहः ।

"लक्षणं तत् प्रवक्ष्यामि प्रमाणं दैवतञ्च यत्" ।

इत्युपक्रम्यानतिदूरे,

"प्राक्कृता पार्थिवी रेखा आग्नेयी चाप्युदक् स्मृता ।
प्राजापत्या च ऐन्द्री च सौमी च प्राक्कृता स्मृता ।"

इति । तथा,

"पार्थिवी चैव सौमी च रेखे द्वे द्वादशाङ्गुले ।
एकविंशतिराग्नेयी प्रादेशिन्ये शुभे स्मृते ।
षडङ्गुलान्तराः कार्य्या आग्नेयीसंहितास्तु ताः ।
पार्थिवायास्तु रेखायास्तिस्रस्ता उत्तरोत्तराः ।
पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत् ।
प्राजापत्या भवेत् कृष्णा नीला चैन्द्री प्रकीर्त्तिता ।
श्वेतवर्णा च सौमी स्याद्रेखानां वर्णलक्षणम् ।
एष लेखविधिः प्रोक्तो गृह्यकर्म्मसु सर्व्वसु ।
सूक्ष्मास्ता ऋजवः कार्य्या लेखास्ताः सुसमाहिताः ।
एतानि तत्त्वतो ज्ञात्वा गृह्यकर्म्माणि कारयेत्" ।

इति । तदनयोः प्रकारयोर्व्विकल्पः । द्वयोरेव स्मृशास्त्रोक्तत्वात् । रेखादैवतवर्णयोर्गृह्यासंग्रहोक्तप्रकार एवाभिनवेशस्तत्रैव तदभि-

धानात्। न कात्यायनोक्तकल्पेऽपि, प्रमाणाभावात्। न चैवं मन्तव्यं, गृह्यकर्म्मणि गृह्यासंग्रहोक्तः प्रकारोऽन्यत्र तु कर्म्मप्रदीपोक्तः,—इति। गृह्यकर्म्मण्येव लक्षणोपदेशादुभयत्र तस्यैव स्पष्टीकरणाच्च। तस्मादिकल्प एवानयोरादरणीयः। यद्यपि श्राधान एव लक्षणमुपदिष्टमाचार्य्येण तदेव च स्पष्टीकृतं कात्यायनेन, तथापि "लक्षणावृदेषा सर्व्वत्र"—इत्यनुपदमेवाचार्य्येण सर्व्वत्र तदतिदिष्टमिति यथोक्त एवार्थः।

अत्र चाङ्गुलिमानादिकं यजमानस्येत्याह कर्म्मप्रदीपः।

"मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि।
मानकृत् यजमानः स्याद् विदुषामेष निर्णयः"।

इति। एतच्च रेखोल्लेखनम्,—यावदग्निस्थापनं सव्यहस्तं भूमौ निधाय कर्त्तव्यमित्याह गृह्यासंग्रहः।

"सव्यं भूमौ प्रतिष्ठाप्य प्रोल्लिखेद्दक्षिणेन तु।
तावन्नोत्थापयेत् पाणिं यावदग्निं निधापयेत्"।

इति। तदेवं यथोक्ता रेखा उल्लिख्य,—

"उत्करं गृह्य रेखाभ्योऽरत्निमात्रे निधापयेत्।
द्वारमेतत् पदार्थानां प्रागुदीच्यां दिशि स्मृतम्"।

इति गृह्यासंग्रहवचनात्;—रेखाभ्योमृदमुत्कीर्णामुद्धृत्य प्रागुदीच्यां दिश्यरत्निमात्रे निधाय, 'अभ्युक्षेत्'—"उक्षसेचने" इति स्मरणादाभिमुख्येन—

"उत्तानेनैव हस्तेन प्रोक्षणं समुदाहृतम्।
न्यञ्चताऽभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं मतम्"।

इति स्मृत्यन्तरोक्तप्रकारेण, सिञ्चेदद्भिरिति सामर्थ्यात्, यथोक्ता-रेखा इत्यर्थः।

अथैवमुल्लेखात् परत उत्करग्रहणतन्निधापनकरणे उल्लिख्या-भ्युक्षेदिति श्रूयमाणमानन्तर्य्यमतिक्रम्यते। शास्त्रं खल्विदम्—उल्लि-ख्याभ्युक्षेत्—इति। न च शास्त्रं नामातिक्रमितव्यम्। नैष दोषः। आनन्तर्य्यश्रवणाभावात्। न खल्वानन्तर्य्यमिहोल्लेखाभ्युक्षणयोः श्रूयते—किन्तर्हि?—पूर्व्वापरीभावमात्रम्। कस्मात्? उल्लिख्याभ्युक्षेदिति क्त्वाश्रवणात्। पूर्व्वकालतायां हि क्त्वाप्रत्ययं स्मरन्ति शाब्दिकाः—"एककर्त्तृकयोः पूर्व्वकाले क्त्वा"—इति, न त्वानन्तर्य्ये। न खल्वेवम-प्युल्लेखस्य पूर्व्वकालतायामस्ति कश्चिद्विवादः। येनोल्लिख्याभ्युक्षेदिति क्त्वाश्रवणमतिक्रम्येत। यथा खल्वधीत्य वेदमधीत्य च विचारशास्त्रं स्नातोऽपि, नातिक्रामति—"वेदमधीत्य स्नायात्"—इति शास्त्रं, तथेहापीत्यदोषः। अतएव—"वेदमधीत्य स्नायादिति शास्त्रमध्य-यनसमावर्त्तनयोः पूर्व्वापरीभावसमानकर्त्तृकत्वे एवाचष्टे, न त्वानन्त-र्य्यम्"—इति माधवाचार्य्याः।

अपिच। वाक्यबलात् खल्वत्र मृदुद्धरणादिकं क्रियते, क्रम-स्त्वाश्रित्य प्रत्यवतिष्ठते भवान्। तच्चैतदनुचितम्। दुर्ब्बलो हि क्रमः—बलवत्तरञ्च वाक्यम्। तदुक्तम्। "श्रुतिलिङ्गवाक्यप्रकरण-स्थानसमाख्यानां समवाये पारदौर्ब्बल्यमर्थविप्रकर्षात्"—इति। तस्माद्वाक्यानुरोधात् क्रमं बाधेमहि—न क्रमानुरोधात् वाक्यम्। अपिच। मृदुद्धरणादिकं पदार्थः, क्रमस्तु पदार्थानामुपकारको गुणः। न खलु गुणानुरोधेन पदार्थ एव न कर्त्तव्यो भवतीति युक्तम्!

प्राप्तानां पदार्थानां उत्तरकालं हि क्रमश्चापतति। यदा च पदार्थः प्राप्नोति, तदाक्रम एव नास्ति। न खलु पूर्व्वसिद्धः पदार्थः पश्चिमसिद्धेन क्रमेण विरोधादकर्त्तव्यो भवति।

नन्वाचार्य्यानुक्तमपि मृदुद्धरणादिकं कथमस्माकमप्यभिधीयते—(यतोऽयं विचारः—श्रवणमतिक्रम्यते वा, न वा अतिक्रम्यते इति।)—परोक्तत्वात्। अक्रियैव खल्वियमुच्यते। तदाह कात्यायनः।—

"अक्रिया त्रिविधा प्रोक्ता मुनिभिः कर्म्मकारिणाम्।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया।
स्वशाखाश्रयमुत्सृज्य परशाखाश्रयन्तु यः।
कर्त्तुमिच्छति दुर्म्मेधा मोघं तत्तस्य चेष्टितम्"।

इति। उच्यते। नेदं मृदुद्धरणादिकं परोक्तमाश्रीयते। किन्त्वाचार्य्यपुत्रेणोक्तमित्यनुष्ठीयते। न खलु स्वशाखायां ग्रन्थान्तरोक्तं परोक्तं भवति। आचार्य्योक्तं लक्षणं ह्याचार्य्यपुत्रेण व्याख्यातमिति केयमस्थाने परोक्तत्वाशङ्का।

अन्ये तु मन्यन्ते। शाखान्तराधिकरणन्यायेनैकमेवेदं कर्म्म। अतएव जैमिनिराचार्य्यस्तस्मिन्नेवाधिकरणे—"एकं वा संयोगरूपचोदनाऽऽख्याऽविशेषात्"—इति सिद्धान्तयाञ्चकार। एकत्वे च कर्म्मणोयत्र क्वचित् किञ्चिदङ्गमामनन्ति, अन्यत्रापि तदुपसंहर्त्तुमुचितम्। किमन्यत् कुर्य्यादियं चिन्ता—ऋते गुणोपसंहारात्? फलञ्चेदमेवाभिहितमस्याश्चिन्ताया भगवता भाष्यकारेणाचार्य्येण च भङ्ग्यन्तरेण। वादरायणस्त्वाचार्य्योऽस्येदमेव प्रयोजनं साक्षादसूचयत् शारीरके। "उपसंहारोऽर्थाभेदात् विधिशेषवत् समाने च"—इति। अतएव स्मरति भगवान् कात्यायनोऽपि।

"यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च।

विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्म्मवत्"।

इति। या पुनरुपदर्शिता पुरस्तात् परोक्तनिन्दा—'परोक्ता च'—इति। सा खलु, विरोधिनीमनाकाङ्क्षिताञ्च परोक्तां क्रियां निन्दतीत्यवगम्यते। कस्मात्? 'स्वशाखाश्रयमुत्सृज्य'—इति, 'परोक्तमविरोधि च'—इति च समाम्नानात्,—इति।

वस्तुतस्तु गृह्योक्तप्रयोगे पारशाखिकगुणो नोपसंहर्त्तव्यः। प्रयोगशास्त्रं खल्वेतद्गृह्यशास्त्रम्। तत्रापि परोक्तगुणोपसंहारे प्रयोगवैरूप्यापत्तेः प्रयोगशास्त्रत्वमेवास्य हीयते। तथाच श्राद्धभाष्ये गृह्यपरिशिष्टम्।

प्रयोगशास्त्रं गृह्यादि न समुच्चीयते परैः।

प्रयोगशास्त्रताहानेरनारम्भविधानतः।

बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म्म प्रकीर्त्तितम्।

तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतोभवेत्"।

इति। तदनेन गृह्यादि प्रयोगशास्त्रमनारम्भविधानतः परैर्न समुच्चीयते इत्युक्तम्। तथाचाहुः।

"प्रयोगः सूत्रकारोक्तो न समुच्चयमर्हति।

समुच्चये यतस्तस्य न निष्पत्तिर्न च क्रमः"।

इति। तदनेन स्वगृह्ये यदुच्यते, तदल्पं वा भवतु बहु वा भवतु, तावदेव कर्त्तव्यं न तत्र परोक्तगुणोपसंहारः कर्त्तव्य इत्युक्तम्। यत् पुनः स्वशाखायां नैवाम्नायते, तदेव त्वपेचितं परोक्तं करणीयमिति, "यन्नाम्नातं स्वशाखायां"—इत्यादिनोक्तं कात्यायनेन। छन्दोगशाखायां खल्वग्निहोत्रं नाम्नायते, किन्तु छन्दोगैरप्यध्वर्यु-

शाखापठितं तदनुष्ठीयते। स्वशाखोक्तस्य प्रयोगस्यान्तराऽन्तरा परोक्तस्य कस्यचित् कस्यचित् पदार्थस्याभिनिवेशस्त्वयुक्तएव। तदेतत् गृह्यासंग्रहभाष्ये निपुणतरमुपपादयिष्यते ॥९॥०॥

लक्षणावृद्देषा सर्व्वत्र ॥१०॥

परिसमूहनाद्यभ्युक्षणान्तं कर्म्म लक्षणमुच्यते। तस्य स्वस्य लक्षणस्य, आवृत्परिपाटी, एषा अनन्तरोक्ता न तु विपरीता, सर्वत्र यत्र यत्राग्निः प्रणीयते तत्र तत्रेत्यर्थः।

अत्र यद्यपि 'प्रागुदक्प्रवणं देशं समं वा परिसमूह्य'—इति श्रुत्या लक्षणमिदं साक्षाद्भूमेरुपकारकं, तथापि भूसंस्कारद्वारेव प्रणाड्या अग्न्याधानस्याप्युपकारकं प्रकरणादित्यवगन्तव्यम्। 'अग्निसमाधानं कुर्व्वीत'—इति हि प्रकरणम्। यथा व्रीहीनवहन्तीत्यवघातस्य द्वितीयाश्रुत्या साक्षाद्व्रीह्युपकारकत्वेऽपि, प्रणाड्या क्रतूपकारकत्वमपि प्रकरणादिष्यते, तथाऽत्रापि द्रष्टव्यम्। वाक्येन वा लक्षणमग्निप्रणयनाङ्गं भवति। 'लक्षणावृद्देषा सर्व्वत्र'—इति सूक्तम्। वक्ष्यति च। "भूर्भुवःस्वरित्यभिमुखमग्निं प्रणयन्ति",—इति। अतएव तत्र तत्राग्निप्रणयने लक्षणं वक्ष्यत्याचार्य्यः—'उत्तरार्द्धे परिवृतस्य लक्षणं कृत्वाऽग्निं प्रणयन्ति'—इति। 'पूर्व्वस्याः कर्ष्वाः पुरस्ताल्लक्षणं कृत्वाऽग्निं प्रणयन्ति'—इति च।

तदिदं लक्षणमाधानाङ्गमग्निप्रणयनाङ्गं वा भूमिसंस्कारद्वारेति संस्कृतायामपि भूमावाधानाद्यङ्गतया प्राप्तं लक्षणं कर्त्तव्यमेव। न चावघातस्य कृष्णलद्व, संस्कृते देशे लक्षणस्य बाध एव, द्वारबाधादिति वाच्यम्। शास्त्रार्थावधारणवेलायां प्रयोजनवत्त्वाल्लक्षणस्य,

इदानीमनुष्ठानवेलायामेव हि कचित् प्रयोजनाभावोऽवगम्यते। कृष्णले त्ववघातस्य शास्त्रार्थावधारणवेलायामेव प्रयोजनभावनिश्चय-इति वैषम्यात्। तथा ह्युक्तमभियुक्तैः। 'शास्त्रार्थावधारणवेलायां यत्र प्रयोजनाभावनिश्चयस्तत्रैव तदुपादानादिलोपः शास्त्रार्थः। यथा कृष्णले अवघातादिलोपः। यत्र त्वनुष्ठानवेलायामेवालस्यादिना पुरुषदोषेण प्रयोजनाभावो ज्ञायते, तत्र प्राक् प्रापितः पदार्थो-नियमापूर्व्वमाचार्यैरनुष्ठेय एव'—इति। याज्ञिकाश्च खल्वनुष्ठानवेला-यामालस्यादिदोषवशाद्व्रीह्यादिस्थाने गृहीतमपि तण्डुलाद्यवघ्नन्ति वितुषीकृतमपि। विहिताविहितत्वसन्देहे च विहिताकरणाद-विहितकरणमेव न्याय्यमित्याचक्षते।

यत्र त्वाहित एवाग्निर्नीयतेऽन्यस्मिन् प्रदेशे, कारणवशात्, तत्र यद्यपि निष्पन्नत्वादाधानस्य तदङ्गं लक्षणमपि न युज्यते कर्त्तुम्, तथापि प्रदेशस्य तस्य संस्कारार्थं तत्रापि लक्षणं कर्त्तव्यमेव। स्थापनमात्रस्य तत्राप्यविशेषाच्च। 'लक्षणावृदेषा सर्वत्र' इति ह्यनु-शासनम्। 'लक्षणं कृत्वाऽग्निं प्रणयन्ति'—इति च दर्शनम्। तत्त्व-कृद्भिरपि,—"यद्यग्निस्थापनानन्तरं कर्मकाले वृष्ट्यादिशङ्कया संस्कृता-ग्निरन्यत्र नीयते तदा पुनर्भूसंस्कारः कर्त्तव्यः"—इत्युक्तम्।

न तु लक्षणमग्नेरपि संस्कारः, प्रमाणाभावात्। न खल्वस्ति किञ्चित् प्रमाणमग्नेरपि संस्कारो लक्षणमिति। शब्दप्रमाणकः खल्वयमर्थोऽयं कर्त्तव्योऽयञ्च न कर्त्तव्य—इति, अयमस्योपकरोति नास्य—इति चैवमादिः। न खल्वस्ति कश्चिच्छब्दो लक्षणमग्नेरुप-करोतीति। श्रुत्या तावल्लक्षणं भूमेरुपकारकं, प्रकरणाच्चाङ्गमाध-

नस्य, वाक्याद्वा प्रणयनस्येत्यवोचाम। न खल्वग्निना लक्षणस्य सम्बन्धोऽस्ति। 'लक्षणं कृत्वाऽग्निं प्रणयन्ति'—इत्यादौ हि श्रुत्या प्रणयनेनाग्नेः सम्बन्धोऽवगम्यते, वाक्येन च लक्षणकरणस्य। न तु लक्षणाग्न्योरन्वयोऽस्ति।

"जातस्य लक्षणं कृत्वा तं प्रणीय समिध्य च"।

इति कर्मप्रदीपेऽपि जातस्येति व्यत्ययात् षष्ठी द्रष्टव्या। जाते सतीत्यर्थः। "मन्थेदग्निं निकामतः"—इति ह्यभिधाय 'जातस्य लक्षणं कृत्वा'—इत्यभिहितवान् कात्यायनः। न हि लक्षणेन समं जातस्य सम्बन्धोऽस्तीत्यवोचाम। न खलु 'जातस्य लक्षणं कृत्वा'—इति विधीयते, किन्त्वनूद्यते। न चाप्राप्तं किञ्चिदनूद्यते। विधीयते इति चेन्न वाक्यभेदप्रसङ्गात्। विधानपक्षे खल्वनूद्य लक्षणं जातसम्बन्धस्तस्य विधातव्यः, कृत्वेति च क्रम इति भिद्येत वाक्यम्। तस्मात् क्रमविधिरेवायं—'जातस्य लक्षणं कृत्वा'—इत्येवमादिः। परम्परया वा जातसम्बन्धो लक्षणस्य वर्णनीय इति न किञ्चिदनुचितम्।

ननु "समूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्येदेष संस्कारोऽनुगतेऽग्नौ भूयः",—इति ग्रन्थान्तरे संस्कृताया अपि भूमेः पुनः संस्कारविधानादग्निसंस्कारो लक्षणमिति चेन्न, 'अनुगतेऽग्नौ संस्कारो भूयः'—इत्यभिधानात्। सोऽयमग्नौ स्थापयितव्ये संस्कारो भूमेर्न त्वग्नेरेव। शब्दप्रमाणकः खल्वयमर्थः—इत्यवोचाम। न च संस्कृतायामपि भूमावग्निप्रणयनाङ्गं लक्षणमनुचितं भवतीति ध्येयम्।

अथानुगतो विनष्टः—इत्यनर्थान्तरम्। अस्त्वेतत्, किमतो भविष्यति? एतदतो भविष्यति:—स्थापितेऽग्नौ विनष्टे पुनरपि लक्षणं कृत्वा

तत्रैवान्योऽग्निः स्थापनीयः—इति। किमतोऽपि भवति? एतदतो-भवति। यदि नामाग्निर्नष्टो न तावता संस्कृताऽपि भूमिरसंस्कृता भवितुमर्हति। येन भूयः संस्कारोऽर्थवान्। आम्नायते च संस्कारः। तस्मादनुमीयते,—अग्नेरेवैष संस्कारः—इति। उच्यते। नैतदस्ति—अग्नेरेवैष संस्कारः—इति। कस्मात्? प्रमाणाभावात्। न ह्यस्ति प्रमाणम्—अग्नेरेष संस्कारः—इति। नन्वेवमनुमीयते इत्युक्तम्। सत्यमुक्तम्। प्रमाणन्तु तत्र किमिति पृच्छामः।

पुनर्व्वचनमिति चेन्नाविशेषात्। इति चेद्भवान् पश्यति:—पुनर्व्वचनमेव प्रमाणमग्निसंस्कारोलक्षणमित्यत्र। अन्यथा ह्येतद-मनर्थकं स्यादिति। तत्रोच्यते। नैतदस्ति—पुनर्व्वचनमग्निसंस्कारो-लक्षणमित्यस्मिन्नर्थे प्रमाणमिति। कस्मात्? अविशेषात्। विशेषा-भावादित्यर्थः। किमनेनोक्तं भवति? एतदनेनोक्तं भवति,—भवेदपि पुनर्व्वचनं प्रमाणं नाम; यदि पुनरुच्यमानस्यास्य काचिदन्या वचनव्यक्तिः सम्भवेत्। न तु सम्भवति। कस्मात्? अविशेषादेव। यद्विधा वचनव्यक्तिरस्याम्न्यर्थतायां प्रमाणम्, तद्विधा ह्यत्रेह वचनव्यक्तिर्नास्ति। सकृदुच्चरितेऽप्यस्य यावानर्थः, शतकृत्वोऽप्युच्चारणे तावानेवार्थः प्रतीयते, न ततोऽधिक इति। तदेवमत्यल्पमिदमुच्यते—पुनर्व्वचनम्—इति। पुनः पुनरपि वचनं नैतदवगमयितुमर्हति। तस्माद् भूमेरेवैष संस्कारः पुनराम्नायते नाग्नेरित्यवगम्यते। भूयः संस्कारवचनञ्चैवमाञ्जस्येनोपपत्स्यते इति। कथं नाम? भूयः पुन-रिति ह्येकोऽर्थः। तदनेनावगम्यते,—यत् किल पूर्वं संस्कृतं तदेव पुनरपि संस्क्रियते इति। अथेदानीमग्निः संस्क्रियते? तर्हि पूर्वं

भूमिरिदानीन्त्वग्निः संस्क्रियते इति विषयभेदात् भूयोवचनम-समञ्जसमापद्येत। न चैतदुचितम् ।

अथापि स्यात्—अस्मादेव कारणात् पूर्व्वमप्यग्निरनेन संस्कृत-इत्यनुमास्यामहे। ततो नैष दोषो भविष्यति—इति। अत्रोच्यते। नाविमोक्षात् । न खल्वेवमपि दोषाद्विमोक्षः सम्भवति । कस्मात्? अन्यत्वाविशेषात्। पूर्व्वमन्योऽग्निरिदानीन्त्वान्योऽग्निः संस्क्रियते—इत्यभ्युपगच्छतोऽपि अन्यत्वाविशेषात् स एव दोषोऽनुवर्त्तते—इत्य-विमोक्षो दोषादित्यर्थः। इतश्च। अप्रमाणत्वात्। न खल्वेवमनुमाने किञ्चिदपि प्रमाणमुपलभ्यते। सेयमप्रामाणिकी पुरुषबुद्ध्युत्प्रेक्षा-मूला कल्पना प्रेक्षावतामनपेक्षणीया भवति। अन्यथा चोपपत्तेः। भवेदपि कदाचिदियं कल्पना; यदि नामान्यथा शास्त्रमिदं नोप-पद्येत, न तु नोपपद्यते। अन्यथा खल्वस्मदुक्तरीत्या शास्त्रमर्थवत् कथमप्रमाणमनुमानमनुगृह्णातीति शक्यमध्यवसातुम्। प्रमाणविरो-धाच्च। प्रमाणेन च खल्वेषा कल्पना विरुध्यते। श्रुत्या तावल्लक्षणं भूमेरुपकारकं, प्रकरणादाऽऽधानस्य, वाक्याद्वा प्रणयनस्येत्यवोचाम। तदिदमागमबाधितमनुमानमप्रमाणमित्यनादरणीयम् ।

संस्कृताया भूमेः पुनः संस्कारोऽनर्थकः?—इति चेत्—काम-मनर्थको भवतु। नैवान्या वचनव्यक्तिः सम्भवति। अपि च। असंस्कृताया अपि भूमेः संस्कारे कमर्थं भवान् पश्यति? न खल्वत्रापि लक्षणेन भूमेर्दृष्टः कश्चिदुपकारः क्रियते। वचनबलाद-दृष्टमत्र किञ्चिदनुमास्यामहे?—इति चेद्वयमपि वचनबलादेवादृष्टं किञ्चिदनुमास्यामहे। वचनबलात् खल्वेवं कुर्व्वाणाः किमित्युपा-

लभेमहि—किमिति क्रियते ?—इति। तस्मात् स्वतः शुद्धप्रदेशे गङ्गापुलिनादाविवाचापि वचनबलादेव लक्षणं कर्त्तव्यम्। तस्माद् विनष्टेऽग्नौ पुनरन्यस्याग्नेः प्रणयनाङ्गतया प्राप्तं लक्षणं संस्कृतायामपि भूमौ कर्त्तव्यमिति न किञ्चिदनुचितम्। दर्शितश्चास्माभिः,— लक्षणेन सममग्नेः सम्बन्धो नास्ति, अस्ति च प्रणयनस्येति। "तस्मादग्न्यर्थाः परिसमूहनादयः"—इति कर्कभाष्यमप्रमाणम्। "परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय"—इति वचनादरमग्निसमाधानार्था भवन्तु परिसमूहनादयः, न जातुचिदग्न्यर्थाभवितुमर्हन्ति।

प्रणाड्या लक्षणमग्न्यर्थमुच्यते चेदुच्यतां नाम। लक्षणं खल्वेतत् श्रुत्या भूमेः प्रकरणादाधानस्य वाक्याद्वा प्रणयनस्योपकरोतीत्यवोचाम। प्रणयनमाधानञ्च द्वयमपि श्रुत्याऽग्नेरुपकरोतीति पारम्पर्य्येणाग्न्यर्थतायां न विवादः। तदनेन प्रबन्धेनैतदप्यवगम्यते,—यदि स्वस्थानस्थित एवाग्नौ किञ्चित् हूयते, न तत्र लक्षणं कर्त्तव्यमिति। भट्टनारायणस्त्वाह—"यत्र यत्राग्निप्रणयनं क्रियते, तत्र तत्र भुवः संस्कारविधानात् भूसंस्कारः। अनुगतेऽग्नौ संस्कृताया अपि भूमेः पुनः संस्कारविधानात् अग्निसंस्कार इति। तथाच गृह्यान्तरम्। "समुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्येदेष संस्कारोऽनुगतेऽग्नौ भूयः— इति। तस्मादुभयसंस्कारः इति सिद्धम्" इति ॥ १० ॥ * ॥

भूर्भुवः स्वरित्यभिमुखमग्निं प्रणयन्ति ॥ ११ ॥

"शुभं पात्रन्तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः।

तस्याभावे शरावेण नवेनाभिमुखस्य तम"।

इति गृह्यासंग्रहवचनात् वक्ष्यमाणयोनिमग्निं कांस्यादिपात्रस्थं कृत्वा, 'अभिमुखं' यथा भवत्यात्मन इत्यर्थात्, तथा, भूर्भुवः स्वरित्यनेन मन्त्रेण 'प्रणयन्ति' स्थापयन्ति रेखोपरीत्यर्थः। यत्पुनः—

"शरावे भिन्नपात्रे वा कपाले वोल्मुकेऽपि वा।

नाग्निप्रणयनं कुर्य्याद्व्याधिहानिभयावहम्"।

इति स्मृत्यन्तरम्। तदुदाहृतगृह्यासंग्रहवचनविरोधात् राणायनीयकौथुमादिव्यतिरिक्तविषयम्। कांस्यादिपात्रसद्भावे शरावनिषेधकमिति राघवभट्टप्रभृतयः। ११॥

लक्षणादिकमभिधायाथेदानीमन्याग्न्याधानकालानुपदिशति त्रिभिः सूत्रैः—

प्रेते वा गृहपतौ परमेष्ठिकरणम् ॥ १२॥

प्रेते इति कर्त्तरि निष्ठा। प्रकर्षेण इते गते—अस्माल्लोकादित्यर्थात्। मृत इत्येतत्। वाशब्दादेकोऽन्यकोऽयमाधानकाल इति दर्शयति। गृहपतौ गृहस्वामिनि। तथाच गौतमः। "भार्य्यादिरग्निर्दायादिर्वा"—इति। "दायायकाल एकेषाम्"—इति च गृह्यान्तरम्। परेते खलु गृहस्वामिनि दायसम्बन्धः पुत्राणामिष्यते। अतएव स्मर्य्यते।

"ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्।

भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः"।

इति।

"पितर्य्युपरते पुत्रा विभजेयुर्धनं पितुः ।
अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते" ।

इति चैवमादि। कर्कोपाध्यायास्त्वाहुः—'अवस्थितेऽयं विकल्पः, अभ्रातृकस्य दारकालः, भ्रातृमतो दायायकालः'—इति । तेषामयमाशयः। विभागमन्तरेण साधारणधनस्य परित्यागासम्भवादनधिकार एवाविभक्तानां धनसाध्येष्वाधानादिषु। अतो भ्रातृमतो-विभागकाल एवाधिकारः। स एव कालो दायायकाल इत्युच्यते—इति। आचार्य्यस्तु 'प्रेते वा गृहपतौ'-इतिसूत्रयन्नेतदनुजानातीत्यवगम्यते। न चाविभक्तधनस्य कथं परित्यागसम्भव इति वाच्यं, स्वत्वस्य तथाप्यविशेषात्। निर्दोषे पितरि स्थिते पुत्राणामस्वाम्यम्—इति स्मरन्मुनिः परेते पितरि स्वाम्यमेषामनुमन्यते । नारदोऽपि स्मरति।—

"यद्येकजाता बहवः पृथग्धर्म्माः पृथक्क्रियाः ।
पृथक्कर्म्मगुणोपेता न चेत् कार्य्येषु सम्मताः ।
स्वभागानथ दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्य्युर्यथेष्टं तत् सर्व्वमीशास्ते स्वधनस्य वै" ।

इति। परेते पितरि दायसम्बन्धात् स एव कालो दायायकाल इत्युच्यते इति न किञ्चिदनुचितम्। आचार्य्यपुत्रोऽप्यस्मा-ह्लेदेनैव विभागकालस्याधानकालत्वमाह। तथाच गृह्यासंग्रहः।

"आधानस्य तु चत्वार उक्ताः कालाः पृथक् पृथक् ।
अन्त्या समिद्विवाहश्च विभागः परमेष्ठिनः" ।

इति। परमेष्ठिन इत्यनेनैतत्सूत्रोक्त आधानकालोऽभिहितः।

तदेवं प्रेते गृहपतौ, 'परमेष्ठिकरणम्' परमे श्रेष्ठे स्थाने तिष्ठतीति परमेष्ठी अग्निरित्याचक्षते। तस्य परमेष्ठिनोऽग्नेः, करणम्—यथोक्तेन विधिना स्वीकरणम्, समाधानमित्येतत्। कर्त्तव्यमिति वाक्यशेषः। "तच्चैकादशेऽह्नि स्यात्, प्रागनधिकारात्"—इति भट्टभाष्यम्। कात्यायनस्तु—

"एतद्गृहपतौ प्रेते कुर्य्यादेकादशेऽहनि।
प्रागेवैकादशात् श्राद्धात् सद्यो जागरणादिकम्"।

इत्यभिधायाह—

"ज्येष्ठः कुर्य्यात्तथाऽऽधानं कनीयांश्च विवर्ज्जयेत्।
नैकादशेऽह्नि कुर्व्वीत द्वादशे वा विचक्षणः"।

इति। तदत्र वृद्धिश्राद्धं न भवति। कस्मात्?

"न तत्पूर्व्वं यतः प्रोक्तः सपिण्डनविधिः क्वचित्।
वृद्धिश्राद्धस्य लोपः स्यादुभयोरपि पक्षयोः"।

इति कर्म्मप्रदीपदर्शनात् ॥ १२ ॥ * ॥

तथा तिथिनक्षत्रपर्व्वसमवाये ॥ १३ ॥

तथेति वैकल्पिकत्वं दर्शयति। नक्षत्रशब्दश्चैको लुप्तवत् द्रष्टव्यः। "नक्षत्रशब्दः काकाक्षिगोलकन्यायेनोभयत्र सम्बध्यते"—इति भट्ट-नारायणोपाध्यायाः। तिथिश्च नक्षत्रञ्च तिथिनक्षत्रे, नक्षत्रञ्च पर्व्व च नक्षत्रपर्व्वणी, तयोस्तयोश्च समवायस्तस्मिन्निति। तिथिः,—पर्व्वेतिपुनः करणात्—"पौर्व्वापर्य्ये सति पूर्व्वदौर्ब्बल्यम्"—इति च सिद्धान्तात्—पर्व्वेतरा शोभना ज्योतिःशास्त्रानुमता, नक्षत्रमपि

शोभनं ज्योतिःशास्त्रानुमतमेव। तयोस्तिथिनक्षत्रयोः समवाये संयोगे, "अग्निसमाधानं कुर्वीत"—इति सम्बध्यते।

तथा, नक्षत्रं मासमंज्ञानिमित्तं चित्रादिकम्, पर्व पौर्णमासम्, तयोः समवाये संयोगे, अग्निसमाधानं कुर्वीत। तथेत्यनुषज्यते वैकल्पिकत्वावेदकम्। तिथिनक्षत्रपर्वणां वा समवाये—युगपदसम्भवात्, तिथिनक्षत्रसमवाये, नक्षत्रपर्वसमवाये चेत्यर्थः।

अथ वा। तिथिनक्षत्रयोर्ज्योतिःशास्त्रोक्तयोः समवाये इति यथोक्त एवार्थः। नक्षत्रपर्वणोस्तु "या वैशाख्यामावस्या रोहिण्या सम्बध्यते, तस्यामादधीत"—इति श्रुत्याद्युक्तयोः समवाये इत्यर्थः। तदत्र, नक्षत्रशब्दस्यार्थद्वयम्—ज्योतिःशास्त्रोक्तं श्रुत्युक्तञ्च नक्षत्रम् प्रामाणिकमित्यादरणीयम्। तदिदमाधानकालद्वयम्,—यत्र तिथिनक्षत्रसमवायो, यत्र नक्षत्रपर्वसमवायः—इति।

इयमप्यपरा सूत्रयोजना भट्टभाष्ये दर्शिता—"तिथिना पौर्णमास्या यानि नक्षत्राणि समाख्यायन्ते, तानि नक्षत्राणि मघादीनि द्वादश, तेषामन्यतमस्य पर्वणा पौर्णमासेन समवायः संयोगस्तिथिनक्षत्रपर्वसमवायस्तस्मिन्"—इत्यन्तेन सन्दर्भेण। अस्मिंस्तु नये, अनेन सूत्रेणैक एवाधानकालोऽभिहितः—इत्यवगन्तव्यम् ॥ १३ ॥*॥

दर्शे वा पौर्णमासे वाऽग्निसमाधानं कुर्वीत ॥ १४ ॥

दर्शोऽमावस्या सूर्य्येन्दुसङ्गम इत्यनर्थान्तरम्। पौर्णमासः पौर्णमासीत्युच्यते। तदेतस्मिन् दर्शे वा पौर्णमासे वा; यस्मिन् कस्मिन्नपि—केवल एव—न तु नक्षत्रमप्यपेक्ष्य इत्यर्थः। अग्निसमाधानं

कुर्वीत। वाशब्दद्वयन्तुल्यवदिकल्पार्थम्। नचचयोगापेक्षायां काल-विलम्बो भवेदित्यविलम्बार्थं दर्शे वा पौर्णमासे वेत्याह। श्रेयस्य-विलम्बो ह्यनुमतः प्रामाणिकानाम्। श्रूयते हि। "न श्वः समुपासीत को हि मनुष्यस्य श्वोवेद"—इति। स्मरन्ति च।

"श्वःकार्य्यमद्य कर्त्तव्यं पूर्व्वाह्णे चापराह्णिकम्।
न हि प्रतीक्षते मृत्युः कृतं वाऽस्य न वा कृतम्"।

इति। समेत्य—आधानं समाधानम्। समेत्य—मिलित्वा। केन?

"नैकयाऽपि विना कार्य्यमाधानं भार्य्यया द्विजैः।
अकृतं तद्विजानीयात् सर्वा नान्वारभन्ति यत्"।

इति कर्म्मप्रदीपवाक्यात्—भार्य्ययेति वाक्यशेषः। अग्नेः समा-धानम्,—'अग्निसमाधानम्'। अत्र च, कया भार्य्यया कथम्भूतया च मेलनम्, कया च न,—इत्येतत् सर्व्वमप्याह कात्यायनः।

"वर्णज्यैष्ठ्येन बह्वीभिः सवर्णाभिश्च जन्मतः।
कार्य्यमग्निच्युतेराभिः साध्वीभिर्मथनं पृथक्।
नात्र शूद्रां नियुञ्जीत न द्रोहद्वेषकारिणीम्।
नाशासनस्थां नान्येन पुंसा च सह सङ्गताम्।
ततः शक्तिवरा पश्चादासामन्यतमैव या।
उपेतानाञ्चान्यतमा मन्थेदग्निं निकामतः"।

इति। इदञ्चाधानमनग्नावपशे सति न कर्त्तव्यम्,—कर्त्तव्यञ्चा-नग्नावप्यशे क्लीबादौ सत्यपि, निर्दोषेऽपि तस्मिंस्तदनुमत्या,—इत्यप्याह स एव।

"आधानकाला ये उक्तास्तथा याश्चाग्नियोनयः ।
तदाश्रित्याग्निमादध्यादग्निमानग्रजो यदि ।
दाराधिगमनाधाने यः कुर्य्यादग्रजाग्रिमः ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः ।
परिवित्तिः परिवेत्ता च नरकं गच्छतो ध्रुवम् ।
अचीर्णप्रायश्चित्तौ तौ पादोनफलभागिनौ ।
देशान्तरस्थक्लीबैकवृषणानसहोदरान् ।
वेश्याऽतिसक्तपतितशूद्रतुल्यातिरोगिणः ।
जड़मूकान्धवधिरकुब्जवामनकुण्ठकान् ।
अतिवृद्धानभार्य्यांश्च कृषिसक्तान्नृपस्य च ।
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा ।
कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति ।
धनवार्द्धुषिकं राजसेवकं कर्षकं तथा ।
प्रोषितश्च प्रतीक्षेत वर्षत्रयमपि त्वरन् ।
प्रोषितं यद्यशृण्वानमब्दादूर्द्ध्वं समाचरेत् ।
आगते च पुनस्तस्मिन् पादं तच्छुद्धये चरेत्" ।

इति ।

"अग्रजः स्याद्यदाऽनग्निरधिकार्य्यनुजः कथम् ?
अग्रजानुमतः कुर्य्यादग्निहोत्रं यथाविधि" ।

इति ।

"ज्येष्ठोभ्राता यदा तिष्ठेदाधानं नैव कारयेत् ।
अनुज्ञातस्तु कुर्व्वीत शङ्खस्य वचनं यथा

नाग्नयः परिविन्दन्ति न वेदा न तपांसि च।
दारेण परिविन्द्यं स्यात् पृथग्धर्म्मा हि ब्राह्मणाः।
नाग्नयः परिविन्दन्ति न यज्ञा न तपांसि च।
न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिका"।

इति च। पितरि चानग्नावपि पुत्रस्याधानाधिकारो न व्याहन्यते। तदप्याह स एव।

"पितुर्यस्य च नाधानं कथं पुत्रस्तु कारयेत्?
अग्निहोत्राधिकारोऽस्ति शङ्खस्य वचनं यथा"।

इति। आधानपरिपाटी चाचार्य्यैरनुक्ताऽपि—

"परिधायाहतं वासः प्रावृत्य च यथाविधि"।

इत्येवमादिकर्म्मप्रदीपवचनेभ्य एवावगन्तव्या। न लब्धय्युँभ्योग्रहीतव्या। परोक्षत्वात्। अक्रियैव खल्वसावस्माकमिति ॥ १४ ॥ * ॥

उक्ता आधानकालाः। अथेदानीमग्नियोनयोवक्तव्याः। तास्त्रिभिः सूत्रैरभिधीयन्ते।

वैश्यकुलाद्वाऽम्बरीषाद्वाऽग्निमाहृत्याभ्यादध्यात् ॥ १५ ॥

वैश्यस्तृतीयोवर्णः शुद्ध एवाभिमतः। तस्यास्य वैश्यस्य कुलात्—गृहात्, वा, अम्बरीषात्; भ्राष्ट्रात्—यवादिभर्ज्जनपाचात्, वा, अग्निमाहृत्य आनीय, अभ्यादध्यात् अभिमर्वतोभावेनादध्यादित्यर्थः। व्याख्यातौ वाशब्दौ। स खल्वयमग्निर्हुतोच्छिष्टः संस्कृतो वा गृह्यतेऽविशेषादिति कर्कोपाध्यायाः ॥ १५ ॥ * ॥

अपि वा बहुयाजिन एवागाराद्ब्राह्मणस्य वा, राजन्यस्य वा, वैश्यस्य वा ॥ १६ ॥

अपि वा—इत्यस्मरीषात् पक्षान्तरमुपदिशति। बहुभिः सोमैर्येनेष्टं स बहुयाजीत्याचक्षते। तस्यामुष्य बहुयाजिन एव। एवकारस्तदितरं व्यवच्छिनत्ति। 'अगारात्' गृहात्। 'अग्निमाहृत्याभ्यादध्यात्'—इति सम्बध्यते। कस्य बहुयाजिनः?—इत्येतदाह। 'ब्राह्मणस्य वा' 'राजन्यस्य'—क्षत्रियस्य 'वा', 'वैश्यस्य वा'। वाशब्दत्रयन्तुल्यवद्विकल्पार्थम्। वैश्यकुलात्—इति सामान्यतोऽभिहितं, तमेव वैश्यमिदानीं बहुयाजितया विशिशिषुराचार्य्यः पुनर्वैश्यग्रहणञ्चकार। नात्र पुनरुक्तिः शङ्कनीया;—सामान्यप्राप्तस्य पुनर्विशेषकथनं खल्वपुनरुक्तमेवेत्याहुः। भवतु वा पुनरुक्तिराग्नेयदिरुक्तिवदादरार्था। पुनरुक्तिः खल्वाचार्य्यस्यानुमतैवेति नैवात्र किमपि चोदनीयं भवति। तथाच गृह्यासंग्रहः।

"पुनरुक्तमतिक्रान्तं यच्च सिंहावलोकितम्।

गोभिले ये न गृह्णन्ति न ते जानन्ति गोभिलम्"।

इति।—अन्यैवाग्नियोनिर्वैश्यकुलमबहुयाजिनोऽपीत्येवमर्थं पूर्व्वञ्च वैश्यकुलग्रहणमित्यप्याहुः॥ १६ ॥ * ॥

अपिवाऽन्यं* मथित्वाऽभ्यादध्यात्॥ १७॥

अपि वा,—अथवा। अन्यम्—

"अश्वत्थोयः शमीगर्भः प्रशस्तोर्वीसमुद्भवः।

---

* इत्यमेव पाठः सर्व्वेषु सूत्रग्रन्थेषु। भट्टभाष्यब्राह्मणसर्व्वस्वयोरपि इत्यमेवेदं सूत्रमधारि। परिशिष्टप्रकाशे तु—'अपि वाऽरणिम्'—इति लिखितम्।

तस्य या प्राङ्मुखी शाखा वोदीची वोर्द्ध्वगाऽपि वा"।

इत्येवमादिकर्म्मप्रदीपोक्तं मन्थनयन्त्रम्—(पुंस्त्वं छान्दसम्)—अरणिं वा।

"परिधायाहतं वासः प्रावृत्य च यथाविधि।

बिभृयात् प्राङ्मुखोयन्त्रमावृता वक्ष्यमाणया"।

इत्येवमादिकया कर्म्मप्रदीपोक्तयैवावृता मथित्वा, अभ्यादध्यादग्निमिति वाक्यशेषः। मथित्वा अरणिं, अन्यम्—परिकीर्त्तितादपरमग्निमारणेयमिति वाऽर्थः। 'अरणिप्रदानमेके"—इति। "आरणेयमुरुपुण्यकोषकामः"—इति च गृह्यान्तरदर्शनात्॥ १७॥ *॥

पुण्यस्त्वेवानर्द्धुकोभवतीति॥ १८॥

पुण्यः, पुण्यजनक एव, प्रकृतत्वादयमारणेयोऽग्निर्भवति। न तु ऋद्धिजनकोऽपीत्याह—अनर्द्धुकः,—इति। ऋद्धिरिति ब्रह्मवर्चसादिकमुच्यते। तामृद्धिं न जनयतीत्यनर्द्धुकः। तुशब्दो वैशेष्यमवगमयत्यारणेयस्य। ब्राह्मणकुलादियोनयः खल्वग्नयो जनयन्ति ब्रह्मवर्चसादिकम्, अयन्त्वारणयोन तथेत्यनर्द्धुक इत्याह। तथा च गृह्यान्तरम्। "ब्राह्मणकुलाद्ब्रह्मवर्चसकामोऽग्निमाहृत्यादधीत, राजन्यादोजोवीर्य्यकामः, वैश्यात् पुत्रपशुकामः, अम्बरीषाद्धनधान्यकामः, आरणेयमुरुपुण्यकोषकामः"—इति। कथन्तर्ह्यारणेयोऽग्निर्विशिष्यतेऽनर्द्धुकत्वात्। नैष दोषः। उरुपुण्यकोषकारित्वादारणेयस्य। उरुपुण्यकोषकारी खल्वारणेय एव भवतीति स एव विशिष्यते। स खल्वारणेयोऽग्निरुरुपुण्यकोषं कुर्व्वाणस्तेनैव ब्रह्मवर्चसादिकमपि कर्त्तुमर्हति। तदधीनत्वात्तेषाम्। अत एव स्मर्य्यते।

"न हि पुण्यकृतः किञ्चित्त्रिषु लोकेषु दुर्लभम्
दुष्प्राप्यमपि येनाप्तं ब्राह्मण्यं गाधिसूनुना"।

इति। स्वाधीना चेयमन्या योनिः पराधीना चान्या। दैवाच्च पुनराधातव्येऽग्नौ पूर्व्वैव योनिराश्रयितव्या भवति।

"पूर्व्वैव योनिः पूर्व्वाऽऽवृत्पुनराधानकर्म्मणि"।

इति कात्यायनस्मरणात्। "पूर्व्वैवानुगतेऽग्नौ योनिः"—इति च ग्रन्थान्तरात्। तत्र च स्वाधीनत्वादेवान्या योनिः सुलभा भवति। पराधीनानाञ्च योनीनां सुतरां दुर्लभत्वमिति पराधीनां पूर्व्वां योनिमलभमानः पुनराधाता प्रत्यवेयादिति चारणेयोविशिष्यते। इतरेऽपि खल्वग्नयः कर्म्मणैवाधानेन त्वृद्धिसाधनमित्ययमारणेयोऽपि काम्यैः स्वनिष्टऋद्धिसाधनहोमैः शक्नोति प्रणाय्या ऋद्धिं साधयितुमित्यदोषः। अत एव कर्म्मप्रदीपे स्मरति भगवान् कात्यायनः।

"पुण्यमेवादधीताग्निं स हि सर्व्वैः प्रशस्यते।
अनर्द्धुकत्वं यत्तस्य काम्यैस्तल्लीयते शमम्"।

इति। इतिरेतावत्य एवाग्नियोनय इति दर्शयति॥ १८॥ *॥

यथाकामयेत, तथा कुर्य्यात्॥ १९॥

सत्स्वेतेषु आधानकालेषु,—सतीषु चैतास्वग्नियोनिषु, यथाकामयेतेच्छेदाधानकर्त्ता, तथा कुर्य्यादाधानमिति वाक्यशेषः॥ १९॥ *॥

स, यदेवान्त्यां समिधमभ्यादधाति, जायाया वा पाणिं जिघृक्षन् जुहोति, तमभिसंयच्छेत्॥ २०॥

स यथोक्तः कर्त्ता, यदेव यस्मिन्नेवाग्नौ। एवकारादितिकर्त्तव्यतान्तरव्यवच्छेदः। 'अन्वार्यं समिधमभ्यादधाति'—यस्मिन्नेव वा 'जायायाः पाणिं जिघृक्षन् जुहोति'—लाजादिकमर्थात्; तमग्निमभिसंयच्छेत्, आभिमुख्येन धारयेत्, रक्षेदित्येतत्।

अथैवमुत्तरसूत्रे 'सएव'—इत्यस्यैवाग्नेः परामर्शात् 'प्रेते वा गृहपतौ'—इत्यादिकालाहितानामग्नीनां गृह्यत्वं न प्राप्नोति? नैष दोषः। यतः प्राधान्यात् खल्वाचार्य्यः 'सएव' इत्याह। ततएवारभ्य खल्वसौ गृह्योभवति। अन्यस्याप्यग्नेर्गृह्यत्वं वास्तवमिति न शक्यं निवारयितुम्। स्मार्त्तः खल्वग्निरेवमभिधीयते।

परतरेण वा सूत्रेणैतत्संभंत्स्यते। कथं कृत्वा? यदेवान्वार्यं समिधमभ्यादधाति, यदेव च जायायाः पाणिं जिघृक्षन् जुहोति, तं होममभिसंयच्छेत्—अभिमुख्येन सम्यक् कुर्य्यात्, तेन चैव होमेनास्य प्रातराहुतिर्हुता भवतीति। सोऽयमित्थं परतरेणास्याभिसंबन्धः। अस्यान्तु वर्णनायामुत्तरसूत्रे 'सएव'—इति पूर्व्वप्रकृतः सर्व्वोऽप्यग्निः परामर्ष्टव्यो भवति। कथं पुनरतिक्रम्य परसूत्रं परतरेण सूत्रेण संभंत्स्यते? "पानव्यापच्च तद्वत्"—इत्यादिवत् अतिक्रान्तसंबन्धस्याचार्य्यानुमतत्वादित्याह। कथं ज्ञायते?

"पुनरुक्तमतिक्रान्तं यच्च सिंहावलोकितम्।
गौभिले ये न गृह्णन्ति न ते ज्ञास्यन्ति गौभिलम्"।

इति—गृह्यासङ्ग्रहवचनात्। उत्तरसूत्रएव वा 'सएव'—इति व्यवहितोऽपि सर्व्वोऽग्निः परामृश्यतामिति न किञ्चिदनुचितम् ॥ २० ॥ * ॥

स एवास्य गृह्योऽग्निर्भवति ॥ २१ ॥

स यथोक्त एव न पुनरन्य इत्यन्यस्मिन्नग्नावस्य होमप्रतिषेधो-गृह्याग्निसन्ताद्यकर्मस्वन्याहिते गृह्येऽपीति विज्ञायते। 'अस्य'—आधातुः, गृह्यो गृह्यार्थो गृह्यनामा वाऽग्निर्भवति। सोऽयमग्नि-रस्याधातुरेव गृह्यो भवति न पुनरन्यस्य इति वा सूत्रार्थः। तदेतत् सर्व्वमाह कात्यायनः।

"न ह्याहिताग्नेः स्वं कर्म्म लौकिकेऽग्नौ विधीयते"।

इति।

"यस्याग्नावन्यहोमः स्यात् स वैश्वानरदैवतम्।
चरुं निरूप्य जुहुयात् प्रायश्चित्तन्तु तस्य तत्"।

इति।

"परेणाग्नौ हुते स्वार्थं परस्याग्नौ हुते स्वयम्"।

इति चैवमादि। अस्य चापवादः पुरस्तादेवोक्तः—ब्रह्मचारी वेदमधीत्यान्त्यां समिधमभ्याधास्यन्नित्यत्र ॥ २१ ॥ ० ॥

तेन चैवास्य प्रातराहुतिर्हुता भवतीति ॥ २२ ॥

तेनान्त्यसमिदाधानेनैव, न त्वन्येन। 'पाणिं जिघृक्षन्'—इत्ये-तस्मिंश्च कल्पे, तेनैव लाजादिहोमेनेत्येतत्। यस्यार्थः,—

"वैवाहिकेऽग्नौ कुर्व्वीत सायम्प्रातस्त्वतन्द्रितः।
चतुर्थीकर्म्म हत्वैतदेतच्छात्यायनेर्मतम्"।

इत्यस्मादपरोऽयं कल्पः—इति दर्शयति। चैवेति वा निपात-समुदायः। गृह्यपरिभाषाकृद्भिरप्युक्तम्—"यदा अह्नि विवाहहोमः,

तदा सायङ्काले होमारम्भः। यदा रात्रौ विवाहहोमः, तदा उत्तरेद्युः सायङ्काले होमारम्भः"—इति।

"यस्मिन्नह्नि विवाहः स्यात् सायमारभ्य तस्य तु।
परिचर्य्यां विवाहाग्नेर्विदधीत स्वयं द्विजः।
यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति।
उत्पन्नस्योत्तरस्याह्नः सायं परिचरेदमुम्"।

इति च स्मृत्यन्तरम्।—"पाणिग्रहणादि गृह्यं परिचरेत्"—इति च गृह्यान्तरम्। अस्याग्नेराधातुर्वा प्रातराहुतिर्हुता भवति। इतिराधानप्रकरणपरिसमाप्तिं द्योतयति॥ २२॥ ०॥

सायमाहुत्युपक्रम एवात ऊर्द्धं गृह्येऽग्नौ होमो-विधीयते॥ २३॥

सायं हूयते इति सायमाहुतिः, सायमाहुत्या उपक्रम्यते आरभ्यते यः, सोऽयं सायमाहुत्युपक्रमः। केषाञ्चिच्छाखिनामग्निहोत्रं यथा प्रातराहुत्या प्रातरारभ्यते, सायमाहुत्या च निस्तिष्ठते, न तथा कौथुमराणायनीयादीनामित्येतदेवकारेण दर्शयत्याचार्य्यः। तदेव सायमाहुत्युपक्रमं प्रातराहुत्यन्तमेकमिदं कर्म्मेति विज्ञायते। तदाह कात्यायनः।

"सायमादि प्रातरन्तमेकं कर्म्म प्रचक्षते"।

इति। ततश्च येनैव हविषा—हुतेन वाऽहुतेन वा, दध्ना वा पयसा वा, सायं होमः कृतः, तेनैव प्रातर्होमोऽपि समापनीयः।

अपचारे खल्वकृतस्य कृतस्य वोपात्तस्य हविषस्तदनुकारिणाऽपरेणैव हविषा प्रातर्होमः कर्त्तव्यो न पुनर्वैकल्पिकं मुख्यमपि हविरुपादेयम्। "सामान्यं तच्चिकीर्षा हि"—इति, "निर्देशात्तु विकल्पे यत् प्रवृत्तम्"—इति च सिद्धान्तात्। कर्म्मप्रदीपे कात्यायनोऽप्याह।

"यथोक्तवस्त्वसमाप्तौ ग्राह्यं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीणामिव शालयः"।

इति। अपवर्गविहितमप्यभिरूपभोजनम् प्रातराहुत्यनन्तरमेवेत्यवगन्तव्यम्। सोऽयं सायमाहुत्युपक्रम एव—'अतः' अस्मादाधानकालात्, 'ऊर्द्ध्वं'—परतो, 'गृह्येऽग्नौ' यथोक्ते, हूयते इति 'होमः—"तद्युक्ते श्रवणात् जुहोतिरासेचनाधिकः स्यात्"—इत्युक्तलक्षणः, 'विधीयते' क्रियते। अत्र विशेषमाह गृह्यासंग्रहः।

"परमेष्ठी विभक्तश्च जुहुयादक्षतान् सकृत्।
प्रातस्तूष्णीं हुतं वाऽपि प्रातराहुत्युपक्रमः"।

इति॥ २३॥ * ॥

पुरा प्रादुष्करणवेलायाः सायं प्रातरनुगुप्ता अप आहरेत् परिचरणीयाः॥ २४॥

'पुरा' पूर्व्वम्। कस्मात्? 'प्रादुष्करणवेलायाः'—"पुराऽस्तमयादग्निं प्रादुष्कृत्य"—इत्यादिना वक्ष्यमाणायाः। 'सायं प्रातः'—चशब्दः समुच्चयार्थोलुप्तवद् द्रष्टव्यः। सायं प्रातश्चेत्यर्थः। 'अनुगुप्ता अप आहरेत्'। हृतभाष्यमेतत्। 'परिचरणीयाः' परिचर्य्यन्ते निर्व्वाह्यन्ते आचमनादीनि याभिरिति—"कृत्यल्युटोवहुलम्"—

इति वचनादनीयः करणे वेदितव्यः। याभिरद्भिराचमनपर्य्युक्षणादि परिचर्य्यते; ता इमाः परिचरणीया अपः,—इति सम्बन्धः ॥ २४ ॥ * ॥

अपि वा सायम् ॥ २५ ॥

'अपि वा' अथवा। 'सायं' (पूर्व्वचाप्येतदुपादानात्)—सायमेव। 'अप आहरेत् परिचरणीयाः'—इति संबध्यते। सायमाहृताभिरेवाद्भिः सायं प्रातश्च परिचरेदित्यर्थः ॥ २५ ॥ * ॥

अपि वा कुम्भाद्वा मणिकाद्वा गृह्णीयात् ॥ २६ ॥

अपि वेत्याहरेदित्यपेक्षया विकल्पार्थः। अपि वा गृह्णीयादिति। कुम्भात् घटात् वा, मणिरेव मणिकः—तस्मान्मणिकादलिञ्जरात्, महतोजलभाण्डात् वा। वाशब्दद्वयं तुल्यवदनयोर्विकल्पार्थम्। 'गृह्णीयात्'—प्रकृतत्वादपः परिचरणीयाः। "निर्णिक्तकरचरणमुखौ पत्नी शिष्यो वाऽऽचम्य, कुम्भादेव अप उद्धृत्य दद्यात्, ताभिः परिचरेत्"—इति भट्टभाष्यम् ॥ २६ ॥ * ॥

पुराऽस्तमयादग्निं प्रादुष्कृत्यास्तमिते सायमाहुतिं जुहुयात् ॥ २७ ॥

पुरा, पूर्व्वस्मिन् काले। कस्मात्? 'अस्तमयात्', सवितुरर्थात्। कात्यायनोऽप्याह।

"सूर्य्येऽस्तशैलमप्राप्ते षट्त्रिंशद्भिरथाऽङ्गुलैः।
प्रादुष्करणमग्नीनां प्रातर्भासाञ्च दर्शनात्"।

इति। तस्मिन्नेतस्मिन् काले। 'अग्निं' आहितं, 'प्रादुष्कृत्य'—प्रकटीकृत्य, प्रज्वाल्येत्येतत्। 'अस्तमिते'—सवितरि।

"यावत् सम्यङ् न भास्यन्ते नभस्यृक्षाणि सर्व्वतः।
न च लौहित्यमापैति तावत् सायन्तु हूयते"।

इति कर्म्मप्रदीपपरिदर्शिते काले। 'सायमाहुतिं' 'जुहुयात्' ॥ २७ ॥ * ॥

पुरोदयात् प्रातः प्रादुष्कृत्योदितेऽनुदिते वा प्रातराहुतिं जुहुयात् ॥ २८ ॥

'पुरा'—'उदयात्', सवितुः। तमिमं सामान्येनाभिहितं कालं विशिनष्टि 'प्रातर्'—इति।

"चतस्रोघटिकाप्रातररुणोदय उच्यते"।

इति स्मृत्युक्तलक्षणे—इत्यर्थः। अतएव कात्यायनोऽपि—"प्रातर्भासाञ्च दर्शनात्"—इत्याह। तस्मिन्नेव खलु काले प्राची दिगरुणकिरणारुणीकृता सम्पद्यते। तदेतस्मिन् काले—'प्रादुष्कृत्य'—प्रकाश्यत्वादग्निम्। 'उदिते'—उद्गते रवौ।

"हस्तादूर्द्धं रविर्यावद्गिरिं हित्वा न गच्छति।
तावद्धोमविधिः पुण्यो नान्योऽभ्युदितहोमिनाम्"।

इति कर्म्मप्रदीपस्पष्टीकृतकाले इत्येतत्। अत्र, "अभ्युदित—इति अभिशब्दस्य सर्व्वतोभावार्थस्योपादानात् सम्पूर्णसूर्य्यमण्डलदर्शने उदितहोमो न तद्धोंदितादावित्यवगन्तव्यम्"—इति परिशिष्टप्रकाशः। नैवम्। ऐदमर्थ्यानियमात्। न खल्वत्राभेरिदमर्थत्वे

किञ्चिन्नियामकमवगम्यते। अनेकार्थाः खल्वेवमादयः शब्दा लोके बहुलमुपलभ्यन्ते, तान्विकेश्वानुमन्यन्ते। उपादानस्य चान्यार्थत्वात्। अत्र खल्वभ्युदितहोमिनामित्येतदन्यार्थमुपादीयते। किमर्थम्? तदुच्यते। तावदेव होमकालः पुण्योन पुनरन्य इत्येतत् खल्विह विधित्सितम्। तस्मात्तदर्थमिदमुपादानं नान्यद्विदधाति। यदि पुनरन्यदपि प्रतिपिपादयिषितमिहाभ्युपगम्यते, तर्ह्यर्थभेदाद्वाक्यं भिद्येत! अन्या खल्वस्य वाक्यस्य वचनव्यक्तिरनूद्यमानस्य, अन्यैव विधीयमानस्य। तस्मात् प्राग्निरहितमन्यार्थमुपादानमिदमसाधक-मस्यार्थस्य—सम्पूर्णसूर्य्यमण्डलदर्शने उदितहोमः—इति।

तस्माद् यावदादित्योगिरिं हित्वा हस्तादूर्द्धं न गच्छति, उदितहोमिनां तावदेव होमकालः पुण्योन पुनरितोऽप्यधिकं गच्छति,—इत्यमुमर्थं सूचयितुं कात्यायनोऽभ्युदितहोमिनामित्याह। स खल्वयम्, उदितहोमिनां नान्यः कालः—इति वक्तव्येऽन्यस्य कालस्यात्यन्तमननुज्ञानार्थमभ्युदितहोमिनामित्याह। कथन्नाम? ये तावदभ्युदितहोमिनस्तेषामपि यदा यावदादित्योहस्तादूर्द्धं न गच्छति, तावानेव होमकालो न परस्तादपि, तदा किमु वक्तव्य-मुदितहोमिनाम्?—इति। सोऽयमभिशब्दोऽस्यार्थस्योपोद्बलको-भवति। स खल्वयमभ्युदितहोमोऽसन्नप्येवमर्थं सिद्धवन्निर्दिश्यते। सन्नेव वाऽनूद्यते। उदितहोमिन एव वा एवं निर्दिश्यन्ते—इति न किञ्चिदनुचितम्। तथाचोक्तम्।

"धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा"।

इति। अतएवाचार्य्यपुत्रेण रविविम्बस्य रेखामात्रदर्शन एवोदितहोमः कर्त्तव्यतयोपदिष्टः। तथा च गृह्यासंग्रहः।

"उदितेऽनुदिते चैव समयाध्युषिते तथा।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः।
रात्रेः षोड़शमे भागे ग्रहनक्षत्रभूषिते।
अनुदयं विजानीयाद्धोमं तत्र प्रकल्पयेत्।
ततः प्रभातसमये नष्टे नक्षत्रमण्डले।
रविविम्बं न दृश्येत समयाध्युषितं स्मृतम्।
रेखामात्रन्तु दृश्येत रश्मिभिश्च समन्वितम्।
उदयं तं विजानीयाद्धोमं कुर्य्याद्विचक्षणः"।

इति। स खल्वयमाचार्य्यपुत्रः "उदिते जुहोति अनुदिते जुहोति समयाध्युषिते जुहोति" इति श्रुतिमनुसरन् प्रातर्होमस्य कालत्रयमुक्तवान्। आचार्य्येण तु समयाध्युषितकालस्यानुदितकाल एवान्तर्भावं पश्यता कालद्वयमुक्तम्। अतोनानयोः पितापुत्रवचसोर्विरोधः शङ्कनीयः। एवञ्चास्माकमुदितहोमो यदा रश्मिसमन्वितं रविविम्बं रेखामात्रं दृश्यते तदैवोपक्रम्य रविरुदयगिरिं हित्वा यावद्धस्तादूर्द्ध्वं न गच्छति, तावति काले समापनीय इत्याचार्य्यपुत्रकात्यायनवचनाभ्यां सिध्यतीति परिशिष्टप्रकाशव्याख्यानमस्माच्छास्त्रविरुद्धमेवेति सुधीभिरवधेयम्। पांशुतुषारादिभिरन्तरिते रवौ यत् कर्त्तव्यं, तदप्याह कात्यायनः।

"रजोनीहारधूमाभ्रवृक्षाग्रान्तरिते रवौ।
सन्ध्यामुद्दिश्य जुहुयात् व्रतमस्य न लुप्यते"।

इति। 'अनुदिते'—उदयमप्राप्ते, 'वा', रवौ, 'प्रातराहुतिं' 'जुहुयात्'। वाशब्दादुदितानुदितहोमयोर्वैकल्पिकत्वं दर्शयति। एकस्यात्र वाशब्दः श्रूयते—अनुदिते वा—इति। सोऽयमनुदितहोमो-नोदितहोमेन तुल्यवद्विकल्प्यते। कस्मात्? वाशब्दद्वयाश्रवणात्। न खलु 'दर्शे वा पौर्णमासे वा—इत्येवमादिवदिह तथात्वाववोधकं वाशब्दद्वयमस्ति। स खल्वयमुदितहोमोऽन्यस्मात् प्रशस्यते राणा-यनीयकौथुमादीनामित्यवगम्यते।

यश्चानुदिते जुहोति, स चेन्न शक्नोत्यनुदिते होतुं; जातुचित् कुतश्चित् प्रतिबन्धात्,—अतिपात एवास्य प्रातराहुतेर्भवति, न शक्नोऽप्युदिते जुहुयात्। कस्मात्? 'उदितेऽनुदिते वा'—इति विकल्पश्रवणात्। विकल्पे च नोभयः शास्त्रार्थः—इति तन्त्रस्थितिः। श्रुतिश्चास्यामेव दशायामुदितहोमं निन्दति। "श्यावोऽस्याहुति-मभ्यवहरति य उदिते जुहोति"—इति। "यथाऽतिथये प्रद्रुताया-न्नमाहरेयुस्तादृक् तत्, यदि उदिते जुहुति"—इति चैवमादिका। आह च भगवानश्वपादः—"अभ्युपेत्य कालभेदे दोषवचनात्"—इति। जैमिनिरपि—"प्रक्रमाद्वा नियोगेन"—इति। यस्य च प्रातराहुतेरति-पातो भवति, स प्रायश्चित्तं कृत्वा गौणकाले तां जुहुयात्॥ २८॥ * ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथमप्रपाठकस्य प्रथमः खण्डः॥ ०॥

यज्ञोपवीतमाचमनञ्च खल्वङ्गं कर्म्मणामित्येतदवगतं—'यज्ञोपवीतिनाऽऽचान्तोदकेन कृत्यम्'—इत्यत्र। अथेदानीं तदुभयमपि क्रमेण व्याचिख्यासुः शिष्यानुजिघृक्षया, यज्ञोपवीतन्तावदाह ।

यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वाऽपि वा कुशरज्जुमेव ॥ १ ॥

यज्ञोपवीतं कुरुते, कुर्व्वीत—धारयेदित्येत् । विध्यर्थे लट् । कीदृशन्तत् ?— इत्याह—'सूत्रम्' सूत्रनिर्म्मितम् ।

"यज्ञोपवीतं कुर्व्वीत सूत्रेण नवतान्तवम्" ।

इति ।

"त्रिवृदूर्द्ध्ववृतं कार्य्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतञ्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते" ।

इति च गृह्यसंग्रहकर्म्मप्रदीपोक्तलक्षणमित्यर्थः । अत्र च—

"पृष्ठवंशे च नाभ्याञ्च धृतं यद्विन्दते कटिम् ।
तद्धार्य्यमुपवीतं स्यान्नातोलम्बं न चोच्छ्रितम्" ।

इति कर्म्मप्रदीपवचनात् ।

"गोभिर्वालपवित्रेण धार्य्यमाणेन नत्यशः ।
न स्पृशन्तीह पापानि श्रियं गात्रेषु तिष्ठति" ।

तथा,

"स्तनादूर्द्ध्वमधोनाभेर्न कर्त्तव्यं कथञ्चन।

स्तनादूर्द्ध्वं श्रियं हन्ति नाभ्यधस्तात्तु नचयः" ॥

इति गृह्यसंग्रहवचनात्।

"कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्ववृतं त्रिवृत्।

शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्" ॥

इत्येवमादिस्मृत्यन्तरेभ्यश्च विशेषोऽवगन्तव्यः। मुख्यश्चायं पक्षः, इह वाशब्दाभावात् उत्तरत्र च वाशब्दाम्नानात्—इति भट्टनारायणप्रभृतयः। यच्च—"वाससा यज्ञोपवीतानि कुरुते, तदभावे त्रिवृता सूत्रेण"—इति निगमपरिशिष्टवाक्यम्। तत्र यज्ञोपवीतपदमुत्तरीयपरं तद्धर्म्मविन्यासविशेषलाभार्थम्। यथा "उपसद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोति"—इति कौण्डपायिनामयनेऽग्निहोत्रपदमग्निहोत्रधर्म्मप्राप्त्यर्थं गौणम्। एवमिहापीत्यदोषः। एवं बहूनि वचनान्याञ्जस्येनोपपद्यन्ते। अन्यथा अस्मादेव वाक्यात्तानि वस्त्रालाभविषयाणि वक्तव्यानि। न चैतदुचितम्! कस्मात्?

"विरोधो यत्र वाक्यानां प्रामाण्यं तत्र भूयसाम्"।

इति स्मरणात्। अतएव स्मर्य्यते।

"यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः।

तथा सन्धार्य्यते यत्नादुत्तराच्छादनं परम् ॥

इति।

"यज्ञोपवीते द्वे धार्य्ये श्रौतस्मार्त्तेषु कर्म्मसु।

तृतीयञ्चोत्तरीयार्थे वस्त्रालाभे तदिष्यते" ॥

इति चैवमादि। परिशिष्टप्रकाशेऽप्युक्तम्—"यज्ञोपवीतानी-त्युत्तरीये गौणं तद्धर्मविन्यासविशेषप्राप्त्यर्थम्"—इति। अथवा। अस्माकं सूत्रं मुख्यं वस्त्रमनुकल्पः, वैपरीत्यमन्येषामित्यदोषः।

'वस्त्रं वा'—अरण्यादावुपवीतनाशे सूत्रलाभासम्भवात्, यज्ञोपवीतं कुरुते। अन्यथा ह्युपवीतस्य मेहनादावनर्थः स्यात्।

"पिबतोमेहतश्चापि भुञ्जतोऽनुपवीतिनः।
प्राणायामत्रिकं षट्कं नवकञ्च यथाक्रमम्"।

इति स्मरणात्। न खलु समुद्भूतवेगानाममीषां विसर्गे क्षणमपि विलम्बः सम्भवति, वेगप्रतिघातप्रतिषेधाच्च,—इत्यन्यदेतत्।

'अपि वा'— अथवा— (चौरादिभिर्वस्त्रस्याप्यपहारेऽरण्यादौ) 'कुशरज्जुमेव' यज्ञोपवीतं कुरुते। एव-शब्दोयज्ञोपवीतकरणं नियमति। कर्म्माङ्गमेव यज्ञोपवीतं मन्यमानः, तस्मादन्यत्रायज्ञोप-वीती प्रत्यवैतीत्यर्थः। तदत्र यज्ञोपवीतं विहितं पुरुषार्थं, यस्य कर्म्मसंयोगः पुरस्तादुक्तः। तदेतत् कात्यायनेनाप्युक्तम्।

"सदोपवीतिना भाव्यं सदा बद्धशिखेन च।
विशिखो व्युपवीतश्च यत् करोति न तत्कृतम्"।

इति। वक्ष्यमाणसूत्रपरिभाषितस्य यज्ञोपवीतिनः कर्म्मार्थत्वे त्वेतत् पुरुषार्थमात्रमित्यवगन्तव्यम्॥ १॥ *॥

तस्यैव खल्विदानीं यज्ञोपवीतस्य विन्यासविशेषः परिभाष्यते द्वाभ्यां, विनियोगविशेषविवक्षया।

दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येऽंसे प्रति

ष्ठापयति दक्षिणं कक्षमन्ववलम्बं भवत्येवं यज्ञोपवीती भवति ॥ २ ॥

दक्षिणं सव्येतरं बाहुं भुजमुद्धृत्योत्क्षिप्य, शिरोमूर्द्धानमवधाय वेष्टयित्वा, 'सव्ये' दक्षिणेतरे—वामे, अंसे स्कन्धे इत्यर्थः। प्रतिष्ठापयति स्थापयति,—यज्ञोपवीतम्। (तथा सति) दक्षिणं कक्षं बाहुमूलकोटरप्रदेशं, अनु-अधः, अवलम्बं लम्बमानं भवति—यज्ञोपवीतमर्थात्। पुरुषस्त्वेवमनेन प्रकारेण यज्ञोपवीती भवति।

सेयं परिभाषा कर्म्मार्था। न खल्वयमपूर्व्वस्य यज्ञोपवीतित्वस्य विधिः,—अपि तु संज्ञाविधिरेषः 'एवं यज्ञोपवीती भवति'-इति। कस्मात्? पक्षान्तरे वाक्यभेदात्। अपूर्व्वस्य यज्ञोपवीतित्वस्यायं विधिरित्येतस्मिन् पक्षे भिद्येत वाक्यम्। कथम्? यज्ञोपवीती भवेत्, स चेवं भवति—इति वचनव्यक्तिभेदात्। न च विशिष्टो विधिः सम्भवति, प्राप्तत्वात् यज्ञोपवीतस्य, अप्राप्तत्वाच्च विन्यासविशेषस्य विध्यनुवादवैषम्यापत्तेः। श्रुत्या चैवमवगमात्। श्रुत्या च खल्वेवमवगम्यते—संज्ञाविधिरेवैषः— इति। एवं यज्ञोपवीती भवतीति वचनमेवं खल्वाञ्जस्येनोपपद्यते। न ह्यत्र यज्ञोपवीती भवेदित्याम्नायते, किन्तर्हि?—एवम्—अनया रीत्या यज्ञोपवीती भवति—इति।

ननु यज्ञोपवीतं कुरुते इति पुरुषार्थं यज्ञोपवीतमनूद्य तस्य विन्यासविशेषः परिभाष्यते—'एवं यज्ञोपवीती भवति'-इति। 'एवं प्राचीनावीती भवति'-इति च। एवन्तर्हि सम्मतमेवानुजानाति

भवान्।—यज्ञसूत्रमात्रं पुरुषार्थः, विन्यासविशेषस्तु कर्म्मार्थः—इति। परमार्थतोऽपि, 'यज्ञोपवीतं कुरुते'—इति सूत्रयित्वा, 'एवं यज्ञोपवीती भवति'—इति, 'एवं प्राचीनावीती भवति'—इति च सूत्रयत आचार्य्यस्यास्मदुक्त एवार्थं स्वरसोऽवगम्यते। तदिदमभिहितमस्माभिः— "यज्ञोपवीतिनाऽऽचान्तोदकेन कृत्यम्"—इत्यत्र ॥ १ ॥ * ॥

सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंसे प्रतिष्ठापयति, सव्यं कक्षमन्ववलम्बं भवत्येवं प्राचीनावीती भवति ॥ ३ ॥

सव्यं वामम्। व्याख्यातमन्यत्। यज्ञोपवीतिना कृत्यमित्येतत् व्याचिख्यासुराचार्य्यः प्रथमं यज्ञोपवीतमुपदिश्य तस्यैव विन्यासविशेषेण यज्ञोपवीतित्वं प्राचीनावीतित्वञ्चाभिदधानोयज्ञोपवीतमस्यास्तीत्यसुमेवार्थं तत्रावगमयति। भाष्यकल्पः खल्वयं खण्डो यज्ञोपवीतिनाऽऽचान्तोदकेन कृत्यमित्यस्य सूत्रस्य ॥ २ ॥ * ॥

यदर्थं विन्यासविशेषः परिभाषितः स विनियोगविशेष इदानीमभिधीयते।

पितृयज्ञे त्वेव प्राचीनावीती भवति ॥ ४ ॥

पितृभ्यः, पितॄणां वा, यज्ञः—"यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्"—इत्युक्तलक्षणः, तस्मिन् पितृयज्ञे पितृकर्म्मणीत्येतत्। तुशब्दस्यशब्दार्थोऽन्यदपि समुच्चिनोति। तदाह कात्यायनः।

"दक्षिणं पातयेज्जानु देवान् परिचरन् सदा।
पातयेदितरज्जानु पितॄन् परिचरन्नपि"।

इति। अथवा। तुशब्दः पितृयज्ञादन्यत् व्यवच्छिनत्ति। तेनान्यत्र विशेषशास्त्रात् सर्व्वत्र यज्ञोपवीती भवतीति गम्यते। पितृयज्ञमात्रे प्राचीनावीतित्वमभिदधानः खल्वाचार्य्योऽर्थादन्यत्र यज्ञोपवीतित्वं दर्शयति। एकः शब्दोऽपरः खल्वार्थोऽप्यर्थो भवति। कर्म्मार्थस्य विन्यासविशेषः पितृयज्ञेऽवकाशमलभमानोऽन्यत्र निविशते। अर्थापत्तिरपि पञ्चमी प्रमाणानामिति हि तन्त्रस्थितिः। अन्यच्च पुरस्तादुक्तम्। एवशब्दश्च पित्र्ये कर्म्मणि प्राचीनावीतित्वं नियमयति। स्मरति च भगवान् मनुः।

"प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा।
पित्र्यमानिधनात् कार्य्यं विधिवद्दर्भपाणिना"।

इति॥ ४॥ *॥

यज्ञोपवीतिना कृत्यमित्येतद्व्याख्यातम्। आचान्तोदकेन कृत्यमित्येतदिदानीं व्याख्यायते।

उदगग्नेरुत्सृप्य प्रक्षाल्य पाणी पादौ चोपविश्य त्रिराचामेत् द्विः परिमृजीत॥ ५॥

अग्निसाध्यस्य सायंप्रातर्होमस्य प्रकृतत्वात्—गृह्याकर्म्मणाञ्च प्रायेणाग्निसाध्यत्वात्, उदगग्नेरित्याह। उदगुत्तरतः। कस्य? अग्नेः। उत्सृप्योत्क्रम्य। सर्पतिर्गच्छतिकर्म्मा। गत्वेत्येतत्। प्रक्षाल्याद्भिः, पाणी हस्तौ, पादौ चरणौ च। देवलस्तत्र विशेषं स्मरति।

"प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः ।
उदङ्मुखो वा दैवत्ये पैतृके दक्षिणामुखः" ।

इति । आपस्तम्बस्त्वाह । "प्रत्यक् पादावसेचनम्"—इति । क्रमस्तु पादप्रक्षालने—"सव्यं पादमवनेनिजे इति सव्यं प्रक्षालयेत्, दक्षिणं पादमवनेनिजे इति दक्षिणं प्रक्षालयेत्"—इति लिङ्ग-दर्शनादवगन्तव्यः । "सव्यं प्रक्षाल्य दक्षिणं प्रक्षालयति"—इति च गृह्यान्तरम् ।—'उपविश्य'—

"अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः ।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्" ।

इति स्मृत्यन्तरोक्तप्रकारेणेत्यर्थः । गृह्यासंग्रहोऽप्याह,

"होमः प्रतिग्रहोदानं भोजनाचमनानि च ।
अवहिर्जानु कार्य्याणि माङ्गुष्ठान्येवमाचरेत्" ।

इति । 'त्रिः'—त्रिवारं, 'आचामेत्'—'आचान्तोदकेन हृत्यम'—इत्यस्य परिदर्शकतया—'अप' इति वाक्यशेषः । "त्रिः पिबदम्बु वीचितम्"—इति च स्मृत्यन्तरम् । अत्र त्रिराचामेदित्यभिदधान-आचार्य्यः—त्रिरभ्यक्षणमाचमनमन्यदितिकर्त्तव्यतेति दर्शयति मन्वर्थ-मुक्तावल्यामप्येवम् । 'द्विः' वारद्वयम्, 'परिमृजीत'—

"संहृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततोमुखम्" ।

इति स्मरणान्मुखमङ्गुष्ठमूलेन प्रमृज्यादित्यर्थः ॥ ५ ॥ * ॥

पादावभ्युक्ष्य शिरोऽभ्युक्षेत् ॥ ६ ॥

अद्भिरिति सामर्थ्यात् । स्पष्टमन्यत् । विसमासकरणं पादाभ्यु-क्षणशेषेण शिरोऽभ्युक्षणनिषेधार्थमिति भट्टभाष्यम् ॥ ६ ॥ * ॥

इन्द्रियाण्यद्भिः संस्पृशेत् ॥ ७ ॥

इन्द्रियाणि, इन्द्रियानाममूर्त्तत्वात् इन्द्रियायतनानि गोलकानि, अद्भिः करणभूताभिः, उदकार्द्रेण हस्तेनेत्येतत्। प्रतीन्द्रियमित्यर्थः। संस्पृशेत्'—सम्यक् स्मृत्यन्तरोक्तप्रकारेण स्पृशेत् ॥ ७ ॥ * ॥

कानि तानि इन्द्रियाणि?—इत्यत आह।

अक्षिणी नासिके कर्णाविति ॥ ८ ॥

अक्षिणी, चक्षुषी। नासिके, नासाच्छिद्रे। कर्णौ, श्रोत्रे। 'संस्पृशेत्' इति सम्बध्यते। इतिरन्यदपि स्मृत्यन्तरोक्तं समुच्चिनोति। उपन्यासमात्रमेवेदम्। क्रमश्च शास्त्रान्तरीय एव भवति। तदाह दक्षः।

"प्रक्षाल्य पाणी पादौ च त्रिः पिबेदम्बु वीक्षितम्।
संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्।
संहत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्।
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः।
नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै।
सर्व्वाभिश्च शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्"।

इति। नन्वाचार्य्येण क्रमस्यानुक्तत्वात् पाठक्रमेणैवानुष्ठानं कुतो स्यादिति चेत्। उच्यते।

दक्षसंहिता किल परिशिष्टकल्पा सून्यन्तरीयग्रन्थानामिति तदुक्तक्रमग्रहणं न दोषाय। तथाचोक्तं तेनैव,

"उक्तं कर्म्म क्रमोनोक्तो न कल्पो मुनिभिः स्मृतः ।
द्विजानान्तु हितार्थाय दक्षस्तु स्वयमब्रवीत्" ।

इति । अतएव सर्व्वमेतत् स्पष्टयति कर्म्मप्रदीपे कात्यायनः ।

"त्रिः प्राश्यापो द्विरुन्मृज्य मुखमेतानुपस्पृशेत् ।
आस्यनासाक्षिकर्णांश्च नाभिवक्षःशिरोंऽसकान् ।
संहताभिस्त्र्यङ्गुलीभिरास्यमेवमुपस्पृशेत् ।
अङ्गुष्ठेन प्रदेशिन्या घ्राणञ्चैवमुपस्पृशेत् ।
अङ्गुष्ठानामिकाभ्याञ्च चक्षुः श्रोत्रं पुनः पुनः ।
कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयन्तु तलेन वै" ।

इति ॥ ८ ॥ * ॥

यद्यन्मीमाꣳस्यꣳ स्यात्तत्तदद्भिः सꣳस्पृशेत ॥ ९ ॥

यत् यत्, इन्द्रियमन्यद्वाऽङ्गं 'मीमांस्यं'—मीमांसाविचारः इदं शुद्धं जातं न वेति सन्देहनिरासाय, विचार्य्यं—विचारार्हं भवति, तत्तदद्भिरुदकेन, संस्पृशेत्—प्रक्षालयेत्, न तु संशयनिरासाय विचारं कुर्य्यादित्यर्थः ॥ ९ ॥ * ॥

तत्रैतदाहुः ॥ १० ॥

तत्र तस्मिन्नाचमने, एतत् वक्ष्यमाणमाहुर्ब्राह्मणवाक्यानीति वाक्यशेषः । सूत्रञ्चेदमाभासान्तं शिष्याणां सुखावबोधार्थं भवति ॥ १० ॥ * ॥

नोपस्पृशेद्व्रजन् ॥ ११ ॥

न उपस्पृशेदाचामेत्, व्रजन्। व्रजतिर्गच्छतिकर्मा। गच्छन्नित्यर्थः ॥ ११ ॥ * ॥

न तिष्ठन् ॥ १२ ॥

न—"उपस्पृशेत्"--इति सम्बध्यते प्रतिवाक्यमितः प्रभृति। 'तिष्ठन्'— ऊर्द्धः सन् ॥ १२ ॥ * ॥

न हसन् ॥ १३ ॥

न, स्मयमानः—इति भट्टभाष्यम्। न हास्यं कुर्व्वन्निति फलितार्थः ॥ १३ ॥ * ॥

न विलोकयन् ॥ १४ ॥

इतस्ततः किञ्चन विलोकयन्नोपस्पृशेत् । १४ ॥ ० ॥

नाप्रणतः ॥ १५ ॥

उपविष्टोऽप्यप्रणतोऽनवनतपूर्व्वकायोनोपस्पृशेत्, उच्छिष्टानामपामङ्गेषु पातसम्भवादित्यभिप्रायः ॥ १५ ॥ ० ॥

नाङ्गुलीभिः ॥ १६ ॥

न उपस्पृशेदङ्गुलीभिरूर्द्ध्वमुदकमुत्क्षिप्येत्यर्थः ॥ १६ ॥ ० ॥

नातीर्थेन ॥ १७ ॥

तीर्थादाचमनार्थशास्त्रविहिताद् यदन्यत्तदतीर्थमित्युच्यते। पर्य्युदासार्थः खल्वयं निपातः। तेनातीर्थेन पित्र्येण नोपस्पृशेत्। स्मरति च भगवान् मनुः।

"ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन" ।

इति । तान्येतानि तीर्थानि—

"कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्" ।

इति स्मृत्यन्तरादवगन्तव्यानि ॥ १७ ॥ ० ॥

न सशब्दम् ॥ १८ ॥

सशब्दं यथा भवति, न तथोपस्पृशेत् ॥ १८ ॥ ० ॥

नानवेक्षितम् ॥ १९ ॥

अनवेक्षितमदृष्टमुदकं नोपस्पृशेत् ।

"रात्राववीक्षितेनापि शुद्धिरुक्ता मनीषिभिः" ।

इति स्मरणाच्च रात्रावेतन्नियम इति वदन्ति ॥ १९ ॥ ० ॥

न बाह्याꣳसः ॥ २० ॥

जानुभ्यां बाह्यौ— बहिष्कृतावंसौ— "अन्तर्जान्वोरन्तरा कृत्वा शिरपोच्चाद्रीः पिबेत्"—इति स्मृत्यन्तरदर्शनात्—हस्तौ यस्य, सोऽयं बाह्यांसो नोपस्पृशेत् ॥ २० ॥ ० ॥

नान्तरीयैकदेशस्य कल्पयित्वोत्तरीयताम् ॥ २१ ॥

अधःपरिधानमन्तरीयमित्याचक्षते । तस्यान्तरीयस्य,—एकदेशस्यावयवस्य, उत्तरीयतां कल्पयित्वा । एकवासा इत्येतत् ॥ २१ ॥ ० ॥

नोष्णाभिः ॥ २२ ॥

न, उपस्पृशेत्—उष्णाभिः, वह्नितप्ताभिरद्भिर्न पुनर्घर्मतप्ताभि-रपीत्यर्थः।

"उदकेनातुराणाञ्च तथोष्णेनोष्णपायिनाम्"।

इति स्मृत्यन्तरदर्शनादनातुरः पुरुष इति वाक्यशेषः ॥ २२ ॥

न सफेनाभिः ॥ २३ ॥

अद्भिरित्येव ॥ २३ ॥ ० ॥

न च सोपानत्कः क्वचित् ॥ २४ ॥

चकारोऽप्यर्थे भिन्नक्रमो द्रष्टव्यः। उपानहौ प्रसिद्धे, ताभ्यां सहितः पुरुषः सोपानत्क इत्युच्यते। सोऽयं सोपानत्कः, क्वचित्—कस्याञ्चिदप्यवस्थायाम्।

"राज्ञां गुरूणां देवानां न दुष्येदन्तिके चरन्।
आजानुपत्तचरणस्तथाऽऽचमनकर्मणि"।

इति स्मृत्यन्तरोक्तायामपि। नोपस्पृशेत्। सोऽयं कौथुमादीनां विशेषविधिः। भट्टभाष्ये त्विदं स्मृत्यन्तरमस्यापवादतया वर्णि-तम् ॥ २४ ॥ ० ॥

कासक्तिकः ॥ २५ ॥

"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्"।

इति स्मृत्यन्तरदर्शनात्—'के,' शिरसि, आसक्तिका आवेष्टिका

कृता येन, सोऽयं कासक्तिकः कृतशिरोवेष्टनः। 'नोपस्पृशेत्' इति सम्बध्यते। बद्धपरिकरः कञ्चुकी चैवमुच्यते इत्यप्याहुः॥ २५॥०॥

गले बद्धः॥ २६॥

गलावलम्बितवासाः, प्रावृतोत्तरासङ्ग इत्येतत्। 'नोपस्पृशेत्'—इत्यनुवर्त्तते॥ २६॥ ०॥

चरणौ न प्रसार्य्य च॥ २७॥

चरणौ पादौ, प्रसार्य्य वितत्य। चशब्दः—

"नासनारूढ़चरण आचामेन्न जपेत् क्वचित्"।

इति स्मृत्यन्तरोक्तं समुच्चिनोति। तेन, तथाविधश्च, न, उपस्पृशेत्॥ २७॥ ०॥

अन्ततः प्रत्युपस्पृश्य शुचिर्भवति॥ २८॥

अन्ततोऽद्ययोक्ताचमनात् परतः, प्रत्युपस्पृश्य स्पृष्टोदकं पाणिना, शुचिर्भवति पुरुष इत्यर्थः। अन्ततोमध्यत इन्द्रियायतनान्युपस्पृश्य शुचिर्भवति, न पार्श्वत इत्यन्ये॥ २८॥ ०॥

हृदयस्पृशस्त्वेवाप आचामेत्॥ २९॥

हृदयं याः स्पृशन्ति, ता इमा हृदयस्पृश एवाप आचामेदिति हृदयस्पृश आपोनियम्यन्ते। तुशब्दश्चशब्दार्थः—

"हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः।
वैश्योऽद्भिः प्राशिताभिश्च शूद्रः स्पृष्टाभिरन्ततः"।

इति स्मृत्यन्तरोक्तं समुच्चिनोति॥ २९॥ ०॥

उच्छिष्टोहैवातोऽन्यथा भवतीति ॥ ३० ॥

उच्छिष्टोह किल इत्येतिह्यार्थकोऽनर्थको वा निपातः। उच्छिष्ट-एव न शुद्ध इत्यर्थः। अतोऽस्मात् यथोक्तात् विधेरन्यथाऽन्येन प्रकारे-णाचान्तोऽपि भवति। इतिर्ब्राह्मणवाक्यसमाप्तिं द्योतयति ॥ ३० ॥ ० ॥

अथ प्रत्युपस्पर्शनानि ॥ ३१ ॥

अथोपस्पर्शनान्तरं प्रति पुनरुपस्पृश्यन्ते येषु निमित्तेषु, तानी-मानि प्रत्युपस्पर्शनानि—द्विराचमननिमित्तानीत्येतत्। वक्ष्यन्ते इति वाक्यशेषः ॥ ३१ ॥ ० ॥

सुप्त्वा, भुक्त्वा, क्षुत्वा, स्नात्वा, पीत्वा, विपरिधाय च, रथ्यामाक्रम्य, श्मशानञ्चाचान्तः पुनराचामेत् ॥ ३२ ॥

सुप्त्वा—निद्रामासेव्य, भुक्त्वा—भक्षयित्वा,—किञ्चिद्भक्ष्यमित्यर्थात्, क्षुत्वा— क्षुतं कृत्वा, स्नात्वा— आप्लुत्य, पीत्वा— पेयमुदकादि, विपरिधाय— वासः। चः समुच्चये।

"होमे भोजनकाले च सन्ध्ययोरुभयोरपि।
आचान्तः पुनराचामेद्वासोविपरिधाय च"।

इत्येवमादिस्मृत्यन्तरोक्तं समुच्चिनोति। रथ्या प्रतोली विशिखेत्यनर्थान्तरम्। तामाक्रम्य, शवानां शयनं श्मशानम्, चकारादाक्रम्येत्यनुषज्यते। आचान्तः कृताचमनः सन् पुनर्भूय-आचामेदिति द्विराचमनमेषु निमित्तेषु कर्त्तव्यमन्यत्र कर्मकालात्। तथाच स्मृत्यन्तरम्।

"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने ।
कर्म्मस्थ एषु नाचामेद्दक्षिणश्रवणं स्पृशेत्" ।

इति । अतएव,

"क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथाऽनृते ।
पतितानाञ्च संभाषे दक्षिणं श्रवणं स्पृशेत्" ।

इति गृह्यासंग्रहवाक्यमपि सङ्गच्छते ॥ ३२ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज-श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथम-प्रपाठकस्य द्वितीयः खण्डः ॥ ० ॥

प्रथमप्रपाठके तृतीयः खण्डः।

उक्तौ सायंप्रातर्होमकालौ, अथेदानीमावृदनयोर्वक्तव्या—कथं होतव्यमिति। तामाह।

अग्निमुपसमाधाय परिसमूह्य दक्षिणजान्वक्तो दक्षिणेनाग्निमदितेऽनुमन्यस्वेत्युदकाञ्जलिं प्रसिञ्चेत् ॥ १ ॥

प्रादुष्कृतमग्निमुप समीपे होमकालस्य, समाधायेन्धनेन सम्यगाधाय प्रज्वाल्य, परि सर्व्वतोभावेन समूह्य विक्षिप्तानम्यवयवानेकीकृत्य, मन्त्रानुपदेशादमन्त्रकमित्यभिप्रायः। यत् पुनराचार्य्य एव समन्त्रकं परिसमूहनं वक्ष्यति—"इमं स्तोममिति त्यृचेन परिसमूहेत्"—इति। तदत्र न भवति। इह मन्त्रानुपदेशात्। क्षिप्रहोमत्वाच्चास्य। तदाह कर्म्मप्रदीपः।

"न कुर्य्यात् क्षिप्रहोमेषु द्विजः परिसमूहनम्।
वैरूपाक्षञ्च न जपेत् प्रपदञ्च विवर्ज्जयेत्"।

इति। क्षिप्रं ये हूयन्ते त इमे क्षिप्रहोमाः सायंप्रातर्होमादय उच्यन्ते। तदनेन परिसमूहनस्य निषेधादाचार्य्येण परिसमूह्येति करणाद्यामन्त्रकमेव परिसमूहनमत्र करणीयं, न तु इमं स्तोममिति त्यृचेनेति सिध्यते। न च,

"यत्र मन्त्रा न विद्यन्ते व्याहृतीस्तत्र योजयेत्।

मन्त्राणामेव चादेशे मन्त्रात् कर्म्म समाचरेत्"।

इति गृह्यासंग्रहोक्तो व्याहृतिप्रयोगः कथं न भवतीति वाच्यम्।

"सायं प्रातर्वैश्वदेवे पितृयज्ञे तथैवच।

कम्बूके गोमये नित्यं व्रतानां समिधासु च।

चैत्ये यूपे व्रीहियवे भूमावप्सु च याज्ञिकैः।

व्याहृतीर्न प्रयोक्तव्या यज्ञवास्तुक्रिया तथा"।

इति तत्रैवास्मिन् कर्म्मणि तन्निषेधात्। एवं स्तरणमप्यत्र न कर्त्तव्यम्। कस्मात्? इतः परं स्तरणाम्नानात्। इतः परं खल्वाचार्य्यः स्तरणमभिदधानः नाल्पेषु स्तरणमिति दर्शयति। तदप्याह कर्म्मप्रदीप एव।

"यान्यधः स्तरणाम्नानान्न तेषु स्तरणं भवेत्।

एककार्य्यार्थसाध्यत्वात् परिधीनपि वर्ज्जयेत्"।

इति। ब्रह्मस्थापनमपि नास्त्येव। कस्मात्? तदधः समाम्नानादेव। अतएव गृह्यान्तरम्।

"एकसाध्येष्ववर्हिःषु न स्यात् परिसमूहनम्।

नोदगासादनञ्चैव चिप्रहोमा हि ते स्मृताः"।

इति चिप्रहोमानामेकसाध्यत्वम्—होतृमात्रसाध्यत्वं दर्शयति गृह्यासंग्रहोऽप्याह।

"राकाग्नौ पितृयज्ञे च ब्रह्माणं नोपकल्पयेत्।

सायंप्रातश्च होमेषु तथैव वलिकर्म्मसु"।

इति। न्यञ्चकरणन्तु—इदं भूमेर्भजामह इति—कर्त्तुमुचितम्। कस्मात्? "पूर्व्वेषु चैके"—इति तस्य पक्षप्राप्तत्वात्। न खल्वेतत्

प्रतिषिध्यते। परमकरणेऽपि न वैगुण्यं भवति; पक्षप्राप्तत्वादेव। एकेषां खल्वाचार्य्याणां मतम्—कर्त्तव्यमिति, न कर्त्तव्यमिति चापरेषाम्। तस्मात् करणेऽभ्युदयः, अकरणे चावैगुण्यमिति सिद्धम्। तत्प्रकारश्च कर्म्मप्रदीपे दर्शितः।

"दक्षिणं वामतोबाह्यमात्माभिमुखमेव तु।
करं करस्य कुर्वीत करणे न्यञ्चकर्म्मणः"।

इति। दक्षिणजान्वक्तः,—दक्षिणं जानु अक्तम्—(अञ्चतिर्गच्छतिकर्म्मा) गतं, भूमिमित्यर्थात् यस्य, स दक्षिणजान्वक्तः भूमिगतदक्षिणजानुकइत्यर्थः। स खल्वयं दक्षिणजान्वक्तः, 'दक्षिणेनाग्निं' दक्षिणस्यामदूरवर्त्तिन्यान्दिश्यग्नेः, अदितेऽनुमन्यस्वेत्यनेन मन्त्रेण करणभूतेन मन्त्रं पठित्वेत्यर्थः। "मन्त्रान्ते कर्म्मादिसन्निपातः"—इति न्यायात्। 'उदकाञ्जलिं' विन्यासविशेषविशिष्टहस्तावञ्जलिरित्याचक्षते। 'उदकपूरितोऽञ्जलिः' अञ्जलेर्व्वा उदकमित्युदकाञ्जलिः। तमिममुदकाञ्जलिं प्रसिञ्चेत् प्रागग्रमित्यर्थः। अग्नेः खलु दक्षिणस्यामदूरवर्त्तिन्यां दिश्ययं प्रसेकः पूर्व्वाभिमुखश्च होता भवति। "प्राञ्चि उदञ्चि वा कर्म्माण्यनुतिष्ठेरन्"—इति च ब्राह्मणम् ॥ १ ॥ * ॥

अनुमतेऽनुमन्यस्वेति पश्चात् ॥ २ ॥

पश्चात् पश्चिमायां दिश्यग्नेः—उदकाञ्जलिं प्रसिञ्चेदित्यनुवर्त्तते। उदगग्रमित्यर्थः। गतमन्यत् ॥ २ ॥ * ॥

सरस्वत्यनुमन्यस्वेत्युत्तरतः ॥ ३ ॥

उत्तरत उत्तरस्यां दिश्यग्नेरुदकाञ्जलिं प्रसिञ्चेत् पूर्व्वाग्रम्। शिष्टमन्यत् ॥ ३ ॥ * ॥

देव सवितः प्रसुवेति प्रदक्षिणमग्निं पर्य्युक्षेत् सकृद्वा त्रिर्वा ॥ ४ ॥

देव सवितः प्रसुवेत्यनेन मन्त्रेण करणभूतेन प्रदक्षिणं यथा भवत्यग्नेस्तथाऽग्निं पर्य्युक्षेत् परिषिञ्चेदेकयैवोदकाञ्जलिधारयेत्यर्थः। सकृदेकवारं वा त्रिर्वारत्रयं वा यथा भवति तथा पर्य्युक्षेदिति क्रियाविशेषणमेतत्। पर्य्युक्षणञ्चेदावर्त्त्यते मन्त्रोऽप्यावर्त्तनीयः। करणत्वादस्य। प्रधानस्य ह्यावृत्तौ तदनुयायिनोगुणा अप्यावर्त्तन्ते। वाशब्दौ तुल्यवद्विकल्पार्थौ। तदत्र त्रिरावृत्तिपक्षे फलभूमा कल्पनीयः। इतरथा लघुप्रयत्नसाध्ये सकृत् पर्य्युक्षणे यावानर्थ-स्तावानेव चेत् गुरुप्रयत्नसाध्ये पक्षान्तरेऽपि स्यात्;—स्यात्तर्हि-प्रामाण्यमेवाननुष्ठानलक्षणमस्य। कः खल्वनुन्मत्तः सत्यप्यल्पीय-स्युपाये तावन्तमेवार्थमुत्पिपादयिषुर्गरीयांसमुपायमुपादत्ते। अत-एवाह कात्यायनः।

"यत्र स्यात् कृच्छ्रभूयस्त्वं श्रेयसोऽपि मनीषिणः।
भूयस्त्वं ब्रुवते तत्र कृच्छ्रात् श्रेयोह्यवाप्यते"॥

इति॥ ४ ॥ ० ॥

पर्य्युक्षणप्रकारमाह।

पर्य्युक्षणान्तान् व्यतिहरन्नभिपर्य्युक्षन् होमीयम् ॥ ५ ॥

दण्डरज्जूदकधारादिष्वादिरप्यन्तशब्दो भवतीत्याहुः। बहु-वचनश्रुतिस्त्रिर्वितिपक्षाभिप्राया। तदयमर्थः। पर्य्युक्षणानां पर्य्यु-क्षणोदकधाराणामन्तान् व्यतिहरन् अभ्यन्तरतः कुर्व्वन्नित्यर्थः।

अनेनैतदुक्तं भवति। पर्य्युक्षणारम्भकोटिमभ्यन्तरतोऽवसानकोटिञ्च वहिः कुर्य्यादिति। व्यतिहरन् व्यतियोजयन् मिश्रीकुर्व्वन्निति वा। अन्ये त्वाहुः—व्यतिहारोविकर्षः व्यतिहरन् विक्रष्टान्तरालान् कुर्व्वन्नित्यर्थः—इति। होमीयं होमार्थमुपक्लृप्तं व्रीह्यादि, अभिपर्य्युक्षन् धारया अभ्यन्तरतः कुर्व्वन्नित्यर्थः। अथवा। अभिपर्य्युक्षन् आभिमुख्येन सिञ्चन् स्पर्शयन्नित्येतत्। 'अग्निं पर्य्युक्षेत्'—इति पूर्व्वसूत्रस्य सम्बध्यते॥ ५॥ ० ॥

अथ हविष्यस्यान्नस्याग्नौ जुहुयात् कृतस्य वाऽकृतस्य वा॥ ६॥

अथेत्यानन्तर्य्यार्थोविशिष्टमानन्तर्य्यमभिद्योतयति।

"समिदादिषु होमेषु मन्त्रदैवतवर्ज्जिता।
पुरस्ताच्चोपरिष्टाच्च इन्धनार्थं समिद्भवेत्"॥

इति कर्म्मप्रदीपदर्शनात् पर्य्युक्षणानन्तरं तूष्णीं समिधमाधायेत्यर्थः। आचार्य्यपुत्रोऽप्याह।

"सर्व्वेषामेव होमानां समिदादौ विधीयते।
कर्म्मान्ते चैवमेव स्यात् स्वाहां तत्र न कारयेत्"॥

इति। समिच्च प्रोक्षितैवाधातव्येत्याहापस्तम्बः। "नाप्रोक्षितमिन्धनमग्नावादध्यात्"—इति। हविष्यस्य हविषि साधोः—

"हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः।
माषकोद्रवगौरादीन् सर्व्वालाभेऽपि वर्ज्जयेत्"॥

इति कर्म्मप्रदीपोक्तस्य माषकोद्रवादिवर्ज्जस्य यवादेः। अन्नस्य

भक्षणीयस्य कीटाद्यदुष्टतया भक्षणयोग्यस्येत्येतत्। षष्ठी चेयं सम्बन्धार्था। हविष्येणानेनाग्नौ जुहुयात् होममभिनिर्व्वर्त्तयेदित्यर्थः। अथवा। अवयवार्थैवेयं षष्ठी द्रष्टव्या। हविष्यस्यान्नस्यावयवेन होम-मभिनिर्वर्त्तयेत्—इति। किमनेनोक्तं भवति? एतदनेनोक्तं भवति। न सर्व्वमिह हविष्यमन्नं होतव्यम्। किन्तर्हि? अवयवस्तस्य होतव्यः—यथाऽवगम्यते तथा होतव्यम्—इति। स खल्वयं होमः—

"होमपात्रमनादेशे द्रवद्रव्ये स्रुवः स्मृतः।
पाणिरेवेतरस्मिंस्तु स्रुचा चात्र न हूयते"॥

इति।

"पाण्याहुतिर्द्वादशपर्व्वपूरिका
कंसादिना चेत् स्रुवमात्रपूरिका।
दैवेन तीर्थेन च हूयते हवि-
र्व्वङ्गारिणि स्वर्चिषि तच्च पावके"॥

इति च कर्म्मप्रदीपदर्शनात्।

"उत्तानेनैव हस्तेन ह्यङ्गुष्ठाग्रेण पीडितम्।
संहताङ्गुलिपाणिस्तु वाग्यतो जुहुयाद्धविः"॥

इति गोभिलपरिशिष्टवचनाच्च, यथोक्तप्रमाणं यथोक्तं हवि-र्होता यथोक्तेन प्रकारेण दक्षिणेन पाणिना कर्त्तव्यः। अत्र च पुनः—'अग्नौ'—इति सूचयन्नाचार्य्यः—समिद्धे वह्नौ होतव्यमिति द्योतयति। सूचितं खल्वाचार्य्येण पुरस्तादेव—"एतस्मिन्नग्नौ होमो-विधीयते"—इति। तदाह कर्म्मप्रदीपः।

"योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः।

मन्दाग्निरामयावी च दरिद्रश्चोपजायते॥
तस्मात् समिद्धे होतव्यं नासमिद्धे कदाचन।
आरोग्यमिच्छताऽऽयुश्च श्रियमात्यन्तिकीन्तथा"॥

इति। समिन्धनञ्चाग्नेर्व्यजनादिना कर्त्तव्यमित्यप्याह स एव।

"जुह्वंश्च हुते चैव पाणिसूर्पस्फ्यदारुभिः।
न कुर्य्यादग्निधमनं कुर्य्याद्वा व्यजनादिना॥
मुखेनैके धमन्त्यग्निं मुखाद्ध्येषोऽध्यजायत।
नाग्निं मुखेनेति च यल्लौकिके योजयन्ति तत्"॥

इति। गृह्यासंग्रहः।

"न वस्त्रेण धमेदग्निं न सूर्पेण न पाणिना।
मुखेनोपाधमेदग्निं मुखाद्ध्येषोऽध्यजायत"॥

इति। होमे च कर्त्तव्ये यत्र यदभिधानोऽग्निस्तत्र तमाहूय संपूज्य होतव्यम्।

"सम्पूजयेत्ततो वह्निं दद्याच्चैवाहुतीः क्रमात्"।

इति स्मरणात्।

"आहूय चैव होतव्यं यत्र यो विहितोऽनलः"।

इति गृह्यासंग्रहवचनाच्च। यत्र चाग्निर्यदभिधानो भवति तदाह गृह्यासंग्रहः।

"लौकिकः पावकोह्यग्निः प्रथमः परिकीर्त्तितः।
अग्निस्तु मारुतो नाम गर्भाधाने विधीयते॥
पुंसवने चन्द्रनामा शुङ्गाकर्म्मणि शोभनः।
सीमन्ते मङ्गलो नाम प्रगल्भो जातकर्म्मणि॥

नाम्नि स्यात् पार्थिवो ह्यग्निः प्राशने च शुचिस्तथा ।
सभ्यनामाऽथ चूड़े तु व्रतादेशे समुद्भवः ॥
गोदाने सूर्य्यनामा स्यात् केशान्ते ह्यग्निरुच्यते ।
वैश्वानरोविसर्गे च विवाहे योजकः स्मृतः ॥
चतुर्थ्यान्तु शिखी नाम धृतिरग्निस्तथाऽपरे ।
आवसथ्ये भवो ज्ञेयो वैश्वदेवे तु पावकः ।
ब्रह्मा वै गार्हपत्ये स्यादीश्वरो दक्षिणे तथा ।
विष्णुराहवनीये तु अग्निहोत्रे त्रयोऽग्नयः ॥
लक्षहोमे च वह्निः स्यात् कोटिहोमे हुताशनः ।
प्रायश्चित्ते विधिश्चैव पाकयज्ञे च साहसः ॥
देवानां हव्यवाहस्तु पितॄणां कव्यवाहनः ।
पूर्णाहुत्यां मृड़ोनाम शान्तिके वरदस्तथा ॥
पौष्टिके बलदश्चैव क्रोधोऽग्निश्चाभिचारिके ।
वश्यार्थे कामदो नाम वनदाहे तु दूतकः ॥
कोष्ठे तु जठरो नाम क्रव्यादोमृतभक्षणे ।
समुद्रे वाड़वो ज्ञेयः क्षये संवर्त्तको भवेत्" ॥

इति । विशेषनामासम्भवे च विश्वरूपो नामाग्निः सर्व्वत्र भवति ।

"सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः ।
विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु" ॥

इति गृह्यासंग्रहवचनात् । हविष्यस्यान्नस्येत्येतदिशिनष्टि;— 'कृतस्य' ओदनादेर्व्वा, 'अकृतस्य' व्रीह्यादेर्व्वा । तदाह कात्यायनः ।

"कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम् ।

व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा मतम्" ॥

इति। व्याख्यातौ वाशब्दौ ॥ ६ ॥ * ॥

अकृतश्चेत् प्रक्षाल्य जुहुयात् प्रोदकं कृत्वा ॥ ७ ॥

अकृतं व्रीह्यादि, चेत् यदि, जुहुयात्,—तर्हि पूर्व्वमेव तत् प्रक्षाल्य— "त्रिर्देवेभ्यः प्रक्षालयेदित्याहुः"— इति लिङ्गदर्शनात् देवार्थलाचास्य वारत्रयमिति वाक्यशेषः। प्रगतमुदकं यस्मात्तदिदं प्रोदकम्—प्रगतोदकं कृत्वा जुहुयात्। तदयमर्थः। पूर्व्वमेव व्रीह्यादि प्रक्षाल्य प्रगतोदकञ्च कृत्वा संस्थापयेत् शुचौ भाजने। आगते च होमकाले तस्मादेवोद्धृत्योद्धृत्य जुहुयात्। न तु होमकाले प्रक्षालयेत्। अप्रगतोदकतयाऽग्नेरपचयापत्तेरित्यभिप्रायः। शब्दप्रमाणकत्वादस्यार्थस्य न किमपि शङ्कितव्यम्। तस्मादेव च नास्ति कृतस्य प्रक्षालनापेक्षा। न खल्वस्ति शब्दः—कृतं प्रक्षालयेदिति ॥ ७ ॥ * ॥

अथ यदि दधिपयोयवागूं वा, कंसेन वा चरुस्थाल्या वा स्रुवेण वै वा ॥ ८ ॥

अथ व्रीहियवयोरभावे, यदि—दधि, पयो, यवागूं वा जुहुयात्। यवागूर्यवसृष्टकः। स खल्वयं दध्यादिहोमानुवादो दध्यादिहोमविधिमनुमापयति—व्रीहियवयोरभावे दध्यादि जुहुयादिति। कस्मात्? प्राप्त्यनुसारित्वादनुवादस्य। यथा चतुरवत्तं पञ्चावत्तं वा जुहोतीति होमानुवादो होमविधिम्। यथा वा—

"असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्।

उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः" ॥

इति दर्भेषु विकिरानुवादो दर्भेषु विकिरविधिम्। तथा चोक्तम्।

"लिङ्गादपि विधिर्ज्ञेयो दर्भेषु विकिरो यथा"।

इति। यथा वा—"यद्युवा उभयं चिकीर्षेद्धौचञ्चैव ब्रह्मत्वञ्चैव"—इत्युभयचिकीर्षाऽनुवादस्तदुभयचिकीर्षाविधिमिति। दृश्यते च—"यदि ब्राह्मणो यजेत, बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाऽभिघारयेत्, यदि राजन्य ऐन्द्रं, यदि वैश्यो वैश्वदेवम्"—इति यदिकाद्याख्यानात् ब्राह्मणादीनां क्रतोर्विधानमिति। तथाच ग्रह्यान्तरम्।

"अभावे व्रीहियवयोर्दध्ना वा पयसाऽपि वा।

तदभावे यवाग्वा वा जुहुयादुदकेन वा"।

इति। तदयमर्थः। यदि व्रीहियवयोरभावे दधि पयो जुहुयात्—"खादिरे बध्नाति, पालाशे बध्नाति, रोहितके बध्नाति"—इतिवदनयोरपि दधिपयसोर्विकल्पः। वाशब्दाभावस्तु तुल्यवद्विकल्पार्थः। तयोरप्यभावे यदि यवागूं वा जुहुयात्—तर्हि कंसेन कांस्यभाजनेन वा जुहुयात्। 'चरुस्थाल्या' चर्वर्थञ्च श्रप्यते, सा चरुस्थालीत्युच्यते। तथा चरुस्थाल्या—

"तिर्य्यगूर्द्ध्वं समिन्मात्रा दृढ़ा नातिबृहन्मुखी।

मृन्मय्यौदुम्बरी वापि चरुस्थाली प्रशस्यते"।

इति कर्म्मप्रदीपोक्तलक्षणया वा जुहुयात्। 'स्रुवेण', स्रुवः खलु होमपात्रमुच्यते—

"खादिरो वाथ पालाशो द्विवितस्तिः स्रुवः स्मृतः।

स्रुग्बाहुमात्रा विज्ञेया वृत्तस्तु प्रग्रहस्तयोः।

स्रुवाग्रे घ्राणवत् खातं द्व्यङ्गुष्ठपरिमण्डलम्।

जुह्वाः शराववत् खातं सनिर्व्वाहं षडङ्गुलम्"।

इति कर्म्मप्रदीपोक्तलक्षणः। तेन स्रुवेण वा जुहुयात्। 'वै'—इति प्रसिद्धार्थकोनिपातः स्रुवस्यैवंविधेषु होमेषु प्रसिद्धिं द्योतयति। कात्यायनोऽप्याह।

"होमपात्रमनादेशे द्रवद्रव्ये स्रुवः स्मृतः"।

इति। तत्रश्चाभावविकल्पोऽयम् 'कंसेन वा चरुस्थाल्या वा'—इति। तस्मात् स्रुवेणेति प्रथमः कल्पः। तस्य त्वभावे कंसचरुस्थाल्योर्विकल्प इति सिद्धम्।

केचिदत्र सूत्रद्वयं कल्पयन्ति। तत्र—"अथ यदि दधि पयो-यवागूं वा"—इत्येकं, "कंसेन वा चरुस्थाल्या वा स्रुवेण वै वा"—इति चैकं सूत्रमिति मन्यन्ते। विवरणञ्चेत्थं कुर्व्वन्ति। अथ यदि-शब्दौ प्रश्नाध्याहारार्थौ। अथ यदि व्रीहियवयोरभावः स्यात् किं जुहुयात्?—इति प्रश्नोऽध्याहार्य्यः। एवं पृष्ट आह—दधि जुहु-यात्, पयो जुहुयात्, तयोरप्यभावे यवागूं वा जुहुयात्। व्रीह्यादि-स्तावत् पाणिना होमः सिद्धः, दध्यादि केन जुहुयात्?—इत्यत-आह। "कंसेन वा चरुस्थाल्या वा स्रुवेण वै वा"। उक्तार्थमन्यत्। यथाश्रुतसूत्रपाठेनैवोपपत्तौ किमर्थमयं प्रयास इति न खल्वधि-गच्छामि॥ ८॥ *॥

अग्नये स्वाहेति पूर्व्वां तूष्णीमेवोत्तरां मध्ये चैवा-पराजितायाञ्चैव दिशीति सायम्॥ ९॥

अग्नये स्वाहेत्यनेन मन्त्रेण पठितेन पूर्व्वां प्रथमां यथोक्त-

हविराहुतिं जुहुयात्। ताञ्चेमां पूर्व्वामाहुतिं मध्य एवाग्नेर्जुहुयात्— न तु दध्यादिहोमपक्षेऽप्यग्नेरपचयाशङ्कां कुर्य्यादित्येवकारार्थः। तूष्णीमेवेत्येवकारो वाग्व्यापारप्रतिषेधं नियमयत्युत्तरस्यामाहुतौ। सेयमुत्तराऽऽहुतिर्मन्त्रदैवतयोरनादेशात्, प्रधानाहुतितया चामन्त्र-दैवतताया अनुचितत्वात्,—"तद्युक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्"—इति च दैवतानियमात्, प्रजापतये स्वाहेति मनसैवोच्चार्य्य मन्त्रं होतव्या। कस्मात् पुनः कारणात् प्रजापतये स्वाहेत्ययमत्र मन्त्रो भवति?

"आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते।

मन्त्रस्य देवतायाश्च प्रजापतिरितिस्थितिः।

इति कात्यायनस्मरणात्। न खलु वाग्व्यापारप्रतिषेधनियमे-ऽपि मनसोव्यापारः प्रतिषिद्धो भवति। तस्मात् प्रजापतये स्वाहेत्ययं मन्त्रः मनसैवोच्चारणीयो होमार्थम्। "यदग्नये च प्रजापतये च सायं जुहोति"—इति। "तस्मात् प्राजापत्यां मनसा जुहोति मनो हि प्रजापतिः"—इति च ब्राह्मणम्। "अग्नये स्वाहा प्रजापतये स्वाहा इति सायं, सूर्य्याय स्वाहा प्रजापतये स्वाहा इति प्रातः',—इति च गृह्यान्तरम्। ताञ्चेमामुत्तराहुतिमपरा-जितायां दिश्यग्नेर्जुहुयात्। अपराजिता, प्रागुत्तरा ऐशानीत्य-नर्थान्तरम्। तथाच गृह्यासंग्रहः।

"प्रक्रमणे तथोद्वाहे होमे स्विष्टकृते तथा।

यस्यां दिशि विधिं प्राहुस्तामाहुरपराजिताम्"।

इति। 'इति' अनेन प्रकारेण सायं जुहुयात्॥ ८॥

अथ प्रातः,—सूर्य्याय स्वाहेतिपूर्व्वां, तूष्णीमेवोत्तरां मध्ये चैवापराजितायाञ्चैव दिशि ॥ १० ॥

अथेतिपूर्व्वप्रकृतार्थम्। येनैव हविषा सायं होमः कृतः,—कृतेन वा, अकृतेन वा, दध्ना वा, पयसा वा;—तेनैव प्रातरपि होतव्यमन्यत्र प्रतिनिधेरिति खल्ववोचाम— "सायमाहुत्युपक्रम एवातऊर्द्ध्वं गृह्येऽग्नौ होमोविधीयते"—इत्यत्र। 'प्रातर्'—यथोक्तलक्षणे। कृतभाष्यमन्यत्। आह। निर्द्देशक्रमादेवाहुत्योः पूर्व्वोत्तरत्व सिद्धे पूर्व्वामुत्तरामित्यवाच्यम्। अथोच्यते, कारणं वक्तव्यम्। उच्यते। नियमार्थं वचनमिदम्। कथं नाम? इयमेव पूर्व्वा नान्या, तथेयमेवोत्तरा नान्येति। किं भवति प्रयोजनम्? हरितगोमयहोमस्य कम्बूकहोमस्य च समानकालत्वात् व्यतिकरोन भविष्यतीति। 'प्राक् स्विष्टकृत आवापः'—इति वचनात् स्विष्टकृद्धोमद्दहापि प्राप्नोति। सोऽपि न भवतीति प्रवेदनार्थञ्चोत्तरत्ववचनम्। पुनरुक्तिश्च गोभिले न पर्य्यनुयोज्येत्येतदपि न प्रस्मर्त्तव्यम् ॥ १० ॥ " ॥

समिधमाधायानुपर्य्युक्ष्य तथैवोदकाञ्जलीन् प्रसिञ्चेदन्वमꣳस्था इति मन्त्रविशेषः ॥ ११ ॥

समिधं मन्त्रदेवतवर्ज्जितां प्रकृतहोमापवर्गविहितामिन्धनार्थामाधाय निःक्षिप्याग्नौ, अनुपर्य्युक्ष्याग्निं 'देव सवितः प्रसुव'—इत्यनेन मन्त्रेणेत्यर्थः। तथैव तेनैव प्रकारेण, पूर्व्वोक्तयैवावृता उदकाञ्जलीन् प्रसिञ्चेत्—'अदिते'—इत्येवमादिभिर्मन्त्रैः। 'अनुमन्यस्व'—इत्येतस्मिंश्च

स्थानचये, 'अन्वमंस्थाः'—इति मन्त्रविशेषः मन्त्रस्य विशेषः कर्त्तव्य-इति वाक्यशेषः ॥ ११ ॥ * ॥

प्रदक्षिणमग्निं परिक्रम्यापाᳬ शेषं निनीय पूरयित्वा चमसं प्रतिष्ठाप्य यथार्थम् ॥ १२ ॥

प्रदक्षिणं यथा भवति, तथाऽग्निं परिक्रम्यापां परिचरणीयानां शेषमवशिष्टं परिचरणकर्म्मणः, निनीय संस्थाप्य। संस्थापितानामप्यपां पुनः संस्थापनवचनं तासामपरित्याज्यत्वं दर्शयति। अथवा। निनीय मिश्रयित्वा, अन्याभिरद्भिः, पूरयित्वा चमसं पात्रविशेषम्। आच-मनमितिपाठेऽपि, आचम्यतेऽनेनेत्याचमनं पात्रमेवार्थः। तच्च पात्रं प्रतिष्ठाप्य, आत्मनोऽन्तिके स्थापयित्वा, यथार्थं यथाप्रयोजनं कर्म्मापवर्गविहितं वामदेव्यगानादिकं, प्रातराहुतिपश्चाद्विहितं ब्रह्म-यज्ञं वा कुर्य्यादिति वाक्यशेषः। तत्र प्रमाणं वक्ष्यामः। प्रातराहु-त्यनन्तरञ्चेद्ब्रह्मयज्ञः क्रियते, तदा वामदेव्यगानमपि तदन्त एव कर्त्तव्यम्। न त्विदानीमेव प्रातराहुत्यन्ते। 'वामदेव्यं गणेष्वन्ते'—इति कात्यायनस्मरणात्। तदिदं पुनरुदकपात्रपरिपूरणमुदका-लम्भनार्थमेव भवति। न त्वदृष्टार्थम्।

"यस्य दृष्टं न लभ्येत तस्यादृष्टं प्रकल्प्यते"।

इति ह्यभियुक्ताः स्मरन्ति। विहितं खल्वेतदुदकालम्भनं कर्म्म कुर्व्वतोनिमित्तविशेषेषु। तदाह कर्म्मप्रदीपः।

"पित्र्यमन्त्रानुद्रवणे आत्मालम्भे अवेक्षणे।

अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे।

मार्ज्जारमूषिकस्पर्शे आक्रुष्टे क्रोधसम्भवे।
निमित्तेष्वेषु सर्व्वत्र कर्म्म कुर्व्वन्नपः स्पृशेत्"।

इति।

"रौद्रञ्च राक्षसं पित्र्यमासुरञ्चाभिचारिकम्।
उक्का मन्त्रं स्पृशेदाप आलभ्यात्मानमेवच"।

इति च गृह्यान्तरम्॥ १२॥ *॥

एवमत ऊर्द्धं गृह्योऽग्नौ जुहुयाद्वा हावयेद्वाऽऽजीवितावभृथात्॥ १३॥

एवमनेन प्रकारेणातोऽस्मात् पूर्व्वोक्ताद्धोमद्वयादूर्द्धं परतः, गृह्योऽग्नौ—पुनरुपादानात्—अन्यान्यपि यानि नित्यनैमित्तिकानि कर्म्माणि गृह्योऽग्नौ विधीयन्ते, तेष्वपि, न पुनः सायंप्रातर्होममात्र-एवेत्यर्थः। जुहुयाद्वा स्वयं, सम्भवश्चेत्, हावयेद्वा पुत्रादिभिरसम्भवश्चेत्। असम्भवकारणञ्चोक्तं कात्यायनेन कर्म्मप्रदीपे।

"सूतके च प्रवासे च अशक्तौ श्राद्धभोजने।
एवमादिनिमित्तेषु हावयेदिति योजयेत्"।

इति। यदा पुनरसमर्थो व्याध्यादिना हावयति, तदा यत् कर्त्तव्यं तदप्याह स एव।

"स्वयं होमासमर्थस्य समीपमुपसर्पणम्।
तत्राप्यशक्तस्य सतः शयनाच्चोपवेशनम्"।

इति। तदनेन, नायं तुल्यवद्विकल्पः—जुहुयाद्वा हावयेद्वा—इति। किन्तर्हि? कात्यायनवचनात् व्यवस्थितोऽयं विकल्पः।

कथं नाम?—सम्भवे जुहुयात्, असम्भवे हावयेदिति यथोक्तैव व्यवस्था।

"सन्ध्याकर्म्मावसाने तु स्वयं होमोविधीयते।
स्वयं होमे फलं यत्तु तदन्येन न जायते"।

इति च स्मृत्यन्तरम्। तदनाद्यं सायंप्रातर्होमद्वयं स्वयमेव कर्त्तव्यम्। कस्मात्? अत ऊर्द्धम्—इत्यभिधानात्। अतऊर्द्धमिति खल्वभिदधान आचार्य्य आद्ये होमद्वये नायं विकल्पः—जुहुयाद्वा हावयेद्वेति—इति दर्शयति। तस्मादाद्यं होमद्वयं स्वयमेव कुर्य्यात् ऊर्द्धन्त्वस्मात् जुहुयाद्वा हावयेद्वेति सिद्धम्।

तस्य खल्वेतस्य होमस्यावधिरुच्यते—'आ जीवितावभृथात्'—इति। अवभृथोयज्ञान्त इत्यनर्थान्तरम्। इह त्वन्तमात्रमर्थः। जीवितस्यावभृथोऽन्तोविनाशः क्षय इत्येकोऽर्थः। तस्मात् जीवितावभृथात् आ। पदद्वयञ्चेदम्। जीवितक्षयपर्य्यन्तमित्यर्थः। तथाच श्रूयते। "यावज्जीवमग्निहोत्रं जुहोति"—इति। "एतद्वै जरामर्य्यं सत्रं यदग्निहोत्रं, जरया वा ह्येवास्मान्मुच्यते मृत्युना च"—इति। "जरामर्य्यं वा एतत् सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च, जरया ह वा एताभ्यां निर्मुच्यते, मृत्युना च"—इति चैवमादि॥ १३॥ * ॥

अथाप्युदाहरन्ति ॥ १४ ॥

अथेति पूर्व्वप्रकृतार्थम्। अथ यत् प्रकृतं—हावयेद्वेति, तदस्यार्थस्य द्रढिम्ने ब्राह्मणवाक्यमप्युदाहरन्ति शिष्टा इत्याभाषान्तं सूत्रम्॥

॥ १४ ॥ * ॥

कामं गृह्येऽग्नौ पत्नी जुहुयात् सायंप्रातर्होमौ, गृहाः पत्नी, गृह्यएषोऽग्निर्भवतीति ॥ १५ ॥

काममित्यनुमत्यर्थकोनिपातः। अमामर्थ्ये गृह्येऽग्नौ पत्नी जुहुयात् सायंप्रातर्होमौ। गृह्येऽग्नौ खल्वयं होम इति पत्नी जुहुयात्। कस्मात्? तदुच्यते। गृहाः पत्नी, एष चाग्निर्गृह्यो भवति। एतं खल्वग्निं गृह्य इत्याचचते। तथाच एतस्मात् समाख्यानात् पत्नी जुहुयात्। तथाच स्मर्य्यते।

"न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
तया हि सहितः सर्व्वान् पुरुषार्थान् समश्नुते"।

इति। ततश्च यावता होमनिष्पत्तिर्भवति, तावन्मात्रं पत्नीमध्यापयेत्। कस्मात्? पत्नी जुहुयादितिवचनात्। न खल्वनधीत्य शक्नोति पत्नी होतुम। न च तूष्णीमित्याह वचनम्। किमिव हि वचनं न कुर्य्यान्नास्ति वचनस्यातिभारः—इति हि तन्त्रस्थितिः। सा खल्वियं पत्नी होतुरन्यस्याभाव एव जुहुयात्। कस्मात्?

"निधायाग्निं स्वदारेषु परिकल्प्यर्त्विजन्तथा।
प्रवसेत् कार्य्यवान् विप्रोवृथैव न चिरं क्वचित्"।

इति कर्म्मप्रदीपवाक्ये ऋत्विक्परिकल्पनस्यार्थवत्त्वोपपत्तेः।

"असमक्षन्तु दम्पत्योर्होतव्यं नर्त्विगादिना।
द्वयोरप्यसमक्षन्तु भवेद्धुतमनर्थकम्"।

इति च तस्याः समक्षमेवर्त्विगादिना होमानुज्ञानात्। यदपि स्मरणम्—

"पत्नी पुत्रः कुमारी वा शिष्योवापि यथाक्रमम्।

पूर्व्वपूर्व्वस्य चाभावे विदध्यादुत्तरोत्तरः" ।

इति । तदपि नास्माकं सम्भवति । कुमारीश्रवणात् । न खल्व-स्माकं स्वशास्त्रे कुमार्य्या होतव्यमिति श्रूयते । इतश्च । स्वशास्त्र-विरोधाद् । स्वशास्त्रे खल्वस्माकं पत्न्याः समक्षमेवर्त्विगादिना होमोऽनुज्ञायते इत्यवोचाम। न च पत्न्या अप्यशक्तौ तदिति वाच्यं, मानाभावात् । न खल्वस्मिन् सङ्कोचे प्रमाणमस्ति। न च सामान्य-मपि वचनमृते कारणाद्विशेषपरं कल्पयितुमुचितम्! इतश्च। ऋत्विक्परिकल्पनवैयर्थ्यात् । ऋत्विक्परिकल्पनं खल्वेवमनर्थकं स्यात् । पत्न्याः खल्वशक्तौ ऋत्विजा होतव्यमिति स परिचिकल्पयि-षितः । सा खल्वियमनर्थिका कल्पना स्यात् । कस्मात्? तयैव तत्सम्भवात् । यदि नामाशक्ता पत्नी भवेत्, तर्हि सैव तदानी-मृत्विजं परिकल्पयिष्यति, किमिदानीमेव तत्परिकल्पनेन ? तदशक्तौ चान्यपरिकल्पनाऽविशेषात् । परिकल्पितस्यापि ऋत्विजो-ऽशक्तौ अन्योऽपि ऋत्विक् पत्न्या परिकल्पयितव्य एव—इति इदानीं ऋत्विक्परिकल्पने, न कश्चिद्विशेषोऽस्ति ।

ननु—"जातिन्तु बादरायणोऽविशेषात्, तस्मात् स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात्"—इति सिद्धान्तात् पत्न्यप्यधिकारिणी कथमिवाग्निहोत्रो न जुहुयात्? उच्यते । नैतदस्ति—केवलायाः पत्न्या अधिकार इति। किन्तर्हि? दम्पत्योः सहाधिकार इति सिद्धान्तः। तथा चोक्तम् । "स्ववतोस्तु वचनादैककर्म्म्यं स्यात्"—इति । "धर्म्मे चार्थे च कामे च नातिचरितव्या"—इति, "सह धर्म्मश्चरितव्यः"—इति चैवमादि खल्वभियुक्ताः स्मरन्ति । तस्मान्नास्ति पत्न्याः केव-

त्नाया: पृथगधिकार:। महाधिकारेऽपि यावदुक्तमेव साऽधिकारोति इति तदन्यत्रानधिकार एव तस्या: सिध्यते। "तस्या यावदुक्त-माशीर्ब्रह्मचर्य्यमतुल्यत्वात्"—इति सिद्धान्तात्। वचनबलादेवानया होतव्यमिति यथावचनमेवाधिक्रियते। दर्शितश्चास्माभिर्वचनस्य तात्पर्य्यम्—होतुरन्यस्याभावे पत्नी जुहुयात्—इति। "सा चान्य-होतुरभावे जुहुयात्"—इति च भट्टभाष्यम्। तस्मादन्येषामेवैष नियम: पत्नी प्रथमं जुहुयात्,—इति। परशास्त्रोक्तं खल्वेतदिति नास्माकं भवति। तथा चाश्वलायनगृह्यम्। "पाणिग्रहणादि गृह्यं परिचरेत् स्वयं पत्न्यपि वा पुत्र: कुमार्य्यन्तेवासी वा"—ति। इतिर्ब्राह्मणवाक्यपरिसमाप्त्यर्थ:, सायंप्रातर्होमप्रकरणपरिसमाप्त्यर्थो-वा ॥ १५ ॥ * ॥

उपदिष्टौ सायंप्रातर्होमौ, सूचितश्च प्रातर्होमानन्तरं ब्रह्मयज्ञ:,—'प्रदक्षिणमग्निं परिक्रम्यापां शेषं निनीय पूरयित्वा चमसं प्रति-ष्ठाप्य यथार्थम्'—इत्यत्र। स खल्वयं ब्रह्मयज्ञ: पञ्चानां महायज्ञा-नामादिभूत:। तदाह कर्म्मप्रदीप:।

> "देव-भूत-पितृ-ब्रह्म-मनुष्याणामनुक्रमात्।
> महासत्राणि जानीयात्त एव हि महामखा:।
> अध्यापनं ब्रह्मयज्ञ:, पितृयज्ञस्तु तर्पणम्।
> होमोदैवो, बलिर्भौतो, नृयज्ञोऽतिथिपूजनम्"।

इति। अनुक्रमादवक्ष्यमाणानीत्यर्थ इति परिशिष्टप्रकाश:। ते खल्विमे पञ्च महायज्ञा: पञ्चसूनापापापनुत्तये गृहमेधिना प्रत्यहं कर्त्तव्या:। अतएव स्मरति भगवान्मनु:।

'पञ्चैतान् यो महायज्ञान्न हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते।

इति।

"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्"।

इति च। स खल्वयं ब्रह्मयज्ञोऽध्यापनं श्रुतिजपश्च। तदप्याह कर्मप्रदीपः। "अध्यापनं ब्रह्मयज्ञः"—इति।

"वेदमादित आरभ्य शक्तितोऽहरहर्जपेत्"।

इति।

"यस्तु श्रुतिजपः प्रोक्तः ब्रह्मयज्ञः स चोच्यते"।

इति च। अत्र शक्तित इत्युपादानादशक्तौ कियानपि श्रुतिजपो ब्रह्मयज्ञो भवतीत्यवगम्यते। "एकामृचं एकं वा यजुरेकं वा सामाभिव्याहरेत्"—इति च स्मृत्यन्तरम्। तदेवं छन्दोगानां स्वशाखापरिभाषितोदितविधो ब्रह्मयज्ञो भवतीति परिशिष्टप्रकाशप्रस्तयः। भट्टभाष्ये तु—

"गुरावध्ययनं कुर्व्वन् शुश्रूषादि यदाचरेत्।
स सर्व्वो ब्रह्मयज्ञः स्यात्तत्तपः परमुच्यते"।

इति स्मरणात् गुरोर्यदध्ययनं सोऽपि ब्रह्मयज्ञ इत्यभिहितम्। तस्य खल्वस्य ब्रह्मयज्ञस्य विकल्पेन त्रयः काला भवन्ति। तथाच 'अध्यापनं ब्रह्मयज्ञः,'—इति। 'यस्तु श्रुतिजपः प्रोक्तः ब्रह्मयज्ञः स चोच्यते,'—इति चाभिधायाह कात्यायनः।

''स चार्व्वाक् तर्पणात्कार्य्यः पश्चाद्वा प्रातराहुतेः।

वैश्वदेवावसाने वा नान्यचेति निमित्तकात्"।

इति। तर्पणादर्व्वाक् श्रुतिजपात्मको ब्रह्मयज्ञः कार्य्य इत्येकः कालः। न चायं ब्रह्मयज्ञः सवितुरुपस्थानरूप इति वाच्यम्। तस्य ब्रह्मयज्ञत्वे प्रमाणाभावात्। न खल्वस्ति प्रमाणं—सवितुरुपस्थानं ब्रह्मयज्ञ इति। कात्यायनः खल्वादितः सन्ध्योपासनमुक्त्वा उक्त्वा च तदतिक्रमदोषम्,—"वेदमादित आरभ्य"—इत्यादित-आरभ्य यथाशक्ति वेदाध्ययनं विदधौ। न चेदं सवितुरुपस्थान-रूपं सम्भवति। आदित आरभ्येत्यभिधानात्। न च सवितुरुप-स्थाने आदित आरभ्य वेदो जप्यते। तस्मात् सवितुरुपस्थानादन्य-एव कश्चित् श्रुतिजपो वचनार्थः। यश्च श्रुतिजप इत्यादिना च तस्यैव ब्रह्मयज्ञसञ्ज्ञामभिधाय,—'स चार्व्वाक् तर्पणात् कार्य्यः'—इति तस्यैव तर्पणादर्व्वाक् कर्त्तव्यतां कात्यायनः प्राह स्म। अतएव स्मरति वृहस्पतिः।

"ब्रह्मयज्ञार्थसिद्ध्यर्थं विद्यामाध्यात्मिकीं जपेत्।
जप्त्वाऽथ प्रणवं वापि ततस्तर्पणमाचरेत्"।

इति। तथा च सन्ध्योपासनमभिधाय ब्रह्मपुराणे।

"कृत्वा प्रदक्षिणं सूर्य्यं नमस्कृत्योपविश्य च।
स्वाध्यायं प्राङ्मुखः कृत्वा तर्पयेद्देवतामृषीन्।

इति। स्वाध्यायब्राह्मणेऽपि, "रक्षांसि वा पुरोनुवाके तपोयम-तिष्ठन्त तान् प्रजापतिर्व्वरेणोपामन्त्रयत"—इत्येवमादिना तृतीये-नानुवाकेन सन्ध्योपासनमभिधाय, "अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्"—इति, "यत् स्वाध्यायमधीयीतैकामप्यृचं

यजुः साम वा तद्ब्रह्मयज्ञः सन्तिष्ठते"—इति चैवमादिभिरष्टाभिरनुवाकैः सविस्तरं पृथगेव ब्रह्मयज्ञः समाम्नायते। तस्मात् सवितुरुपस्थानरूपोऽयं ब्रह्मयज्ञ इत्यप्रमाणं वचनम्।

अथैवमाचार्य्येण स्नानग्रन्थे—"अथ नित्यवत् सन्ध्यामुपासीत उदुत्यं चित्रम्"—इत्युपक्रम्य,—"आभिर्ऋग्भिः सवितुरुपस्थानम्"—इत्यभिधाय,—"नमो ब्रह्मणे इत्युपजाय चेत्यन्तेनाग्निस्पृष्यलिति च सर्व्वत्र सव्येनैतांस्तर्पयेत्"—इत्येवमादिना तर्पणमभिधाय,—"गायत्र्यष्टशतमादौ कृत्वा भासं दशस्तोभम्"—इत्यादिना,—"अहरहर्ब्रह्मयज्ञाय"—इत्येवमन्तेन तर्पणानन्तरं ब्रह्मयज्ञोऽभिहितः कथं सङ्गच्छते ?

उच्यते। नैष दोषः। श्रुतिसामान्येऽप्यर्थभेदात्। समानायामप्युभयत्र तर्पणश्रुतावनयोरर्थभेदो भवति। भिद्यते खल्वनयोरर्थइत्यदोषः। आचार्य्यः किल सूर्य्योपस्थानादनन्तरं स्नानाङ्गमेव तर्पणमभिदधौ न त्वन्यत् प्रधानभूतम्—'पितृयज्ञस्तु तर्पणम्'—इति। स्नानप्रकरणे खल्वाचार्य्यस्तर्पणं सूर्य्योपस्थानादनुपदमाह स्म। तदस्य तर्पणस्य स्नानाङ्गतायामस्ति प्रमाणं प्रकरणम्, न तु प्रधानतायां किञ्चिदपि प्रमाणं पश्यामः। कात्यायनवाक्यस्वरसादप्येवमेवाचार्य्यस्याभिप्रायोऽवधार्य्यते। कात्यायनोऽपि खल्वार्य्यस्याभिप्रायस्य प्रकाशयितेत्यवोचाम। स च ब्रह्मयज्ञानन्तरं तर्पणं पितृयज्ञमभिदधानः सूर्य्योपस्थानादनन्तरं तर्पणं स्नानाङ्गमेवाचार्य्येणाभिहितमिति दर्शयति। अन्यथा कथमिव स्वोपजीव्यस्यैवाचार्य्यस्य विरुद्धमयमभिदधीत! एवं खल्वस्यैव वचस्यनाश्वासो लोकानां प्रसज्येत!

तस्मादाचार्य्येण—"अथातः स्नानविधिं व्याख्यास्यामः"—इति प्रतिज्ञाय, "पुनः शन्नोदेव्यादिभिर्मार्जनञ्च"—इत्येवमन्तेन स्नानमभिधाय, तदङ्गस्य तर्पणस्याभिधाने प्राप्ते, "अथ नित्यवत् सन्ध्यामुपासीत"—इति, "आभिर्ऋग्भिः सवितुरुपस्थानम्"—इति चानूद्य क्रमार्थं, तर्पणमभिहितम् । तस्मात् स्नानाङ्गं तर्पणं सवितुरुपस्थानात्परं पितृयज्ञस्तु तर्पणं ब्रह्मयज्ञात्परमित्यविरोधः ।

आह । ननु 'स चार्व्वाक् तर्पणात् कार्य्यः'—इति कात्यायनवाक्यस्य पितृयज्ञरूपतर्पणपरत्वे किं मानम् ? उच्यते ।

"पञ्चानामथ सत्राणां महतामुच्यते विधिः" ।

इत्युपक्रम्य पञ्चमहायज्ञप्रकरणे खल्वेवमभिहितं कात्यायनेन । तदत्र तर्पणपदस्योपक्रमोपस्थितं पितृयज्ञ एव तर्पणमर्थः । "सन्निहिते बुद्धिरन्तरङ्गा"—इति न्यायात् । "प्रकृतप्रत्ययश्च न्याय्यः"—इति चाभियुक्तवचनात् । व्यक्तिवचनानाञ्चामीषाम् आग्नेयीवत् सन्निहितव्यक्तिपरताया न्याय्यत्वात् । अतएव, 'पितृयज्ञस्तु तर्पणम्'—इत्यत्रापि स्वोक्तमेव तर्पणमर्थः ।

तस्माद् यथा "आग्नेय्या अग्नीध्रमुपतिष्ठते"—इत्याग्नेयीपदेन प्रकृतो ज्योतिष्टोमसमाम्नातोऽन्यत्र विनियुक्तोऽपि मन्त्रोगृह्यते, न पुनर्दाशतया लिङ्गवन्तोऽपि मन्त्रा नापि तदुभयम्—इति तृतीयाध्याये निरूपितम् । एवमिहापि प्रकृतं पितृयज्ञरूपमेव तर्पणं परामृश्यते, न स्नानाङ्गं नाप्युभयमिति । कात्यायनो हि कर्म्मप्रदीपे दशमे खण्डे स्नानमुपदिश्य, एकादशे खण्डे गायत्रीजपान्तं सन्ध्योपासनं,—

"वेदमादित आरभ्य शक्तितोऽहरहर्जपेत्" ।

इति जपयज्ञस्याभिधाय, द्वादशे खण्डे,

"यवाद्भिस्तर्पयेद्देवान् सतिलाद्भिः पितॄनपि" ।

इत्यादिना स्नानसूत्रोपदिष्टात् स्नानाङ्गतर्पणाद्विलक्षणमेव सपरिकरं तर्पणमभिधाय,—

"कार्यां यथेच्छेच्छरदातपार्त्तः
पथः पिपासुः क्षुधितोऽन्नमन्नम् ।
बालो जनित्रीं जननी च बालं
योषित् पुमांसं पुरुषश्च योषाम् ॥
तथा सर्व्वाणि भूतानि स्थावराणि चराणि च ।
विप्रादुदकमिच्छन्ति सर्व्वाभ्युदयकृद्धि सः ।
तस्मात् सदैव कर्त्तव्यमकुर्व्वन् महतैनसा ।
युज्यते ब्राह्मणः कुर्व्वन् विश्वमेतद्विभर्त्ति हि" ।

इत्युपसंहृतवान् ; तदत्राकरणे दोषस्य करणे चाभ्युदयस्योपदेशात् प्रधानमेवैतत् तर्पणमिति प्रतिपत्तव्यम् । न ह्यत्र तर्पणस्याङ्गत्वे लिङ्गादिकं किमपि प्रमाणमुपलभामहे ; येन स्नानाङ्गमिदं तर्पणमिति प्रतिपद्येमहि । ब्रह्मयज्ञसाहचर्य्यादपि पितृयज्ञस्तर्पणं प्रधानमेवावगम्यते । साहचर्य्यमपि खल्वर्थस्य नियामकमिष्यते । अतएव कर्म्मप्रदीपे, 'पितृयज्ञस्तु तर्पणम्'—इतिस्नानप्रकरणनैरपेक्ष्येणाम्नातम् । मनुस्मृतावपि, 'पितृयज्ञस्तु तर्पणम्'—इत्युक्तम् । स्नानस्य तदङ्गतर्पणस्य वा नामापि तत्र न श्रूयते । प्रकरणान्तरे खल्विदमाम्नानं प्रकरणाधिकरणन्यायेन कर्म्मान्तर-

मवगमयति। तथा चोक्तम्। "प्रकरणान्तरे प्रयोजनान्यत्वम्"—इति। तुल्यञ्च समाम्नानम्—अध्यापनं ब्रह्मयज्ञस्तर्पणं पितृयज्ञो-होमो दैवयज्ञ इत्येवमादि न च स्नानाङ्गतर्पणादर्व्वाक् छन्दो-गानां ब्रह्मयज्ञो भवति। स्नानाङ्गतर्पणात् परत एवाचार्य्येण ब्रह्मयज्ञस्योपदेशात्। छन्दोगानां विहितस्यैव ब्रह्मयज्ञस्य खल्वेष कालविधिः— 'स चार्व्वाक् तर्पणात् कार्य्यः'—इत्येवमादिः। न चान्यविषयमेतद्वाक्यम्। न खल्वस्यैव पूर्व्वस्मिन् परस्मिंश्च वाक्य-प्रवाहे छन्दोगविषये सति मध्यपठितमिदं वाक्यमकस्मादेवान्येषां भवितुमर्हति। न चार्द्धजरतीयमुचितम्। तस्मान्न किञ्चिदेतत्। स्नानाङ्गञ्च तर्पणमन्तरेण स्नानं न भवति, भवति चेदं तर्पणमन्त-रेणापि स्नानं रोगाद्युपद्रवेषु।

"तर्पणन्तु शुचिः कुर्य्यात् प्रत्यहं स्नातकोद्विजः।
देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्"।

इति च स्मृत्यन्तरम्। तदेवं सिद्धे तर्पणद्वैते, स्नानाङ्गतर्पणं भवितुरुपस्थानात् परं पितृयज्ञस्तु तर्पणं ब्रह्मयज्ञादिति न किञ्चि-दनुचितम्। अतएव कात्यायनेन श्रुतिजपात् परं तर्पणमुक्तम्।

यच्च तर्पणद्वैतमभ्युपगच्छताऽपि तत्त्वकारेण, स्नानाङ्गतर्पणन्तु प्रधानतर्पणस्य प्रकृतिभूतं नित्याग्निहोत्रमिव सत्राग्निहोत्रस्य। तत्र स्नानाङ्गतर्पणस्य सन्ध्योत्तरत्वं साक्षादुक्तं विकृतावपि सम्भवे प्राप्तम्। यथा ज्योतिष्टोमस्य इष्ट्युत्तरकालत्वं विकृतिसोमेऽप्यति-देशप्राप्तम्—इत्युक्तम्। तत्र ब्रूमः। स्मृत्यन्तरोक्तं प्रधानतर्पणं स्नानाङ्गतर्पणस्य विकृतिर्भवेत् भवतु नाम। कात्यायनोक्तन्तु प्रधान-

तर्पणं न स्नानाङ्गतर्पणेन विक्रियते। कस्मात्? सपरिकराभिहित-त्वात्तस्य। सपरिकराभिहिता प्रकृतिर्विकृतिरन्या,—इति हि सिद्धान्तः। तत्र कुत्र कस्य धर्म्मः प्रदिश्यताम्।

अथापि भवतः श्रद्धामनुरुध्य प्रधानतर्पणं स्नानाङ्गतर्पणस्य विकृतिरिति सामान्येन प्रतिपद्येमहि, तथापि 'स चार्व्वाक् तर्पणात् कार्य्यः'—इति कात्यायनादिभिस्तस्य कालविशेषोपदेशात् नैव चोदकेन तत्र कालः प्रापयितव्यो भवति। वैकृतेन विशेषोपदेशेन प्राकृतस्य चोदकप्रापयितव्यस्य कालस्य बाधात्। चोदकेन हि विप्रकृष्टाधीतः कालः संबन्धयितव्यः, सन्निकृष्टन्तु ब्रह्मयज्ञोत्तरत्व-मिति शीघ्रमुपस्थितेन ब्रह्मयज्ञोत्तरत्वेन विलम्बोपस्थितं सन्ध्योत्तरत्वं बाध्यते। शरमयेनेव वर्हिषा कुशमयं वर्हिः। अपिच। यदि विकृतावानुमानिकं चोदकप्राप्तं सामिधेनीनां पाञ्चदश्यं बाधित्वा, "सप्तदश सामिधेनीरनुब्रूयात्"—इत्यनारभ्याधीतेनापि वाक्येन साप्तदश्यं सामिधेनीनामिष्यते, तर्हि, 'स चार्व्वाक् तर्पणात् कार्य्यः'—इति, 'ब्रह्मयज्ञप्रसिद्ध्यर्थम्'—इति चैवमादिभिर्वाक्यैः साक्षा-देव पितृयज्ञविषयैः चोदकप्राप्तं सन्ध्योत्तरत्वं बाधित्वा पितृयज्ञस्य तर्पणस्य ब्रह्मयज्ञोत्तरत्वं सुतरामेष्टव्यम्।

अतएव चातुर्म्मास्येषु साकमेधे तृतीये पर्व्वणि—"अग्नयेऽनीक-वते प्रातरष्टाकपालो, मरुद्भ्यः सान्तपनेभ्योमध्यन्दिने चरुः, मरुद्भ्यो-गृहमेधिभ्यः सर्व्वासां दुग्धे सायमोदनम्"—इति प्रातर्मध्यन्दिने सायमित्यङ्गः कालेषु इष्टीनां समाम्नानात्,—यथा देवदत्तः प्रातर-पूपं भक्षयति, मध्यन्दिने विविधमन्नमश्नाति, अपराह्णे मोदकान्

भवयति,—इत्येकस्मिन्नहनि इति गम्यते, तथाऽत्रापि गम्यते—इत्येकस्मिन्नहनि इष्टीनामवगमात् मद्यस्कालता विकृतीनाममूषामिष्टीनामिति चोदकप्राप्तमानुमानिकं द्व्यहकालत्वं बाध्यत इति पञ्चमाध्याये सिद्धान्तितम्। तथा चोक्तम्। "अपि वा क्रमकालसंयुक्ताः मद्यः क्रियेत तत्र विधेरनुमानात् प्रकृतिधर्म्मलोपः स्यात्"—इति। एवमिहापि भविष्यति।

ननु नास्त्यत्र शब्दोब्रह्मयज्ञानन्तरन्तर्पणं पितृयज्ञः,—इति। साकमेधेऽपि तर्हि नास्ति शब्दः—मद्यस्काला इमा इष्टय इति। तत्रार्थादवगम्यते मद्यस्कालता इति चेदिहाप्यर्थादवगम्यते ब्रह्मयज्ञोत्तरत्वमविशेष एव। न खलु वयं शब्दस्याप्रयोगमर्थाभावे हेतुमभ्युपगच्छामः। सत्यप्यर्थे तदवसराभावान्न प्रयुज्यते शब्द इति ह्यभियुक्ताः कथयन्ति। गम्यते चान्यस्मात् कारणादयमर्थो—यदुत ब्रह्मयज्ञादनन्तरं पितृयज्ञस्तर्पणं कर्त्तव्यमिति। अस्ति चात्र साक्षादपि ब्रह्मयज्ञोत्तरत्वावगमकं किञ्चिद्वचनम्। तच्च पुरस्तादेवोदाहृतमस्माभिः।

यदि पुनः सामान्यत एव तर्पणस्य ब्रह्मयज्ञोत्तरत्वमास्थायेतापि तर्हि तत् प्रकृत्या वा गृह्येत विकृत्या वा,—इति भवतां द्वयी गतिः स्यात्। तत्र यदि प्रकृत्या गृह्येत, तर्ह्युभयोः कालयोरन्यतरः कालः पक्षे परित्यज्येत। यदि विकृत्या गृह्येत, तत्रापि चोदकेन प्राकृतस्य कालस्य प्रापितत्वादन्यतरः कालः परित्यज्येतैव। तदेवमुभयथाऽप्यन्यतरकालपरित्यागस्यावश्यकत्वे समानेऽपि यतरः पक्षो न्यायेनानुगृह्यते, ततरः पक्ष इहाश्रयितव्योभवति। तत्र विकृतौ

चोदकप्राप्तः काल आनुमानिक इति स त्यज्यताम्। प्रकृतौ तु सन्ध्योत्तरत्वकालः साचादाम्नात इति न युज्यते त्यक्तुमित्यस्मत्-पचो न्यायेनानुगृह्यते।

अतएव, "य इष्ट्या पशुना सोमेन आग्रयणेन वा यच्यमाणः स पौर्णमास्याममावस्यायां वा यजेत"—इति सामान्यवचनेन साङ्गस्य यागस्यामावस्यायां पौर्णमास्यां वा करणाम्नानात् तस्य च प्रकृतिपरत्वे तत्र प्रत्यचसमाम्नातस्य 'पूर्व्वेद्युरग्निं गृह्णाति उत्तरमहर्द्देवतां यजेत'—इति कालस्य पचे परित्यागप्रसङ्गात् सामान्यवचनं विकृतिपरमिति तत्र चोदकप्राप्तमानुमानिकं द्वैयहकाल्यं परित्यज्यते इति वैकृतानामैन्द्राग्नादीनां सद्यस्कालत्वमिति पञ्चमाध्याये सिद्धान्तितम्।

परमार्थतस्तु ब्रह्मयज्ञोत्तरत्वाम्नानं न सामान्यविषयं किन्तु पितृयज्ञरूपतर्पणविषयमेवेति पुरस्तादुपदर्शितमस्माभिः। अतएव गोभिलीयवचनद्वयम्।

"आप्लवने तु संप्राप्ते तर्पणं तदनन्तरम्।
गायत्रीन्तु जपेत् पश्चात् स्वाध्यायञ्चैव शक्तितः।
आप्लवने तु संप्राप्ते गायत्रीं जपतः पुरा।
तर्पणं कुर्वतः पश्चात् स्नानमेव वृथा भवेत्"।

इति। तदनेन स्नानाङ्गस्यैव तर्पणस्यायं काल इति स्पष्टमवगम्यते। कस्मात्? 'आप्लवने तु संप्राप्ते',—इत्युपक्रमात्। 'स्नानमेव वृथा भवेत्',-इति चोपसंहारात्। तस्मादियमेवावधारणा,—स्नानाङ्गं तर्पणं जपयज्ञात् पूर्वं कर्त्तव्यं जपयज्ञादनन्तरन्तु तर्पणं पितृयज्ञरूपं

कर्त्तव्यमिति। तदनेन तन्त्रता निरस्ता। कस्मात्? कालभेदात्। अन्यः कालः पितृयज्ञस्य तर्पणस्य ब्रह्मयज्ञोत्तरत्वमन्यश्च कालः स्नानाङ्गस्य तर्पणस्य सूर्य्योपस्थानोत्तरत्वमिति भवति कालभेदः। 'स चार्व्वाक् तर्पणात् कार्य्यः'—इति तर्पणादर्व्वाग्ब्रह्मयज्ञमभिदधानः कात्यायनोऽर्थाद् ब्रह्मयज्ञात् परं तर्पणं पितृयज्ञरूपं दर्शयति।

एतेन यत्परिशिष्टप्रकाशकताऽभिहितम्—'स चार्व्वाक् तर्पणात्कार्य्यः'—इति यजुर्व्वेदिविषयम्, छन्दोगानान्तर्पणात्परं ब्रह्मयज्ञाभिधानादिति, यच्च तत्त्वकारेण—ब्रह्मयज्ञानन्तरन्तर्पणं सामगेतरेषामिति। तदसङ्गतम्। पितृयज्ञरूपं खल्विदं तर्पणं—'स चार्व्वाक् तर्पणात्कार्य्यः'—इति, स्नानाङ्गन्तु तर्पणं ब्रह्मयज्ञादर्व्वागभिहितमिति विभिन्नविषयतया विरोधानवसरात्। शब्दमूलः खल्वयमर्थो भवति—अनेनेदं कर्त्तव्यमनेनेदमिति। न खल्वस्ति शब्दो—ब्रह्मयज्ञानन्तरन्तर्पणं सामगेतरेषामिति। सेयमशाब्दी पुरुषबुद्धिमूला कल्पना प्रेक्षावतामनपेक्षणीया भवति। कस्मात्?—"धर्म्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्"—इति जैमिनिसूत्रात्। लाघवादेवमस्तु, इति चेदुच्यते। न खलु शास्त्रबलादस्तुसिद्धौ लाघवं किमपि कर्त्तुमर्हति। पुरुषप्रवृत्तौ खल्वेतदुपयुज्यते। अल्पीयस्यदृष्टानुमानकल्पना न्याय्येति चेदुच्यते। सत्यं न्याय्या—अल्पीयस्यदृष्टानुमानकल्पना यत्र विशेषहेतुर्नास्ति। इह चास्ति विशेषहेतुः—'स चार्व्वाक्तर्पणात् कार्य्यः'—इति। प्रमाणस्य खल्वभावेऽल्पीयस्यपि अदृष्टानुमानकल्पना न क्रियते,—क्रियते पुनर्गरीयस्यपि सति प्रमाणे इति हि प्रमाणपरतन्त्राणां समयः। तथा चाभियुक्तानां वचनम्।

"प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि।
अदृष्टशतभागोऽपि न कल्प्यो निष्प्रमाणकः"।

इति। अपि च। छन्दोगानां स्वशास्त्रोपदिष्टं प्रधानतर्पणस्य ब्रह्मयज्ञोत्तरत्वं छन्दोगेतरेषामिति वदन् प्रष्टव्यः। स्वशास्त्रोपदिष्टं ब्रह्मयज्ञोत्तरत्वं छन्दोगैः कुतस्त्यज्यते? तेषां सन्ध्योत्तरत्वस्य चोदकप्राप्तत्वादिति चेत्। न। तेषां ब्रह्मयज्ञोत्तरत्वस्यापि वाक्येन प्राप्तत्वाविशेषात्। एवञ्च कतरदिह त्यक्तव्यमिति भवति विचारणा। तत्र चोदकप्राप्त एवानुमानिकः कालस्त्यक्तव्यः साक्षादुपदिष्टं ब्रह्मयज्ञोत्तरत्वं न युज्यते त्यक्तुमित्यवोचाम।

ननु उक्तं सामगेतरेषामुपदेशोऽयं भविष्यति,—इति। नैतत् साधूक्तम्। न खल्वत्र सामगेतरे श्रूयन्ते, किन्तर्हि भवता कल्पयितुमभिप्रेयन्ते। सैव कल्पना न सम्भवतीति ब्रूमः। छन्दोगानां प्रधानतर्पणस्य सन्ध्योत्तरत्वं चेत् कुतश्चित् कारणात् सिध्येत्, विकल्प एव तर्ह्युभयोः कालयोर्भवेत्। न तु छन्दोगपरिशिष्टोपदिष्टकालस्य छन्दोगेतरविषयत्वमिति साध्वी कल्पना। तदपि चोदकेन सिषाधयिषितं, तच्च न सम्भवतीत्युक्तम्।

इतरेतराश्रयाच्चासिद्धिः। चोदकेन छन्दोगानां प्रधानतर्पणस्य सन्ध्योत्तरत्वसिद्धावेव तद्विरोधाद्ब्रह्मयज्ञोत्तरत्वावेदकस्य शास्त्रस्य तदन्यपरत्वं सेत्स्यति, सिद्धे च तच्छास्त्रस्य तदन्यपरत्वे प्रधानतर्पणस्य चोदकेन सन्ध्योत्तरत्वसिद्धिरितीतरेतराश्रयमापद्यते। तस्मादितरेतराश्रयाच्च न सिध्यति तद्वचनस्य सामगेतरविषयत्वम्। वैलक्ष-

स्वार्थोऽर्थादप्यवगम्यमानस्योदकं बाधते चोदकस्य दुर्ब्बलत्वादित्य-प्युपदर्शितमेवाधस्तात्।

अपि च। छन्दोगपरिशिष्टोपदिष्टं पितृयज्ञस्य तर्पणस्य ब्रह्म-यज्ञोत्तरत्वं छन्दोगानां न भविष्यति, भविष्यति त्वन्येषामिति कोऽयमप्रदावेशः परीक्षकाणामिति न खल्वधिगच्छामि। यावान् खल्वश्रुतकल्पनायां दोषस्तावानेव श्रुतस्योत्सर्गे इति हि तन्त्रस्थितिः। भवतां मते त्वपदस्थितैव स्थितिरियं स्यात्। अश्रुतस्य छन्दोगेतर-विषयत्वस्य कल्पनात् छन्दोगानां श्रुतस्य ब्रह्मयज्ञोत्तरत्वस्यो-त्सर्गाच्च। न खल्वन्यशास्त्रोक्तमपि पुरुषबुद्ध्या बलादन्यत्र नीयते इति युक्तम्। न खल्वेवमयं धर्म्मो भवति।

यदपि छन्दोगानां स्नानाङ्गतर्पणस्य सन्ध्योत्तरत्वमुक्तम्। तद-प्ययुक्तम्। सवितुरुपस्थानात् परमेव तेषां स्नानाङ्गतर्पणस्य कर-णोपदेशात्। न चोपस्थानान्तमेव छन्दोगानां सन्ध्योपासनम्, किन्तर्हि?—गायत्रीजपान्तमेव। कथं ज्ञायते? शृणु यथा ज्ञायते। "अथातः सन्ध्योपासनविधिं व्याख्यास्यामः"—इति प्रति-ज्ञाय, "ध्यानयुक्तमावर्त्तयेदोंपूर्व्वां गायत्रीम्"—इति गायत्री-जपान्तमभिधाय, "अथ य इमां सन्ध्यां नोपास्ते"—इत्युपसंहर-न्नाचार्य्यो गायत्रीजपान्तमेव सन्ध्योपासनमिति दर्शयति। अत एव स्नानप्रकरणे—"अथ नित्यवत् सन्ध्यामुपासीत्"—इत्यभिधाय, "सवितुरुपस्थानं, नमो ब्रह्मणे इत्युपजाय च"—इत्यभिहितम्। तदत्र—सन्ध्यामुपासीत—इति गायत्रीजपान्तमेव सन्ध्योपासनं प्राप्नोतीत्यन्तरा तर्पणार्थम्—सवितुरुपस्थानम्—इति वचनं सङ्ग-

च्यते। तदन्तस्य सन्ध्योपासनत्वे तु—सन्ध्यामुपासीत—इत्यनेनैव प्राप्तत्वात्—सवितुरुपस्थानम्—इति पुनर्व्वचनमाचार्य्यस्यानर्थकमेव स्यात्। कर्म्मप्रदीपोऽपि।

"अत ऊर्द्धं प्रवक्ष्यामि सन्ध्योपासनिकं विधिम्।
अनर्हः कर्म्मणां विप्रः सन्ध्याहीनो यतः स्मृतः"॥

इति प्रतिज्ञाय,—

"तिष्ठेदोदयनात् पूर्व्वां मध्यमामपि शक्तितः।
आसीतोडूमाचान्त्यां सन्ध्यां पूर्व्वत्रिकं जपन्"॥

इति गायत्रीजपान्तमभिधाय,—

"एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यत्र तिष्ठति।
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते"॥

इत्युपसंजहार।

यत्पुनर्मनुवचनम्—

"यदेव तर्पयत्यद्भिः पितॄन्, स्नात्वा द्विजोत्तमः।
तेनैव सर्व्वमाप्नोति पितृयज्ञक्रियाफलम्"॥

इति। तत्स्नात्वेति साङ्गस्य सतर्पणस्य स्नानस्याभिधानात् यदेवेति श्लोकमेव—'पितृयज्ञस्तु तर्पणम्'—इति प्रधानतर्पणं परामृशति। अशक्तावप्यन्यस्य पितृयज्ञस्य तर्पणादेव सर्व्वं पितृयज्ञफलं दर्शयति। स्नात्वेति तु प्राप्तस्यैव कर्म्मार्थस्नानस्यानुवादः। यथा स्मृत्यन्तरे—

"यदादौ वेदमारभ्य स्नात्वा भक्त्या द्विजोत्तमः।
अध्यापयेत् द्विजान् शिष्यान् सोऽयं ब्रह्मसखः स्मृतः"॥

इत्येवमादौ। अथवा। अत्यन्ताशक्तः स्नात्वा यदेव तर्पयति स्नानाङ्गमपि, तेनापि पितृयज्ञफलमाप्नोतीत्येवमर्थं मनुवचनं भविष्यतीत्यदोषः। न चास्मादेव मनुवचनात् स्नानाङ्गतर्पणादेव प्रधानतर्पणं तन्त्रात् सेत्स्यति इति वाच्यम्। नैयायिकास्तन्त्रतायाः कालभेदेऽसम्भवात्। नैयायिकी खल्वियं तन्त्रतेष्यते। न च कालभेदे तन्त्रतान्यायोऽस्ति। न च वचनशतेनापि न्यायआनेतुं शक्यते। तस्मादशक्तविषयं मनुवचनं वाच्यम्। न च वाच्यं—कात्यायनवचनमेव स्नानाशक्तविषयं किमिति न स्यादिति। प्रमाणाभावात्। न हि मनुः स्नानाङ्गतर्पणस्य पितृयज्ञत्वं स्मरति, किन्तर्हि? तेनैव पितृयज्ञफलप्राप्तिम्। कात्यायनस्तु पितृयज्ञस्य तर्पणस्य जपयज्ञात् पराचीनत्वम्। तदनयोर्विभिन्नविषययोर्वाक्ययोर्नास्त्येकविषयत्वम्। विशेषवचनत्वाच्च। विशेषवचनं खल्विदं कात्यायनस्य छन्दोगविषयं, न सामान्येन मनुवचनेनान्येन वा सङ्कोचयितुमुचितम्। विशेषस्य बलवत्त्वात्। "पदार्थान्तरसाकाङ्क्षविशेषमपहाय तदिरत्र सामान्यमन्वेति"—इति हि न्यायः। कथं पुनर्मनोर्दुर्बलत्वमुच्यते? बृहस्पतिस्तस्य प्राधान्यं स्मरति—

"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः कृतम्।
मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते"॥

इति। अत्रोच्यते। सत्यं स्मरति बृहस्पतिरस्य प्राधान्यम्, अस्त्येव तत्, तच्च वयमपि नापलपामः। परमेतत्प्राधान्यमवष्टभ्य नात्र निर्णयो युक्त इति ब्रूमः। यत्र खल्वन्यत् विनिगमनाकारणं नास्ति, समानविषयस्तु समाम्नानद्वयमुपलभ्यते, तत्र मनोः प्राधान्य-

मवष्टभ्य शास्त्रार्थावधारणा कर्त्तुमुचिता। सामान्यविशेषवचनयोस्तु विशेषवचनं बलवदिति को नाम साहसिकः समुत्सहतेऽपलपितुम्? एवं खल्वपक्षस्तितैव शास्त्रमर्य्यादा स्यात्। सर्व्वाणि दर्शनानि सर्व्वे च लोकाः व्याकुप्येरन्। अतएव मनोरननुमतमपि वैश्वदेवादिक-माचार्य्यानुमतमनुष्ठीयते, मन्वनुमतन्तु काम्यतया क्रियते इति निपुणतरमुपपादयिष्यामः।

परमार्थतस्तु 'स्नात्वा यदेव तर्पयति'—इति, 'तेनैव'—इति च ब्रुवाणो मनुरेवकारादन्यत् तर्पणं विनाऽपि, पिण्डबलिनेव, स्नानाङ्ग-तर्पणेनैव पितृयज्ञफलप्राप्तिं दर्शयति इति—तद्वचनमेव पृथक्तर्प-णाशक्तविषयं भवितुमुचितम्। अपिच। मनुना स्नानाङ्गतर्पणेनैव पितृयज्ञक्रियाफलप्राप्तिवचनात् तत्त्वतामनुमायान्यथानुपपत्त्या पितृ-यज्ञतर्पणस्य तत्कालत्वमनुमित्सति भवान्। अस्मादेव च कारणात् ब्रह्मयज्ञोत्तरत्ववचनं स्नानाशक्तविषयमिति प्रतिपद्यते। तच्चैतदनु-चितम्। कस्मात्? इतरेतराश्रयात्। सिद्धे हि स्नानाङ्गतर्पण-कालत्वे प्रधानतर्पणस्य, ब्रह्मयज्ञोत्तरत्ववचनं स्नानाशक्तविषय-मवतिष्ठते। सिद्धे च ब्रह्मयज्ञोत्तरत्ववचनस्य स्नानाशक्तविषयत्वे प्रधानतर्पणस्य तत्कालत्वानुमानकल्पना—इति इतरेतराश्रयमाप-द्येत। अपि चार्थविप्रकर्षात्। विप्रकृष्टा खल्वेषा कालकल्पना, सन्निकृष्टेन कालेन ब्रह्मयज्ञोत्तरत्वेन बाध्यते। आनुमानिकं खल्विदं स्नानाङ्गतर्पणकालत्वं प्रत्यक्षन्तु ब्रह्मयज्ञोत्तरत्वं प्रत्यक्ष-ञ्चानुमानाद्बलीयः। यावत् खल्वनुमातुमुत्सहते भवान्, तावदेव ब्रह्मयज्ञोत्तरत्वमन्वीयते—इति प्रत्यक्षविरोधादनुमानमेव बाध्यते—

इति युक्तम्। सदाचारस्य स्मृत्यपेक्षया दुर्ब्बलतायामित्यमेव कारणमभिहितं वार्त्तिककृद्भिः। तथा चोक्तम्।

"सदाचारः स्मृतिं यावदनुमातुं समुत्सुकः।
स्मृतिर्लब्धश्रुतिस्तावद्धर्म्ममेव प्रमापयेत्"॥

इति। अपि च।

"तेनैव सर्व्वमाप्नोति पितृयज्ञक्रियाफलम्"।

इत्यवधारयन्मनुरशक्तविषयमिदमिति दर्शयति। शक्तस्य तु श्राद्धादिकरणं दर्शयिष्यामः। यदि पुनः केषाञ्चिदपि शाखिनां तर्पणयोः समानकालत्वं प्रामाणिकम्। तर्हि कामं तत्परमस्तु मनुवचनम्। तावताऽप्यस्माकं ब्रह्मयज्ञोत्तरत्ववचनं नापचीयते। तस्मादस्मदुक्त एवार्थः समादरणीयः।

अथैवमेकस्मिन्नेव दिने स्नानाङ्गं प्रधानञ्चेति तर्पणद्वयं कर्त्तव्यमित्युक्तम्। तत् खल्वनुचितमेव। कस्मात्?

"नावर्त्तयेत् पुनः कर्म्म तर्पणादिकमन्वहम्।
काम्यनैमित्तिके हित्वा एकं ह्येकत्र वासरे"॥

इत्येवमादिस्मरणात्। उच्यते। इदं हि वाक्यं, 'एकं ह्येकत्र वासरे'—इत्युपसंहारादेकस्यैव कर्म्मणः फलभूमार्थितया पुनरावृत्तिं निषेधतीति—सकृदनुष्ठानेनैव शास्त्रार्थस्य कृतत्वात् सुतरां नावर्त्त्यते कर्म्मेति न्यायमूलम्। न पुनर्निमित्तभेदेऽपि नैमित्तिकानामावृत्तिं निषेधति। सति निमित्ते नैमित्तिकस्यावश्यम्भावात्। अत एवैकस्मिन्नहनि प्रातर्मध्याह्ने च स्नानाङ्गतर्पणमुपपद्यते। 'काम्यनैमित्तिके हित्वा'—इति च निमित्तभेदेनावृत्तौ मुनेः स्वरसोऽव-

गम्यते। अतएवेदमपि प्रदर्शनमात्रं न पुनर्नियमार्थम्। न्यायस्यान्यत्राप्यविशेषात्। अतएव—

"विषुवद्दिवसे प्राप्ते पञ्चतीर्थ्यां विधानतः।
स्नात्वा सङ्कर्षणं कृष्णं दृष्ट्वा भद्रांश्च भो द्विजाः"॥

इत्येकस्मिन्नपि दिने निमित्तभेदेन नैमित्तिकावृत्तिर्न्यायावगतैव स्मर्य्यते। तथा।

"धर्म्मविन्नाचरेत् स्नानमाह्निकञ्च पुनः पुनः।
तर्पणं ब्रह्मयज्ञञ्च वैश्वदेवं न चाचरेत्"॥

इति। इदमपि वचनं एकस्यैव कर्म्मण एकदैव पुनराचरणं निषेधतीति न्यायमूलमेव। वैश्वदेवमाहचर्य्याच्चैवमवगम्यते। न खल्वेकस्मिन् दिने सकृदेव वैश्वदेवः कर्त्तव्यः इति शक्यते वक्तुम्। रात्रावपि पुनर्वैश्वदेवस्य वक्ष्यमाणत्वात्। अतएव सामान्यतः स्मर्य्यते।

"यथाब्देनाब्दिकं कर्म्म मासेनैव तु मासिकम्।
न्यूनाधिकं न कर्त्तव्यं न चैकत्र क्रियाद्वयम्"॥

इति। एकस्याः क्रियाया एकदा वारद्वयविधानं न युक्तमिति हलायुधः। तस्मात् तर्पणद्वयमविरुद्धम्। तदेवं 'स चार्व्वाक् तर्पणात् कार्य्यः'—इति ब्रह्मयज्ञस्यैकः कालः। 'पश्चाद्वा प्रातराहुतेः'—इत्यपरः कालः। अध्यापनं श्रुतिजपश्चाच्च कर्त्तव्यम्। तथा च स्मर्य्यते।

"द्वितीये च तथा भागे वेदाभ्यासो विधीयते।
वेदाभ्यासो हि विप्राणां परमन्तप उच्यते।

ब्रह्मयज्ञः स विज्ञेयः षड़ङ्गसहितस्तु सः।
वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः।
तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासश्च पञ्चधा"।

इति। अनया च स्मृत्येदमवगम्यते—यत् गुरोरध्ययनमपि ब्रह्मयज्ञोऽस्यैव कर्त्तव्यमिति। अत्र चाध्यापनं प्रथमः कल्प इति भट्टभाष्यम्। कर्म्मप्रदीपोऽप्याह।

"ब्रह्मयज्ञादपि ब्रह्मदानमेवातिरिच्यते"।

इति। 'वैश्वदेवावसाने वा'—इत्यपरः कालः। वैश्वदेवो नाम होम उच्यते देवयज्ञरूपः। विश्वे देवाः सर्व्वे देवाः, ते यस्य होमस्य देवताः सोऽयं देवयज्ञात्मको होमो वैश्वदेव इत्युच्यते। तदवसानमन्यः कालो ब्रह्मयज्ञस्य। तस्य खल्वस्य वैश्वदेवस्यावसाने विहितमपि वामदेव्यगानं वलिकर्म्मान्त एव कर्त्तव्यम्।

"अहोमकेष्वपि भवेत् यथोक्तं चन्द्रदर्शने।
वामदेव्यं गणेष्वन्ते वल्यन्ते वैश्वदेविके"।

इति कर्म्मप्रदीपदर्शनात्। स खल्वयं वामदेव्यगानरूपो ब्रह्मयज्ञो-वैश्वदेवावसाने वलिकर्म्म कृत्वा कर्त्तव्यः—इति परिशिष्टप्रकाशः। वल्यन्ते वामदेव्यगानान्तिको यो जपः स ब्रह्मयज्ञः—इति भट्टभाष्यम्। ते खल्विमे त्रयो ब्रह्मयज्ञकाला व्यवस्थिता वेदितव्याः। कथन्नाम? तर्पणादर्व्वाक् श्रुतिजपः। प्रातराहुतेः पश्चात् स चाध्यापनञ्चाध्ययनञ्च। वैश्वदेवावसाने स एवेति। सा खल्वियं व्यवस्था बहुसम्मतेत्यादरणीया। अनियमेनैते यथासम्भवं ब्रह्मयज्ञकाला इत्यपरमतम्। वैश्वदेवावसाने तु व्याख्यातारो विव-

इन्ते। केचिदाहुः—वामदेव्यगानमेवात्र श्रुतिजप इति। अन्ये त्वाहुः—वामदेव्यगानमपि अन्यदप्यध्ययनमत्र श्रुतिजप इति। इदमेव तावन्मतमाद्रियामहे। कस्मात् ? ब्रह्मयज्ञस्यैव कालत्रयविधानात्। व्यवस्थायाश्च प्रमाणविशेषाभावात्। इयान् परं विशेषः। यदशक्तौ कर्म्मापवर्गविहितेनापि वामदेव्यगानेन तदानीं स कृतो भवति। तमिमं तृतीयं महायज्ञं वैश्वदेवमुपदिदिक्षुराचार्य्य इदमाह।

निष्ठिते सायमाशप्रातराशे भूतमिति प्रवाचयेत् ॥ १६ ॥

निष्ठा निष्पत्तिः संजाताऽस्येति निष्ठितः, तस्मिन्निष्ठिते निष्पन्ने इत्येतत्। अन्ये त्वाहुः—निष्ठिते निःशेषेण व्यञ्जनोपसेचनादिसहिते स्थिते सिद्धे—इति। कस्मिन्? सायमाशप्रातराशे, सायमाश्यते इति सायमाशः, प्रातराश्यते इति प्रातराशः, स च स चेति द्वन्द्वैकवद्भावस्तस्मिन् सायमाशप्रातराशे। सायंप्रातःशब्दौ खल्विमौ दिवारात्रिपरौ। कस्मात् ?

"मुनिभिर्द्दिरशनं प्रोक्तं
विप्राणां मर्त्यवासिनां नित्यम्।
अहनि च तथा तमस्विन्यां
सार्द्धप्रहरयामान्तः"।

इति कर्म्मप्रदीपदर्शनात्। भूतमिति प्रवाचयेत्, प्रकर्षेण वाचयेत्। भूतमिति प्रवाचयेदिति सूचयन्नाचार्य्यो—भूतमिति ब्रूहीति प्रवाचयितुः प्रश्नोऽर्थादायात इति दर्शयति। कः प्रवाचयेत् ?

गृहपतिः। कस्मात्? प्रकृतत्वात्। कां प्रवाचयेत्? पत्नीम्। कस्मात्? अग्निपंक्त्यां तस्या एवाधिकारात्। कथमग्निपंक्त्यां तस्या एवाधिकारः? मन्वादिस्मरणात्। तथा च स्मरति भगवान्मनुः।

"अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्।
शौचे धर्म्मेऽग्निपंक्त्याञ्च पारिणाय्यस्य रक्षणे"।

इति। केनचित् प्रतिबन्धेन पत्नी चेदसन्निहिता स्यात्, तर्हि किं कर्त्तव्यम्? इत्यत्राह कर्म्मप्रदीपः।

"भूतप्रवाचने पत्नी यद्यसन्निहिता भवेत्।
रजोयोगादिना तत्र कथं कुर्व्वन्ति याज्ञिकाः?
महानसेऽन्नं या कुर्य्यात्सवर्णान्तां प्रवाचयेत्।
प्रणवाद्यपि वा कुर्य्यात् कात्यायनवचो यथा"।

इति ॥ १६ ॥ * ॥

ऋते भगया वाचा शुचिर्भूत्वा ॥ १७ ॥

ऋते विना, अभगया अभजनीयया अशोभनया वाचा, तां विनेति व्यत्ययेनेयं तृतीया द्रष्टव्या। अथवा। ऋते प्रदीप्ते, तत्राप्यस्याभिधानकाण्डे पाठात्। कस्मिन्? प्रकृतत्वादग्नौ, वैश्वदेवार्थमिति वाक्यशेषः। भट्टभाष्ये तु—"ऋते गते। ऋ गतौ। कस्मिन्? प्रकृतत्वादन्नहोमार्थमग्निसविधमासादिते इत्यर्थः। एतस्मिन् काले प्रवाचयेत्"। इति व्याख्यातम्। तथाच गृहपतिना भगया वाचा भूतमिति ब्रूहीत्येवमभिहिता पत्नी, शुचिर्भूत्वाऽऽचमनादिना, भगया वाचा शोभनया विस्पष्टया भूतमिति ब्रूयादित्यर्थः।

गृहपतेः स्वाचान्तोदकेन कृत्यमित्यनेनैव शौचं सिद्धमिति शुचिर्भूत्वेत्येतत् पत्नीसम्बन्धविवक्षयैवाचार्य्यः सूचयाञ्चकारेति गम्यते ॥ १७ ॥ ॰ ॥

पत्न्या खल्वेवमुक्ते गृहपतिः—

प्रतिजपत्योमित्युच्चैस्तस्मै नमस्तन्माख्या इत्युपांशु ॥ ॥ १८ ॥

ॐ—इत्युच्चैः प्रतिजपति। तस्मै नमस्तन्माख्या इत्युपांशु—

"शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयन् ।

किञ्चित् शब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः"।

इत्युक्तलक्षणं यथा भवति, तथा प्रतिजपतीत्यनुषज्यते ॥ १८ ॥ ॰ ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथमप्रपाठकस्य तृतीया खण्डिका ॥ ॰ ॥

गोभिलीयगृह्यसूत्रे

प्रथमप्रपाठके चतुर्थी खण्डिका ।



अथेदानीमुपक्रान्तेनान्नेन वैश्वदेवबलिकर्म्मणी कर्त्तव्ये—इत्येतदाह ।

अथ वाग्यतो बलीन् हरेत् ॥ १ ॥

अथेत्यानन्तर्य्यार्थम् । वक्ष्यमाणं वैश्वदेवहोमं निर्वर्त्त्यानन्तरं वाग्यतः संयतवाक्, बलीन् वक्ष्यमाणान्, हरेन्निदध्यादित्यर्थः । ननु वक्ष्यति होमानन्तरम्—'अथ बलीन् हरेत्,'—इति, तत् कि-मित्यस्मिन्नथेत्युच्यते ? उच्यते । होमानन्तरं बलीनेव हरेत्, न त्वन्यत् किञ्चित् कुर्य्यादित्येवमर्थमिदमुच्यते । तदनेन वैश्वदेवाव-सानविहितमपि वामदेव्यगानादिकं बलिहरणान्त एव कर्त्तव्यम् । अत एव कात्यायनोऽपि—

"वामदेव्यं गणेष्वन्ते बल्यन्ते वैश्वदेविके" ।

इति स्मरति । एतेन—

"प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा ।
संप्राप्तो वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः" ।

इति स्मृतिरपि व्याख्याता वेदितव्या ॥ १ ॥ * ॥

वाग्यत इत्यस्यापवादमाह—

भाषेतान्नसꣳसिद्धिमतिथिभिः कामꣳसम्भाषेत ॥ २ ॥

भाषेत वदेत्, अन्नसंसिद्धिमन्नस्य सम्यक्सिद्धिं प्रकृतिमित्येतत्। किमिदमन्नमुपसिक्तं उत न ?— इत्येवमादिकामन्नप्रकृतिं प्रति भाषेत। भाषणञ्चेदं पृच्छारूपम्। अन्नसंसिद्धिमन्नसंसिद्ध्यर्थं भाषेत—इति भट्टनारायणोपाध्यायाः। अतिथिभिः—

"एकरात्रं हि निवसन्नतिथिर्ब्राह्मणः स्मृतः।
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते"।

इति मन्वादिस्मरणात् नास्ति द्वितीया तिथिरस्येत्यतिथिरुच्यते। तैरतिथिभिः सह। बहुवचनात् सम्भवे बहवोऽप्यतिथयो भवन्तीति दर्शयति। काममिच्छया सम्भाषेत बलिहरणकालेऽपि। अतिथिगुणविशेषादिकं ज्ञात्वा इच्छया सम्भाषेत वा, न वा सम्भाषेत— इत्यनियमः ॥ २ ॥ * ॥

अथ हविष्यस्यान्नस्योद्धृत्य हविष्यैर्व्यञ्जनैरुपसिच्याग्नौ जुहुयात् तूष्णीं पाणिनैव ॥ ३ ॥

अथेति प्रकृतसमन्त्रकपरिसमूहनादि समिदाधानान्तं स्मारयति। कर्म्मप्रदीपोऽप्याह—

"पर्य्युक्षणञ्च सर्व्वत्र कर्त्तव्यमदितेऽन्विति।
अन्ते च वामदेव्यस्य गानं कुर्य्यादृचस्त्रिधा"।

इति। हविष्यस्यान्नस्येति षष्ठी सम्बन्धार्था अवयवार्था वा। सावशेषः खल्वेष होमो भवति। न खल्वत्र सर्व्वहुतत्वे प्रमाणमस्ति।

एतदवशिष्टेनैवान्नेन बलिहरणं, गृहमेधिनो भोजनस्यास्यैव इति च वक्ष्यामः। अन्नस्येति च सूचयन्नाचार्य्यो नात्र चरोरावृदस्तीति दर्शयति। स्थालीपाके—चरौ खलु तामावृतं वक्ष्यति। न खल्वत्र स्थालीपाकः श्रूयते। मनुरपि—

"वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्व्वकम्।
आभ्यः कुर्य्याद्देवताभ्यो ब्राह्मणो होममन्वहम्"॥

इति स्मरति। विश्वे देवाः सर्व्वे देवास्ते यस्य पाकस्य देवताः सोऽयं वैश्वदेवोऽहरहर्यन् पच्यते तदुच्यते। तदयमर्थः। अथ समिदाधानान्तकर्म्मानन्तरं हविष्यस्यान्नस्य उद्धृत्य गृहीत्वा, हविष्यैर्घृतदुग्धदध्यादिभिर्व्यञ्जनैरुपकरणैरुपसिच्य सव्यैयाग्नौ जुहुयात्। तूष्णीमिति वाग्व्यापारप्रतिषेधान्मनसा मन्त्रमुच्चार्य्येत्यर्थः। वाग्यतोबलीन् हरेत्,—इति बलिहरण एव वाग्यतत्वमुक्तमितीह होमे न प्राप्नोतीति खल्वाचार्य्यस्तूष्णीमित्याह। 'पाणिनैव' जुहुयान्न स्रुवादिपात्रान्तरेणेत्यर्थः॥ ३॥

प्राजापत्या पूर्व्वाऽऽहुतिर्भवति सौविष्टकृत्युत्तरा॥ ४॥

प्रजापतिर्द्देवताऽस्येति प्राजापत्या प्रजापतिदेवताका पूर्व्वा प्रथमा आहुतिर्भवति। 'सु' शोभनं 'इष्टं' अभिलषितं करोतीति, स्विष्टकृदित्यग्निरुच्यते। कस्मादग्निरुच्यते? तदुच्यते। 'अग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्धपूर्व्वार्द्धे जुहुयात्'—इति लिङ्गात्। "देवा वै अग्निं स्विष्टकृतमब्रुवन्;—हव्यं नोवहेति, सोऽब्रवीत्; किं मे ततः स्यात्? इति, यत् कामयसे इत्यब्रुवन्, सोऽब्रवीत्; सर्व्वेष्टिषु केवला

सौविष्टकृतीति, तथेति, सोऽवहद्रवींषि"—इति च ब्राह्मणं भवति। तस्य खल्वस्य स्विष्टकृत इयं सौविष्टकृती। सा खल्वियं सौविष्टकृती स्विष्टकृद्देवताका उत्तरा द्वितीया आहुतिर्भवतीत्यनुषज्यते।

अत्र च—प्रजापतये स्वाहा, अग्नये स्विष्टकृते स्वाहा—इति होममन्त्रः पर्य्यवस्यति। कस्मात्?—लिङ्गदर्शनादेव। वक्ष्यति चाचार्य्यः—"मन्त्रान्ते स्वाहाकारः"—इति। "नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगे चतुर्थी"—इति च शाब्दिकाः स्मरन्ति। "अमुष्मै स्वाहेति जुहुयात्"—इति च श्रुत्यन्तरम्। "तस्मात् प्राजापत्यां मनसा जुहोति"—इति वचनात् प्राजापत्याऽऽहुतिर्मनसा होतव्या। होमो-दैवः—इति वचनादयन्तावद्देवयज्ञो वैश्वदेव इति चोच्यते।

इदमिदानीं सन्दिह्यते। "अग्नावग्निर्धन्वन्तरिर्विश्वेदेवाः प्रजापतिः स्विष्टकृदिति होमाः"—इति गौतमेन पञ्च आहुतयो दर्शिताः। अन्यैरपि मुनिभिरन्यथैव होमः समाम्नातः। किमेते होमा विकल्प्येरन्, आहोस्वित् समुच्चीयेरन्? यदा समुच्चीयेरन्, तदाऽपि किं स्वशाखाहोमानामर्व्वागन्तरा परतो वा निविशेरन्, अथ वा परत एवेति? किन्तावत् प्राप्तम्? विकल्प्येरन्निति। कस्मात्? एकार्थत्वात्। वैश्वदेवनिर्वृत्त्यर्थं खल्विमे होमाः समाम्नायन्ते। 'एकार्थास्तु विकल्प्येरन्'—इति खल्वाचार्य्याणां समयः। अथवा। समुच्चीयेरन्निति प्राप्तम। कस्मात्? अतुल्यबलत्वात्। अतुल्यबलाः खल्विमे होमा भवन्ति;—स्वशाखाविहितो होमः स्वस्यैव भवति, अन्यस्तु स्वस्य चान्यस्य च—इत्यतुल्यबलत्वात् समुच्चीयेरन्निति युक्तम्। ते खल्विमे समुच्चीयमाना होमाः, स्वशाखा-

होमानाम् आदावन्ते मध्ये वाऽनियमेन सन्निविशन्ते नियमकारिणः शास्त्रस्याभावादिति तावत् प्राप्तम्।

एवं प्राप्ते उच्यते। विकल्पस्तावदमीषां न सम्भवति, प्रतुल्य बलत्वादेव। इतश्च। स्वशास्त्रपरित्यागप्रसङ्गात्। यदा ह्यमी विकल्पेरन्, तदा स्वशास्त्रसमाम्नातोऽपि होमः पक्षे परित्यज्येत। न चैतदुचितम्। न खलु स्वशाखाश्रयमुत्सृज्य परोक्तमुपादीयते। तस्मान्न विकल्पः। अथ समुच्चीयेरन्नमी होमाः? एतदपि न सम्भवति। कस्मात्? एकसिद्धावन्यवैयर्थ्यात्। एकेन स्वशास्त्रोक्त-होमेन सिद्धे फले न खल्वन्यस्य होमस्य प्रयोजनमुपलभामहे। येन तमपि समुच्चिनुमः।

अपि च। गौतमेन प्राजापत्याहुतेरर्व्वागन्यास्तिस्र आहुतयः समाम्नायन्ते। ताः खल्विमास्तिस्र आहुतयः कौथुमादीनां प्राजा-पत्याहुतेरर्व्वाक् न सम्भवन्ति। कस्मात्? प्राजापत्या पूर्व्वाऽऽहुति-र्भवतीति समाम्नानात्। इयमेव पूर्व्वा नातोऽन्येत्यर्थः। अन्यथा पूर्व्वेति व्यर्थमापद्येत। एवं 'प्राक् स्विष्टकृत आवापः'—इति वच-नात् प्राजापत्याहुतेः परतः स्विष्टकृदाहुतेरर्व्वागन्यः सामान्याभि-हितः पौराणिकादिको होमो माभूदित्येतदर्थं सौविष्टकृत्युत्तरे-त्याह। इयमेवोत्तरा नान्येति तदर्थः। अन्ते सन्निविशन्तामिति चेन्न, स्वशाखाविहितहोमेन सिद्धे फले साधनव्यापारवैयर्थ्यात्।

नन्वमी सामान्यहोमाः स्वशास्त्रहोमानामन्ते नित्यतया मा सन्निविशन्तां काम्यतयैव सन्निविशन्तामिति चेदोमिति ब्रूमः। सामान्येन खल्वभिहितानां सर्व्वशाखिधर्म्मत्वमुचितम्, तस्मात् सर्व्वे-

रेव तदिच्छयोपादेयं भवति। यदप्याहुः। शाखान्तराधिकरणन्यायेनैकमेवेदं कर्मेति सर्वत्र सर्वोपसंहारो भविष्यति,—इति। तदप्यनुचितम्। भिन्नशास्त्रसमाम्नानात्। विभिन्नेषु शास्त्रेषु खल्वाम्नातानां परस्परनिराकाङ्क्षाणामेषां उपसंहारो न सम्भवति। अतएव गृह्यपरिशिष्टम्।

"प्रयोगशास्त्रं गृह्यादि न समुच्चीयते परैः।
प्रयोगशास्त्रताहानादनारम्भविधानतः॥
बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म्म प्रकीर्त्तितम्।
तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतोभवेत्"॥

इति। अपि चागुणत्वात्। उपसंहारः खलु गुणानामेव भवति न प्रधानानाम्। प्रधानानि चेह सामान्यसमाम्नाता होमाः। अपि च देवताभेदात्। देवताभेदः खल्विहोपलभ्यते। न च देवताभेदे कर्म्मैक्यं भवति। अपि च पूर्व्वोत्तरत्वाम्नानात्। 'प्राजापत्या पूर्व्वाहुतिर्भवति सौविष्टकृत्युत्तरा'—इति पूर्व्वोत्तरत्वमाहुत्योरभिदधानः खल्वाचार्य्य एतावानेव होम इति दर्शयति—इत्यवोचाम। तस्मान्नामीषामैककर्म्यमस्ति। तस्मादादौ मध्ये च सन्निवेशासम्भवात् स्वशास्त्रहोमानामन्त एवेच्छया सामान्यहोमाः सन्निविशन्ते। स्वशास्त्रोक्तहोमः खल्वावश्यकः सामान्यहोमोऽपि निर्विषयोमाभूदितीच्छया काममन्ते भवतु, न त्वावश्यकः। ततश्च सामान्यहोमानामकरणे प्रत्यवायो नास्ति। करणे त्वभ्युदयः।

"यच्च स्यात् कृच्छ्रभूयस्त्वं श्रेयसोऽपि मनीषिणः।
भूयस्त्वं ब्रुवते तच्च कृच्छ्रात् श्रेयोह्यवाप्यते"॥

इति स्मरणात्। बलिकर्म्मण्यप्येष न्यायश्चिन्तनीयः। एतेन—"सदा भोजनस्योपनीतस्यायमग्नौ जुहुयात्, अग्ने विवस्वदुषस इति पूर्व्वेण, बलिञ्चोत्तरेण कुर्य्यात्, बहुपशुधनधान्यो भवति"—इत्येवमादिश्रुत्यादिसमाम्नाते काम्ये होमबलिकर्म्मणी अपि व्याख्याते। तदेतत् सर्व्वमाह कात्यायनः।

"न स्यातां काम्यसामान्ये जुहोतिबलिकर्म्मणी।
पूर्व्वं नित्यविशेषोक्तजुहोतिबलिकर्म्मणोः॥
काममन्ते भवेयातां न तु मध्ये कदाचन।
नैकस्मिन् कर्म्मणि तते कर्म्मान्यत्तायते यतः"॥

इति। "अग्निहोत्रदेवताभ्यः सोमाय वनस्पतये अग्नीषोमाभ्यां इन्द्राग्निभ्यां द्यावापृथिवीभ्यां धन्वन्तरये इन्द्राय विश्वेभ्यो देवेभ्यो-ब्रह्मणे"—इत्येवमादिकस्तु परशास्त्रोक्तो होमोबलिश्च परैर्न कर्त्तव्य एव। परोक्तत्वात्। अक्रियैव खल्वसावन्येषामित्यवोचाम। येषान्तु स्वशास्त्रे होमोबलिश्च नैवोपदिश्यते, तैः सामान्याभिहित एव कश्चिद्धोमोबलिश्चोपादेयः।

अनाहिताग्नेर्यत् कर्त्तव्यन्तदप्याह कात्यायनः।

"अम्न्यादिर्गौतमेनोक्तो होमः शाकल एवच।
अनाहिताग्नेरेवैष युज्यते बलिभिः सह"॥

इति। यः खल्वम्न्यादिर्होमो गौतमेनोक्तः, स तदुक्तैरेव बलिभिः—"दिग्देवताभ्यश्च यथास्वं द्वारेषु मरुद्भ्यो गृहदेवताभ्यः प्रविश्य ब्रह्मणे मध्ये अद्भ्य उदकुम्भे आकाशायेत्यन्तरीक्षे नक्त-ञ्चरेभ्यश्च सायम्"—इत्येवंलक्षणैः सहित इत्येकः कल्पः। यश्च

शाकलहोमो देवकृतस्यैनस—इत्याद्यष्टाकृत्यात्मकः सामवेदपठितः स चाग्निपुराणाद्युक्तबलिभिः सहित इत्यन्यः कल्पः। तथाचाग्निपुराण-योगियाज्ञवल्क्यौ।

"अन्नं व्याहृतिभिः पूर्वं हुत्वा मन्त्रैश्च शाकलैः।
भूतेभ्यश्च बलिं दत्त्वा ततोऽश्नीयादनग्निमान्" ॥

इति। प्रणवपरिशिष्टम्।

"अन्नं व्याहृतिभिर्हुत्वा तथा मन्त्रैश्च शाकलैः।
भूतेभ्यश्च बलिं दत्त्वा तदाऽश्नीयादनग्निकः" ॥

इति। तथा स्मृत्यन्तरम्।

"अनग्निकस्तु योविप्रोह्यन्नं व्याहृतिभिः स्वयम्।
हुत्वा शाकलहोमैश्च शिष्टाद्भूतबलिं हरेत्" ॥

इति। तदेवं गोतमोक्तहोमस्तदुक्तबलिभिः सहेति, शाकल-होमोऽग्निपुराणाद्युक्तबलिभिः सहेति च निरपेक्षौ द्वौ कल्पाविति रघुनन्दनादीनां मतम्। तेषां मते, 'शाकल एवच'—इत्येवका-रोऽनन्तरोक्तकल्पव्यवच्छेदार्थः, चशब्दस्य वाशब्दार्थः, एष इति च प्रकृतवाचिना सर्व्वनाम्ना निरपेक्षं कल्पद्वयमुच्यते। पितृदयिता-कारादिभिस्तु—एकस्मिन् प्रयोगे गौतमोक्ताग्न्यादिहोमशाकल-होमौ समुच्चितौ लिखितौ। तेषां मते एवचेति निपातसमुदायः समुच्चयवाची। यथा स्मृत्यन्तरे—

"विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एवच।
कुह्वै चैवानुमत्यै च प्रजापतय एवच"।

इति।

"दिवाचरेभ्यो भूतेभ्यो नक्तञ्चारिभ्य एवच" ।

इति चैवमादौ । तथा कात्यायनस्यैव ।

"आरोग्यमायुरैश्वर्यं धीर्धृतिः शं बलं यशः ।

ओजोवर्चः पशून् वीर्यं ब्रह्म ब्राह्मण्यमेवच" ॥

इति ।

"अर्घ्येऽक्षय्योदके चैव पिण्डदानेऽवनेजने ।

तन्त्रस्य विनिवृत्तिः स्यात् स्वधावाचन एवच" ॥

इति चैवमादिवदुक्तम् । एष इति चैकवचनान्तेन प्रकृतवाचिना सर्व्वनाम्ना समुच्चितं होमद्वयमेकप्रयोगभूतं परामृश्यते । एष इति खल्वेकवचनं विधेयविशेषणतया विवक्षितं भवितुमुचितम् । न चाप्यविवक्षायां कारणमस्ति । न चैष गौतमोक्तहोमः—एष वा शाकलहोम-इत्यावृत्तिकल्पना प्रामाणिकी । न च साहित्यवाचिद्विवचनान्ताद्यनुक्तेर्नैवमितिवाच्यम् । साहित्यवाचिन एवच शब्दस्योक्तत्वात् ।

न च, 'अन्नं व्याहृतिभिर्हुत्वा'—इति, 'अनग्निकस्तु योविप्रः'—इति चैवमादिभिः केवलशाकलहोमाभिधानान्न समुच्चय इति वाच्यम् । अन्यार्थानामन्यत्रानुपयोगात् । अन्यार्थाः खल्विमाः स्मृतयः—कल्पान्तरपरा नान्यत्रोपयुज्यन्ते इति कात्यायनोक्तकल्पे समुच्चयो न विरुध्यते । कल्पान्तरपराः खल्विमाः स्मृतयो भवन्ति । कस्मात् ? अतुल्यार्थत्वात् । कात्यायनेन शाकल एव होमः समाम्नातः, आसु च स्मृतिषु व्याहृतिहोमः शाकलहोमश्चेति नेमौ तुल्यौ कल्पाविति शक्यते वक्तुम् । तस्मादिमाः स्मृतयः कात्यायनोक्तकल्पात् कल्पान्तर-

विधायिन्यो न कात्यायनोक्तकल्पे समुच्चयं वाधितुमुत्सहन्ते। तस्मात् कात्यायनवचने एवचेत्यनेन समुच्चय एवादरणीयः। अन्यच तथा दर्शनात्। पक्षान्तरे कुसृष्टिकल्पनापत्तेः। न च तत्र प्रमाणमस्ति। तस्मात् कौथुमादीनां कात्यायनोक्त एव कल्पः। कल्पान्तराणि तेषां नैव सम्भवन्ति। स्वशाखाश्रयपरित्यागप्रसङ्गात्। यच्च व्यासस्मृतौ—

"व्यस्ताभिर्व्याहृतीभिश्च समस्ताभिस्ततः परम्।
षड्भिर्देवकृतस्येति मन्त्रवद्भिर्यथाक्रमम्।
प्राजापत्यं स्विष्टकृतं हुत्वैवं द्वादशाहुतीः"।

इति शाकलहोमे षट्संख्यावचनम्। यच्च स्कन्दपुराणवचनम्—

"वैश्वानरं समभ्यर्च्य साज्यपुष्पाचतैरथ।
भूराद्या व्याहृतीस्तिस्रः स्वाहान्ताः प्रणवादिकाः।
ॐ भूर्भुवः स्वः स्वाहेति विप्रोदद्यात्तथाऽऽहुतिम्।
तथा देवकृतस्याद्या जुहुयात्तु षडाहुतीः।
यमाय तूष्णीमेकाञ्च तथा स्विष्टकृदग्नये।
विश्वेभ्यश्चापि देवेभ्यो भूमौ दद्यात्ततोवलिम्।
सर्व्वेभ्यश्चापि भूतेभ्यो नमो दद्यात्तदुत्तरे।
दक्षिणेऽपि पितृभ्यश्च प्राचीनावीतिकोददेत्।
निर्णेजकोदकास्येन ऐशान्यां यक्ष्मणेऽर्पयेत्।
ततो ब्रह्मादिदेवेभ्योनमोदद्यात्तदुत्तरे।
निवीती सनकादिभ्यः पितृभ्यस्त्वपसव्यवान्"।

इति। तदपि कल्पान्तरपरमेव। संख्यान्तरवचनात्। संख्यान्तरं खल्विहोच्यते—षड्भिरिति, द्वादशाहुतीरिति, षडाहुतीरिति च।

अस्माकं खल्वष्टावाहुतयः शाकलहोमे भवन्ति। अष्टाहुत्यात्मकः खल्वेष होमस्ताण्ड्यब्राह्मणे समाम्नातः। तस्मादमूषां स्मृतीनां कात्यायनोक्तकल्पात् कल्पान्तरपरत्वं कौथुमादिच्छतिरिक्तविषयत्वं च वाच्यम्। अतएव हलायुधेन वाजसनेयिनां देवकृतस्येति षडाहुतयोऽभिहिताः व्याहृतिहोमादयश्च।

शाकलहोमे खल्वेतस्मिन् स्वाहाकारप्रयोगो नास्ति। कथन्तर्हि होतव्यम्? तदुच्यते। "देवकृतस्यैनसोऽवजनमसि"—इत्येवमादिभिरसिकारान्तैरेवाष्टाभिर्मन्त्रैरष्टावाहुतयो होतव्याः। कस्मादेवमुच्यते? द्राह्यायणसमाम्नानात्। तथाच द्राह्यायणसूत्रम्। "अष्टावष्टौ शकलान्याहवनीये प्रहरेयुर्देवकृतस्येत्येतत्प्रभृतिभिरिकारान्तैः"—इति। लाट्यायनोऽप्याचार्य्य एवमेव सूत्रयाञ्चकार। अत्र खल्विकारान्तैरिति सूत्रयन्नाचार्य्यः स्वाहाकारस्याप्रयोगं दर्शयति। विपर्य्यये च स्वाहाकारो मन्त्रान्तः स्यात् न पुनरिकार इति। तस्मादिकारान्तैरित्येतत् स्वाहाकारं परिसञ्चष्टे। अत एवाचार्य्येण सायणेन प्रौढब्राह्मणभाष्ये व्याख्यातम्—"अवयजनमसीत्येवमन्तैः न तत्र स्वाहाकार इत्यर्थः"—इति। होममन्त्रस्य स्वाहाकारान्तत्वमन्तरेणापि दर्शनान्नैवात्र किमपि शङ्कितव्यं भवति। तथाच सूत्रम्। "आग्निध्रीये द्वे आहुती जुहुयुरपां पुष्पमिति पूर्व्वां स्वाहाकारेणोत्तराम्"—इति। वाचनिकी खल्वेवमादिका व्यवस्था वचनमेवमनुसरतीति न किञ्चिदनुचितम्।

आचार्य्येणाग्निस्वामिना तु लाट्यायनसूत्रमेवं विवृतम्—"इकारान्तैरिति मन्त्रान्तज्ञापनार्थम्"—इति। तस्यापि पूर्व्वोक्त एवार्थे

तात्पर्य्यम्। कथन्नाम ?—इकार एवान्तोनाच स्वाहाकारोऽस्तीति। अवगम्यत एव खल्वमीषां मन्त्राणामिकारान्तत्वमिति पुनरिकारान्तवचनमनर्थकमेव स्यात्—यदि न परिसञ्चक्षीत। न च "उत्तरादिः पूर्व्वान्तलक्षणम्"—इति सूचणान्नाच मन्त्राणामिकारान्तत्वमवगम्यते इति वाच्यम्। स्तोमभागमन्त्रादीनामिवामीषामपि लिङ्गादेवावसानावगमस्य सम्भवात्। "यावद्यजुरनादिष्टान्तान् मन्त्रान्"—इति सूचणाच्च।

इदन्त्विह वक्तव्यम्। "मन्त्रान्ते स्वाहाकारः"—इति वचनात् मन्त्रस्यावसाने स्वाहाकारः प्रयोक्तव्यो भवति। सोऽयं समाप्ते मन्त्रे तदन्तिके प्रयुज्यते, न त्वसौ मन्त्रस्यान्तोऽवयवो भवति। तस्मात् प्रयुक्तेऽपि स्वाहाकारे मन्त्रस्येकारान्तत्वं न व्याहन्यते। समस्तस्य यजुष एकैकस्यामाहुतौ प्रयोगेऽपि मन्त्रलिङ्गं संगच्छत एव। तत्रैवं सति 'इकारान्तैः'—इत्यवचने, 'सूर्य्यामादित्याभ्योनाष्ट्राभ्यः पातु'—इत्यादिवत् समस्तस्य यजुष एकमन्त्रत्वं तेन चैकैकाश्चाहुतयः किं न भवेयुः। तस्मात्, 'इकारान्तैः'—इत्यनेन मन्त्राणामन्तप्रज्ञापनमर्थवदेव। तस्यार्थो न परिसंख्यानम्। दोषत्रयापत्तेः। अनन्यगत्या हि तदङ्गीक्रियते। यदेव च न्यायादिभ्योऽवधार्य्यते, तदेव सौकर्य्यार्थमाचार्य्यैः सूत्र्यते। शैली खल्वेषा तत्रभवताम्। न चेदेवं "उत्तरादिः पूर्व्वान्तलक्षणम्"—इत्यपि न सूचयितव्यं स्यात्। लिङ्गात् तदवगतेः सम्भवात्।

"यावद्यजुरनादिष्टान्तान् मन्त्रान्"—इत्यस्य तु नायं विषयः। अनादिष्टान्तान् मन्त्रान् यजुर्जानीयात्, तत्र यावत् यजतिसमर्थं

तावत् प्रयुञ्जीत,—इति हि तस्यार्थः। अतएव व्याख्यातं भगवता भाष्यकारेणाग्निस्वामिना। "येषां मन्त्राणामन्तोनादिश्यते तानेव यजुः प्रतीयात्। तेषु यावदेव यजतिसमर्थं तावदेव प्रयोक्तव्यमिति येऽर्थवादा मध्ये पठितास्तेषामुद्धारः"—इति। एवञ्च 'इकारान्तैः'—इत्यवचने समस्तस्य यजुषो यजतिसमर्थत्वात् समस्तेन यजुषा प्रत्येकमाहुतयः स्युः। तस्मात् परिसंख्याने मानाभावात् इकारान्तैः इति मन्त्रान्तप्रज्ञापनार्थमित्यादरणीयम। किञ्च 'इकारान्तैः' इत्यनेन आदिश्यत एव मन्त्राणामन्तः। भवांस्तु मन्यते 'यावद्-यजुरनादिष्टान्तान् मन्त्रान्'—इत्यनेन मन्त्रान्तस्यावगतिसम्भवात्, 'इकारान्तैः'—इति वचनमनर्थकं सत् परिसंख्यानार्थं भवतीति किमत्र ब्रूमः। तस्मादत्रापि मन्त्रान्ते स्वाहाकारः प्रयोक्तव्यः। विहिताविहितत्वसन्देहे चाविहितकरणमेव न्याय्यमिति चावोचाम। तथाचाभाणकः।

"सन्दिग्धेऽपि परे लोके त्याज्यमेवाशुभं नरैः।
यदि नास्ति तदा किं स्यादस्ति चेन्नास्ति दूषणम्"।

इति। एवमनाहिताग्नेर्वैश्वदेवहोमो व्याख्यातः। बलयस्तु तस्यापि गृह्योक्ता एव भवन्ति। कथं ज्ञायते? 'बलिभिः सह'—इत्युक्ते तथाऽवगतेः। विशेषानुक्तौ हि गृह्योक्तमेवान्तरङ्गत्वात् शीघ्रमागच्छति हृदयम्। आगच्छति चेत्, न युज्यते विना कारणमुत्स्रष्टुम्। विशेषस्य चानुपदेशात्। होमविशेषवत् बलिविशेषो नैवानाहिताग्नेरुपदिश्यते। तस्मादाचार्य्योक्ता एव बलयस्तस्यापि भवन्ति। न चैते तस्य प्रतिषिद्धाः। न चाप्रतिषिद्धस्य स्वशास्त्रोक्तस्य

परित्यागोयुक्तः। तत्परित्यागेन शास्त्रान्तरोक्तबलिपरिग्रहेऽपि न किञ्चित् प्रमाणम्। स्वशास्त्रोक्तन्तु बुद्ध्यारोहमेवेति तदेव ग्रहीतव्यं भवति।

स खल्वयं वैश्वदेवहोमो लौकिकाग्नौ जलादावपि कर्त्तव्यः।

"लौकिके वैदिके वापि हुतोच्छिष्टे जले चितौ।
वैश्वदेवञ्च कुर्व्वीत पञ्चसूनापनुत्तये"।

इति शातातपस्मरणात्।

"शालाग्नौ वा पचेदन्नं लौकिके वापि नित्यशः।
यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयते"।

इति च स्मृत्यन्तरम्। जलचित्योः पर्य्युक्षणादिकमपि नास्ति, अग्नावेव तदाम्नानादिति वाचस्पतिमिश्राः। गौतमोक्ताग्न्यादिहोमशाकलहोमयोर्विकल्पवादिनस्त्वाहुः। गौतमवचने होमादिवाग्निप्राप्तेरग्निग्रहणं जलचित्याधारतानिवृत्त्यर्थं, ततश्च शाकलकल्प एव साऽवतिष्ठते—इति। तदनेन समुच्चयपक्षेऽप्यनयोर्जलचित्याधारता न युक्ता तत्राप्यग्न्यादिहोमस्याविशेषादिति चेत्। उच्यते। यदि नामाग्निग्रहणं जलचित्याधारतां निवर्त्तयेदपि, तर्हि केवलगौतमोक्ताग्न्यादिहोम एव निवर्त्तयतु, न तु कात्यायनोक्ते तत्समुचिते शाकलहोमेऽपि, तद्वचनस्य तत्राप्रवृत्तेः। सामान्येन च वचनान्तरेण तत्र तत्प्राप्तेः। अपिच। नैतदप्यस्ति,—गौतमवचनेऽग्निपदं जलचित्याधारतानिवृत्त्यर्थम्—इति। न खलु गौतमवचनेऽग्निग्रहणं जलचित्याधारतां निवर्त्तयति, किन्तर्हि, एकदेशोत्कीर्त्तनपरमग्निपदं जलादिकमुपलक्षयति। अतएव—

"कनकालङ्कृतां दत्त्वा तत्र गामवतारयेत् ।
सामगाय च सा देया ब्राह्मणाय विशाम्पते" ॥

इति वचनमेकदेशोत्कीर्त्तनपरमिति,—"सचेलकण्ठां काञ्चन-शृङ्गीं वृषप्रजां रूप्यखुरां कांस्योपदोहां विधाय दद्यात्"—इति मुन्यन्तरोक्तमन्यदुपलक्षयति,—इति वाचस्पतिमिश्रैर्निरूपितम् ।

ननु होमादेवाग्निप्राप्तेरग्निग्रहणमग्नावेवेत्येवमर्थमेव किमिति न स्यात्? इति चेन्नैष दोषः । कस्मात्? अशब्दत्वात् । अग्नाविति वचनं खल्वग्नौ होमं शक्नोति वदितुं, न पुनरनग्निं निवर्त्त-यितुं प्रभवति । तस्मादशब्दोऽयमर्थः—अग्नावेव इति । ननु होमा देवाग्नेः प्राप्तत्वादन्याय्यं पुनर्व्वचनम्? उच्यते । काममन्याय्यं भवतु, न तु शक्नोत्यन्यद्वदितुम् । सकृदुच्चरितेऽप्यस्य यावानर्थः, शतकृत्वोऽप्युच्चरिते तावानेव प्रतीयते । अपिच । साधुः खल्वय-माचार्य्यः कथमस्य वचनमन्याय्यं भवतु । साधोर्व्वचनं बहुशोऽप्युच्य-मानं न्याय्यमेव, असाधोस्तु सकृदप्यन्याय्यम् । पुनर्व्वचनस्य प्रयोजनं किञ्चिदवक्तव्यम्? एवन्तर्हि आदरः पुनर्व्वचनस्य प्रयोजनं भविष्यति । आदरेणाग्नौ होमः कर्त्तव्यः—इति । आदरार्थमपि पुनर्व्वचनमा-चार्य्याणां बहुलमुपलभ्यते । परिसंख्यानार्थमेव कुतो न भवति पुनर्व्वचनमिति चेन्न, अन्यथैवोपपत्तेः । न खल्विष्यते परिसंख्या सम्भवन्त्यामपि गतौ । सा हि दोषत्रयदुष्टा भवति । तथा चोक्तम् ।

"श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात् ।
प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका" ।

इति । परिसंख्यायाञ्च श्रुतिरत्यन्तमुत्सृष्टा भवति । यावच्च भवा-

नग्निपदस्यास्वार्थकल्पनया जलादिकं व्यावर्त्तयितुमुत्सहते, ताव-दाक्यान्तरेण जलाद्याधारताऽन्वीयते—इत्युपरिष्टादुपजायमानोऽपि परिसंख्यावाक्यार्थः कथमिवान्वितमपि जलादिकं परिसञ्चचीत। वाक्यान्तरप्राप्तस्य परिसंख्याने वाक्यान्तरस्य सामर्थ्यविरहात्। वाक्यभेदश्चैवमापद्येत! कस्मात्? इति होमाः कर्त्तव्याः, ते चाग्नावेव न जलादावित्यर्थभेदात्। एकं खल्विदं वाक्यम्—'अग्नावग्निर्ध-न्वन्तरिर्विश्वेदेवाः प्रजापतिः स्विष्टकृदितिहोमाः'—इति। तस्मा-दग्नाविति न नियमार्थं वचनम्। अन्यथा—

"वैश्वानरं समभ्यर्च्य माल्यपुष्पाचतैरथ"।

इति।

"अनाहिताग्निरावसथ्याग्निरादायान्नं हुतस्रुतम्।
शाकलेन विधानेन जुहुयाल्लौकिकेऽनले"।

इति चैवमादिस्मृतौ शाकलहोमेऽप्यग्नेरुपादानात्तचापि जल-चित्याधारता न स्यात्। न स्यादेवेति चेन्नाभ्युपगमात्। अभ्युप-गम्यते खल्वेतद्भवता—यदुत शाकलकल्पे जलचित्याधारतेति।

अपिच। गौतमः खल्वाचार्य्यः—"भार्य्यादिरग्निर्दायादिर्व्वा, तस्मिन् गृह्याणि, देवपितृमनुष्ययज्ञाः"—इत्यभिधाय, 'अग्नावग्निः'—इत्यादिवचनं रचयाञ्चकार। स खल्वयं होमो गृह्य एवाग्नौ मा भूदित्येवमर्थं पुनरग्नावित्याह। तत्कथमनर्थकमग्निवचनं?—येन परि-सञ्चचीत। अग्नावित्यवचने खल्वयं होमः प्रकृते गृह्य एवाग्नौ स्यात्। होमात् खल्वग्निर्गम्यते, प्रकृतश्च गृह्योऽग्निरिति स एव गम्येत। तस्मादग्नाविति जात्या द्रव्यमग्निमात्रं लक्षयित्वा तत्र होमो-

विधीयते,—लौकिकेऽप्यग्नौ होतव्यमित्येवमर्थं, नान्येषामाधाराणां निवृत्त्यर्थम्। न खल्वग्निपदं व्यक्तिवचनं, येनाग्नेयीन्यायात् सन्निहित एवाग्निरर्थः स्यात्। यदि पुनरग्निपदस्यापि प्रकृत एवाग्निरर्थ इत्युच्यते। अस्तु तर्हि गौतमीयानां गृह्याग्निसाध्यएवायं होमः, स एव तु गोभिलीयस्यानाहिताग्नेः कात्यायनेन विहितः,—इति गोभिलीयस्यानाहिताग्नेराधारविशेषानुपदेशान्न तेषामप्यग्नावेव होमः कर्त्तव्य इति शक्यते वक्तुम्। होममात्रं खल्वनाहिताग्नेर्विधीयते, न तु गृह्याग्निसाध्यत्वविशिष्टमपि। गौरवादसम्भवाच्च। न खल्वनाहितगृह्याग्नेस्तस्मिन्नग्नौ होमः सम्भवति। तस्माद्गौतमवचनेऽग्निपदं निरग्नेरप्याधारान्तरं निवर्त्तयतीत्यसङ्गतं वचनम् ॥ ४ ॥ * ॥

अथ बलीन् हरेत् बाह्यतोवाऽन्तर्वा सुभूमिं कृत्वा ॥ ५ ॥

अथेति पूर्व्वप्रकृतार्थम्। अथ पूर्व्वप्रकृतेनैवान्नेन होमावशिष्टेनेत्येतत्। कात्यायनोऽपि स्मरति।

"स्वशाखाविधिना कृत्वा तच्छेषेण बलिं हरेत्"।

इति। अपचारे च शेषस्यान्यदप्युपादाय बलीन् हरेत्। कस्मात्?—

"यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीणामिव शालयः" ॥

इति कर्म्मप्रदीपस्मरणात्। 'गुणलोपे च मुख्यस्य'—इति च न्यायात्। मुख्यः खल्वयं बलिर्भवति प्रधानत्वात्। न खल्वयं

बलिर्द्रव्यार्थः, किन्तर्हि?—पुरुषार्थं इत्युपरिष्टादुपपादयिष्यामः। पुरुषार्थश्च कर्म्म प्रयोजयति द्रव्यम्। अर्थकर्म्मणि च द्रव्यविधिरयं भवति,—शेषेण बलीन् हरेत्—शेषेण बलिहरणमभिनिर्व्वर्त्तयेदिति।

ननु साक्षादत्र शेषः प्रतिपाद्यते? उच्यते। सत्यं शेषः प्रतिपाद्यते। तत् खल्विदं प्रतिपादनमर्थकर्म्मणि क्रियते—इति शेषनाशेऽपि नैतत् परिलुप्यते। कर्म्मचोदना हि द्रव्यमन्तरेणानुपपन्ना द्रव्यमाक्षिपति, विशेषशास्त्रन्तु नियामकम्, तच्चासम्भवात् यदा न प्रवर्त्तेत, तदा मा भून्नियमः, तथापि सामान्याक्षेपस्य वारयितुमशक्यत्वात् अस्ति प्रतिनिधिः,—इति खल्वभियुक्ताः कथयन्ति। प्रतिपत्तिरूपकार्म्माङ्ग एव प्रतिपाद्याभावे तन्निवृत्तिमनुमन्यन्ते। विहितस्य द्रव्यस्य खल्वपचारे प्रतिनिधिरुपादेय इति च षष्ठाध्याये सिद्धान्तितम्।

"चरितार्था श्रुतिः कार्य्या यस्मादप्यनुकल्पशः"।

इति च स्मरणम्। अस्ति चात्र साक्षादपि द्रव्यान्तरविधायकं किञ्चिद्वचनम्। तच्चोदाहरिष्यामः। तस्माच्छेषापचारेऽन्यदुपादाय बलयोहर्त्तव्या इति सिद्धम्।

कुत्र बलयोहर्त्तव्याः? तदुच्यते। 'बाह्यतो' बहिर्व्वा, प्रक्रतत्वादग्न्यगारस्य। तथा चाग्न्यगारान्निष्क्रम्य तस्मिंस्तस्मिन् प्रदेशे तन्तं बलिं हरेत्, योयोबलिर्यस्मिन् यस्मिन् प्रदेशे समाम्नातः। 'अन्तर' मध्ये वा अग्न्यगारस्य—एकस्मिन्नेव प्रदेशे बलीन् हरेत् सर्व्वान्। 'सुभूमिं' शोभनां भूमिं 'कृत्वा', यथासम्भवं सम्मार्ज्जनोपलेपनादिभिरिति वाक्यशेषः ॥ ५ ॥ * ॥

सकृदपोनिनीय चतुर्धा बलिं निदध्यात सकृदन्ततः परिषिञ्चेत् ॥ ६ ॥

सकृदेकवारम्। अप उदकं निनीय निषिच्य चतुर्द्धा चतुर्षु स्थानेषु बलिं बलिचतुष्टयं निदध्यात्। अत्र च—"समाचारात् प्राप्तं बलिचतुष्टयमात्रं सकृद्गृहीत्वा चतुर्षु स्थानेषु निदध्यात्, बलिमित्येकवचनात्, चतुर्धेतिवचनाच्च",—इति वत्ससोमभट्टनारायणौ। तच्चेदं, बलिचतुष्टयार्थं सकृदेव सेकः—इत्यस्मिन् पक्षे ज्ञेयम्। यत्र पुनरग्निमसूत्रानुसारादेकैकबल्यर्थमेकैकः परिषेकः पुरस्ताच्चोपरिष्टाच्च क्रियते, न तत्रैतद्भवति। न खलु शक्यते द्वितीयादिबल्यन्नं दत्तहस्ते कुर्व्वता तेनैव हस्तेन परिषेक्तुम्। दक्षिणः करः खलु कर्म्मपारगोऽङ्गानुक्राविल्यवोचाम। परिशिष्टप्रकाशोऽप्येवमेवाह।

तदेवं बलिचतुष्टयं दत्वा, सकृदेकवारं अन्तत उपरिष्टात् परिषिञ्चेद्दलीन्। प्राक्संस्थाः खल्विमे बलयो भवन्ति। कस्मात्? "प्राञ्चि उदञ्चि वा कर्म्माण्यनुतिष्ठेरन्"-इति श्रवणात्। एकत्र निधानपक्षे तथोपदेशाच्च। तच्चोदाहरिष्यामः। बलिपरिमाणमाह कर्म्मप्रदीपः।

> "न चावराद्ध्यांबलयो भवन्ति
> महामार्ज्जारश्रवणप्रमाणात्।
> एकत्र चेत् सन्ना भवन्ति
> इतरेतरसंसक्ताश्च" ॥

इति। तच्च परिमाणमङ्गुष्ठपर्व्वमात्रमिति भट्टभाष्यम् ॥६॥*॥

एकैकं वाऽनुनिधानमुभयतः परिषिञ्चेत् ॥ ७॥

'एकैकम्', एकमेकं वा बलिम्, 'अनुनिधानं',—निधानमनुलक्षीकृत्यानुनिधानं, प्रत्येकं निहितान् बलीन् प्रत्येकमेवोभयतः पुरस्ताच्चोपरिष्टाच्च परिषिञ्चेत् ॥ ७ ॥ * ॥

स यत् प्रथमं निदधाति स पार्थिवो बलिर्भवत्यथ यत् द्वितीयꣳ स वायव्यो यत् तृतीयꣳ स वैश्वदेवो-यच्चतुर्थꣳ स प्राजापत्यः ॥ ८ ॥

स यजमानः प्रथमं यन्निदधाति इति यदर्थोनिधानक्रिया-विशेषणम्। व्यत्ययाद्वा नपुंसकत्वम्। स यत् यं बलिं प्रथमं निदधाति, स पार्थिवः,—पृथिवी देवताऽस्येति देवतार्थे तद्धित-विधानात् पृथिवीदेवताको भवतीत्यर्थः। अनेनैव सूत्रशेषो-व्याख्यातः। "अनिरुक्तं हि प्राजापत्यम्",—इति वचनात् मानसः प्राजापत्यबलिः। तदत्र मन्त्रानुपदेशात् कात्यायनोक्तोबलिमन्त्र आदरणीयः। तद्यथा।

"असुष्मै नम इत्येवं बलिदानं विधीयते।
बलिदानप्रदानार्थं नमस्कारः कृतोयतः" ॥

इति। अत्र, इतिः पदद्वयकीर्त्तनार्थः। एवमिति क्रमार्थम्। भट्टनारायणकुल्लूकभट्टशूलपाणिवाचस्पतिमिश्ररघुनन्दनप्रभृतिभिरपि नमस्कारान्त एव बलिमन्त्रोऽभिहितः। परिशिष्टप्रकाशे तु,—'नमो-ब्रह्मणे' इति दर्शनात् नमः पृथिव्यै इति बलिहरणमन्त्रोलिखितः। असुष्मै नम इति च तत्सूत्रविरोधादेव न क्रमपरं किन्तु पद-

दयकीर्त्तनाभिप्रायम्—इति चाभिहितम्। नैतदेवम्। शाब्दक्रम-विरोधात्। इत्येवं बलिदानम्—इति शाब्दः क्रमः खल्विह कात्यायनेन समाम्नातः। पाठक्रमाच्च बलवत्तरः स इष्यते। तथा-चोक्तम्। "श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात्"—इति। "क्रम-कोपोऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्च"—इति च।

कात्यायनवचनं पदद्वयकीर्त्तनाभिप्रायं न क्रमपरमिति चेन्न विनिगमनाऽभावात्। कात्यायनवचनं पदद्वयकीर्त्तनाभिप्रायमाचा-र्य्यसूत्रं वेत्यत्र न काचिद्विनिगमनोपलभ्यते। परमार्थतस्तु—इत्येव-मितिवचनात् कात्यायनवचनं क्रमपरं भवितुमर्हति। किमाचार्य्यः कात्यायनस्य नोपजीव्यः? क एवमाह—नोपजीव्य इति, सत्यमुप-जीव्य एवाचार्य्यः कात्यायनस्य, किमतो भविष्यति? यद्येवमेतदतो-भविष्यति;—कात्यायनवचनमुपजीव्यबाधभयादेव न क्रमपरम्—इति। मैवम्। नित्यवत्त्वावाचार्य्येण सन्त्रानुपदेशात्। इत्येवं बलि-दानम्—इति ब्रुवाणः कात्यायन आचार्य्यस्यैवाभिप्रायं प्रकाश-याञ्चकारेति क्षिप्यते। स खलु,—गोभिलोक्तानामस्पष्टानां विधिं प्रदीपवत् सम्यग्दर्शयिष्ये—इति प्रतिज्ञातवानित्यवोचाम। वृत्ति-कारकल्पः खलु कात्यायन आचार्य्यस्य। मुन्यन्तरैश्चास्य संवादो-दृश्यते। इदमप्यनल्पप्रामाण्यकारणं यदुत संवादः—इति। सूत्यर्थ सन्देहे च सूत्यन्तरसंवादादेवार्थनिर्णयं निबन्धारोमन्यन्ते।

यदि पुनः वास्तुबलौ—नमो ब्रह्मणे—इत्याचार्य्यस्य सूत्रं क्रम-परमिष्यते कामं ब्रह्मबलावेव नमो ब्रह्मणे इत्यस्तु प्रयोगस्तत्रैव तथाम्नानात्, न त्वन्यत्र प्रमाणाभावात्। कल्प्यतामन्यत्रापीति चेन्न,

नमस्कारान्तत्वबोधकशास्त्रसद्भावात्। न खल्वाचार्य्येणैकत्र नमःपदं पूर्व्वमुक्तमिति सर्व्वत्र तदेव कल्पयितव्यम्,—अनादृत्य नमःपदान्तत्वबोधकानि मुनिवचनानि,—इति युक्तम्। अथ—

"बहूनामेकधर्म्माणामेकस्यापि यदुच्यते।

सर्व्वेषामेव तत् कुर्य्यादेकरूपा हि ते स्मृताः" ॥

इति वचनादस्तु सर्व्वत्रैव नमःपदादित्वमिति चेदुच्यते। एवमपि वास्तुबलावेव तद्भवितुमर्हति, न तु नित्यबलावपि। नित्यबलौ कृत्स्नेन नमस्कारान्तत्वबोधकवचनेन कल्पनानवकाशात्। वस्तुतस्तु वास्तुबलावपि न तद्वचनात् सर्व्वत्र नमःपदादित्वं कल्पयितुं शक्यते। कस्मात्? ब्रह्मबलावेव तदभिधानात्। अपिच। यत्र खल्वेकधर्म्माणां बहूनामेकं सिद्धवदनूद्य किञ्चिदुच्यते, तत्रैव तद्वचनं प्रवर्त्तते। न चात्र बहूनामेकं सिद्धवदनूद्य किञ्चिद्विधीयते। किन्तर्हि?—किञ्चिद्विशिष्टमेवैकं विधीयते। तच्च किञ्चिद्विशिष्टमेवैकं विहितं सद्बहूनाम् एकं भवति—इति नास्त्यत्र तद्वचनस्यावकाशः। यत्र खल्वेकधर्म्माणां बहूनामेकं धर्म्मिणं—लब्धात्मभावमनूद्य कस्यचिद्धर्म्मस्य विधानं भवति, भवति तत्र तस्य वचनस्यावसर इति धीमद्भिरनुचिन्तनीयम्।

यत्तु—बलिमन्त्राणामन्येषां नमःपदान्तत्वमभ्युपगम्य, ब्रह्मबलौ नमःपदादित्व-नमःपदान्तत्वयोर्व्विकल्पम्—आहुः। तत्र प्रमाणं नास्ति। विकल्पस्य चान्याय्यत्वात् नैषा साध्वी कल्पना। क्रमपरत्वे खल्वाचार्य्यसूत्रस्य, कात्यायनवाक्येन समं तस्य विकल्पायोगाच्चानुचितैषा कल्पना। न खल्वष्टदोषदुष्टोविकल्पः सम्भवन्त्यामपि गतौ

समाश्रयितुमुचितः। पचेऽपि प्रामाण्यान्माभूद्वचनस्य प्रमत्तगीतता —इति खल्वभावगत्या समाश्रीयते। तथाचाभियुक्तानां वचनम्।

"एवमेवाष्टदोषोऽपि यद्व्रीहियवपाकयोः।

विकल्प आश्रितस्तत्र गतिरन्या न विद्यते"॥

इति। अतुल्यबलत्वाच्च। न ह्याचार्य्यसूत्रस्य क्रमपरत्वमभ्युपेत्य, पुनः कात्यायनवाक्यात् तद्विरुद्धं नमःपदान्तत्वं प्रह्ववत्तौ शक्य-मभ्युपगन्तुम्। न खल्वनयोस्तुल्यबलत्वमस्ति वचनयोः। सेयं—निरङ्कुशत्वात् पुरुषबुद्धीनां—कल्पना समुत्रमिता, न शास्त्रबला-दित्यनादरणीया। अधिकं तु तत्रैव वक्ष्यामः। तस्मादास्तुबला वाचार्य्यनिर्द्देशवकाद्वृह्मवत्तौ नमःपदादित्वमन्यत्र तु नमःपदान्तत्वं मन्त्राणामास्थेयम्॥ ८॥ * ॥

अथापरान् बलीन् हरेत्; उदधानस्य मध्यमस्य द्वारस्याब्दैवतः प्रथमोबलिर्भवत्योषधिवनस्पतिभ्यो-द्वितीय, आकाशाय तृतीयः॥ ९॥

अथेति पूर्व्वविध्यनुकर्षणार्थम्। पूर्व्वेषामिवामीषामपि बली-नामुभयतः परिषेक इत्यर्थः। कर्मप्रदीपोऽप्याह—"सर्व्वेषामुभयतः परिषेकः"—इति। अपरानन्यान् बलीन् हरेत्। कुत्रेमे बलयो-हर्त्तव्याः?—इत्यत्राह;—'उदधानस्य', उदकं धीयते यस्मिन्नुदकं दधाति य इति वोदधानं मणिक उच्यते। षष्ठी चेयं समीपार्था। उदधानस्य मणिकस्य समीपे, नोदधान एवेत्यर्थः। मध्यमस्य द्वारस्य,—गृहस्येत्यर्थात्। 'अब्दैवतः' आपो देवता यस्य, सोऽयम-

द्दैवत:, 'प्रथम:' प्रक्रतानां वलीनामाद्योवलिर्भवति। स खल्वयं वलिरुदधानसमीपे निधातव्य:। यस्य मध्यमस्य दारस्य समीपे निधीयते, सोऽयं द्वितीयोवलिरोषधिवनस्पतिभ्यो भवति। तृतीय: खल्वाकाशाय वलिर्भवति। स खल्वयमाकाशदैवतो वलिरन्तरीचे निधातव्यो भवति। कस्मात्? आकाशदैवतत्वादस्य वलेरनिर्देशाच्च स्थानस्य। आकाशदैवते वलौ खल्वन्तरीचमागच्छति हृदयं, तच्चानुचितं परित्यक्तुं विशेषोपदेशविरहात्। स्मृत्यन्तरे चोपदेशात्। स्मृत्यन्तरे खल्वेवमुपदेशोदृश्यते, गौतमीये,—"आकाशायेत्यन्तरीचे"—इति। भट्टभाष्ये तु—"अयमनिर्दिष्टस्थानो यत्र कुत्रचिन्निधेय:" इत्युक्तम् ॥९॥

अथापरं वलिं हरेत्,—शयनं वाऽधिवर्चौवा,* स कामाय वा वलिर्भवति मन्यवे वा ॥ १० ॥

अथापरं वलिं हरेदित्युक्तार्थम्। शयनं शय्येत्यनर्थान्तरम्। अधिवर्चोमूत्रोच्चारप्रदेश:। वाशब्दचतुष्कस्य शब्दार्थम्। शयनस्य प्रत्यधिवर्चस्य प्रति वलिं हरेत्। हृतस्य स वलि:, कामाय च भवति, मन्यवे च,—इति यथासङ्ख्यम्। तदयमर्थ:। शयनं प्रति योवलिर्निधीयते स कामदेवताकोभवति, अधिवर्च: प्रति योवलिर्निधीयते स मन्युदेवताकोभवति—इति। अधिवर्चमिति पाठेऽपि यथोक्त एवार्थ:। अत्रापि, "वलिमित्येकवचनात् स्थानद्वयनिर्देशाच्च

* 'अधिवर्चं वा'—इति क्वचित् पाठः। तत्र च 'सान्ता अप्यदन्ताः'—इति गतिः।

बलिद्वयमात्रं सकृद्गृहीत्वा निदध्यात्"—इति भट्टभाष्यम्। तदिदं प्रत्येकपरिषेकपक्षे न सम्भवतीत्यवोचाम।

अन्ये त्वाङ्वाशब्दान् विकल्पार्थान् मन्यमानाः,—"एकएवायं बलिः शयनं वा प्रति देयोऽधिवर्च्चो वा, स कामदेवत्यो भवति मन्युदेवत्यो वा"—इति। नैतदेवम्। "अथ तद्विन्यासः"—इत्युपक्रम्य कर्म्मप्रदीपे, "कामाय, मन्यवे"—इति बलिद्वयसमाम्नानात्। "चतुर्द्दश नित्याः"—इति च सङ्ख्यावचनात्। बलेरेकत्वे खल्वियं सङ्ख्या लुप्येत! एतेन, येऽप्याहुः,—"शयनं प्रति कामाय रात्रौ, अधिवर्च्चः प्रत्यहनि मन्यवे"—इति, तेऽपि निरस्ताः। प्रमाणविशेषाभावाच्च ॥ १० ॥ * ॥

अथ सँस्तूपँ,* स रक्षोजनेभ्यः ॥ ११ ॥

अथेति विशिष्टमानन्तर्य्यं द्योतयति। मन्युबलिदानानन्तरम्,—इन्द्राय वासुकये ब्रह्मणे—इति बलित्रयं दत्त्वाऽथानन्तरमित्यर्थः। कस्मादेवमुच्यते? उच्यते। आचार्य्य एव वास्तुबलौ दशदिक्षु इन्द्रादिबलिदशकमभिधायासूत्रयत्,—"प्राच्यूर्द्ध्वावाचीभ्योऽहरहर्नित्यप्रयोगः"—इति। प्राच्यूर्द्ध्वाधोदिक्षु खल्विन्द्रवासुकिब्रह्मदेवत्या बलयोवास्तुकर्म्मणि समाम्नाताः। तेषां खल्वमीषां बलीनामहरहर्नित्यं प्रयोगोभवति—इति सूचयन्नाचार्य्यः, स्पष्टमिदमाह,—अहरहः इन्द्रवासुकिब्रह्मबलयो भवन्तीति। परिशिष्टप्रकाशेऽप्युक्तम्,—"गृह्यान्तरानुसारेण मन्युबलेरनन्तरम्—इन्द्रवासुकिब्रह्मदे-

* '॰स्तूपं'—इति सो॰ ३।॰ पुस्तके पाठः

वत्या बलयोदेयाः, ततो रक्षःपितृबली"—इति। "चतुर्दश नित्याः"—इति च कर्म्मप्रदीपः।

ते खल्विमे बलयः प्राच्यूर्द्धाधोदिचु निधातव्याः। कस्मात्? प्राच्यूर्द्धावाचीभ्योऽहरहर्नित्यप्रयोगः—इति दर्शनात्। क्रमस्तु,—इन्द्राय वासुकये ब्रह्मणे इति। कस्मात्? वास्तुबलौ तथादर्शनात्। वास्तुबलौ खल्वादित इन्द्रबलिस्ततोवासुकिबलिस्ततोऽपि ब्रह्मबलिर्दृश्यते। परन्तत्र दशत्वाद्बलीनामन्येऽपि बलयोऽन्तरान्तरा सन्निविष्टाः। न चैतावता किञ्चिदपचीयते। अतिदेशागतानां खल्वमीषां बलीनां तदवगतमेव पौर्व्वापर्य्यं स्थानञ्च कल्पयितुमुचितम्। तदाह कर्म्मप्रदीपः। "मन्यवे इन्द्राय वासुकये ब्रह्मणे"—इति।

अत्राह। "एकत्र प्राक्संख्यातैते बलयो भवन्त्येतद्वचनात्—इति। नैतदेवम्। "एकत्र चेत् कृत्स्ना भवन्ति"—इत्यभिधाय,—"अथ तद्विन्यासः"—इत्युपक्रमादेकत्र कृत्स्नबलिनिधानपक्ष एवैतस्य विन्यासविशेषस्य समाम्नानात्। कल्प्यतेऽनेकत्र निधानपक्षेऽपीति चेत्। उच्यते। कल्पनीयं तावत् स्थानमिति सत्यं, परन्तु युष्मदुक्तं वा कल्प्यते, अस्मदुक्तं वा,—इति भवति विचारणा। तत्र ये बलयो यथाचार्य्येण समाम्नातास्ते तथैव दातुमुचिता अतिदेशागता अप्यसति विशेषवचने। 'प्राच्यूर्द्धावाचीभ्योऽहरहर्नित्यप्रयोगः"—इति च हृदयमागताः प्राच्यूर्द्धाधोदिशोन युज्यन्ते परित्यक्तुम्। अधिपतयः खल्विमे आसां दिशामित्येषोऽस्मत्कल्पनायां विशेषः। तदेवमिन्द्रवासुकिब्रह्मबलिदानानन्तरं, संस्तूपं प्रति, "संस्तूपः सम्मार्ज्जनरेणुपुञ्जादिप्रक्षेपस्थानम्,—उत्करपिण्डिकेति

लोकैरभिधीयते"—इति भट्टभाष्यम्। तमिमं संस्तूपं प्रति, बलिं हरेत्। स खल्वयं बलिः,—रक्षोजनेभ्यो भवति॥११॥*॥

अथैतद्बलिशेषमद्भिरभ्यासिच्यावसलवि दक्षिणा निनयेत्तत्पितृभ्यो भवति॥१२॥

अथशब्दः प्राचीनावीतित्वसव्यजानुपातदक्षिणामुखत्वानि स्मारयति। एतद्बलिशेषम्, एतद्बलिदानावशिष्टमन्नम्, अद्भिरभ्यासिच्याप्लाव्य। तदिदमाप्लावनं, रक्षोबल्यवशिष्टत्वादन्नस्य संस्कारार्थं भवति। शेषं खल्विदमन्नं पितृबल्यर्थं भवति। तस्य च संस्कारोनानर्थकः। आप्लावनं रक्षोबलिशेषस्यान्नस्य न किञ्चित् दृष्टमुपकरोति?—इति चेन्मा करोतु दृष्टमुपकारम्, अदृष्टन्तु करिष्यति। यथा, "स्रुचः संमार्ष्टि"—"अग्निं संमार्ष्टि" "पुरोडाशं पर्य्यग्निं करोति"—इत्येवमादौ। तथा चोक्तं। "तुल्यश्रुतित्वाद्वा इतरैः सधर्म्मः स्यात्"—इति। तदेवमद्भिरभ्यासिच्य, 'अवसलवि' पितृतीर्थेनेत्यर्थः। अवसलविशब्दः खल्वयं पितृतीर्थमाह। तथाच गृह्यान्तरम्। "प्रदेशिन्यङ्गुष्ठयोरन्तरा अवसलवि अपसव्यं वा, तेन पितृभ्योददाति"—इति। 'दक्षिणा' दक्षिणस्यां दिशि निनयेत्। तच्चेदं निनयनं पितृभ्यो भवति। तथाच पित्र्यर्थत्वान्नात्र नमस्कारः प्रयोक्तव्यः, किन्तु पितृभ्यः स्वधेति स्वधाकारेणैष बलिर्दातव्यः। तदाह कात्यायनः।

"स्वाहाकारवषट्कारनमस्कारादिवौकसाम्।
स्वधाकारः पितॄणाञ्च हन्तकारो नृणां मतः।

स्वधाकारेण निनयेत् पित्र्यं बलिमतः सदा ।

तदप्येके नमस्कारैः कुर्व्वते नेति गौतमः" ।

इति। एकत्र चेत् सर्व्वे बलयो निधीयन्ते, तर्हि, यथा निधातव्यन्तदाह कर्म्मप्रदीपः। "अथ तद्विन्यासोद्दिष्टिपिण्डानिवोत्तरोत्तरांश्चतुरोबलीन्निदध्यात्,—पृथिव्यै, वायवे, विश्वेभ्योदेवेभ्यः, प्रजापतये—इति। सव्यत एतेषामेकैकस्यैकैकम्,—अद्भ्यः, ओषधिवनस्पतिभ्यः, आकाशाय, कामाय—इति। एतेषामपि, मन्यवे, इन्द्राय, वासुकये, ब्रह्मणे—इति। एतेषामपि, रक्षोजनेभ्यः—इति। सर्व्वेषां दक्षिणतः पितृभ्यः—इति, चतुर्दश नित्याः, आशस्प्रभृतयः काम्याः। सर्व्वेषामुभयतः परिषेकः पिण्डवच्च पश्चिमा प्रतिपत्तिः"—इति। आधानदिने च वैश्वदेवबलिकर्म्मणी सायमाहुत्यनन्तरं रात्रावेव कर्त्तव्ये। तदप्याह कर्म्मप्रदीपः।

'ऊर्द्धं पूर्णाहुतेः कुर्य्यात् सायं होमादनन्तरम्।

वैश्वदेवन्तु पाकान्ते बलिकर्म्मसमन्वितम्।

ब्राह्मणान् भोजयेत् पश्चादभिरूपान् स्वशक्तितः।

यजमानस्ततोऽश्नीयादितिकात्यायनोऽब्रवीत्" ।

इति। सोऽयं भूतयज्ञः,—"बलिर्भौतः"—इति वचनात्। एतदनन्तरं वामदेव्यगानं कर्त्तव्यम्। "बल्यन्ते वैश्वदेविके"—इति स्मरणात्। स खल्वयं ब्रह्मयज्ञस्य तृतीयः कालः—इत्यवोचाम।

अथेदानीं मनुष्ययज्ञः कर्त्तव्यः। तदाह कात्यायनः—"नृयज्ञोऽतिथिभोजनम्"—इति। तथाचोक्तम्। "अतिथिभिः कामं सम्भाषेत"—इति। मनुरपि—

"कृत्वैतद्बलिकर्म्मैवमतिथिं पूर्व्वमाशयेत्।
भिक्षाञ्च भिक्षवे दद्यात् यथावद्ब्रह्मचारिणे"।

इति स्मरति। भोजनोपयुक्तस्य पर्य्याप्तस्यान्नस्याभावे यथाशक्ति किञ्चिदप्यन्नमुद्धृत्य ब्राह्मणाय दद्यात्। तदाह कर्म्मप्रदीपः।

"अप्युद्धृत्य यथाशक्ति किञ्चिदन्नं यथाविधि।
पितृभ्योऽथ मनुष्येभ्यो दद्यादहरहर्द्विजे।
पितृभ्य इदमित्युक्त्वा स्वधाकारमुदीरयेत्।
हन्तकारं मनुष्येभ्यस्तदन्ते निनयेदपः"।

इति। वस्तुतस्तु अतिथिभोजनं तदसम्भवे मनुष्येभ्य इदं हन्तेत्युत्सृज्य किञ्चिदन्नदानं गोभिलीयानां स्वशास्त्रोक्तमावश्यकमित्यवगन्तव्यम्। अन्नस्याप्यभावे मूलादिकमपि दद्यात्। तदाह गौतमः। "अहरहर्ब्राह्मणेभ्योऽन्नं दद्यादामूलफलशाकेभ्योऽथैवं मनुष्ययज्ञं समाप्नोति"—इति। "अहरहर्दद्यादोदपात्रादथैवं मनुष्ययज्ञं समाप्नोति"—इति च शतपथीये ब्राह्मणे। अत्यन्तासम्भवे च भिक्षादानेनापि कस्याञ्चिदवस्थायां मनुष्ययज्ञोनिर्व्वहति। अतएव "भोजनं हन्तकारं वा"—इत्येवमादिवचनेषु विकल्प-निर्द्देशः सङ्गच्छते। भिक्षुकस्य चाभावेऽयं गोभ्यो दद्यात्, गवामप्यभावेऽग्नौ क्षिपेत्। "भिक्षुकाभावे चायं गोभ्यो दद्यादग्नौ वा क्षिपेत्"—इति विष्णुस्मरणात्। अन्येऽपि नृयज्ञप्रकाराः तन्त्रान्तरेषु द्रष्टव्याः

अथेदानीं पितृयज्ञः वक्तव्यः। स चानेकप्रकारः। तत्र तावत् पित्रादींस्त्रींस्त्रींश्च मातामहादीनुद्दिश्य यथोक्तब्राह्मणभोजनमिति एकः कल्पः। तदाह कात्यायनः।

"श्राद्धं वा पितृयज्ञः स्यात् पित्र्योबलिरथापि वा"।

इति।

"अप्येकमाशयेद्विप्रं पितृयज्ञार्थसिद्धये।

अदैवं नास्ति चेदन्योभोक्ता भोज्यमथापि वा"।

इति च। वायुपुराणे।

"अप्येकं भोजयेद्विप्रं षण्णामप्यन्वहं गृही।

अदृशाः प्रहरन्त्यस्मै वज्रेणैते षड्स्त्रिणा"।

इति। नित्यश्राद्धे तु विशेषोऽभिधीयते। यथा हारीतः।

"नित्यश्राद्धमदैवं स्यादर्घ्यपिण्डविवर्जितम्"।

इति। मनुः।

"एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके।

न चैवात्राशयेत् कञ्चिद्वैश्वदेवं प्रति द्विजम्"।

इति। मत्स्यपुराणम्।

"नित्यं तावत् प्रवक्ष्यामि अर्घ्यावाहनवर्जितम्।

अदैवं तद्विजानीयात् पार्व्वणं पर्व्वसु स्मृतम्"।

इति। लिखितजातूकर्णौ।

"नित्यश्राद्धमदैवं स्यात् पिण्डहोमविवर्जितम्"।

इति। भविष्यपुराणम्।

"अग्नौकरणमर्घ्यञ्चावाहनञ्चावनेजनम्।

पिण्डश्राद्धे प्रकुर्व्वीत पिण्डहीने विवर्ज्जयेत्।

इति। यद्यप्यर्घ्यमत्र निषिद्धं, तथापि प्रकारान्तरेण तदपि गृह्यान्तरे विहितम्। तथाच गृह्यान्तरम्। "नैत्यिके वर्हिर्दर्त्त्वोदकञ्च

पितर एतद्वोऽर्घ्यमिति पाणिनैवाद्भिस्तिलमिश्राभिरर्घं दद्यादन्यदेवमाचान्तेषु पितृभ्यः स्वधेति पितृणामक्षय्यमस्त्विति च। सह चेदश्नीयात् पूर्वमेव स्वधाऽक्षय्यस्तोरभिदध्यात्"—इति। एवञ्च पार्वणविहितेतिकर्त्तव्यताकमर्घ्यमत्र न भवति, भवति तु ततोऽन्यादृशमेवेत्यभूतमिति। अस्माच्च गृह्यान्तरादेवं विकल्पोऽवगम्यते, सह वाऽश्नीयात् पश्चादेति। मन्वादिभिस्तु पश्चाद्भोजनमेवोपदिष्टम्। तच्च परतोदर्शयिष्यामः। व्यासः।

> "आवाहनस्वधाकारपिण्डाग्नौकरणादिकम्।
> ब्रह्मचर्य्यादिनियमं विश्वान्देवांस्तथैवच।
> नित्यश्राद्धे त्यजेदेतान् भोज्यमन्नं प्रकल्पयेत्।
> दत्त्वा च दक्षिणां शक्त्या नमस्कारैर्विसर्ज्जयेत्।
> एकमप्याशयेन्नित्यं षण्णामप्यन्वहं गृही"।

इति। स्वधाकारः स्वधावाचनम्। शातातपः।

> "पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते।
> स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते।
> अक्षय्यदक्षिणास्वस्ति सौमनस्यं तथास्त्विति"।

इति। एवञ्च—

> "नित्यश्राद्धमदैवं स्यादर्घ्यपिण्डविवर्ज्जितम्।
> दक्षिणारहितं ह्येतद्दातृभोक्तृव्रतोज्झितम्"।

इति दक्षिणानिषेधोऽशक्तविषयः—इति तत्त्वज्ञाः। अतएव शक्त्या दक्षिणादानं व्यासः स्मरति। तदिदं नित्यश्राद्धं सम्भवे बहुब्राह्मणकमसम्भवे त्वेकब्राह्मणकमपि भवति। सोऽयं मुख्यः

कल्पः। श्राद्धकरणेऽशक्तस्तु यथाशक्ति किञ्चिदप्यन्नम् उद्धृत्य पितृभ्य-इदं स्वधेत्युच्चार्य्याग्निसमीपे उदकं निनयेत्। तच्चान्नं ब्राह्मणाय दद्यात्। 'अप्येकमाशयेद्विप्रम्'—इत्यभिधाय,—"अप्युद्धृत्य यथाशक्ति",—इत्येवमादिकात्यायनस्मरणात्। न चेदं श्राद्धविधायकमिति वाच्यं, प्रमाणाभावात्। श्राद्धस्य पूर्व्वेण वाक्येन विहितम्—'श्राद्धं वा पितृयज्ञः स्यात्'—इति, 'अप्येकमाशयेद्विप्रम्'—इति च। कथमिहापि विधीयेत। तस्मात्—'अप्येकमाशयेत्'—इति बहूनामसम्भवे एकब्राह्मणभोजनम्—एकेनापि ब्राह्मणेन श्राद्धकरणमित्येतत्परम्। 'अप्युद्धृत्य यथाशक्ति'—इति तु ब्राह्मणभोजनोपयुक्तान्नासम्भवेन श्राद्धासम्भवे—किञ्चिदप्यन्नमुद्धृत्य देयमित्याह। भिन्नौ खल्विमौ कल्पौ भवतः—यच्चैकब्राह्मणकश्राद्धं, यच्चोद्धृत्यान्यमपि देयमिति। तत्त्वतोऽप्येवम्। भट्टनारायणस्याप्येष एव स्वरसः। एतेन—

"नित्यश्राद्धेष्वसामर्थ्यात् त्रीन् द्वावेकमथापि वा।
भोजयेत् पितृयज्ञार्थं दद्यादुद्धृत्य दुर्ब्बलः"।

इति।

"यथाशक्त्यन्नमुद्धृत्य पित्र्येण विधिना सदा।
आहूय ब्राह्मणं दद्यात्तत्कुले वा समर्पयेत्"।

इति चैवमादिपुराणवाक्यमपि व्याख्यातम्। तत्राप्यशक्तस्य योऽयं भूतयज्ञे पितृबलिर्दीयते, तेनैव पितृयज्ञः कृतो भवति। 'पित्र्योबलिरथापि वा'-इति वचनात्। यदा कस्याञ्चिदवस्थायाम्—'यज्ञादेव निवर्त्तते'—इत्येवमादिकायां न हरति बलीन्, तदा

तर्पणेनैव पितृयज्ञः कृतोभवति। सोऽयं छन्दोगानां स्वशास्त्रपरिभाषितश्चतुर्विधः पितृयज्ञः श्राद्धं पितॄनुद्दिश्य ब्राह्मणायान्नदानं पित्र्यवलिस्तर्पणञ्चेति।

तदिदं तर्पणं सर्व्वस्यामेव दशायामावश्यकं यथाशक्ति चान्यत्। इयान् परं विशेषो यदशक्तस्य तर्पणेनापि प्रत्यवायः परिहृतो भवति। समुच्चयेन सर्व्वेषां पञ्चानामुपदेशस्तु शक्तमस्येति परिशिष्टप्रकाशः। तथा गौतमः। "नित्यं स्वाध्यायः पितृभ्यश्चोदकदानं, यथोत्साहमन्यत्"—इति। अत्र च,—तर्पणब्रह्मयज्ञयोः पूर्व्वमुक्तयोरपि नित्यमित्यादिना पुनरभिधानं यज्ञत्रयानुष्ठानाशक्तावङ्गवैकल्येनाप्यनयोरवश्यानुष्ठेयत्वार्थम्—इति कल्पतरुप्रभृतयः। अन्ये तेषां पञ्चानां यथाशक्ति समुच्चयविकल्पावाहुः। यदा पुनर्न शक्नोति पृथक् तर्पयितुं, तदा स्नानाङ्गेनापि तर्पणेन पितृयज्ञफलमधिगच्छति।

"यदेव तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः।
तेनैव सर्व्वमाप्नोति पितृयज्ञक्रियाफलम्"।

इति मनुवचनात्। सोऽयमुक्तः पितृयज्ञः। उक्ताश्च पञ्चमहायज्ञाः॥ १२ ॥ ० ॥

अथेदानीमुक्तस्यैव विशेषोऽभिधीयते—

आसीन एवाग्नौ जुहुयात्॥१३॥

आसीन उपविष्ट एव। नोर्द्धः, न वा प्रह्वः॥१३॥०॥

आसीनः पितृभ्यो दद्यात्, यथोपपादमितरान्॥१४॥

आसीनः पितृभ्यो वलिं दद्यात् हरेत्। आसीनः—इत्येतदवाच्यम्?—

इति चेन्न, एवं हि आसीन इत्यनुषज्येत। तदेतदनुगमाचार्य्य-आसीन इत्याह। पितृभ्योदद्यात् यथोपपादम्—इत्ययमपि सम्बन्ध-आशङ्क्येत, साऽप्याशङ्का माभूदिति च तद्वचनम्। पुनरुक्तञ्च गोभिले याह्यमिति चावोचाम। इतरान्,—अपरान् बलीन्। कस्मादपरान्? पित्र्यबलेरिति ब्रूमः। कस्मात्? प्रकृतत्वात्। प्रकृतः खल्वत्र बलिः पित्र्य एवेति तदपेक्षयैवापरत्ववर्णनमुचितम्। तान् खल्विमान् पित्र्यबलेरन्यान् सर्व्वान् बलीन्, 'यथोपपादं' यथोपपद्यते दानं, तथैव दद्यात् न पुनरासीन एवेत्ययमस्ति नियम इत्यर्थः। तेनाधिवर्चःप्रदेशस्याशुचितया दूरस्थ एव प्रक्षिप्य दद्यादूर्द्धः सन्। एवमन्यत्रापि क्वचित् प्रह्वः क्वचित्रान्यादृश एवेति यथायथमूहनीयम् ॥ १४ ॥०॥

स्वयन्त्वेवैतान् यावद्वसेद्बलीन् हरेत् ॥ १५ ॥

यावद्गृहे वसेत्, तावदेतान् सर्व्वानेव बलीन्,—न पुनः पित्र्यबले-रपरानेवेत्यर्थः। स्वयमेव यजमानो हरेन्निधाद्नलसः सन्। गृहे वसन् खल्वसौ यजमानः स्वयमेव बलिहरणं कुर्य्यान्नान्यद्वारा इति सूचयन्नाचार्य्यः, प्रवसन्नन्यद्वाराऽपि—इत्येतत् सूचयति। तस्मात् स्वयमेवेति स्वयं सम्भवाभिप्रायं वचनम्। उपलक्षणञ्चैतद्बलिग्रहणं होमादीनामपीति द्रष्टव्यम्। तुशब्दश्च स्वयं करणपक्षे फलविशेषं द्योतयति ॥ १५ ॥

अपि वाऽन्यो ब्राह्मणः ॥ १६ ॥

अपिवा, अथवा। अशक्तौ यजमानस्य प्रवासे वेत्यर्थः। अन्यो-

ब्राह्मणो, 'बलीन् हरेत्'—इत्यनुवर्त्तते। अथवा। अपि वेत्येतत् क्षत्त्रियविषयमाचार्य्यस्य पक्षान्तरम्। स्वयमेवेत्येतन्नियममननुजानन्नाचार्य्यः—'अन्यः'—इत्याह। तस्मादन्योऽपि ब्राह्मणो राज्ञो-बलिहरणादिकं कुर्य्यादित्यर्थः। तथाच स्मरति भगवान्मनुः।

"पुरोहितञ्च कुर्व्वीत, वृणुयादेव चर्त्विजम्।
तेऽस्य गृह्याणि कर्म्माणि कुर्य्युर्वैतानिकानि च"॥

इति ॥१६॥०॥

दम्पती एव ॥१७॥

जाया च पतिश्च—दम्पती, भार्य्यापती—गृहपतिस्तत्पत्नी चोच्येते। ताविमौ दम्पती एव,—बलीन् हरेयाताम्,—इति सम्बध्यते ॥ १७ ॥

इति गृहमेधिव्रतम् ॥१८॥

इत्येवमहरहः पञ्चानां महायज्ञानामनुष्ठानं गृहमेधिव्रतम्, गृहे ययोर्मेधो यज्ञो भवति, ताविमौ गृहमेधिनौ दम्पती—इति ब्रूमः। तयोर्गृहमेधिनोर्दम्पत्योर्व्रतं शास्त्रविहितोनियम इत्यर्थः। तदेवं पञ्चमहायज्ञावशिष्टमन्नं दम्पती भुञ्जीयाताम्।

"भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैवहि।
भुञ्जीयातान्ततः पश्चादवशिष्टन्तु दम्पती"॥

इत्येवमादिस्मरणात्। मनुरपि।

"देवानृषीन् मनुष्यांश्च पितृन् गृह्याश्च देवताः।
पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत्"।

इति। प्रकारान्तरं पूर्व्वमुक्तम्। अदत्वा च पञ्च महायज्ञान् भुञ्जतोस्तयोर्व्रतलोपोभवतीति विज्ञायते। गृहमेधिनोरेवैतद्व्रतं, तावेव पूर्वं भुञ्जानौ प्रत्यवायभागिनौ भवतः। सुवासिनीप्रभृतयस्तु पूर्वमेव भोजनीयाः। तदाह मनुः।

"सुवासिनीः कुमारांश्च रोगिणोगर्भिणीस्तथा।
अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन्"।

इति। तथा गौतमः। "भोजयेत् पूर्व्वमतिथिकुमारव्याधितगर्भिणीसुवासिनीस्थविरान् जघन्यांश्च"—इति।

"अदत्वा यस्तु एतेभ्यः पूर्वं भुङ्क्तेऽविचक्षणः।
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः"॥

इति च धर्म्मशास्त्रम्॥ १८॥

दम्पती एव बलीन् हरेयाताम्—इत्युक्तम्, अथेदानीं कश्चिदिह विशेषोऽभिधीयते—

स्त्री ह सायं प्रातः पुमानिति॥ १९॥

स्त्री पत्नी, ह किल। स खल्वयम्—ऐतिह्यार्थकोऽनर्थको वा निपातः। इति होचुर्वृद्धाः—इति ह्यैतिह्यमुच्यते। सेयं पत्नी, सायं रात्रौ, बलीन् हरेत्—अमन्त्रं, तूष्णीम्—इत्यर्थः। कस्मात् पुनः कारणादमन्त्रमुच्यते पत्न्या बलिहरणम्? इयमेव तावन्मात्रं कुतोनाध्याप्यते? उपदेशादिति ब्रूमः। अमन्त्रमेव खल्वस्या बलिहरणमुपदिश्यते—इति नेयमध्याप्यते इत्यदोषः। तथाच मनोः स्मरणम्।

"सायन्त्वन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत्।

वैश्वदेवं हि नामैतत् सायं प्रातर्विधीयते" ॥

इति। तदनेन रात्रावपि वैश्वदेवबलिकर्मणोरविशेषेण कर्त्तव्यत्वं दर्शितम्। अस्याञ्च स्मृतौ—सिद्धस्य अन्नस्य—इति पचप्राप्तमनूद्यते गुणभूतं, न तु विधित्सितम्। सायं बलिं हरेत्—इत्ययमत्र सम्बन्धः, न सायं सिद्धस्य अन्नस्य—इति। तस्मात्—"यस्योभयं हविरार्त्तिमार्च्छेत्"—इतिवत् नित्यानुवादोऽयम्—अन्नस्य सिद्धस्य—इति। 'अथ हविष्यस्यान्नस्य'—इतिवन्मुख्यकल्पपरिकीर्त्तनाभिप्रायं वा वचनम्।

तदिदं बलिहरणद्रव्याभिधानपरं शास्त्रं नान्यत् परिसञ्चष्टे। अभावे खल्वन्नस्य प्रतिनिधिमप्युपादाय बलिहरणं कर्त्तुमुचितम्। कस्मात्? प्रतिनिधिशास्त्रस्यार्थवत्त्वोपपत्तेः। प्रतिनिधिशास्त्रस्य खल्वेवमर्थवत्त्वोपपद्यते। इतरथा प्रतिनिधिशास्त्रमनर्थकं—प्रलापमात्रं स्यात्। तथोदाहरिष्यामः। न चैतदुचितम्। अहनीति चेन्नाविशेषात्। इति चेत् भवान् पश्यति,—अहनि प्रतिनिधिशास्त्रमर्थवत् कथमनर्थकं प्रलापमात्रम् उच्यते—इति। तत्र ब्रूमः। नैषा कल्पना सम्भवति। कस्मात्? अविशेषात्। विशेषाभावादित्यर्थः। अहन्यपि, सिद्धस्य—इति, अन्नस्य—इति च श्रवणम्, अविशेषेणोपलभ्यते—इति। तत् यदि रात्रौ प्रतिनिधिशास्त्रं न प्रवर्त्तते, अहन्यपि न प्रवर्त्तिष्यते, हेत्वविशेषात्। अप्रवृत्तिहेतुः खल्वहनि रात्रौ च न विशिष्यते—उभयत्रापि समान इत्यर्थः। तथाचोक्तम्। "अथ हविष्यस्यान्नस्योद्धृत्य हविष्यैर्व्यञ्जनैरुपसिच्याग्नौ जुहुयात्"—इति। मनुरपि स्मरति।

"वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम् ।
आभ्यः कुर्य्याद् देवताभ्यो ब्राह्मणो होममन्वहम्" ॥

इति। "वैश्वदेवादन्नात् पर्य्युक्ष्य जुहोति"—इति च गृह्यान्तरम् । आह च कात्यायनः कर्म्मप्रदीपे।

"सायं प्रातर्वैश्वदेवः कर्त्तव्यो बलिकर्म्म च ।
अनश्नताऽपि सततमन्यथा किल्बिषी भवेत्" ॥

इति। तदत्रानश्नतोऽपि वैश्वदेवोबलिकर्म्म च कर्त्तव्यम्—इत्युक्तम्। तस्मात् इयमेवावधारणा—सायं बलिं हरेत्—इति सम्बन्धः, न सायं सिद्धस्य—इति ।

अथ मन्यसे—अतिथ्यनुरोधेन पाकसम्भव एव अनश्नतोरात्रौ करणम्—इति । तन्नोच्यते । नाप्रमाणत्वात् । न खल्वेषा कल्पना सम्भवति;—अतिथ्यनुरोधेन यदा पच्यते, तदैव रात्रौ अनश्नता वैश्वदेवादिकं कर्त्तव्यम्, नापचमानेन—इति । कस्मात् ? अस्मिन्नर्थं प्रमाणाभावात् । न खलु पाकार्थता वैश्वदेवबलिकर्म्मणोः शक्यते वक्तुम्। किं कारणम्? पुरुषसंस्कारत्वात् । कुतः पुनरनयोः पुरुषसंस्कारत्वमुच्यते ? "सहधर्म्मचारिणीसंयोगः, पञ्चानां महायज्ञानामनुष्ठानम्"—इति गौतमेन पुरुषसंस्कारमध्ये पाठात् । "तानेतानहरहः कुर्व्वीत"—इति—

"स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः" ॥

इति च पुरुषार्थत्वावगमात् । वैश्वदेवं बलिकर्म्म च, अकुर्व्वाणः पुरुषः किल्बिषी भवति—इति च कात्यायनेन सुव्यक्तमनयोः

पुरुषार्थत्वाभिधानात्। "पञ्च वा एते महायज्ञाः सतति प्रतायन्ते सतति सन्तिष्ठन्ते देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञः—इति चारण्यके तैत्तिरीये। तदेव खल्वमीषां मूलम्—इत्यभियुक्ता मन्यन्ते। तस्मात् पुरुषार्थत्वमेवामीषां महायज्ञानां, न पुनर्वैश्वदेवबलिकर्म्मणोः पाकार्थत्वम्।

अथ उच्यते—"पुरुषार्थयोरेव सतोरनयोः पाकार्थतामप्यनुमन्यामहे"—इति। अत्रोच्यते। काममनुमन्येमहि पाकार्थतामप्यनयोर्यदि प्रमाणमत्र किञ्चित् उपलभेमहि। न तु प्रमाणमिह किञ्चिदुपलभामहे। तस्मादसङ्गतमनयोः पाकार्थत्वम्—इति। स यदि ब्रूयात्,—अकृत्वा वैश्वदेवादिकमन्नं भुञ्जानस्य दोषश्रवणादन्नसंस्कारत्वमनयोरनुमातव्यम्—इति। तं प्रति ब्रूयात्। ब्रह्मयज्ञादिकमप्यकृत्वा भुञ्जानस्य दोषश्रवणादनैकान्तिकमेतल्लिङ्गं नान्नसंस्कारत्वमनयोरनुमापयितुमर्हति—इति। तदिदं दोषकीर्त्तनम्, आवश्यकत्वममीषाम् अवगमयति,—इति पुरुषार्थशास्त्रैस्तुल्यवदेव तात्पर्य्यम्। तत्प्राये समाम्नानाच्च। पुरुषार्थप्राये चाध्यापनादिकर्म्मप्रवाहे वैश्वदेवबलिकर्म्मणी समाम्नायेते। तदनयोरपि पुरुषार्थत्वमवधार्य्यते। तथाचोक्तम्। "प्राये वचनाच्च"—इति।

पुरुषार्थयोरनयोरन्नसंस्कारार्थत्वमपि, न साम्प्रतमभ्युपगन्तुम्। पुरुषार्थत्वे हि द्रव्यं वैश्वदेवाद्यर्थं भवति, अन्नसंस्कारार्थत्वे त्वन्नार्थं वैश्वदेवादिकं स्यात्। अस्तु कोदोषः?—इति चेन्नासम्भवात्। न खल्वेतत् सम्भवति,—अन्नार्थं वैश्वदेवादिकं, वैश्वदेवाद्यर्थञ्चान्नम्,—इति। कस्मात्? विरोधात्। विरुध्यते खल्वेकस्य गुणभावः प्रधान-

भावस्य। न ह्येकमेव वस्तु एकमेवापेक्ष्य एकदैव प्रधानं गुणभूतञ्च भवितुमर्हति। इतश्च। वाक्यभेदप्रसङ्गात्। कथं वाक्यभेदप्रसङ्गः? वचनव्यक्तिभेदात्। वचनव्यक्तिः खल्वनयोर्भिद्यते—इति भिद्येत वाक्यम्। वैश्वदेवेनान्नं संस्कुर्यात्—इत्येकस्मिन् पक्षे वचनव्यक्तिर्भवति, अन्नेन वैश्वदेवमभिनिर्व्वर्त्तयेत्—इति चान्यस्मिन्। एकं खल्विदं वाक्यं—'हविष्यस्यान्नस्य जुहुयात्'—इति। न च भङ्क्त्वा वाक्यम्, उभयार्थत्वं कल्पयितुमुचितम्।

आह—'अथ हविष्यस्यान्नस्योद्धृत्य हविर्व्यञ्जनैरुपसिच्याग्नौ जुहुयात्'—इत्यस्मादेवाम्नानात् द्रव्यार्थत्वमवगम्यते—इति। न—इति ब्रूमः। कस्मात्? अर्थकर्मवदाम्नानात्। अर्थकर्मण्यपि सायं प्रातर्होमे समाम्नायते—"अथ हविष्यस्यान्नस्याग्नौ जुहुयात् कृतस्य वा अकृतस्य वा"—इति। तत्समानमिदमपि आम्नायते—"हविष्यस्यान्नस्य"—इति। तस्मात्—"सोमेन यजेत"—इत्येवमादिवदिहापि द्रव्यमुच्यते जुहोतेरुपकारकम्। सेयं द्रव्यचोदना वा स्यात्, विशिष्टकर्मचोदना वा स्यात्, सर्व्वथाऽपि द्रव्यं कर्म्मार्थतां नातिशेते। यथा खल्वपचारे सोमस्य पूतिका उपादीयन्ते वचनबलात्, एवमिहाप्यपचारेऽन्नस्य अन्यदप्युपादेयं वचनबलात्—इति न किञ्चिदनुचितम्।

न खल्वत्र द्रव्यस्य ईप्सितभावः अवगम्यते। हविष्यादस्मादुद्धृत्य तेन होममभिनिर्व्वर्त्तयेत्—इति खल्वत्र वचनव्यक्तिर्भवति। कस्मात्? "वैश्वदेवादन्नात् पर्य्युक्ष्य स्वाहाकारैर्जुहुयात्"—इति दृष्टान्तरदर्शनात्। अथ वा। हविष्येणान्नेन होममभिनिर्व्वर्त्तयेत्—इत्ययम् एव अर्थः। यदाऽप्यवयवार्था षष्ठीयमुच्यते, तदापि हविष्यस्यान्नस्या-

वयवेन जुहुयात्—इति वचनार्थः। सर्व्वथाऽपि द्रव्यमेव कर्म्मार्थं न कर्म द्रव्यार्थमवगम्यते। येषामपि हविष्यस्यान्यस्य अवयवं जुहुयात्—इति वचनव्यक्तिः, तेषामपि न कर्मणः अन्यावयवार्थत्वमवगन्तव्यम्। न खल्वन्यावयवेन संस्कृतेन किञ्चित् प्रयोजनमस्ति। तदर्थञ्चेत् कर्म, तदप्यनर्थकं स्यात्। यः खल्ववयवो जुहोतिना सम्बध्यते, स तेनैवोपचीयते, नावतिष्ठते, यश्चावतिष्ठते, नासौ जुहोतिना सम्बध्यते॥। न च वैश्वदेवादिकमन्यस्य किञ्चित् उपकरोति। न खल्वेवम् अन्यार्थता कर्म्मणः शक्यते वक्तुम्। "येन्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत, तस्य द्रव्यप्रधानत्वात्"—इति सूत्रणात्।

अथ वैश्वदेवादिकमन्यस्य मा करोतु दृष्टं कञ्चिदुपकारम्, अदृष्टन्तु करिष्यति। अदृष्टोऽपि उपकारो लोके बहुलमुपलभ्यते। ग्रामान्तरात् आगतानां पुरुषाणां पर्य्यग्निकरणेन खल्वदृष्ट उपकारः क्रियते—इत्युच्यते। न—इति ब्रूमः। न करिष्यति अदृष्टमपि उपकारं वैश्वदेवो द्रव्यस्य। कस्मात्? तस्य शब्दमूलत्वात्। शब्दमूलं खल्वदृष्टमिष्यते। न खल्वस्ति शब्दः,—वैश्वदेवो द्रव्यस्य उपकरोति,—इति। शब्दस्त्वस्य पुरुषार्थतामाह—'महायज्ञैश्च'—इति, 'तानेतान्'—इति चैवमादिः। सा खल्वियं कल्पना पुरुषबुद्धिमूला—इत्यनादरणीया। तथाचोक्तम्। "धर्मस्य शब्दमूलत्वाद् शब्दमनपेक्षं स्यात्"—इति। न च एकेनादृष्टेन पुरुषार्थतया चरितार्थे शास्त्रे अन्यदपि अदृष्टं कल्पयितुमुचितम्। लोकेऽपि नात्यन्तमदृष्ट उपकारो दृश्यते, यत्र चात्यन्तमदृष्ट उपकारः, तत्र प्रमाणमपि न दुर्लभम्—इत्यनुदाहरणम्।

स खल्वयम्—'अन्नस्य'—इत्युपदेशोऽन्नस्य होमस्य च सम्बन्धं करोति, सम्बन्धे च सति—"द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः"—इति, "भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते"—इति चानया तन्त्रयुक्त्या, द्रव्यं गुणभावेन सम्बध्यते। सेयं तृतीयार्थे षष्ठी विभक्तिः,—इति, "सक्तून् जुहोति, मारुतं जुहोति, एककपालं जुहोति"—इत्येवमादिवत् इहापि द्रव्यमेव कर्म्मार्थं, कर्म्म तु पुरुषार्थम् एव, न द्रव्यार्थम्—इति सिद्धम्। अत एव स्मर्य्यते। "अहरहः पञ्चयज्ञान्निर्व्वपेत् अपि मूलफलोदकशाकेभ्यः"—इति। "अहरहः स्वाहां कुर्य्यादन्नाभावे केनचिदाकाष्ठात् देवताभ्यः, पितृभ्योमनुष्येभ्यश्चोदपात्रात्"—इति च गृह्यान्तरम्। "यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः सन्तिष्ठते, यत् पितृभ्यः स्वधाकरोत्यप्यपस्तत् पितृयज्ञः सन्तिष्ठते"—इति च तैत्तिरीये ब्राह्मणे।

"न चेदुत्पद्यतेऽन्नन्तु अद्भिरेनान् समापयेत्"—

इति च स्मरणम्। तदेवमादिशास्त्रेभ्यः—सुव्यक्तमिदमवगम्यते; यत् द्रव्यमेव कर्म्मार्थम्—इति, कर्म प्रधानं पुरुषार्थम्—इति च। न हि द्रव्यार्थकर्म्मणां द्रव्याभावेऽपि करणमस्ति। पुरुषार्थमेव हि कर्म्म, श्रुतद्रव्यापचारेऽप्यन्येन केनचित् यथाकथञ्चित् क्रियते, द्रव्यस्य गुणभूतत्वात्। द्रव्यार्थत्वे तु कर्म्मणश्चोदितद्रव्याभावे लोप एव स्यात्। न खलु प्रैयङ्गवेऽपि चरावयघातः क्रियते, न वा तदर्थं व्रीहय उत्पाद्यन्ते। तदिदं प्रतिनिधिविधानपरं शास्त्रम् अन्नाभावेऽप्यन्येन होममुपदिशत् कर्म्मनिर्व्वर्त्तेरीप्सिततमत्वं दर्शयति। तस्मात् न कर्म्मणो द्रव्यार्थता। तदुक्तम्। "यैर्द्रव्यं न

चिकीर्ष्यन्ते, तानि प्रधानभूतानि, द्रव्यस्य गुणभूतत्वात्'—इति ।
मनुरपि—

"वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् ।
तस्याप्यन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत्" ॥

इति पाकान्तरेणान्नदानपचेऽपि, न बलिं हरेत्—इत्याचचाणः द्रव्यस्यैव कर्म्मार्थतामनुजानाति—इत्यवगम्यते । इतरथा कथमिवा-संस्कृतस्यान्नस्य भोजनमनुजानीयात्! आचार्य्योऽपि वक्ष्यति । "यद्येकस्मिन् काले व्रीहियवौ प्रक्रियेयाताम्, अन्यतरस्य कृत्वा कृतं मन्येत"—इति, "यद्येकस्मिन् काले पुनः पुनरन्नं पच्यते सकृदेवैतद्बलितन्त्रं कुर्व्वीत"—इति चैवमादि ।

अथ,—"अकृतस्य नाश्नीयान्न चान्नमाशयेत्"—इति, गृह्या-न्तरम् अकृतस्य अशनं निषेधति । किमतो भविष्यति ? उच्यते । एतदतो भविष्यति,—अकृतस्य अशननिषेधेन होमस्य अन्नसंस्कार-कत्वमनुमास्यामहे;—होमः खल्वन्नं संस्करोति, तदभावे चासंस्कृत-मन्नं नात्तव्यम्,—इति । अत्रोच्यते । एवमपि, अन्येषामेवैष होमोऽन्नार्थः स्यात्, न त्वस्माकम् । अपि च । नैषा कल्पना सम्भवति—अन्नार्थं वैश्वदेवः—इति । कुतः ? तदुच्यते । पञ्चमहा-यज्ञानां खलु तैत्तिरीयारण्यकमेव मूलमाचचते । तत्र च पुरुषार्थत्वममीषाम् अवगम्यते । तच्च पुरस्तादुपदर्शितम् । सेयं निर्मूला कल्पना नादरणीया । तस्मात् होमभोजनयोः क्रमः इह विधित्सितः—इत्यवगच्छामः । पूर्व्वं यस्य न हूयते, तन्न अत्तव्यम्—इति, अनया वचनव्यक्त्या खल्वस्मत्पचोऽनुगृह्यते । अथ वा ।

अकृतस्य—इति कर्त्तरि निष्ठा। न कृतं येन—इति वा विग्रहः, "अकृतस्य प्रायश्चित्तम्"—इत्येवमादिवद्व्याख्येयम्। होममकुर्व्वतोऽन्नं नाश्नीयात्, न च आशयेत्—इति वचनार्थः। अत एव—'अकृतस्य'—इति, 'अन्नम्'—इति च वैयधिकरण्येन पदद्वयमुपादीयते। अन्यथा खलु 'अकृतस्य'—इति षष्ठी वा न स्यात्, 'अन्नम्'—इति वा द्वितीया। तदिदम् एकं वचनं बहूनामनुरोधान्नेयं, न तु एतदवष्टभ्य बहूनि वचनानि अन्यथा नेयानि—इति युक्तम्। स्मरन्ति च।

> विरोधो यत्र वाक्यानां प्रामाण्यं तत्र भूयसाम्।
> तुल्यप्रमाणसत्त्वे तु न्याय एव प्रवर्त्तकः" ॥

इति। मुख्यकमप्यस्यान्नार्थत्वस्मरणं यदि कथञ्चिदुपलभ्येतापि, तर्हि तदपि कृत्स्नश्रुतिविरोधादनपेक्षणीयमेव प्रेक्षावताम्। किं पुनरङ्ग? सन्दिग्धार्थस्य तदानुगुण्येन वर्णनम्। तस्मात्—वैश्वदेवादिकमन्नार्थम् उभयार्थं वा,—इत्यसङ्गता कल्पना।

तदेवं सिद्धेऽपि वैश्वदेवस्य पुरुषार्थत्वे, अन्नस्य सिद्धस्य—इति यद्यनुवादो वा मुख्यकल्पाभिप्रायं वा न स्यात्, नियम्येत तर्ह्यन्नम्। परिमज्जीत चान्यत् द्रव्यम्। भिद्येत तर्हि वाक्यम्। कथम्? रात्रौ वैश्वदेवः कर्त्तव्यः, स च सिद्धेनैव,—इति वचनव्यक्तिभेदात्। न चेतदपि सम्भवति, प्रतिनिधिवचनानामनर्थकत्वापत्तेः। तस्मात् पाकाभावेऽपि रात्रौ वैश्वदेवादिकमुदकादिनापि कर्त्तुमुचितम्। न खलु पाकाभावे—'अनश्नताऽपि रात्रौ वैश्वदेवः कर्त्तव्यः'—इति शास्त्रं न प्रवर्त्तते!। तत् किमिति,

अकारणमेव शास्त्रमिदमतिक्रम्यते ।। न च शास्त्रं नामातिक्रमित-
व्यम्। 'सततम्'—इति चाभिधानात्। अनश्नताऽपि सततं वैश्वदेवो-
बलिकर्म्म च कर्त्तव्यम्,—इति खल्वभिहितं कात्यायनेन। सेयं
'सततं' श्रुतिरेवं सति उपरुध्येत ।। न खल्वेवमियम् अनुगृह्यते ।
तस्मान्न किञ्चिदेतत् ।

यदि पुनर्नियम्यते अन्नं, तर्हि तदर्थवत्त्वोपपत्तेः, 'अनश्नताऽपि सततम्,'—इति च स्मरणात्, पुरुषार्थत्वाच्चास्य, अनश्नताऽपि वैश्व-देवार्थमेव पुनः पाकः क्रियताम् । पाकेनैव चेत् वैश्वदेवः कर्त्तव्यः, तर्हि अयमेव बलादपि पाकमानयिष्यति । तस्मात्—यद्येव-मायहातिशयं करोषि,—सिद्धेनैव वैश्वदेवः कर्त्तव्यः,—इति, तर्हि अनुमन्यस्व अतिथ्यनुरोधमन्तरेणापि अनश्नतोऽपि पुनः पाकम् । किमिति,—अतिथ्यनुरोधेन पाकाभावे वैश्वदेवलोपं कथयसि—इति न विद्मः । एतेन—

"पुनः पाकमुपादाय सायमप्यवनीपते ।।
वैश्वदेवनिमित्तं वै पत्न्यमन्त्रं बलिं हरेत्" ॥

इत्येवमादिकं पुराणवचनमपि व्याख्यातम्। इदं हि वचनं वैश्वदेवनिमित्तं पाकमुपादायेति वैश्वदेवनिमित्तं पाकं मुख्यकमाह। अन्यथा खल्वश्नतोऽपि रात्रौ पाकाभावे नास्ति वैश्वदेवादिकम्,—इत्यापतति । न चैवम् इष्यते । तस्मात्,—"स्वीयभोजनसम्भवे पाकं विनाऽपि, तदसम्भवे अतिथ्यनुरोधेन पाकसम्भव एव, सायं वैश्वदेव-बलिकर्म्मणी,—इति रघुनन्दनमतमसङ्गतम्। न च स्वीयभोजन-सम्भवे पाकं विनाऽपि,—इत्यस्यां कल्पनायां प्रमाणमस्ति। न चैवं,

'पुनः पाकमुपादाय,—इति वचनमुपपद्यते । तस्मात्, पुनः पाकमुपादाय,—इत्यनूद्यते, पाकं सिद्धमन्नम् उपादाय, सायमपि, पुनर्वैश्वदेवं कुर्य्यात्,—इति वा वचनार्थः। यस्तु पुरुषार्थयोरेव सतोर्वैश्वदेववलिकर्म्मणोर्द्रव्यार्थत्वं प्रतिजानीते। तस्य रात्रौ पाकाभावेऽपि पुरुषार्थयोस्तयोर्यथाकथञ्चिदनुष्ठानमावश्यकमित्यफलः प्रयासः। तस्मादस्मदुक्तैव व्यवस्था शास्त्रार्थः ॥ १९ ॥ ० ॥

आह। तदिदं वलिहरणमहरहर्यत् पच्यते तेनैवान्नेन कर्त्तव्यं न पुनरन्यार्थमपि यत् श्रप्यते, तेनापि कर्त्तव्यम्—इत्युच्यते। कस्मात् ? 'वैश्वदेवादन्नात् पर्य्युक्ष्य जुहोति'—इति, 'सिद्धस्य वैश्वदेवस्य अन्वहं होतव्यम्'—इति, 'होमशेषेण वलयोहर्त्तव्याः'—इति चैवमादिशास्त्रेभ्यः। नेत्युच्यते। पुरुषार्थं खल्वेवमादिकं कर्म्म, यथाकथञ्चित् पुरुषेण निर्व्वर्त्तनीयम्। अन्यथा खल्वयमधर्म्मम् इयात्। तस्मान्नैष नियमः—वैश्वदेवेनैवान्नेन होतव्यम्—इति। तमिममर्थम् आचार्य्यः सुव्यक्तमुपदिशन्नाह—

सर्व्वस्य त्वेवान्नस्यैतान् वलीन् हरेत्,—पित्र्यस्य वा, स्वस्त्ययनस्य वा, ऽर्थार्थस्य वा ॥ २० ॥

सर्व्वस्यैवान्नस्य एतान् वलीन् हरेत्। यत् किञ्चिदन्नं पच्यते भोजनार्थं वा, अन्यार्थं वा, तेनैव—वलयोहर्त्तव्याः न पुनरत्रास्ति कश्चिन्नियमोऽनेनैवान्नेन— इत्येतदर्थमाचार्य्यः 'सर्व्वस्य'— इत्याह। "अनेकस्य अशेषता सर्व्वशब्दस्य अर्थः"—इति ह्यवोचाम। स खल्वयमर्थोविस्पष्टमुपदिश्यते,—'पित्र्यस्य वा' इति। पित्र्यस्य, पितृ-

कर्म्मार्थं प्रवृत्तस्य, अमावस्यादावन्वाहार्य्याद्यर्थम्—इत्यर्थः। स्वस्त्ययनस्य, तदर्थं पकस्य। स्वस्ति—इति अभिप्रेतार्थसिद्धिमाचक्षते। तस्या-श्रयनं प्रापकं यत्कर्म्म, तत् स्वस्त्ययनम्। किन्तत्? ब्राह्मणभोजना-दिकम्। कस्मात्? "स्नेहवद्मांसमन्नं ब्राह्मणान् भोजयित्वा स्वस्ति ईषां भवति"—इत्येवमादिवचनात्। 'अर्थार्थस्य' अर्थोधनम्, अर्थः प्रयोजनं, यस्य, पुरुषस्य, सोऽयम् अर्थार्थः—इत्युच्यते। यस्मात् पुरुषात् अर्थं आशास्यते, तदर्थं पकस्य—इत्यर्थः। वैश्वदेवावशिष्टेन बलिहरणोपदेशात् वैश्वदेवेऽपि सुतरामेषैव व्यवस्था।

अथ पित्राद्यर्थं यत् पच्यते, तेनापि चेत् वैश्वदेवादिकं क्रियते, न तर्हि पाकः पित्र्यो भवति। वैश्वदेवाद्यर्थत्वमपि खल्वस्य विद्यत-एव। उच्यते। सत्यमस्तीदं, यत् पित्रर्थं यत् पच्यते, तेनापि वैश्वदेवादिकं कर्त्तव्यम्—इति। नैतावता पाकस्य पित्र्यत्वमपह्नोतुं शक्यते। कुतः? यतस्तथापि अपणस्य पितृद्देश्यकत्वमस्त्येव—इति, पाकः पित्र्यः—इत्युच्यते। पितृकर्म्म किलोद्दिश्य यत् पच्यते, तत् पित्र्यम्—इति प्रतिजानीमहे। सोऽयं पाकविशेषः पितृणाम-साधारणः,—इति तथा व्यपदिश्यते। व्यपदेशाः खल्वसाधारणतयैव भवन्ति। प्रत्यक्षं खल्वेतदस्माकम्, यत् चितिजलपवनवीजादि-समवधानजन्माऽप्यङ्कुरो व्यपदिश्यते—शाल्यङ्कुरः—इति। कस्मात्? शालिवीजानामसाधारणत्वात्। चित्यादिकं खलु साधारणम्—इति, न तेन व्यपदिश्यते। तस्मादुपपन्नमेतत्—'पित्र्यस्य वा स्वस्त्ययनस्य वा अर्थार्थस्य 'वा'—इति।

तदेवं यस्य कस्याप्यर्थं पकस्य अन्नस्यैतान् बलीन् हरेत्, न

पुनर्वैश्वदेवार्थपक्वस्यैव—इति एव-शब्दार्थः । तु शब्दो बलिहरणस्य कालविशेषं द्योतयति। कः पुनरसौ कालविशेषः? पूर्वं, पश्चाद्वा—इति ब्रूमः । सोऽयं विभज्य प्रदर्श्यते । तत्र तावत् अर्थार्थं स्वस्त्ययनार्थञ्च यत् पच्यते, तेन पूर्वमेव बलिहरणं भोजनादित्याचक्ष्महे। कस्मात्? 'अहुतस्य नाश्नीयात् न चान्नमाशयेत्'—इति गृह्यान्तर-वचनात्। तथा दर्शनाच। दृश्यते सत्यादितो बलिहरणं पश्चात् भोजनं वैश्वदेवस्यान्नस्य। तस्मादिहापि तदेव कल्पयितुमुचितम्। न खलु पुरुषोच्छिष्टेनान्नेन बलिहरणम्—इति साध्वी कल्पना भवति। यज्ञावशिष्टान्नभोजनमेव ह्युपदिशन्ति शिष्टाः।

"यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते"।

इति।

"यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्"।

इति चैवमादि। अत एव वैश्वदेवादर्वाक् यदि भिक्षुकः समायाति, तदाऽपि वैश्वदेवार्थमन्नमुद्धृत्य,—पृथक् कृत्वा, तस्मै भिक्षा दातव्या,—इति कथ्यते। न तु भिक्षादानावशेषेण वैश्वदेवः कर्त्तव्यः—इति। तदाह व्यासः।

"अकृते वैश्वदेवे तु भिक्षुके गृहमागते।
उद्धृत्य वैश्वदेवान्नं भिक्षां दत्त्वा विसर्ज्जयेत्"॥

इति। अत्राह। "अगस्त्य इन्द्राय हविर्निरूप्य मरुद्भ्यः संप्रदित्सां चकार तमिन्द्र एत्य परिदेवयाञ्चक्रे" इति लिङ्गात्।

"निरूप्य हविरन्यस्मा अन्यस्मै न हि ह्रूयते"।

इति वचनाच्च स्वस्त्ययनाद्यर्थं यत् पच्यते, तेन बलिहरणमशास्त्र-

मिति । उच्यते । नासौ दोषः । कस्मात् ? नित्यहविर्विषयत्वा-
त्तिङ्गवचनयोः । कथं ज्ञायते ? कण्ठत एव तथाऽभिधानात् ।
तस्मादुक्तैव व्यवस्था । पित्रर्थश्चेदन्नं पच्यते, तर्हि पूर्वमेव श्राद्धं,
पश्चाद्बलिहरणम्—इति ब्रूमः । तत् कस्य हेतोः ? तथैव स्मरणात् ।
तथा च मनोः स्मरणम् ।

"उच्छेषणन्तु तत्तिष्ठेद्यावद्विप्रा विसर्ज्जिताः ।
ततो गृहबलिं कुर्य्यादिति धर्म्मो व्यवस्थितः" ।

इति । न चेदं गृहबलिपदम्—

"स्वयमेव हरेत् काम्यान् बलीन् यावद्गृहे वसेत् ।
आतुरत्वे प्रवासे वा लोपो गृहबलेर्भवेत्" ॥

इति ग्रन्थान्तरदर्शनात् काम्यबलिमात्रपरम्—इति वाच्यम् ।
तन्मात्रपरत्वे प्रमाणाभावात् । तस्मात् गृहे यो बलिर्दीयते—
गृहमेधिना यः क्रियते, सोऽयं गृहबलिरुच्यते । गृहबलिपदस्य
काम्यबलिमात्रपरत्वेऽपि, काम्यानां बलीनां श्राद्धोत्तरकालत्वमिदं
वचनं शक्नोति विधातुं, न तु नित्यानामेतन्निषेद्धुमपि । ततश्च
तेषामपि शास्त्रान्तरात् तथात्वमविरुद्धमेव । तथा च गौतमस्मरणम् ।

"पितृश्राद्धमकृत्वा तु वैश्वदेवं करोति यः ।
अकृतं तद्भवेत् श्राद्धं पितॄणां नोपतिष्ठते" ।

इति ।

"पितृपाकात् समुद्धृत्य वैश्वदेवं करोति यः ।
अकृतं तद्भवेत् श्राद्धं पितॄणां नोपतिष्ठते" ।

इति च स्मृत्यन्तरम् । तथा कार्ष्णाजिनिस्मरणम् ।

"यदा श्राद्धं पितृभ्यश्च कर्त्तुमिच्छति मानवः।
वैश्वदेवं ततः कुर्य्यान्निवृत्ते पितृकर्म्मणि"।

इति। अत्र वैश्वदेवस्य श्राद्धोत्तरत्ववचनात् ततः पराचीनस्य बलेः सुतरां तथात्वम्। तथा मत्स्यपुराणम्।

"निर्वर्त्य प्रणिपत्याथ पर्य्युच्याग्निञ्च धर्म्मवित्।
वैश्वदेवं प्रकुर्वीत नैत्यिकं बलिमेव च"।

इति। अत्र—"नैत्यिकं बलिमेव च"—इत्येवमेव श्राद्धभाष्ये नीलाम्बरोपाध्यायाः पठन्ति। परिशिष्टप्रकाशे नारायणोपाध्यायो-ऽप्येवमेव पठति। वाचस्पतिमिश्राणामप्ययमेव पाठः। "नैत्यिकं विधिमेव च"—इति क्वचित् पाठः। तथापि तथैवार्थः। भविष्य-पुराणञ्च।

"कृत्वा श्राद्धं महाबाहो, ब्राह्मणांश्च विसृज्य च।
वैश्वदेवादिकं कर्म्म ततः कुर्य्यान्नराधिप!"।

इति।

"विसर्ज्जयेत् प्रियाण्युक्त्वा प्रणिपत्य च भक्तितः।
आद्वारमनुगच्छेच्चागच्छेच्चानुप्रमोदितः।
ततो नित्यक्रियां कुर्य्याद्भोजयेच्च तथाऽतिथीन्।
नित्यक्रियां पितृणाञ्च केचिदिच्छन्ति सत्तमाः।
न पितृणान्तथैवान्ये शेषं पूर्व्ववदाचरेत्।
पृथक् पाकेन चेत्यन्ये केचित् सर्व्वञ्च पूर्व्ववत्"।

इति च मार्कण्डेयपुराणम्। न चैवं नित्यश्राद्धमपि बलिहर-णात् पूर्व्वमेव प्राप्नोति—इति वाच्यम्। नित्यपाकस्य पितृपाकत्वा-

भावात् । व्यपदेशाः खल्वसाधारणतया भवन्ति—इत्यवोचाम । वैश्वदेवः—सर्व्वार्थः खल्वसौ पाको भवति । पितृपाकात् समुद्धृत्य,—इति हि स्मरन्ति । सर्व्वासु च स्मृतिषु बलिहरणात् परत एव नित्यश्राद्धमुच्यते । अमीषाञ्च वचनानां पार्व्वणश्राद्धप्रकरणे पाठात् नान्यत्र सन्निवेशः ।

ननु वाक्यं प्रकरणं बाधिष्यते ? नेत्युच्यते । विसर्ज्जयेत्—इति, श्राद्धारमनुगच्छेत्—इति च, अभिधाय, ततो नित्यक्रियां कुर्य्यात्—इत्याम्नानात् व्यक्तमिदमवगम्यते—विसर्ज्जनमनुगमनञ्चेदमनित्ये यत् क्रियते, तदुच्यते, न तु नित्ये—अहरहः क्रियमाणश्राद्धेऽपि—इति । तदिदं वाक्यं न अहरहः श्राद्धविषयम्—इति सिद्धम् ।

"नित्यश्राद्धे गयाश्राद्धे तीर्थश्राद्धे तथैव च ।
वैश्वदेवं हुनेदादौ ततः श्राद्धं समाचरेत्" ।

इति च स्मरणान्तरम् । अपि च । 'निर्व्वर्त्त्य'—इति, 'कृत्वा श्राद्धम्'—इति, 'विसर्ज्जयेत्—इति च, प्रकृतमेव निर्व्वर्त्तनं, प्रकृतमेव श्राद्धम्, प्रकृतमेव च विसर्ज्जनमर्थोऽवगम्यते । व्यक्तिवचनानां खल्वमीषामग्नेयीन्यायात् सन्निहितव्यक्तिपरतैव न्याय्या—इत्यदोषः । परमार्थतस्तु विश्वदेवहोमात् परतो नित्यश्राद्धविधानात् कोऽयमस्थाने संरम्भ इति न खल्वधिगच्छामि । तस्मात् पूर्व्वं श्राद्धं पश्चाद्वलिहरणम्—इत्यवगन्तव्यम् ।

अत्राह । श्राद्धोत्तरकालन्तु तदर्थतैव पाकस्य न स्यात् । सर्व्वो हि सर्व्वस्य परद्रव्यस्य यावन्मात्रं दत्तम्, तस्यैवेष्टे, नान्यस्य—इति । एवञ्च सति सूत्रारम्भवैयर्थ्यमेव स्यात् । तस्मात् श्राद्धात् पूर्व्वं बलि-

हरणम्'—इति। न—इति ब्रूमः। वाचनिके न्यायानवतारात्। वाचनिकः खल्वयमर्थः—इत्युपपादितम्। तत्किमत्र न्यायः करिष्यति? न हि वचनस्यातिभारो नाम अस्ति। उत्तरकालं नास्ति तदर्थतैव पाकस्य—इत्यपि वर्णनमनुचितमेव। कस्मात्? वचनप्रामाण्यादेव। यस्मात् वचनानि श्राद्धादुत्तरकाले बलिहरणं दर्शयन्ति, तस्मादवगच्छामः—अस्त्युत्तरकालमपि पाकस्य तदर्थत्वम्—इति।

अपि च। कस्मादुत्तरकालमस्य तदर्थता लुप्यते?—इति तावदयं प्रष्टव्यः। प्रयोजनस्य वृत्तत्वात्—इति चेत्, न ह्यामे हुतेऽपि वनस्पतेस्तदर्थता लुप्यते। पाकः खल्वयं पितृकर्मोद्दिश्य कृतः—इत्यस्ति पित्रर्थता पाकस्य। न खल्ववशिष्टाशस्य तदर्थत्वाभावः पाकस्य तदर्थत्वमपहन्तुं शक्नोति। तथा चोक्तम्। "यमर्थमधिकृत्य प्रवर्त्तते तत् प्रयोजनम्"—इति। श्राद्धं खल्वधिकृत्य पाकः प्रवृत्तः—इति वृत्तेऽपि श्राद्धे नैतत् अन्यथयितुं शक्यते। यथा खल्वाग्नेयहोमे कृतेऽपि, पुरोडाशस्याग्नेयता न व्याहन्यते—अत एवाग्नेयात् पुरोडाशात् स्विष्टकृदवद्यते, तथेहापि भविष्यति। मीमांसाभाष्यकारेणाप्युक्तं दशमस्य प्रथमे। "यथा शिरसा धारितायाः स्रजः शिरसोऽवतारितायाः देवदत्तीयाऽसाविति कृत्वा शुचिदेशनिधानादिः संस्कार एषितव्यो भवति"—इति।

प्रयोजनं यावन्मात्रेण निर्व्वाह्यते, तावन्मात्रमेव चेत् तदर्थमुच्यते, न तर्हि अन्यार्थपाकात् बलिहरणं सम्भवति। न खल्वेक एव भागः श्राद्धाय च उपादेयो, बलिहरणाय च,—इति समञ्जसं वचनम्। यदि तावत् श्राद्धायोपादीयते, नैव बलिहरणाय भवति,

अथ बलिहरणायोपादीयते, न तर्हि श्राद्धाय भवति,—इत्यशक्यत्वादनुचितम्। अथ 'प्रयोजननिर्व्वाहाय यदुपयुज्यते,—यत् अर्हति प्रयोजनं निर्व्वोढुम्, तदेव तदर्थम्'—इति मन्यते, तर्हि निर्वृत्तेऽपि प्रयोजने, नैव द्रव्यस्य तदर्थत्वमपचीयते। स्वरूपयोग्यतामात्रस्याविशिष्टत्वात्—इति यथोक्त एवार्थः। यच्च—'प्रकृतस्य नाश्नीयात्'—इति वचनम्, तदेतद्व्यतिरिक्तविषयमवतिष्ठते। तस्मात्—"वैश्वदेवबलिकर्मणी नित्ये श्राद्धात् पूर्व्वमेव कर्त्तव्ये, काम्यन्तु बलिकर्म श्राद्धानन्तरम्"—इत्यसङ्गतं वर्णनम्।

यदप्याहुः—"पार्व्वणश्राद्धे कर्त्तव्ये साग्निना तर्पणेनैव पञ्चयज्ञान्तर्गतपितृयज्ञस्य निर्वर्त्तितत्वात् न श्राद्धानन्तरं पितृबलिनित्यश्राद्धयोरनुष्ठानं, निरग्निना पार्वणदिनेऽपि तदनन्तरं पितृबलिनित्यश्राद्धे कर्त्तव्ये"—इति। तदप्यसङ्गतम्। पितृबलेर्नित्यत्वात्। चतुर्दश नित्याः—इति सङ्ख्यावचनात् प्रमाणविशेषाभावाच्च। यच्चोक्तम्—

"पितृयज्ञन्तु निर्वर्त्त्य तर्पणाख्यं द्विजोऽग्निमान्।
पिण्डान्वाहार्य्यकं कुर्य्यात् श्राद्धमिन्दुक्षये सदा"॥

इति मत्स्यपुराणवचनेऽर्थात् प्राप्तस्यापि तर्पणानन्तर्य्यस्य पुनरभिधानात् अन्यः पितृयज्ञो नास्ति—इति। तदपि चिन्त्यम्। आनन्तर्य्याश्रवणात्। क्त्वा हि, पूर्वकालतायां स्मर्य्यते,—इत्यवोचाम। तदिदं वचनं सिद्धवदनूद्य पूर्वकालीनतर्पणं, इन्दुक्षये सदा कुर्य्यादन्वाहार्य्यम्—इत्येतद्विधत्ते। न तु तर्पणस्य पूर्वकालतामपि। कस्मात्? वाक्यभेदप्रसङ्गात्। एकं खल्विदं वाक्यम् एवं सति

भिद्येत। अपि च। इदं वचनम्, श्राद्धदिने तर्पणस्यावश्यकत्वमा-चष्टे, न त्वन्यत् परिसङ्ख्चष्टे। कथं नाम ? तर्पणं निर्वर्त्त्यैव श्राद्धं कुर्य्यात्, न तु केवलनित्यश्राद्धेनैव पितृयज्ञो निर्वर्त्तते—इति मन्येत। "पितृतर्पणानन्तर्य्यानुवादस्तर्पणपार्वणयोर्मध्ये पितृयज्ञाख्यनित्यश्राद्धव्युदासार्थः"—इति शूलपाण्युपाध्यायाः। सर्वथाऽपि न परिसङ्ख्चष्टे। श्रुतहान्यश्रुतकल्पनापत्तेः। तदुक्तम्।

"अन्यार्थंश्रूयमाणा च याऽन्यार्थप्रतिषेधिका।
परिसङ्ख्या तु सा ज्ञेया यथा प्रोषितभोजनम्"॥

इति। दोषस्य खल्वयम्, यत् श्रुतस्य च उत्सर्गोऽश्रुतस्य च परि-कल्पनम्। प्राप्तस्यैवमन्योऽपि पितृयज्ञो बाध्येत! तदिदं दोषत्रयं परिसङ्ख्यायामवर्जनीयमापद्येत! न चैतत् युक्तमभ्युपगन्तुम्। यदि पुनः—परिसङ्ख्चीतापि अन्यं पितृयज्ञं, तदाऽपि श्राद्धात् पूर्वमेव परिसङ्ख्चीत, न तु परस्मादपि। कस्मात्? तर्पणाख्यमेव पितृयज्ञं निर्वर्त्त्य-(न तु बलिहरणादिकमपि कृत्वा—इत्यर्थः)—पिण्डान्वा-हार्य्यकं श्राद्धं कुर्य्यात्,—इति वचनव्यक्तिसम्भवात्। अस्यां खलु वचनव्यक्तौ अन्योऽपि पितृयज्ञः श्राद्धात्परमर्थादवगम्यते। तस्माद-स्मदुक्त एवार्थ आदरणीयः॥ २०॥ ०॥

तदिदं बलिहरणम्—

यज्ञादेव निवर्त्तते॥ २१॥

यज्ञो ज्योतिष्टोमादिः। तस्मात् यज्ञात् हेतोर्निवर्त्तते। यज्ञा-दिति वा सप्तम्यर्थे व्यत्ययेन विभक्तिः पञ्चमी क्रियते। यज्ञ एव

निवर्त्तते—इत्यर्थः। बलिहरणम—इति च होमादेरपि उपलक्षणम-वोचाम। "तस्मात् दीक्षितो न ददाति, न पचति, न जुहोति"—इ त च ब्राह्मणं भवति। एवशब्देन किमिह व्यवच्छिद्यते? न किञ्चित्। किमर्थं तर्हि? होमादीनामावश्यकत्वप्रदर्शनार्थम्—इति ब्रूमः। कथन्नाम? यज्ञ एव निवर्त्तते न पुनरन्यत्र—आपद्यपि—इत्यर्थः। तेनापद्यपि पञ्चयज्ञानामवश्यकर्त्तव्यत्वमवगम्यते। स्मरन्ति च।

"आपद्यपि हि कष्टायां पञ्चयज्ञान्न हापयेत्।
स्वर्गापवर्गयोः प्राप्तिं महायज्ञैः प्रचक्षते"॥

इति। सोऽयं सामान्यो विधिरपवादविधिभिरुपरुध्यते। न पुनरेतावता कारणेन सपिण्डमरणादावपि कर्त्तव्यतैवामीषाम्—इति भ्रमितव्यम्। कस्मात्?

"सन्ध्यां पञ्च महायज्ञान् नैत्यिकं स्मृतिकर्म्म च।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया"॥

इति।

"पञ्चयज्ञविधानञ्च न कुर्य्यान्मृत्युजन्मनोः"।

इति चैवमादिस्मरणात्। यज्ञ एव निवृत्तिरिति वचनात् खल्व-शौचादावानुमानिकी कर्त्तव्यताप्रतीतिः, प्रत्यक्षन्तु निषेधशास्त्रम्। भट्टनारायणस्त्वाह—"दीक्षितो न जुहोति,—इति' सिद्धे पुनर्वचनं परिसङ्ख्यानार्थम्। कथन्नाम? यज्ञ एव बलिहरणं निवर्त्तते, नान्यत्रेति। एवञ्चाशौचादावपि सिद्धस्य पाकस्य किञ्चिदन्नं तूष्णीं प्रक्षिप्य अग्नौ जुहुयात्। तच्छेषं बलिं कृत्वा तूष्णीमेव प्रक्षिपेत्"—इति॥२१॥०॥

यद्येकस्मिन् काले व्रीहियवौ प्रक्रियेयाताम्, अन्यतरस्य कृत्वा कृतं मन्येत ॥ २२ ॥

यदि, एकस्मिन्—भोजनकाले; दिवैव वा, रात्रावेव वा,—इत्यर्थः। व्रीहियवौ, व्रीहिश्च यवश्च, तौ व्रीहियवौ। अनयोरुपादानमन्यदपि धान्यादिकमुपलक्षयति। 'प्रक्रियेयाताम्' प्रकर्षेण, भक्तकरम्भपायसशष्कुल्यादिभेदेन—इत्यर्थः। 'क्रियेयातां' कृतौ भवेयाताम्, तर्हि अन्यतरस्य एकतरस्य व्रीहेः यवस्य वा, 'कृत्वा' बलिहरणम्, 'कृतं' 'मन्येत' जानीयात्, न पुनः अन्यस्यापि कर्त्तव्यम्—इत्यर्थः॥ २२ ॥ ० ॥

यद्येकस्मिन् काले पुनः पुनरन्नं पच्येत, सकृदेवैतद्बलितन्त्रं कुर्व्वीत ॥ २३ ॥

यद्येकस्मिन् काले—इत्युक्तार्थम्। 'पुनः पुनः भूयोभूयः 'अन्नं पच्येत', अतिथ्यादिबाहुल्यवशात्, तथापि 'सकृत्' एकवारम्, 'एव' 'एतद्बलितन्त्रं' 'कुर्व्वीत' न प्रतिपचनम् ॥ २३ ॥

यद्येकस्मिन् कुले बहुधाऽन्नं पच्येत; गृहपतिमहानसादेवैतद्बलितन्त्रं कुर्व्वीत ॥ २४ ॥

'यदि' 'एकस्मिन् कुले' एकपाकोपजीविनि भ्रात्रादिवर्गे, 'बहुधा अन्नं पच्येत' बहुषु महानसेषु कुतश्चित् कारणात् कदाचित्, भ्रातृपुत्रादीनां भोजनसौकर्य्यार्थं वा, तर्हि, एषां यो गृहपतिः, तस्य, 'महानसात्' 'एव' 'एतद्बलितन्त्रं कुर्व्वीत' न प्रतिमहानसात्—इत्यर्थः। स्मरति च वृहस्पतिः।

"एकपाकेन वसतां पितृदेवद्विजार्चनम्।
एकं भवेत्, विभक्तानां तदेव स्यात् गृहे गृहे"।

इति। कः कुर्व्वीत? गृहपतिः—इति ब्रूमः। कस्मात्? प्रकृतत्वात्। प्रकृतः खल्वत्र गृहपतिः कर्त्ता—इति स एव कुर्व्वीत॥ २४॥ ०॥

यस्य त्वेषामग्रतः सिध्येत्, नियुक्तमग्नौ कृत्वाऽग्रं ब्राह्मणाय दत्त्वा भुञ्जीत॥ २५॥

'एषाम्' एकपाकोपजीविनां, मध्ये, 'यस्य तु' 'अग्रतः' पूर्व्वं, गृहपतिपाकात्, 'सिध्येत्' सिध्यति पाकः, स किञ्चिदन्नम्—'अग्नौ' 'नियुक्तं' 'कृत्वा' किञ्चिच्च, 'अग्रं' 'ब्राह्मणाय दत्त्वा भुञ्जीत'। तुशब्दो विशेषणार्थः। किं विशिष्यते? अनावश्यकत्वेऽपि वैश्वदेवादीनाम्, इदमस्य विशिष्यते,—यदग्नौ नियोज्यं ब्राह्मणाय च दातव्यम्—इति॥ २५॥*॥

यस्यो जघन्यं भुञ्जीतैवेति॥ २६॥

यस्य पुनर्जघन्यं परस्तात् गृहपतिपाकात् सिध्यति पाकः, स भुञ्जीतैव, न पुनरग्नौ वा नियुञ्जीत, ब्राह्मणाय वा दद्यात्, बलिं वा हरेत्। उ—इति पुनरर्थोऽपार्थो वा निपातः। अन्ये तु पठन्ति—"यः सो जघन्यं भुञ्जीतैव"—इति। तदिदमेवं विव्रियते,—यः जघन्यं भुञ्जीत, स उ भुञ्जीतैव—इति। सो जघन्यम्,—इति छान्दसोऽयं प्रयोगः। 'इतिः' नित्यबलिप्रकरणपरिसमाप्तिं द्योतयति।

सेयं पञ्चसूत्री द्रव्यस्य कर्म्मार्थतामाह। कर्म्मणश्च पुरुषार्थताम्।

कर्म्मणां द्रव्यार्थत्वे खल्वावर्त्तेत प्रतिद्रव्यं कर्म्म। तदननुजानानः आचार्य्यः पुरुषार्थत्वममीषां दर्शयति। द्रव्यार्थत्वे खल्वमीषां वचनानामदृष्टार्थत्वं कल्पनीयं स्यात्। न चैतदुचितं सम्भवन्त्यां गतौ। तस्मात् यथोक्तएवार्थः ॥ २७॥ * ॥

अथाप्युदाहरन्ति ॥ २७ ॥

अथानन्तरञ्च यत् कर्त्तव्यं, तदपि उदाहरन्ति वदन्ति ब्राह्मणवाक्यानि—इत्याभामान्तं सूत्रम्। स्मृतिकाराणां खल्वियं शैली यत् 'तदाहुः' 'तत्रैक आहुः' 'अथो खल्वाहुः' 'अथाप्युदाहरन्ति' इत्येवमादीनि पदानि ब्राह्मणवाक्यानामादौ निपातयन्ति॥ २७॥

एतस्यैव बलिहरणस्यान्ते कामं प्रब्रुवीत, भवति हैवास्य ॥ २८ ॥

एतत्—इति बलिहरणं ब्रूमः। 'एतस्य' बलिहरणस्य, 'अन्ते' अवसाने, 'एव'—काम्यानामपि बलीनामनन्तरम्—इत्यर्थः। 'कामं प्रब्रुवीत' काम्यते इति कामः—अभिलसितमायुरादिकमुच्यते। तमिमं काममभिलषितं वस्तु, प्रब्रुवीत प्रकर्षेण कथयेत लाभार्थं, प्रार्थयेदग्निम्—इत्येतत्। "मनो ह वै देवा मनुष्यस्य जानन्ति"—इति श्रवणात् मनसैव इयं प्रार्थना मा भूत्—इति प्रब्रुवीतेत्याह। प्रार्थना च इयं वामदेव्यगानादर्वाक् कर्त्तव्या। तदाह नित्यान् काम्यानपि बलीनभिधाय कात्यायनः।

"स्पृष्ट्वाऽपो वीक्षमाणोऽग्निं कृताञ्जलिपुटस्ततः।
वामदेव्यजपात् पूर्व्वं प्रार्थयेत् द्रविणोदसम्।

आयुरारोग्यमैश्वर्य्यं धीर्धृतिः शं बलं यशः।
ओजोवर्च्चः पशून् वीर्य्यं ब्रह्म ब्राह्मण्यमेव च।
सौभाग्यं कर्म्मसिद्धिञ्च कुलज्यैष्ठ्यं सकर्तृताम्।
सर्व्वमेतत् कर्म्मसाक्षिन्, द्रविणोद, रिरीहि नः"।

इति। आयुरारोग्यम्—इत्यादिः प्रार्थनमन्त्रः। स खल्वयं प्रार्थितः कामो, 'भवति' निष्पद्यते, 'एव'। 'ह' किल, 'अस्य' प्रार्थयितुरित्यर्थः॥ २८॥

स्वयन्त्वेवाशस्यꣳ बलिꣳ हरेत् यवेभ्योऽध्याव्रीहिभ्यः, व्रीहिभ्योऽध्यायवेभ्यः, स त्वाशस्यो नाम बलि-र्भवति॥ २९॥

'स्वयं तु एव'। तुशब्दः चशब्दार्थः, समुच्चये। किं समुच्चि-नोति? पूर्व्वोक्तं नित्यबलिम्—इति भट्टभाष्यम्। नैतत् युक्तम्। कस्मात्? नित्यबलौ प्रतिनिधिसद्भावात्। आशस्यबलौ च तद-भावात्। समुच्चयपक्षे खल्वाशस्यञ्च बलिं स्वयमेव हरेत्—इति वचनव्यक्तिरवगम्यते। नित्यञ्च—इति चार्थः। तदनया वचनव्यक्त्या आशस्य इव नित्येऽपि बलौ प्रतिनिधिर्निरस्येत। तस्मात्—तुशब्दः सुम्भमिकरणादिकं स्मारयति—इति ब्रूमः। कथन्नाम? नित्यबलिवत्—सुम्भमिकरणम् उभयतः परिषेकः—इत्येवमादिकया रीत्या—इति। 'आशस्यम्' आशस्यनामानं 'बलिं' 'स्वयम्' 'एव' 'हरेत्' न पुनः प्रवासादावपि अन्येन—इत्यर्थः। उक्तश्चायमर्थः पुरस्तादस्माभिः—'स्वयमेव हरे कामान्'—इत्यादिग्रन्थान्तरेण।

कोऽयमाग्रस्रो नाम बलिः ? कस्मै च हर्त्तव्यः ?—इत्यत्राह—'यवेभ्यः'—इति। सेयं चतुर्थी विभक्तिर्यवानां देवतात्वमवगमयति। त्यागोद्देश्यां हि देवतामाचक्षते। चतुर्थ्या खल्वत्र यवानामुद्देश्यत्वमवगम्यते। श्लोकमपि उदाहरन्ति।

"तद्धितेन चतुर्थ्या वा मन्त्रलिङ्गेन चेष्यते।
देवतासङ्गतिस्तत्र दुर्ब्बलन्तु परम्परम्"।

इति। तस्मात् यवदैवतोऽयं बलिर्भवति। तेन—यवेभ्यो नमः—इति प्रयोगः सिध्यति। कस्मिन् काले हर्त्तव्योऽयं बलिः ? तदुच्यते। 'अधि' उपरि। कस्मात् ? 'यवेभ्यः' यवोत्पत्तेरित्येतत्। तदत्र यवपदाच्चतुर्थ्येव प्रमाणम्।

"अपादानसम्प्रदानकरणाधारकर्म्मणाम्।
कर्त्तुश्चान्योन्यसन्देहे परमेकं प्रवर्त्तते"।

इति शाब्दिकस्मरणात्। यवेभ्य उपरि—इति यथाश्रुतेऽप्यर्थे केवलमभ्युपगम्यमाने, देवताविशेषानुपदेशात् यवदैवत एवायं बलिः कल्पयितुमुचितः। श्रुतत्वात्। तदुत्सर्गे च कारणविशेषाभावात्। अत एव—यवेनैव द्रव्येणैष बलिर्हर्त्तव्यः—इत्यवधार्य्यते। अतएव च—

'आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः"।

इति कर्म्मप्रदीपवचनादाज्यद्रव्यकः प्रजापतिदेवताकोऽयं बलिः—इत्यपि नाद्रियते। 'जुहोतिषु'—इत्यभिधानाच्च। तथा च गृह्यान्तरम्।

"यवैर्यवेभ्य आवापो व्रीह्युत्पत्तेरधो बलिः।

व्रीहिभ्यो व्रीहिभिः पूर्व्वं यवोत्पत्तेर्जिजीविषोः"।

इति। कियन्तं कालं यावदयं बलिर्हर्त्तव्यः? तदुच्यते। 'आव्रीहिभ्यः' व्रीह्युत्पत्तिपर्य्यन्तम्—इत्यर्थः। एतेन—'व्रीहिभ्योऽध्या-यवेभ्यः'—इति व्याख्यातम्। 'स त्वाग्रस्यो नाम बलिर्भवति'। सः—इति प्रस्तुतपरामर्शिना सर्व्वनाम्ना निरपेक्षं बलिरयं परा-मृश्यते। तुशब्दोऽन्येभ्योबलिभ्योऽस्य वैशेष्यमवगमयति। स्वयमेव खल्वयं बलिर्हर्त्तव्यो लोप एवास्य प्रवासादाविति स्मवोचाम। स खल्वयं बलिरेकस्मात् शस्यादारभ्य अपरशस्यपर्य्यन्तं कर्त्तव्यत्वात्—'आग्रस्यो नाम' भवति॥ २९॥

तदनेनाग्रस्यबलिना—

दीर्घायुर्हैव भवति॥ ३०॥

दीर्घम् आयुर्यस्य सोऽयं दीर्घायुः, दीर्घं वा अस्य आयुः, ह किल नूनं भवत्येव। नायमल्पायुर्भवतीत्यर्थः॥ ३०॥

विश्राणिते फलीकरणानामाचामस्यापामिति बलिं हरेत्, स रौद्रो भवति स रौद्रो भवति॥ ३१॥ *॥

'विश्राणिते' विशेषेण श्राणिते, 'श्रण दाने' इति स्मरणात् दत्ते अन्ने। क्षीणप्राये इत्यर्थः। 'फलीकरणानां' कम्बुकानाम्—इति भट्टभाष्यम्। फलीकरणानि कणाः—इति परिशिष्टप्रकाशः। तथाच गृह्यपरिशिष्टम्।

"आचितं शकटं प्राहुर्द्रोणः स्यात् कांसमानकः।
कम्बुकाश्च कणाश्चैव फलीकरणकुशाः"।

इति। 'आचामस्य' भक्तमण्डस्य—

"ओदनाद्यद्रवं प्राहुराचामं हि मनीषिणः"।

इति स्मरणात्। 'अपाम्' उदकस्य। षष्ठीविभक्त्योऽवयवार्थाः। इतिना मिलितमुच्यते, चौण्येतान्येकीकृत्येत्यर्थः। 'बलिं हरेत्'—इत्युक्तार्थम्। स खल्वयं बलिः, रौद्रो रुद्रदेवताको भवति। रात्रौ चायं बलिर्दातव्यः। कस्मात्?

"यच्छूणे चोदकं दद्यात् यच्छीतन्ते इति ब्रुवन्।

आरोग्यमस्य तेन स्यात्, सायं रौद्रात् यथेप्सितम्"।

इति गृह्यान्तरदर्शनात्। एतस्मात् च गृह्यान्तरात्,—यत् किञ्चन् कामयते, तत् रौद्रबलेः फलमवगच्छामः। 'स रौद्रो-भवति स रौद्रो भवति'—इत्यभ्यासो महायज्ञप्रकरणपरिसमाप्तिं द्योतयति। त इमे आग्रस्प्रभृतयः कौथुमराणायनीयादीनां स्वशास्त्रोक्ताः काम्या बलयो भवन्ति। कात्यायनोऽप्याह। "आग्रस्प्रभृतयः काम्याः"—इति। सामान्यविहितास्तु काम्याबलयो विष्णुपुराणादौ द्रष्टव्याः॥ ३१॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज-श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथम-प्रपाठकस्य चतुर्थी खण्डिका॥ ०॥

गोभिलीयगृह्यसूत्रे

प्रथमप्रपाठके पञ्चमी खण्डिका।

अथ दर्शपौर्णमासयोः ॥ १ ॥

अथेत्ययमधिकारार्थः। दर्शश्च पौर्णमासश्च,—दर्शपौर्णमासौ। तयोरधिकार इदानीं वर्त्तिष्यते—इति वाक्यशेषः। अथवा, अथशब्दोऽपूर्व्वप्रकरणोपन्यासार्थः पूर्व्वप्रकृतार्थो वा। कथन्नाम? यथा सायंप्रातर्होमवैश्वदेवबलिहरणानि नित्यानि, तथा दर्शपौर्णमासावपि ॥ १ ॥

तत्र तावदुपवासपूर्व्वकत्वाद्दर्शपौर्णमासयोरुपवासव्यवस्थैव प्रथममभिधातव्या। तत्रापि—

"दर्शान्तं पौर्णमासाद्यमेकमेव प्रचक्षते"।

इति कर्म्मप्रदीपवचनात् पौर्णमासादित्वावगमात्कर्म्मणः पौर्णमास्याः तावत् व्यवस्था उच्यते—

सन्ध्यां पौर्णमासीमुपवसेत् ॥ २ ॥

रात्र्यह्नोः सन्धिः, सन्ध्या—

"अहोरात्रस्य यः सन्धिः सूर्य्यनक्षत्रवर्जितः।
सा च सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः"।

इति स्मृत्युक्तलक्षणा। सा खल्वियं परैव सन्ध्या गृह्यते—इति वक्ष्यामः। अविशेषात् सन्ध्याद्वयमपि सन्ध्याशब्दार्थः—इति तु भट्टभाष्यम्। तस्यां या पौर्णमास्यवच्छिद्यते:—यस्यां किल पौर्णमास्यां सन्ध्यायामेव—सवितुरस्तमयसमकालमेव पूर्णश्चन्द्रमाः समुदेति, सा पौर्णमासी सन्ध्येत्युच्यते। तामिमां सन्ध्यां पौर्णमासीं प्राप्योपवसेत्—तस्यामुपवासं कुर्य्यादित्यर्थः। उपवासः खल्वयम्,—उपावृत्तस्य पापेभ्यः गुणैः सह वासो वक्ष्यमाणोपवसथानुष्ठानं यथोक्तकालस्याभोजनमुच्यते। न पुनरहोरात्रमभोजनम्। कस्मात्? "औपवसथिकं दम्पती भुञ्जीयाताम्"—इति तदहर्भोजनोपदेशात्।

"उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह।
उपवासः सविज्ञेयो न शरीरविशोषणम्"।

इति च स्मरणात्। एके पुनः—"उपास्मिन् श्वो यक्ष्यमाणा देवा वसन्ति एवं विद्वानग्निमुपस्तृणाति"—इति तैत्तिरीयब्राह्मणं पठन्तः उपवासोऽग्न्याधानम्"—इति वर्णयन्ति। "पूर्व्वेद्युरग्निं गृह्णाति उत्तरमहर्देवतां यजते"—इत्येवमादिशाखान्तरमप्युदाहरन्ति॥ २॥

उत्तरामित्येके॥ ३॥

सन्ध्यां पौर्णमासीमनुपोष्य तदुत्तरां पौर्णमासीमुपवसेत्—खण्डामपीत्यर्थः। इत्येके आचार्य्या मन्यन्ते।

एवं वा—

उत्तरेति प्रकृतत्वात् पौर्णमास्याः प्रतिपदुच्यते। उत्तरपदं

खल्विदमव्यवस्थितत्वात् पौर्णमास्यास्तदपेक्षयैव उत्तरत्वमवगमयति, न सन्ध्यामपेक्ष्य, व्यवस्थितत्वादित्यभिप्रायः। तामिमामुत्तरां प्रतिपदमुपवसेत्—इति, एके अन्ये शाखिनो मन्यन्ते न वयमेवं ब्रूमइत्यर्थः। तथाच रौरकीयाणां ब्राह्मणम्। "द्वे ह वै पौर्णमास्यौ द्वे अमावस्ये,—तस्मात् प्रतिपद्युपवसन् यजेतापरेद्युः"—इति। तस्मात् पारशाखिकोऽयं पक्षः कौथुमराणायनीयादीनां न भवति॥ ३॥

स्थिता तावदपर्य्यवसितैव पौर्णमासीकथा, 'त्रयः पौर्णमासीकाला भवन्ति'—इत्यत्र पुनरुद्भविष्यति। अमावस्यायाः खल्विदानीं व्यवस्थोच्यते—

अथ यदहश्चन्द्रमा न दृश्येत,ताममावास्याम्॥ ४॥

अथ उभयत्रामावास्यालाभे यदहर्यस्मिन्नहनि चन्द्रमा न दृश्येत, नावलोक्येत, ताममावास्याम्, उपवसेदित्यनुवर्त्तते। सा खल्वियं कुहूरुच्यते। तत्रैव हि चन्द्रमा न दृश्यते—इति सैवोपवस्तव्या न सिनीवाली। तस्यां खल्ववलोक्यते प्रातः चन्द्रमाः। तस्मात्ताच क्षयलक्षणा। तदिदं सूत्रं वर्द्धमानाभिप्रायम्। कात्यायनोऽप्याह।

"वर्द्धमानाममावास्यां लक्षयेदपरेऽहनि।
यामांस्त्रीनधिकान् वापि पितृयज्ञस्ततो भवेत्"।

इति॥ ४॥ ०॥

कस्याश्चित् पौर्णमास्याः कस्याश्चिच्चामावास्यायाः उपवासव्यवस्थामभिधाय, अथेदानीं दर्शपौर्णमासयोः कश्चिन्नियमः, पौर्णमास्यमावस्ययोश्च स्वरूपं वक्तव्यम्—इत्युत्तरो ग्रन्थ आरभ्यते।

एवं वा—

कस्मात् पुनः कारणात् पौर्णमास्याममावस्यायाञ्च उपवासो-व्यवस्थाप्यते ?—न पुनश्चतुर्दश्यामुपोष्य तयोरेव इज्यते ?—इत्यस्यां जिज्ञासायामिदं सूत्रमारभ्यते—

पक्षान्ता उपवस्तव्याः पक्षादयोऽभियष्टव्याः ॥ ५ ॥

पक्षोऽर्द्धमासः। स च शुक्लकृष्णभेदात् द्विविधः। तदन्ता तिथिश्च द्वयौ पौर्णमासी अमावस्या च। बहुवचनं व्यक्तिभेदाभिप्रायमा-त्यपेक्षम्। तदयमर्थः। पक्षाणामन्ता अवसानतिथय उपवस्तव्याः। पक्षाणामादयः प्रतिपदश्च अभियष्टव्याः आभिमुख्येन पूर्व्वाङ्गादि-सम्पादनेन यष्टव्याः—इत्यर्थः। अस्मादपि कारणात्—पौर्णमासी-मुपवसेत् नोत्तराम्—इत्यवधार्य्यते ॥ ५ ॥

आमावास्येन हविषा पूर्व्वपक्षमभियजते पौर्णमा-सेनापरपक्षम् ॥ ६ ॥

अमावास्यायां यदुपक्लृप्तं हविस्तदामावास्यम्—इत्युच्यते। तेन आमावास्येन हविषा पूर्व्वपक्षं शुक्लपक्षम अभियजते। पौर्णमासेन पौर्णमास्यामुपक्लृप्तेन हविषा अपरपक्षं कृष्णपक्षम्, अभियजते—इत्यनुषज्यते। पूर्व्वपक्षप्रतिपदिष्ट्या कृत्स्न एव पूर्व्वः पक्षः इष्टो-भवति, अपरपक्षप्रतिपदिष्ट्या च कृत्स्नोऽपरपक्षः—इत्यभिप्रायः। कर्म्मणः पौर्णमासादित्वात् दर्शान्तत्वाच्च पौर्णमास्यां यागार्थे यद्ध-विरुपक्लृप्तममावस्यायामपि तदेवोपकल्पनीयमित्यनुमन्येयम् ॥ ६ ॥

अथ केयं पौर्णमासी ? का वा अमावस्या ? तदुच्यते—

यः परमो विकर्षः सूर्य्याचन्द्रमसोः सा पौर्णमासी, यः परमः सङ्कर्षः साऽमावास्या ॥ ७ ॥

यः परमो महान् विकर्षो विप्रकर्षोऽव्यवधानं सप्तमराश्यवस्थानम्—इत्येतत्। कयोः ? सूर्य्याचन्द्रमसोः। सूर्य्यश्च चन्द्रमाश्च, तयोः सूर्य्याचन्द्रमसोः। सा पौर्णमासी पूर्णिमा—इत्येकोऽर्थः। सा—इति पौर्णमास्यपेक्षया स्त्रीत्वम्। यः खलु परमः सङ्कर्षः सन्निकर्षः—एकराश्यवच्छेदेनैकांशावस्थानं सूर्य्याचन्द्रमसोः, सा अमावस्या दर्शः सूर्य्येन्दुसङ्गमः—इत्यनर्थान्तरम् ॥ ७ ॥

अवसिता प्रासङ्गिकी कथा। प्रकृतामेवेदानीममावस्याव्यवस्थामनुवर्त्तामहे—

यदहस्त्वेव चन्द्रमा न दृश्येत,ताममावस्यां कुर्व्वीत ॥ ८ ॥

यदहश्चन्द्रमा न दृश्येत, न दृश्यते—क्षीयते, आगमबलात् क्षीणः—इत्यवगम्यते; ताममावस्यां कुर्व्वीत। तुशब्दः, चशब्दार्थः समुच्चते। एवशब्दोऽवधारणार्थः। उपवासमन्यच्च यद्विहितम्—"अमावस्यायां तत् श्राद्धम् इतरदन्वाहार्य्यम्"—इति, तदपि तस्यामेव कुर्व्वीत—इत्येवमवध्रियते। तदनेन,—उपवासपिण्डपितृयज्ञान्वाहार्य्यश्राद्धानामेकस्मिन् काले कर्त्तव्यत्वमवगम्यते। अतएव कात्यायनः अमीभिरेव वचनैः श्राद्धमपि व्यवस्थापयाञ्चकार।

तदिदं क्षीणामावस्याभिप्रायं सूत्रम्। क्षयस्याच लक्ष्यते। अतो नास्ति पौनरुक्त्यम्—'अथ यदहश्चन्द्रमा न दृश्येत ताममावास्याम्'—इत्यनेन सूत्रेण। तत्र खल्ववलोकनाभावोऽर्थः, वर्द्धमानाभिप्रायञ्च वचनम्—इत्यवोचाम। तदाह कात्यायनः।

"पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते।
वासरस्य तृतीयांशे नातिसन्ध्यासमीपतः।
यदा चतुर्दशीयामं तुरीयमनुपूरयेत्।
अमावस्या क्षीयमाणा तदैव श्राद्धमिष्यते।
यदुक्तं यदहस्त्वेव दर्शनं नैति चन्द्रमाः।
तत्क्षयापेक्षया ज्ञेयं क्षीणे राजनि चेत्यपि"।

इति। तथा च श्रूयते। "अपराह्णे ददाति, तस्मिन् क्षीणे ददाति"—इति। "एष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः, स एतां रात्रिं क्षीयते, तस्मिन् क्षीणे ददाति"—इति च शतपथीये ब्राह्मणे।

या च श्रुतिः—"यदहस्त्वेव चन्द्रमादर्शनं नैति,ताममावस्यां कुर्व्वीत"—इति, "यदैवैष न पुरस्तान्न पश्चाद्दृशे, अथैभ्यो-ददाति"—इति चैवं जातीयिका, सा तु दर्शनाभावपरैव, न क्षयपरा। श्रुतिः खल्वेवमत्यन्तमुत्कृष्येत। "श्रुतिलक्षणाविषये च श्रुतिर्ज्यायसी"—इत्याचक्षते। शतपथादिब्राह्मणेषु च, क्षीयते—इति, क्षीणे—इति चैवमादिसमाम्नानात् क्षयमात्रमर्थः, न पुनरदर्शनमपि। तथाविधवचनव्यक्तेरभावात्। तदनयोर्विभिन्नविषययोर्वचनयोर्नास्त्येकविषयत्वम्। तस्मादासामीषां वचनानामेकवाक्यता।

न खल्वेकवाक्यत्वानुरोधात् श्रुतिरुत्स्रष्टुं युज्यते, लक्षणा वा आश्रयितुम्। श्रुतिर्हि वाक्याद्बलीयसी, कथमिव वाक्यानुरोधादुत्सृज्येत! तस्मात्—शतपथश्रुतिदर्शनादपराऽपि श्रुतिः क्षयपरा—इति वाचस्पतिमिश्रादिवर्णनमसङ्गतम्।

सा खल्वियमपरा श्रुतिर्वर्द्धमानाऽभिप्राया—इत्यवधार्य्यते। कुतः? परिशिष्टकारस्मरणात्। स हि वर्द्धमानायामपरेऽहनि श्राद्धं स्मरति। अतएव, आचार्य्यस्य सूत्रद्वयमुपपद्यते,—'अथ यदहश्चन्द्रमा न दृश्येत'—इति, 'यदहस्त्वेव चन्द्रमा न दृश्येत'—इति च। इतरथा श्रुतीनामेकवाक्यतायामपि, आचार्य्यस्य सूत्रद्वयं नोपपद्यते। न खलु सर्व्वत्र क्षयलक्षणायां कश्चिदपि विशेषः शक्यते दर्शयितुम्। वर्द्धमानायामपि चैवमनुपपत्तिः। सर्व्वत्र क्षयलक्षणायां खल्वनुपपत्तिर्वर्द्धमानायां परदिने श्राद्धकरणस्य। कस्मात्? अमावस्याष्टमे यामे क्षयाभावात्। प्रत्यक्षश्रुतिविरोधेन च स्मार्त्तायाः श्रुतेरनुमानासम्भवात्।

यः पुनरेवं समाधानं ब्रूते,—'यदुक्तं यदहस्त्वेव'—इत्यनया स्मृत्या श्रुतौ लक्षणावर्णना न सम्भवति, स्मृतिमपेक्ष्य श्रुतेर्बलवत्त्वात्'—इति। सोऽपि नातीव समीचीनमाह। कुतः? यतो—भवेदेतदेवं नाम, यदि स्मृतिविरोधपरिहाराय श्रुतौ लक्षणा अभ्युपगम्येत। न तु तथा अभ्युपगम्यते। श्रुतिरियमनया स्मृत्या व्याख्यायते—इति कृत्वा त्वियं वर्णना स्यात्। न खल्वेवमियं श्रुत्या विरुध्यते; येन अप्रमाणं स्यात्। श्रुत्या विरुध्यमाणा स्मृतिरप्रमाणम्—इति ह्याचक्षते, न श्रुतिव्याख्यानपराऽपि। तस्मात् यथा

श्रुतिव्याख्यानपराणाम्—"अभ्युत्य कालभेदे दोषवचनात्"—इति, "चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः"—इति, "वचनात्त्वयथार्थमैन्द्री स्यात्"—इति चैवमादिकानामक्षपादवादरायणजैमिनीयानां सूत्राणां नाप्रामाण्यम्, एवमिहापि भवितुमुचितम्। कथमन्यथा कात्यायनवचनादाचार्य्यसूत्रेऽपि लक्षणा स्यात्, तस्य तदुपजीव्यत्वात्। अतएव भगवतो व्यासस्य स्मरणम्।

"वेदार्थो यः समाख्यातस्तत्राज्ञानं भवेद् यदि।
ऋषिभिर्निश्चिते तत्र का शङ्का स्यान्मनीषिणाम्"।

इति। न चात्र, यदा चतुर्दशीयामम्,—इत्यत्र श्रुतिविरोधपरिहाराय श्रुतौ लक्षणा इति नारायणोपाध्यायादिदिशा भ्रमितव्यम्। अदर्शनवत् क्षयस्यापि श्रौतत्वाविशेषात्। तस्मादस्मदुक्तमेव समाधानमादरणीयम्। क्षयश्च कात्यायनेन दर्शितः।

"अष्टमांशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः।
अमावस्याऽष्टमांशे च ततः किल भवेदणुः"।

इति। 'ततः'—इति अमावस्याष्टमयामे क्षयाभावं दर्शयति। क्षयानन्तरम्—इति तस्यार्थः। अन्यथा तत्पदवैयर्थ्यात्—इति रामकृष्णोपाध्यायाः। अमावस्याष्टमांशे च,—इति चस्त्वर्थः, व्यवस्थाऽर्थको वा। अमावस्यायाः सप्तममंशं यावत् क्षयः, अष्टमे चांशे उत्पत्तिर्व्यवस्थाप्यते। तस्मात्—अणुकालोऽपि क्षयकाल एव—इत्यसङ्गतं वर्णनम्। यच्च—'ततः'—इत्यत्र, 'पुनर्'—इति पठितं नारायणोपाध्यायेन। तदप्यनुचितम्। सर्व्वेष्वेव ग्रन्थेषु 'ततः'—इति पाठस्यैव दर्शनात्। शूलपाणिप्रभृतिभिः प्रामाणिकतरैश्च तथैव

पठितत्वात्। किं बहुना? तन्मतमनुजानानोऽपि वाचस्पतिमिश्रः, 'ततः'—इत्येव पठति। नापि 'पुनर्'—इति पाठ आञ्जस्येन सङ्गच्छते। कुतः? उच्यते। पुनः किल भवेदणुः—इत्यस्य खल्वयमर्थः अवगम्यते—अमावस्याष्टमांशे पुनरपि—चतुर्दश्यष्टमयामवदेव अणुर्भवेत्—इति। पुनःशब्दस्वरसात्। सोऽपि एवमेव व्याचष्टे। स खल्वयमर्थः, नातीव समञ्जसः। कस्मात्? एवं खल्वणुपदस्य लक्षणा स्यात्। वाक्यार्थश्च नोपपद्यते। कथम्? यदि तावदणुपदं द्व्यणुकाभिप्रायं, तर्हि स्फुटमेतस्य चतुर्दश्यन्त्ययामवैलक्षण्यम्। पुनःशब्दस्य खल्वेवं पीड्यते। अथ मतम्—चतुर्दश्यष्टमे यामे चन्द्रमसो यावन्तोऽवयवाः शिष्यन्ते, तदभिप्रायकमणुपदम्, तथाच यादृशमणुत्वं चतुर्दशीशेषयामे तादृशमत्रापि—इति। एवन्तर्हि अणुपदस्य लक्षणा स्यात्। न ह्यत्र लक्षणाकारणमस्ति। न चैवमपि वाक्यार्थ उपपद्यते। किं कारणम्? चतुर्दश्यष्टमे यामे किल चन्द्रमाश्चतुर्थभागोनकलावशिष्टो भवति, अमावस्यासप्तमयामे च कृत्स्नं क्षीयते।

"अथेन्दुराद्ये प्रहरेऽवतिष्ठते चतुर्थभागोनकलावशिष्टः।
तदन्त एव क्षयमेति कृत्स्नमेवं ज्योतिश्चक्रविदोवदन्ति"।

इति विशेषाभिधानस्वरसात्। चतुर्दश्यष्टमयामे तावत् यथावदवस्थितस्य चन्द्रमसोऽवयवापचयादेवं वाक्यार्थः सङ्गच्छते। अमावस्याष्टमयामे तु नैवम्। न हि सप्तमयामे निरवशेषेण क्षीणस्य अणुमात्रावशेषस्य चन्द्रमसो जातुचिदपि अष्टमयामे अवयवापचयाच्चतुर्थभागोनकलावशिष्टता सम्भवति। अपि तु अवयवोपचयादेव—इत्यकामेनापि वाच्यम्। तथाच—उपचीयमानावयवस्य

चन्द्रमसः चतुर्थभागोनकलावशेषः—इति न शक्यते वक्तुम्। कुतः? अवशेषपदार्थासङ्गतेः। भिन्नौ खल्विमावर्थौ,—यस्यावस्थितस्य चन्द्रमसोऽवयवापचयाच्चतुर्थभागोनकलावशेषः, यच्चाणुमात्रावशेषस्यावयवोपचयात् चतुर्थभागोनकलत्वम्,—इति धीमद्भिरवधेयम्। एतेन,—इदमपि वर्णनमसङ्गतमेव;—'अहत्स्नचयस्तुरीयोनकलाऽवशिष्टता, सा च चतुर्दशीशेषयामे भवति, कृत्स्नचयस्य सप्तमे अमावस्यायामे अष्टमे च पुनस्तुरीयोनकलावशेषः'—इति।

तस्मात् 'पुनः किल भवेदणुः'—इति पाठेऽपि पुनःशब्दः पक्षान्तरार्थो वर्णनीयः। तेन चयात् पक्षान्तरमिदमुच्यते,—अणुर्भवेत् उत्पद्यते,—इति वचनव्यक्तिरादरणीया। अतएव,—'अमावस्याष्टमांशे अणुर्भवति पुनरुत्पद्यते' इति तत्त्वकारादिभिर्व्याख्यातम्। अतः,—इदमपि वर्णनमनादरणीयम्;—'अमावस्याष्टमयामे परमाणुमात्रं तिष्ठति, द्व्यणुकारम्भस्तु प्रतिपद्येव'—इति। भवेत्—इति च प्रमादपाठः खल्वेवं स्यात्।

अपि च। पुनः किल भवेदणुः—इत्यस्य परेषां वर्णनायामपि उत्पत्तिकाल एव अमावस्याष्टमांशः स्यात्। न चयकालः। कस्मात्? असाधारणत्वात्। उत्पत्तिः खल्वष्टमांशे असाधारणी। सा ह्यत्रोपदिश्यते। न चयः। व्यपदेशाश्च असाधारणतयैव भवन्ति,—इत्यवोचाम। 'चीणे ददाति'—इत्येतस्य च असाधारण एव चयोऽर्थः। कुतः? शीघ्रमुपस्थितेः। साधारणासाधारणयोः खल्वसाधारणमेव शीघ्रमागच्छति हृदयम्। आगच्छति चेत्, न युज्यते विनाकारणमुत्स्रष्टुम्। अतएव,—"दृष्टिपूर्व्वकमेवादः

पौर्णमासं हविः"—इत्यग्निषोमीयः पुरोडाश एवोत्कृष्यते, न पुनरुपांशुयाजीयमाज्यमग्निषोमीयानग्निषोमीयसाधारणम् — इति सिद्धान्तः। अपिच। अमावस्यायाः क्षयस्य व्यभिचाराभावे, न जातुचिदपि,—'यदहस्त्वेव चन्द्रमा न दृश्येतताममावस्याम्'—इति अमावस्यां क्षयेण व्यशेक्ष्यत्। व्यशिषच्चाचार्य्यः,—तस्मादनुमिमीमहे;—व्यभिचरत्यमावस्या क्षयम्—इति।

इदमिदानीं सन्दिह्यते। यदा पूर्व्वस्याममावस्यायामुपवासः क्रियते, तदा परदिने पश्वादियागः किं पूर्व्वाह्ण एव अमावस्यायामपि कर्त्तव्यः?—आहोस्विदपराह्णेऽपि प्रतिपद्येव?—इति। पूर्व्वाह्ण एव दर्शेऽपि,—इति तावत् प्रतिपद्यामहे। कुतः? "अथ पूर्व्वाह्ण एव प्रातराहुतिं हुत्वाऽग्रेणाग्निं परिक्रम्य"—इति वक्ष्यमाणसूत्रात्। पूर्व्वाह्ण एव—इति—सूचयन्नाचार्य्योऽन्तरेणापि प्रतिपदं पूर्व्वाह्ण एव यागं दर्शयति—अमावस्यायामपि। अन्यथा, 'प्रागावर्त्तनादह्नः'—इति सूचितत्वादनुवादापत्तेः। स खलु अप्रवृत्तिविशेषकरोऽनर्थकः—इत्यवोचाम। अपराह्णेऽपि प्रतिपद्येव,—इति च प्रतिपद्यामहे। कस्मात्? "पश्वान्ता उपवस्तव्याः पश्वाद्योऽभियष्टव्याः"—इति सूचणात्। सोऽयं तुल्यवद्विकल्पः,—इति भट्टनारायणोपाध्यायाः। तदेतत् कात्यायनः स्पष्टयाञ्चकार।

"पश्वादावेव कुर्व्वीत यदा पश्वादिकं चरुम्।
पूर्व्वाह्ण एव कुर्व्वीत विद्धेऽप्यन्ये मनीषिणः"।

इति। यदापदमुभाभ्यामन्वेति। कथन्नाम? यदा, सर्व्वस्मिन्नेव पश्वादौ विद्धेऽपि, आपराह्णिकेऽपि वा,—इत्यर्थः। यदा, सर्व्वस्मिन्नेव

पूर्व्वाह्णे, सदर्शेऽपि,—इत्यर्थः। तदिदमुक्तं,—'विद्वेऽप्यन्ये मणीषिणः'—इति। अत्रान्यग्रहणं क्रियते,—अन्येषामाचार्य्याणामिदं मतम् (न पुनरस्मत्कल्पितम्)—इत्यन्यानाचार्य्यान् पूजयितुं, नात्मीयं मतं पर्य्युदसितुम्। 'अन्येऽपि मनीषिणः'—इति वा वचनव्यक्तिरादरणीया। 'सदा' पदाद्वा नित्यस्यैव पक्षादिचरोरयं कालविकल्पः,—इत्ययमर्थोऽवगन्तव्यः। तदत्र, 'पक्षादावेव कुर्व्वीत'—इति, 'पूर्व्वाह्ण एव कुर्व्वीत'—इति च निरपेक्षसमाम्नानात्, "खादिरे बध्नाति, पालाशे बध्नाति, रौहितके बध्नाति"—इति "यवैर्यजेत, व्रीहिभिर्यजेत"—इति चैवमादिवद्विकल्प एव स्फुटमवगम्यते। स्वेन स्वेन पदसमूहेन खल्वत्र वाक्यद्वयं पृथक् पृथगेव परिपूर्णं, तस्माद्विस्पष्टमर्थद्वयं, विभागे च न साकाङ्क्षम्—इति; "हस्तौ अवनेनिक्ते, उपलराजिं स्तृणाति"—इत्येतयोरिव नास्त्यनयोरपि परस्परं सम्बन्धः। तथाचोक्तम्। "वाक्यानाञ्च समाप्तत्वात्"—इति, "समेषु वाक्यभेदः स्यात्"—इति, "एकार्थास्तु विकल्पेरन्"—इति च। 'यस्मिंस्तु साधनोपकारे कार्य्ये, तस्मिन्नेव उपकारे अन्यत् साधनं विधीयते, तत्र विकल्पः'—इति च शास्त्रतात्पर्य्यविदां समयः। अत्र खल्वेकस्मिन् होमे साधनतया द्वौ कालौ विहितौ,—पक्षादावेव—इति, पूर्व्वाह्ण एव,—इति च।

"स्मृतिशास्त्रे विकल्पस्तु आकाङ्क्षापूरणे सति"।

इति च स्मरणम्। एवकारद्वयेन च प्रत्येकमवधारयन्नेकैकशः करणमुपदिशति। कुर्व्वीत,—इति च क्रियाभ्यासस्तावन्मात्रे करणार्थः। यत्र चोभयमेव सम्पद्यते, तत्राप्यन्यतरोपादानमवर्ज्जनीयमेव। एके-

कम्मः अनुगुणानामुदगयनादीनामिव वा, समुदितोपलब्धौ महान् अभ्युदयोवाच्यः ।

"सुग्भ्यां दाभ्यां तिल-व्रीहि-यव-गोधूम-कल्पितम् ।
हविः प्रजुहुयात्तच्चं वासरानेकविंशतिम्" ।

इत्यस्यात्र स्मृतौ,—सति सम्भवे तिलादीनां समुच्चयः, असति विकल्पः,—इति विश्वेश्वरभट्टैर्व्याख्यातम् । तद्वदत्रापि वा, सम्भवासम्भवाभ्यां समुच्चयविकल्पौ आदरणीयौ । अतएव,—"यत् पितृभ्यः पूर्वेद्युः करोति, पितृभ्यस्तेतत् यज्ञं निष्क्रीय यजमानो देवेभ्यः प्रतनुते"—इति, "पूर्वेद्युरग्निं गृह्णाति उत्तरमहर्देवतां यजते"—इति चैवमाद्याः श्रुतयोऽनुगृह्यन्ते । अन्यथा, उपवासश्राद्धयोरेकदिनत्वनियमात्; पूर्वस्यास्त्वामावस्यायां तदवधारणात्; उत्तरदिने यागमकृत्वा, तत्परदिने प्रतिपदि तत्करणे, श्रुतय उपरुध्येरन् ।

न चाहःपदं तिथिपरम्—इति तृतीयेऽपि दिने प्रतिपदि यागे श्रुतीनामुपरोधो नास्ति,—इति वाच्यम् । 'अथ यदहश्चन्द्रमा न दृश्येत तामनावास्याम्'—इत्येवमादिसूचणात् सावनस्यैवाह्नोऽवगतेः । 'यज्ञादौ सावनो मतः' इति च स्मरणात् । अपि च । 'यदहस्त्वेव'—इत्येवमादिभिः सूत्रैरुपवासकालं सूचयित्वा, 'अथ यदहरुपवसथो भवति'—इत्यादिभिः प्रातरुपवसथमभिधाय, 'अथापराह्ण एव'—इत्यादिभिस्तस्मिन्नेव दिने दम्पत्योर्भोजनमुक्त्वा, 'तौ खलु जाग्रन्मिश्रावेव'—इत्यादिना तत्रैव जागरणं विधाय, 'अथ पूर्वाह्ण एव प्रातराहुतिं हुत्वा' इत्यनेन, अथानन्तरदिने

प्रातराहुतिहोमानन्तरमेव यागस्य सूचणात् पूर्वापरभावनदिनत्वमेव उपवासपश्चाद्दियागयोः पर्य्यवस्यति। 'पूर्वेद्युः पितृभ्यो निष्क्रीय प्रातर्देवेभ्यः प्रतनुते'—इतीयञ्च श्रुतिः भावनाभिप्रायैव स्फुटमवगम्यते। कुतः ? प्रातर्—इति वचनात्। अत्र प्रातरिति वचनाच्च प्रातरेव यागः प्रतिपदभावेऽपि,—इति प्रतीयते।

नापि तृतीयदिने यागः कर्त्तुम् उचितः। तत्र हि द्वितीयाविद्धतया प्रतिपदः, चन्द्रमसो दर्शनप्रसङ्गः। स खल्वनिष्ट एव। तथाच गृह्यान्तरम्।

"यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते।
तत्र व्याहृतिभिर्हुत्वा दण्डं दद्यात् द्विजातये"।

इति। "एषा वै समला नामेष्टिः"—इति च ब्राह्मणम्। वर्द्धमानायां पुनरनन्यगतेर्व्वचनात् नैष दोषः। तदिदमुक्तं,—'विद्धेऽप्यन्ये'—इति।

"सन्धिश्चेदपराह्णे स्यात् यागः प्रातः परेऽहनि।
कुर्वाणः प्रतिपद्भागे तुरीयेऽपि न दुष्यति"।

इति च गृह्यपरिभाषादौ स्मृत्यन्तरम्। अत्र 'पादः प्रातः'—इति केनचित् पठितम्। तदनाकरम्।

न चाहःपदस्य तिथिपरतायामपि नियमेन पूर्वापरदिनत्वमुपपद्यते श्राद्धपश्चाद्दियागयोः। चतुर्दश्यामपि श्राद्धविधानात्। न खल्वेतदन्यत्र इयं श्रुतिरित्यत्र किञ्चित् प्रमाणमस्ति। 'प्रतिपद्युपवसन् यजेतापरेद्युः'—इत्यस्यामपि श्रुतौ, प्रतिपद्युपवसन्—इति श्रूयते, न प्रतिपदि यजेत—इति। श्रुतिः खल्वेवमत्यन्तमुत्सृष्टा भवति। न

च वाक्यानुरोधात् श्रुतिरुत्स्रष्टुं युज्यते! "यदर्थस्याभिधानं शब्दस्य श्रवणमात्रादेवावगम्यते, स श्रुत्याऽवगम्यते"—इति हि पदवाक्यप्रमाणकुशला मन्यन्ते। शब्दश्रवणमात्राच्चायमर्थोऽवगम्यते,—प्रतिपद्युपवसेदिति। अन्यस्तु—प्रतिपदि यजेत,—इति पुरुषबुद्धिकल्पितः। यथा खल्वेकस्माद्वाक्यादाख्यातपदमन्यस्माच्च नामपदं गृहीत्वा यो-वाक्यार्थः सम्पद्यते पुरुषकल्पनामूलः, तादृशो ह्ययमर्थो भवति,—अपरेद्युः प्रतिपदि यजेत,—इति। तस्मादयुक्तः स आश्रयितुम्। अतएव,—'द्वे ह वै पौर्णमास्यौ, द्वे अमावस्ये',—इति पौर्णमास्यमावस्ययोर्द्वित्वमुच्यते। तदनेन प्रतिपदोऽमावस्यात्वं पौर्णमासीत्वञ्चातिदिश्यते,—इति प्रतिपद्युपवास एव अनया श्रुत्या विधीयते,—इति प्रतिपद्यामहे। नाप्यत्राऽपि धर्म्मातिदेशस्य सप्तमाध्याये सिद्धान्तितत्वात्। अथ मतं,—प्रतिपदि यागेऽपि, अमावस्यायां यजेत, पौर्णमास्याञ्च,—इत्युपपत्तये तस्याः पौर्णमास्यादित्वमतिदिश्यते? तर्हि अमावस्यायामपि यागोऽनेनैव नयेन अवगम्यते,—इत्यस्मत्पक्ष एवानुगृह्यते।

स खल्वयं प्रतिपद्युपवासोऽन्येषामनुमतो नास्माकम्,—इति आचार्य्येणैव उक्तम्,—'उत्तरामित्येके'—इति। अतएव, एकेषामनुमतामुत्तरां दर्शयितुं तत्रैव सूत्रे, 'प्रतिपद्युपवसन्'—इतीमां श्रुतिं तत्रभवान् भट्टनारायण उदाजहार। अपिच। परेषामेवैषा श्रुतिर्नास्माकम्। रौरुकीयाः खल्वेवमामनन्ति, न अस्मच्छाखिनः। तस्मादिमामवष्टभ्य नास्मच्छास्त्रमन्यथयितुमुचितम्।

"पूर्वाह्णे मध्यमे वापि यदि पर्व्व समाप्यते।

तदोपवासः पूर्व्वेद्युस्तदहर्य्याग इष्यते।
अपराह्णेऽथवा रात्रौ यदि पर्व्व समाप्यते।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते"।

इति च स्मृतिर्मध्यमेऽपि भागे पर्व्वसमाप्तौ तद्दिने यागमभिदधाना अस्मदुक्तमेव अर्थमनुगृह्णाति। न चात्रान्या गतिः सम्भवति, मध्यम-भागपर्य्यन्ते पर्व्वसमाप्तावपि पूर्व्वेद्युरेवोपवासस्यावश्यम्भावात्। तदत्र पूर्व्ववाक्यं क्षीणाभिप्रायम्, उत्तरवाक्यन्तु वर्द्धमानाभिप्रायं प्रत्येतव्यम्। यदपि—

"आवर्त्तने यदा सन्धिस्ततः पूर्व्वमथापि वा।
तस्मिन्नहनि यष्टव्यं परतश्चेत् परेऽहनि"।

इति स्मरणम्। तत्र, आवर्त्तनम् अह्नो मध्यभागः,—इति तिथ्याभट्टोक्तमादरणीयम्। आवर्त्त्यते यत्र भागे, तदावर्त्तनम्,—इति व्युत्पत्तेः सम्भवात्, वचनान्तरसंवादाच्च। न ह्यावर्त्तनपर्य्यन्ते—इत्यर्थां कल्पनायां किञ्चित् कारणमस्ति। एकत्रैव वचने,—आवर्त्तने, ततः पूर्व्वं वा,—इत्युपादानाच्च नायमर्थः शक्यते वक्तुम्। तस्मादस्या अपि स्मृतेः पूर्व्वोक्तस्मृतिसमानविषयतैव अवगन्तव्या। वचनस्य यथा-श्रुतार्थपरतायामपि, आवर्त्तनकालेऽपि सन्धौ तदहर्य्यागमुपदिशन्ती स्मृतिरस्मन्मतमेव अनुगृह्णातीति ध्येयम्। तदत्रापि तथासम्भवं क्षीणावर्द्धमानाभिप्रायता वर्णनीया। साधारणाश्च स्मृतयः, असाधारणवचनानामनुपरोधेन नेतव्याः। परमार्थतस्तु प्रायेण विभिन्नशाखिविषयाणि वचनानि भवन्ति। नैतेषामविरोध-सम्पादनप्रयासेनावश्यं मनः खेदयितव्यम्। पर्व्वणः सन्धिश्च यदि

पर्व्वणस्तुरीयो भागः, तदा व्यक्तमस्मद्दर्शनैव अभिरुपदिश्यते- इत्यनुसन्धेयम् ।

वाचस्पतिमिश्रास्तु,—"हरिहरपद्धत्यादौ तु विशेषः। तथा हि, श्राद्धेष्ट्योस्तावदव्यवधानेन पूर्व्वापराह्णानुष्ठेयत्वं,—'पूर्व्वेद्युः पितृभ्यो- निष्क्रीय प्रातर्द्देवेभ्यः प्रतनुते'—इति श्रुतेः। लोगाक्षिरपि,—

"पूर्व्वाह्णे वाथ मध्याह्ने यदि पर्व्व समाप्यते।
उपोष्य तत्र पूर्व्वेद्युस्तदहर्याग इष्यते।
अपराह्णेऽथ सायाह्ने यदि पर्व्व समाप्यते।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते"।

समाप्यते प्राप्यते। पर्व्व अमावस्या। उपोष्य औपवसथं विधाय। तेनापराह्णगामिन्याममावस्यायां श्राद्धमौपवसथञ्च विधाय तदुत्त- राह्ने मध्याह्नाभ्यन्तरे इष्टिः,—इति वर्त्तुलार्थः। एवञ्च वर्द्धमानावत् सर्व्वत्रैवोत्तरापराह्ण एव साग्निना श्राद्धं कार्य्यम्"—इति परेषां विशेषमुपन्यस्य,—"एतन्मते चीयमाणापदस्य उत्तरापराह्णव्यापि- त्वमर्थः। खर्व्वितापदस्यापि तत्स्थिताया उत्तरापराह्णव्यापने प्रथमायाः प्रतिषेधोऽर्थः, तदव्यापने तु विधिरिति व्यवस्थितविकल्पः"—इति वर्णयाम्बभूवुः। तदत्र भगवन्तो भूमिदेवाः प्रमाणम्। परमत्र मते व्यक्तमुत्तरदिने अमावस्यायामपि इष्टिरवगम्यते। ये तु—चीणादौ पूर्व्वस्याममावस्यायां श्राद्धम्, इष्टिञ्च पूर्व्वाह्णे प्रतिपद्येव वदन्ति, तेषामुपवासतृतीयदिवसे वा यागः स्यात्। श्राद्धोपवासयोः समान- दिनत्वं वा न स्यात्। श्रुतीनां स्मृतीनाञ्च बह्वीनाम् उपरोधोऽवर्ज- नीयः स्यात्। तदत्र तएव प्रष्टव्याः॥ ८॥ ०॥

यस्माञ्चतुर्दश्यामपि चन्द्रमाः क्षीयते, तस्मात्—

दृश्यमानेऽप्येकदा गताध्वा भवतीति ॥ ९ ॥

दृश्यमानेऽपि चन्द्रे। तदिदं चतुर्दशीमभिप्रेत्य वचनम्। अस्यापि खल्वमावस्याविषयत्वे पूर्वेणैव सूत्रेण श्विनीवाल्याविधानादर्थतएव तत्र प्रातश्चन्द्रमसोदर्शनस्य प्राप्तत्वादनुवादापत्तेः। एकदा—एकस्मिन् काले। यदा खलु विप्रकृष्टायाममावस्यायामपेक्ष्यमाणायां सन्ध्या-समीपसुप्तत्वं स्यात्, तदैव, न सर्वदा—इत्यर्थः। 'गताध्वा' गतः प्राप्तः देवपितृलोकप्रापणाय अध्वा अनया, सेयं गताध्वा प्रशस्ता, 'भवति' चतुर्दश्यपि। तदाह कात्यायनः।

"यच्चोक्तं दृश्यमानेऽपि तच्चतुर्दश्यपेक्षया।
अमावस्यां प्रतीक्षेत तदन्ते वापि निर्वपेत्"।

इति। 'इतिः' अमावस्याव्यवस्थोपसंहारार्थः। अत्र किञ्चिद्वक्त-व्यमस्ति। तत्र तावत् 'अष्टमांशे चतुर्दश्याः'-इत्यादिना चन्द्रमसः क्षयमभिधायाह कात्यायनः।

"आग्रहायण्यमावस्या तथा ज्यैष्ठस्य या भवेत्।
विशेषमाभ्यां ब्रुवते चन्द्रचारविदोजनाः।
अत्रेन्दुराद्ये प्रहरेऽवतिष्ठते
चतुर्थभागोनकलाऽवशिष्टः।
तदन्त एव क्षयमेति कृत्स्न-
मेवं ज्योतिश्चक्रविदो वदन्ति।
यस्मिन्नब्दे द्वादशैकश्च यत्र-

तस्मिंस्तृतीयया परिदृश्यो नोपजायते ।
एवं चारं चन्द्रमसोविदित्वा
क्षीणे तस्मिन्नपराह्णे च दद्यात् ”।

इति। तदस्मादिशेषाभिधानात् मार्गशीर्षज्यैष्ठयोश्चतुर्दश्यष्टम-याम न श्राद्धम्। तत्र चन्द्रक्षयाभावात्। किन्त्वमावस्यायामेव। पूर्व्वदिने त्वमावस्याया अलाभे परदिनेऽपि श्राद्धम्। अनन्यगते-र्वचनात्। पूर्व्वत्र वासरतृतीयांशे अमावस्याया अलाभेन संशया-भावात्। परत्र चन्द्रक्षयलाभाच्च। उभयदिने चन्द्रक्षयलाभे तु पूर्व्व-दिन एव। “यदा चतुर्दशीयामं”—इति वचनात्। न ह्यनेन विशेषाभिधानेन तदपोह्यते। किन्तु चन्द्रक्षयस्यैव विशेषोऽभिधीयते।

यच्चोक्तं तत्त्वकारेण। ‘मार्गशीर्षज्यैष्ठयोरुभयदिने चन्द्रक्षयलाभे यद्यपि यदा चतुर्दशीयाममिति वचनात् पूर्व्वदिन एव श्राद्धं प्राप्नोति, तथापि तद्वचनं चन्द्रक्षयानुरोधमूलमिति कृत्स्नक्षयानुरोधात् क्षीणायामपि परत्रापराह्णलाभे श्राद्धम्। अन्यथैतद्विशेषाभिधानं व्यर्थं स्यात्’—इति। तदसङ्गतम्। कृत्स्नक्षयानुरोधे प्रमाणाभावात्। ननु मा भूत् प्रमाणं, विशेषाभिधानस्यार्थवत्त्वार्थं कृत्स्नक्षयानुरोधः कल्प्यते इति चेत्। नैषा साध्वी कल्पना। विशेषाभिधानस्यार्थवत्त्वस्य पूर्व्वमेव दर्शितत्वात्। तस्मात् कपोलकल्पितेन कृत्स्नक्षयानुरोधेन वचनस्योपरोधः सर्व्वथैवासङ्गतः। वचनस्य चन्द्रक्षयानुरोधमूलत्वेऽपि कृत्स्नक्षयानुरोधमूलत्वे न प्रमाणम्। तथात्वे वा मासान्तरेऽपि पूर्व्वदिने श्राद्धं न स्यात्। कृत्स्नक्षयाभावात्।

इदमप्यपरमिह विवेचनीयम्। दिनद्वयसंबन्धिन्यमावस्या तावत्

त्रिविधा सम्भवति; परदिने पूर्व्वदिवसीयचतुर्द्दश्यपेक्षया न्यून-कालव्यापिनी, समकालव्यापिनी, अधिककालव्यापिनी च। तत्राद्या क्षीणा, द्वितीया स्तम्भिता, तृतीया वर्द्धमानेत्युच्यते। तत्राचार्य्येण चन्द्रमसः क्षयादर्शनाभ्यामुपवासादिकं व्यवस्थापितम्। कात्यायनस्तु क्षीणायां चन्द्रक्षये वर्द्धमानायाञ्च चन्द्रादर्शने श्राद्धमुक्तम्। एवञ्च क्षीणायां चन्द्रमसः क्षयो वर्द्धमानायाञ्च तस्यादर्शनं नियामकं सम्पद्यते। स्तम्भितायामाचार्य्येण विशेषानुपदेशात् चन्द्रमसः क्षया-दर्शनयोरनुरोधाच्च पूर्व्वत्र परत्र वा करणमिति विकल्पएवाचार्य्य-स्याभिप्रेत इत्यवधार्य्यते। तथाच कर्म्मप्रदीपे कात्यायनः।

"संमिश्रा या चतुर्द्दश्या अमावस्या भवेत् क्वचित्।
खर्व्वितां तां विदुः केचिद्गताध्वामिति चापरे"।

इति। केचित् यजुर्व्वेदिनः। अपरे ऋग्वेदिनः। तदत्र छन्दोग-परिशिष्टकृता छन्दोगानां व्यवस्थामनभिधाय यजुर्व्वेदिनां ऋग्वे-दिनाञ्च व्यवस्थामभिदधता छन्दोगानामिच्छाविकल्प एवाभिप्रेयते इत्यवगम्यते। इतरथा स्वापेक्षितमनभिदधतोऽनपेक्षितञ्च ब्रुवतो-ऽसंबन्धप्रलापित्वमनवधेयवचनत्वञ्च तस्यापद्यते। न चैतत् सम्भवति। युक्तमाह लघुहारीतः।

"त्रिमुहूर्त्तोऽपि कर्त्तव्या पूर्व्वा दर्शा च बह्वृचैः।
कुहूरध्वर्य्युभिः कार्य्या यथेष्टं सामगीतिभिः"।

इति। तस्मात् संमिश्रा येति वचनं क्षीणायाः पूर्व्वमुक्तत्वात् वर्द्धमानायाश्च वक्ष्यमाणत्वात् स्तम्भिताविषयमिति तत्प्रकारोक्तमादर-णीयम्। वचनमिदमुभयत्रामावस्याप्राप्तौ कुत्र श्राद्धं कर्त्तव्यमिति

संशयप्रदर्शनार्थम् इति वाचस्पतिमिश्रादिमतन्तु न युक्तम्। वचनारम्भवैयर्थ्यात्। चीणावर्द्धमानयोर्मध्ये संशयप्रदर्शनस्यानुचितत्वाच्च।

इदमप्यपरमिह विवेचनीयम्। चीणायां यदि पूर्व्वदिने न व्याप्नोत्यमावस्या पौराणिकमपराह्णं व्याप्नोति च परदिने, तदापि पूर्व्वदिने एव त्रिमुहूर्त्तव्यापिन्यामुपवासः श्राद्धञ्च कर्त्तव्यम्। तत्रैव चन्द्रचयलाभात्। चीणायां पूर्व्वत्रैव करणस्योपदेशाच्च। नातिसन्ध्यासमीपतः,—इति सन्ध्यासमीपमुहूर्त्तमात्रस्यैवाचानतुज्ञानेन सामान्यविषयस्य मुहूर्त्तत्रयाननुज्ञानस्यैतदितरविषयत्वात्। परदिने चन्द्रचयालाभेनाचाप्यापदविशेषाच्च। 'त्रिमुहूर्त्ताऽपि कर्त्तव्या'—इति दर्शनाच्च। यत्र च पूर्व्वदिने सन्ध्यासमीपमुहूर्त्तमात्रे अमावस्या, तत्रापि मार्गशीर्षज्येष्ठयोरितरत्र पूर्व्वदिन एव चतुर्द्दश्यां कर्त्तव्यं न परत्रामावस्यायामपि। चीणायां पूर्व्वत्रैव करणोपदेशात्। चतुर्द्दश्यामपि श्राद्धविधानाच्च। 'अमावस्यां प्रतीक्षेत'—इति च यत्रैव दिने चतुर्द्दश्यां करणमुपदिश्यते तत्रैवामावस्याप्रतीक्षा सम्भवन्ती अनूद्यते न तु विधीयते। वाक्यभेदप्रसङ्गात्। न ह्येकमेव वाक्यमुभयं विधातुं शक्नोति। अमावस्यायाश्च प्रतीक्षां चतुर्द्दश्याञ्च निर्व्वापम्। चीणायां ह्यमावस्यायां पूर्व्वत्रैव करणमवगतम्। तदनेन नापोद्यते। किन्तु तत्रैव प्रथमं अमावस्या प्रतीक्षणीया, तदसम्भवे च तत्रैव चतुर्द्दश्यन्ते निर्व्वप्तव्यम्,—इत्येतद्वचोच्यते। न पुनरपरस्मिन्नपि दिने अमावस्याप्रतीक्षा वचनार्थः। दिनान्तरस्यानुपस्थितेः। प्रत्यासत्त्या अमावस्याप्रतीक्षा-चतुर्द्दश्यन्तनिर्व्वापयोरेकस्मिन्नेवाह्नि सम्भवासम्भवाभ्यामवगतेश्च। तदिदं वचनं अमावस्यायां

प्राप्नायामप्यविशेषाच्चतुर्द्दश्यां करणं निरस्यति। अतएव, 'तत् किं अमावस्यावच्चतुर्द्दशी, इत्यत आह। अमावस्यां प्रतीक्षेत। उभय-तिथेः प्राप्तौ श्राद्धायामावस्या प्रतीक्षणीया'–इति तत्त्वकारेणापि वर्णितम्। "यदा विप्रकृष्टत्वादमावस्यायाः प्रतीक्षणे सन्ध्यासमीपं स्यात्, तदा अमावस्यां न प्रतीक्षेत अन्यदा प्रतीक्षेत" इति वर्णयद्भि-र्भट्टनारायणोपाध्यायैरपि अयमेवार्थोभङ्ग्यन्तरेण प्रतिपादितः।

एवन्तर्हि चतुर्द्दशीतुरीययामानुपूरणवचनमनर्थकम्। नैष दोषः। तस्यार्थवत्त्वोपपत्तेः। चतुर्द्दशीतुरीययामस्य अमावस्याया वा अपराह्णसम्बन्धः खल्वनया भङ्ग्या प्रतिपाद्यते। तत्र हि चन्द्रमाः क्षीयते। सोऽयमस्यार्थः। यदा अमावस्या क्षीयमाणा तदा श्राद्धम्, इत्येतावन्मात्रोक्तौ च न ज्ञायते पूर्व्वस्मिन् वा अह्नि श्राद्धमिदं स्यात् अपरस्मिन् वा,–इति। तदिदं पूर्वस्मिन्नेवाह्नि कर्त्तव्यम्,–इति प्रतिपिपादयिषया च तुरीयं चतुर्द्दशीयाम् अनुपूरयेदिति वचनमर्थवद्भवति। तस्माच्चतुर्द्दशीतुरीययामानु-पूरणवचनात् परदिनमात्रे पौराणिकापराह्णे अमावस्यालाभे परत्रैव करणमिति निर्व्वासना वर्णना।

किञ्च उभयत्र पौराणिकापराह्णेऽमावस्याया अलाभे चैतस्मादेव वचनात् पूर्व्वत्र करणस्य भवतोऽपि सम्मतत्वात् तत्र खल्वस्ति तुरीययामानुपूरणमित्यकामेनापि वाच्यम। तत्र चेदस्ति, अत्र नास्तीति न शक्यते वक्तुम्। न ह्यत्र परदिने पौराणिकापराह्ण-लाभालाभयोः कश्चिदुपयोगोऽस्ति। येन परदिनमात्रे पौराणि-कापराह्णलाभे पूर्व्वत्र पौराणिकापराह्णात् परतः प्रवृत्तायाः अमा-

व्याख्याया नास्ति तुरीययामानुपूरणमस्ति पुनरुत्तरत्र तदलाभे इत्युच्येत। तस्मादुभयत्रैव तुरीययामानुपूरणमस्तीत्याख्येयम्।

अनुस्याच लक्षणार्थः। स खल्वविशिष्ट एव। प्रत्युत लक्षणार्थकानुपदोपादानात् चतुर्द्दशीतुरीययामं लक्षीकृत्यान्यायामप्यमावस्यायां पूर्व्वत्र करणमवगम्यते। अन्यथा तुरीयं यामं पूरयेदित्येतावन्मात्रेऽप्युक्ते, 'द्युहन्तु व्यापिनी चेत् स्यात्' इति वत् भवन्मतेऽपि मुहूर्त्तमात्रस्यैव पूरणं प्रतीयेत। किमित्यनुपदं प्रयुक्तवान्। तस्मादनुपदस्यास्मदुक्तएवार्थे तात्पर्य्यमवधेयम्। एतेन पूरयेदित्युक्ते तुरीययामव्यापकत्वं प्रतीयते। अतएवानुपूरयेदित्युक्तम्। तथाच अनु लक्षीकृत्य पूरयेदित्यर्थः। अनुपूरयेदिति मुख्यापराह्णमन्वेति यावत् इति। तुरीयमनुपूरयेदित्यपराह्णप्राप्युपलक्षणार्थम् इति चैवमादि यदृच्छावर्णनमपि निरस्तं वेदितव्यम्।

तस्मात् "यदा चतुर्द्दश्यैव पूर्व्वं दिनं समाप्यते तदा क्षीयमाणापक्षेऽपि अमावस्यायामपराह्णे तदुत्तरदिने श्राद्धम् अनुपूरयेदित्यभिधानात्। प्रकृते च पूर्व्वदिने तुरीययामानुपूरणाभावात्"—इति वाचस्पतिमिश्रवर्णनमादरणीयम्। ननु खलु भोः। यदिदं तुरीयमनुपूरयेदितिवचनमनुकूलं युष्माकं प्रतिकूलञ्चास्माकमिति मन्यसे, तदिदमनुकूलमस्माकं प्रतिकूलञ्च युष्माकं सम्पन्नमित्यहो प्रमादः।

अतएवाचार्य्यः 'यदहस्त्वेव चन्द्रमा न दृश्येतताममावस्याम्' इत्यमावस्यां क्षयविशिष्टां सूचयित्वा तदसम्भवे 'दृश्यमानेऽप्येकदा' इति चतुर्द्दशीमेव क्षयविशिष्टां सूचयाञ्चकार। तस्मात् परदिनेऽप्यपराह्णे अमावस्याया अलाभे चतुर्द्दशीविधानमित्यसङ्गता कल्पना।

प्रमाणाभावाच्च। क्षीणपक्षस्य चन्द्रक्षयानुरोधमूलक इति तावन्नि-र्व्विवादम्। कुतः ? चन्द्रक्षयचन्द्रादर्शनयोराचार्य्योक्तयोः क्षीणा-वर्द्धमानापक्षयोः परिशिष्टकृता निवेशितत्वात्। चन्द्रक्षयस्य क्षीणपक्षे कथञ्चित् सामान्यसम्भवाच्च। एतच्च चन्द्रक्षयावरुद्धं क्षीणपक्षम्,—इति, यदा चतुर्द्दशीयाममिति वचनं चन्द्रक्षयानुरोधमूलकम्,—इति चैवमादिकमसकृददता तत्त्वकारेणापि स्वहस्तितम्। चतुर्द्दश्येव पूर्व्वदिनस्य परिसमाप्तौ परदिने चन्द्रादर्शने करणन्तु अनन्यगते-र्व्वचनात्। न चैतत् श्रुत्या विरुध्यते इति शक्यते वक्तुम्। क्षयवद-दर्शनस्यापि श्रौतत्वाविशेषात्। सन्निवेशस्तु स्मार्त्तः स्मृतिमनुसरतीति न किञ्चिदनुचितम्। 'कालश्चन्द्रक्षयात्मकः'—इति सामान्यस्मरण-मपि तुरीयमनुपूरयेदितिविशेषशास्त्रानुसारेण वर्णनीयम्।

अतएव पौराणिकापराह्णोऽपि नात्रानुरुध्यते। एवं खलु पुनरपि सामान्यमेव शास्त्रमनुसृत्य अस्मच्छास्त्रमुपरुध्येत। पौरा-णिकापराह्णस्य च क्षीणादिपक्षचितयसाधारणस्य क्षीणपक्षमात्र-निवेशवतश्चन्द्रक्षयाद्दुर्व्वलत्वमप्यस्त्येव। सम्भितायाञ्च परदिने पौरा-णिकापराह्णमप्युपेक्ष्य पूर्व्वदिने चिमुहूर्त्तायामपि करणं स्वयमेव वर्णितम्। परमार्थतस्तु वामरहतीयांशे श्राद्धविधानाच्चाच पौरा-णिकापराह्णस्यात्यन्तमनुरोधोऽस्ति। वामरहतीयांशपदोपादानेन पौराणिकापराह्णस्य कियतोऽंशस्य परित्यागात् तदतिरिक्तस्य कियतोऽंशस्याभ्यनुज्ञानाच्च। चन्द्रमसि क्षीणेऽपराह्णे च दद्यात्,—इत्युपसंहारोऽपि स्वोक्तचन्द्रक्षयवत् स्वोक्तवामरहतीयांशरूपापराह्ण-परतयैव सुतरामुपपद्यते। न पुनः परोक्तापराह्णपरतया। उप-

क्रमोपसंहारयोः समानविषयत्वानुरोधात्। श्रुतावपि श्रौतएवा-पराह्णोवर्णयितुमुचितः। स च वासरतृतीयांशरूपएव। श्रुतावपि श्रौतमपराह्णमुपेक्ष्य पौराणिकमपराह्णं वर्णयन्तोन न्यायेन सङ्गच्छन्ते। पौराणिकापराह्णस्य पूर्व्वत्रापि न विशिष्यते। परममावस्या तत्र नास्तीत्येतावानेव विशेषः। किन्त्वातः, चीणापचे स्वल्पमावस्याया-नात्यन्तमपेचेति निवेदितमस्माभिः। अतएव दर्शनिमित्तं चन्द्र-चयः कालः इति स्मरणम्। श्रुतिरपि चयापराह्णयोः श्राद्ध-मभिदधाना नातीवामावस्याया आदर इति दर्शयति। "अमा-वस्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति" इतीयञ्च श्रुतिरमा-वस्यायां पिण्डपितृयज्ञस्य करणं विधत्ते न चतुर्द्दश्यां निषेधति। ततश्चास्मात् पराचीनस्यान्वाहार्य्यस्य चतुर्द्दश्यां करणोपदेशादय-मपि तत्रापकर्षव्यः। "तिष्ठन्तं पशुं प्रयजति"—इति प्रयोजापकर्ष तदन्तकर्म्मापकर्षवत्।

पूर्व्वापरीभावश्चानयोः,

"पितृयज्ञन्तु निर्व्वर्त्त्य विप्रश्चन्द्रचयेऽग्निमान्।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकम्"॥

इति मन्वादिभिरन्वाहार्य्यस्य पिण्डपितृयज्ञात् पराचीनत्व-स्मरणात्।

"अमावास्यां द्वितीयं यदन्वाहार्य्यं तदुच्यते"।

इति गृह्यान्तरे चान्वाहार्य्यस्य द्वितीयत्वकीर्त्तनस्मरणात् पिण्ड-पितृयज्ञस्य प्राथम्यावगमात्। एतेन,

"न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः"।

इति मनुवचनमपि व्याख्यातम्। अन्ये तु "पिण्डपितृयज्ञश्चन्द्रादर्शने" इति कातीयं कल्पसूत्रमवलोकयन्तः श्रौतममावास्यापदं चन्द्रक्षयपरमिति वर्णयन्ति। नैमित्तिकं स्मार्त्तं वा कालान्तरमिदम्। अतो न प्रत्यक्षश्रुतिविरोधेन तदन्ते वापि निर्व्वपेदिति स्मृतेरप्रामाण्यमाशङ्कनीयमित्यपरे मन्यन्ते।

न चात्र केवलं वयमेव पर्य्यनुयोक्तव्याः। कदाचिच्चतुर्द्दश्यां करणस्य भवतोऽपि सम्मतत्वात्। तत्राप्येतस्य पर्य्यनुयोगस्याविशेषात्। भट्टनारायणोपाध्यायास्तु 'गताध्वा भवति' इति पृथगेव सूत्रं मन्यमाना इदानीं चतुर्द्दशीं प्रति अमावस्यानामसम्पत्तिरनेनोच्यते इति वर्णयाम्बभूवुः। तदेतत्तत एवोपलक्षयम्। अस्मिंस्तु नये नास्त्यनुपपत्तिलेशोऽपि। चतुर्द्दश्या अमावस्यानामतया तदतिक्रमस्य वक्तुमशक्यत्वादित्यवधेयम्। अतएव 'राजनि क्षीणे वामरहतीयांशे श्राद्धम्' इति, 'चन्द्रमसि क्षीणेऽपराह्णे च दद्यात्' इति चोपक्रमे उपसंहारे चामावस्यामनभिधाय क्षयापराह्णयोरेव क्षीणपक्षे श्राद्धमुक्तम्। अतएव, यदा अमावस्या क्षीयमाणा तदैव श्राद्धम्, इत्युक्तं, न तस्यामेवेति। तदैव पूर्व्वदिन एवेति च तत्प्रकारेणैव वर्णितम्। अतएव, परदिनमात्रे पौराणिकापराह्णेऽमावस्यालाभे परत्रैव करणमित्यपि कदाचिदाशङ्का स्यात् कस्यचिन्मन्दमतेः, सापि माभूदित्येतदर्थं तदैवेत्येवकारः सुतरामुपपद्यते। खण्डान्तरव्युदासमात्रन्तु नातीव प्रयोजनम्। अन्तरेणाप्येवकारमेतस्यानपायात्। अतएव, स्तम्भिता-बर्द्धमानयोर्व्विशिष्य अमावस्यापरिकीर्त्तनमिति धीमद्भिरनुचिन्तनीयम् ॥ ८ ॥

अवसिता अमावस्याकथा। अपर्य्यवसितामिदानीं पौर्णमासी-कथामनुवर्त्तामहे।—

त्रयः पौर्णमासीकाला भवन्ति; सन्ध्या वाऽस्त-मितोदिता वोच्चैर्वा॥ १०॥

त्रयः त्रिसङ्ख्याकाः, त्रिप्रकारकाः,—इति यावत्। पौर्णमास्या एव कालाः पौर्णमासीकालाः भवन्ति। ते खल्विमे विभज्य प्रदर्श्यन्ते। सन्ध्या वा। सन्ध्या तावदुक्तलक्षणा। सा वा। अस्त-मितोदिता वा। अस्तमिते उदितो यस्यां,—यस्यां किल पौर्ण-मास्यामस्तमिते सवितरि पूर्णश्चन्द्रमाः समुदेति, सेयमस्तमितो-दिता। सा वा। उच्चैर्वा। यस्याम् उच्चैः स्थिते,—कलाहीने समु-दिते चन्द्रमसि, पश्चात् सवितुरस्तमयः स्यात्, सेयम् उच्चैः पौर्ण-मासीत्युच्यते। सा वा। इयं किल चतुर्दशीमिश्रा भवति। पुराणेऽपि इत्यमेव पौर्णमासीप्रकाराः व्युत्पादिताः। तथाचोक्तम्।

"राका चानुमती चैव द्विविधा पूर्णिमा मता।
पूर्व्वोदितकलाहीने पौर्णमास्या निशाकरे॥
पूर्णिमाऽनुमती ज्ञेया पश्चास्तमितभास्करे।
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह॥
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता।
यदा चास्तमिते सूर्य्ये पूर्णचन्द्रस्य चोद्गमः॥
युगपत्, सोत्तरा रागात्तदाऽनुमतिपूर्णिमा।

राकान्तामनुमन्यन्ते देवताः पितृभिः सह।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयोऽब्रुवन्" ॥

इति। पश्चास्तमित—इति छान्दसः प्रयोगः। कलाहीने निशाकरे पूर्व्वमुदिते सति, यत्र भास्करोऽस्तमेति, सेयमनुमती नाम पूर्णिमोच्यते। इयमेव, 'उच्चैः'—इति सूचिता। अस्तमिते सूर्य्ये पूर्णचन्द्रस्योद्गमः, युगपच्च सूर्य्यस्यास्तमयः पूर्णचन्द्रस्योद्गमश्च,—इति द्वयी राका भवति। अचार्य्या,—अस्तमितोदिता, द्वितीया सन्ध्येत्यस्मदीयं दर्शनम्। एतस्मात् लिङ्गात्,—सन्ध्या पौर्णमासी अपि, अस्तमयसन्ध्यासम्बन्धिनी गृह्यते, न पुनरुदयसन्ध्यासम्बन्धिन्यपि,—इति युक्तम्। सेयमभिद्यमानेऽप्यर्थे भिन्नयोराचार्य्ययोर्विभिन्ना रीतिरित्यनवद्यम् ॥ १० ॥

उच्चैः पौर्णमासी तावच्चतुर्दशीमिश्रा सुतरामुभयदिनगामिनी भवति, कतरा पुनरत्रोपोष्या? तत्राह।

अथ यदहः पूर्णो भवति ॥ ११ ॥

अथेत्यनन्तरायामुच्चैः पौर्णमास्यामेष विधिरिति दर्शयति। 'अथशब्दः सूत्रभेदप्रज्ञापनार्थः। अन्यथा पूर्व्वेण सूत्रेणास्यैकसूत्रता स्यात्,—उच्चैर्व्वा यदहः पूर्णो भवति'—इत्येके वर्णयन्ति। यदहर्यस्मिन्नहनि पूर्णः सकलकलोपचयादखण्डमण्डलश्चन्द्रमाः भवति, तामुपवसेत्—इत्यर्थः ॥ ११ ॥

कदा पुनश्चन्द्रमाः सकलकलोपचयादखण्डमण्डलो भवति? कः खलु ज्ञानोपायोऽस्यार्थस्य?—इत्यस्यामाकाङ्क्षायामुच्यते,—

पृथगेवैतस्य ज्ञानस्याध्यायो भवति, अधीयीत वा तद्विद्भ्यो वा पर्व्वागमयेत ॥ १२ ॥

पृथगन्य एव, एतस्य पूर्व्वविवक्षितस्य ज्ञानस्य, उपायभूतोऽध्यायः अधीयते—इत्यध्यायो ग्रन्थो भवति। तञ्च ग्रन्थम्, अधीयीत वा—स्वयं वा पठेत्, तं विवक्षितज्ञानोपायं ग्रन्थं ये विदन्ति,—त इमे तद्विदो ज्योतिःशास्त्रविद उच्यन्ते। तेभ्यः सकाशात् वा पर्व्व दर्शपौर्णमासाख्यम् आगमयेत सम्यग् जानीयात्। कस्मिन् काले चन्द्रमाः क्षीयते?—तदपि ज्ञानं ज्योतिःशास्त्रसापेक्षमेव,—इत्यभिप्रायः। तत्र क्षयकालः कात्यायनेनैव ज्योतिःशास्त्रादाकृष्य दर्शितः। पूर्णताकालः परमस्माभिर्वक्तुमवशिष्यते। पञ्चदश्यां पञ्चदशे मुहूर्त्ते किल चन्द्रमाः सकलकलोपचयादखण्डमण्डलो भवति,—इति ज्योतिःशास्त्रविदः कथयन्ति। श्लोकमपि उदाहरन्ति।

"पञ्चदश्यां पञ्चदशे मुहूर्त्ते चन्द्रमण्डलम्।
यथा भवति, तद्वत्त्वं सदा भव, नृपोत्तम!"।

इति। केनचित् ज्योतिःशास्त्रकुशलेन कश्चिद्राजा खल्वेवमुपश्लोकितः।

"राकामध्यगतश्चन्द्रः पूर्ण इत्यभिधीयते"।

इति च स्मरन्ति। कालवशात् पुनरेतस्यान्यथात्वं जातम्। युगपरिवृत्त्या किल कालभेदो गणितागतवस्तुषु भवति,—इति ज्योतिर्विदो वदन्ति। अतएव, ततः पराचीनेन ज्योतिःशास्त्रविदा भास्कराचार्य्येण सिद्धान्तशिरोमणावुक्तम्।

"कक्षाचतुर्थान्तरगेऽर्हि चन्द्रः
कर्णान्तरे तिर्य्यगिनोयतोऽब्जात्।
पादोनषट्काष्ठलवांतरेऽतो-
दलं नृदृश्यस्य दलस्य शुक्लम्"।

इति॥१२॥०॥

अथ यदहरुपवसथो भवति, तदहः पूर्व्वाह्ण एव प्रातराहुतिं हुत्वैतदग्नेः स्थण्डिलं गोमयेन समन्तं पर्य्युपलिम्पति॥१३॥

अथेति पूर्व्वप्रकृतार्थम्। पूर्व्वप्रकृते यस्मिन्नहनि उपवसथो भवति, तदहस्तस्मिन्नहनि प्रातराहुतिं हुत्वा, पूर्व्वाह्ण एव, अग्नेरेतदधिकृतं स्थण्डिलम्, एतस्य अधिकृतस्याग्नेर्व्वा स्थण्डिलम् अग्न्यगारम्, गोमयेन गोशकृता गोमयोदकेनेत्येतत्। समन्तं चतुरस्रं परि सर्व्वतोभावेनोपलिम्पति। एतदिति रसवतीनिरासार्थम्। नत् खल्वस्य द्वितीयमग्न्यागारम्। स्थण्डिलग्रहणं लौहादिभाण्डस्थे अग्नौ होमनिषेधार्थम्। पूर्व्वाह्ण एव उपलिम्पति,—इति सम्बन्धात् एवकाराच्च पूर्व्वाह्ण एव उपवसथं दर्शयति चतुर्दश्यामपि। अन्यथा, प्रागावर्त्तनादिति सिद्धत्वादनुवादापत्तेः। अतएव पूर्व्वाह्ण-एव प्रातराहुतिं हुत्वा,—इत्यपि न वर्ण्यते।

सिद्धायामपि प्रातराहुतौ, प्रातराहुतिं हुत्वा,—इति वचन-मौपवसथिके अहनि स्वयं होमकरणसूचनार्थम्। कथन्नाम? हुत्वा पर्य्युपलेप्तव्यम्—इति पर्य्युपलेपनहोमयोरेकः कर्त्ताऽवगम्यते।

किमर्थं पुनरत्र स्वयं होमकरणं नियम्यते? फलविशेषार्थमित्याह। अत्र हि स्वयं होमे कृते सर्व्वदैव स्वयं कृतो भवति। भवति चात्र ब्राह्मणम्। "एते ह वै रात्री सर्व्वा रात्रयः समवयन्ति; या आपूर्य्यमाणपक्षस्य रात्रयः ताः सर्व्वाः पौर्णमासीं समवयन्ति, या अपक्षीयमाणपक्षस्य रात्रयस्ताः सर्व्वा अमावस्यां समवयन्ति, स योऽहैवं विद्वान् स्वयमुपवसथं जुहोति, सर्व्वदा हैवास्य स्वयं कृतं भवति"—इति ॥ १३ ॥ ० ॥

अथेध्मानुपकल्पयते; खादिरान् वा, पालाशान् वा ॥ १४ ॥

अथानन्तरं, श्वोयागार्थमिध्मान्,—

"प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्त्तितम्।
एवंविधाः स्युरेवेह समिधः सर्व्वकर्म्मसु।
समिधोऽष्टादशेध्मस्य प्रवदन्ति मनीषिणः।
दर्शे च पौर्णमासे च क्रियास्वन्यासु विंशतिम्"।

इति कर्म्मप्रदीपोक्तलक्षणसंख्याकान्। बहुवचनमावृत्त्यपेक्षम्। उपकल्पयते, उप समीपे अग्नेरित्यर्थात्, कल्पयते आसादयतीत्यर्थः। इध्मान् विशिनष्टि,—खादिरान् खदिरमयान् वा, पालाशान् पलाशमयान् वा। खदिरपलाशौ प्रसिद्धौ। वाशब्दद्वयन्तु व्यवस्थितविकल्पार्थम्। ते खल्विमे इध्माः यत्र न कर्त्तव्याः, तदप्याह कर्म्मप्रदीपः।

"अङ्गहोमसमित्तन्त्रसोष्यन्त्याख्येषु कर्म्मसु।
येषाञ्चैतदुपर्य्युक्तं तेषु तत्सदृशेषु च।

अक्षभङ्गादिविपदि जलहोमादिकर्म्मणि ।
सोमाहुतिषु सर्व्वासु नैतेष्विध्मो विधीयते" ।

इति । अस्यायमर्थः । विवाहादिकर्माङ्गभूता ये होमास्ते अङ्ग होमाः,—इत्युच्यन्ते । येऽपि समिद्धविष्कास्तन्त्रहोमाः । द्विविधाः किल होमाः याज्ञिकसम्प्रदायप्रसिद्धाः,—चिप्रहोमास्तन्त्रहोमाश्च,—इति । तत्र ये चिप्रं हूयन्ते,—तदमे सायंप्रातर्होमादयोऽनङ्गविस्तार-युक्ताः चिप्रहोमा उच्यन्ते । ये तु परिसमूहनबर्हिराद्यङ्गविस्तारयुक्ताः, तदमे तन्त्रस्येतिकर्त्तव्यताया यथोक्तायाः संबन्धात् तन्त्रहोमा उच्यन्ते । यश्च आसन्नप्रसवायाः सुखप्रसवार्थं सोष्यन्तीहोमः । येषाञ्च सायं-प्रातर्वैश्वदेवहोमानाम, उपरि पश्चात्, एतत् इध्माख्यं द्रव्यम्, उक्तम् आम्नातम् । तेष्वेतेषु तत्सदृशेष्वन्येषु च चिप्रहोमेषु । यः किल ऊढायां यानेन पत्या नीयमानायामक्षभङ्गनद्धविमोक्षादिविपदि नैमित्तिको होमो विहितः । यश्च,—"पौर्णमास्यां रात्रावविदा-सिनि ह्रदे नाभिमात्रमवगाह्याक्षततण्डुलानृगन्तेष्वास्येन जुहुयात् स्वाहेत्युदके"—इति काम्योजलहोमः, आदिपदात् यश्च पदवर्त्म-होमः, याश्च सोमरक्षाहुतयः, तेषु एतेषु सर्वेषु होमेषु इध्मो न विधीयते,—इति ॥ १४ ॥ ० ॥

खादिरपालाशालाभे, विभीदकतिल्वकबाधकनीव-निम्बराजवृक्षशाल्मल्यरलुदधित्थकोविदारश्लेष्मातक-वर्ज्ॅं सर्वंवनस्पतीनाभिध्मोयथार्थॅं स्यात् ॥ १५ ॥

खादिरपालाशयोरलाभे असम्भवे, विभीदकादिवर्ज्जमन्येषां

सर्वेषां वनस्पतीनामश्वत्थप्रभृतीनाम्, इध्मो, यथार्थम्, अर्थं प्रयोजनम् अनतिक्रम्य, स्यात्—आसादनीयो भवेत्। तदलाभे,—इत्यनभिधाय, खादिरपालाशालाभे,—इति जात्या द्रव्यमुपलक्षयन्नाचार्य्यस्तयोरलाभ एव सर्ववनस्पतीनामुपादानं, न तु तत्प्रतिनिध्योरपि कदरपारिभद्रयोरभावे,—इति दर्शयति। विभीदकादयो वृक्षजातिविशेषाः ॥ १५ ॥ ० ॥

विशाखानि प्रति लूनाः कुशाबर्हिः ॥ १६ ॥

विश्लिष्टाः पृथग्भूताः शाखाः पत्राणि यस्मात् स्थानात्, तानि विशाखानि—कुशस्कन्धप्रदेशा उच्यन्ते। तानि प्रति लक्षीकृत्य लूनाश्छिन्नाः कुशाः, बर्हिः—बर्हिःस्तरणार्थमासादयितव्याः—इत्यर्थः। बर्हिःसंज्ञकाः,—इति वा व्याख्येयम्। तदत्र विधेयप्राधान्यविवक्षयैकवचनं द्रष्टव्यम्। 'बर्हिषः'—इति बहुवचनान्तमेव शूलपाणिः पठति। तदा व्यक्त एवार्थः ॥ १६ ॥ ० ॥

उपमूललूनाः पितृभ्यः ॥ १७ ॥

उपमूले मूलसमीपदेशे लूनाः कुशाः, पितृभ्यः पितृकर्मार्थमासादयितव्याः,—इति प्रसङ्गादिहोच्यते। ते खल्विमे पित्रर्थमासादयितव्याः कुशाः मूलसमीपेऽप्यधोभाग एव लवितव्याः नोर्द्ध्वभागे। कस्मात्?

"हरितायज्ञियादर्भाः पीतकाः पाकयज्ञिकाः।
समूलाः पितृदेवत्याः कल्माषा वैश्वदेविकाः"।

इति कर्म्मप्रदीपे समूललोपदेशात्। एके पुनरुपमूललूनानां समूलत्वासम्भवं मन्यमानाः, पिण्डास्तरणकुशानां च्छिन्नमूलत्व-विधायककात्यायनसूत्रं पश्यन्तोभ्रान्ताः सूत्रमिदं पिण्डास्तरण-कुशपरम्—इति वदन्ति। तदसङ्गतम्! मूलादधस्तात्लवनएव समूललोपमूललूनत्वयोः सम्भवात्।

"गोकर्णदीर्घाश्च कुशाः सकृच्छिन्नाः समूलकाः"।

इति तद्धृतवचनान्तरएव छिन्नानामपि कुशानां समूलत्व-दर्शनाच्च। कात्यायनस्तु न सम्मतसूत्रकारः,—इति तत्सूत्रोपदर्शन-मप्यनुचितम्॥ १७॥ ०॥

तेषामलाभे, शूकतृणशरशीर्य्यवल्वजमुतवनलसुण्ठ-वर्ज्जं सर्व्वतृणानि॥ १८॥

तेषां यथोपदिष्टानां कुशानामलाभे, शूकतृणादिवर्ज्जं सर्व्व-तृणानि, वर्हिस्तरणार्थमासादयितव्यानि, वर्हिःसंज्ञकानि वा भवन्ति। तैः कुशार्थः कर्त्तव्यः—इत्यर्थः। शूकतृणं, शूकयुतं तृणम्। शूकानि फलपुष्पमञ्जर्य्यः। शरादयः, तृणजातिविशेषाः। यत् पुन-र्वल्वजविधायकं पुराणवचनम्—

"कुशाः काशाः वल्वजाश्च तथाऽन्ये तीक्ष्णरोमशाः।
मौञ्जश्च शाद्वलश्चैव षड्दर्भाः परिकीर्त्तिताः"।

इति। तत् कौथुमादिव्यतिरिक्तविषयम्। 'तीक्ष्णरोमशाः,—इति वल्वजानां विशेषणं, तेनाच तद्व्यतिरिक्तवल्वजानां निषेधो-बोद्धव्यः'—इति नारायणोपाध्यायप्रभृतयः। तदसङ्गतम्। साधारण-

वचनव्यपाश्रयेण स्वशास्त्रसङ्कोचस्यान्याय्यत्वात्। 'तथाऽन्ये'—इति वल्वजानां भेदेनैव तीक्ष्णरोमशानामवगमाच्च। अन्यथा, 'तथा-ऽन्ये'—इति प्रमादपाठः स्यात्। षट्सङ्ख्याविरोधाच्च। षट्सङ्ख्या-कीर्त्तनं खल्वेवं विरुध्यते। तीक्ष्णरोमशत्वस्य वल्वजविशेषणत्वे पञ्चानामेवोपलम्भात्। न च—

"पितृतीर्थेन देयाः स्युर्दूर्वाः श्यामाकमेवच"।

इति तत्पूर्ववचनोपात्ताभ्यां दूर्वाश्यामाकाभ्यां सङ्ख्यापूरणम् इति वाच्यम्। सप्तसङ्ख्याऽऽपत्तेः। तस्मात्, ततो भेदेनैव इह षणा-मुपादानम्। षणामेव वा मध्ये दूर्वाश्यामाकयोरितरापेक्षया उपा-देयत्वार्थं तयोः पूर्व्वं प्रातिस्विकतया कीर्त्तनम्,—इति वर्णनीयम्। ते खल्वत्र शादलतयैव लभ्येते। यत्तु,—शादलम्—इति दूर्वादिषड्-विशेषणं पृथक्त्वे तु सप्तमापत्तेः,—इति वाचस्पतिमिश्रवर्णनम्। तदप्यनुचितमेव। विशेषणत्वाऽसङ्गतेः। शादलस्यैकवचनान्ततया कुशादीनाञ्च बहुवचनान्ततया निर्देशात् परस्परमनाकाङ्क्षत्व-प्रतीतेः। मौञ्जञ्च शादलञ्चेव—इति च मुञ्जादिभ्यो भेदेनैव शादलस्यावगतेः। पूर्व्ववचनोपात्तयोः दूर्वाश्यामाकयोरत्रान्तर्भाव-स्योक्तत्वाच्च। षड्दर्भाः—इति खल्वत्र परिभाष्यते। तेषामेव दूर्वाश्यामाकयोः विशेषविवक्षया पूर्वत्रोपादानम्—इत्यस्मदुक्तैव वर्णना। अतएव इह पठितानामपि कुशानाम्—

"गोकर्णदीर्घाश्च कुशाः सकृच्छिन्नाः समूलकाः"।

इति पूर्व्ववचनपूर्व्वार्द्धे परिकीर्त्तनं सङ्गच्छते। तस्मात् पूर्व्ववचने पूर्व्वार्द्धेन प्रथमकल्पानां कुशानाम्, उत्तरार्द्धेन च अनुकल्पान्तरा-

पेक्षया अभ्यर्हितयोः दूर्वाश्यामाकयोः पृथगुपादानम्—इत्या-
दरणीयम् ॥ १८ ॥ ० ॥

आज्यं स्थालीपाकीयान् व्रीहीन् वा यवान् वा चरुस्थालीं मेक्षणं स्रुवमनुगुप्ता अप इति ॥ १९ ॥

अत्र प्रतिपदम् उपकल्पयते—इति सम्बध्यते। कथम्? आज्यम् उपकल्पयते। स्थालीपाकीयान् स्थालीपाकसमर्थान्,—यावद्भिः स्थालीपाको निर्वहति तावतो व्रीहीन् वा यवान् वा, उपकल्पयते। चरुस्थालीम् उक्तलक्षणाम्, उपकल्पयते। मेक्षणम्—

"इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत्।
वृत्तञ्चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम्।
एषैव दर्व्वी यस्तत्र विशेषस्तमहं ब्रुवे।
दर्व्वी द्व्यङ्गुलपृथ्वग्रा तुरीयोनन्तु मेक्षणम्"।

इति कर्म्मप्रदीपोक्तलक्षणम्, उपकल्पयते। स्रुवमुपकल्पयते। स्रुवलक्षणमुक्तम्। अनुगुप्ता अप उपकल्पयते। इतिना, अन्यदप्ये-वम्भूतं दर्व्वीप्रभृतिकं सूचयति। उपकल्पनं चामीषामुदगग्राणा-मग्नेरुत्तरतः प्राक्सं प्राक्सं प्रयोजनानुसारेण करणीयम्। तथाच कर्म्मप्रदीपः।

"प्राक्सं प्राक्समुदगग्नेरुदगग्रं समीपतः।
तत्तथाऽऽसादयेद्द्रव्यं यद्यथा विनियुज्यते"।

इति। उपकल्पितानां चामीषां प्रत्येकोवीक्षणमभ्युक्षणञ्चाद्भिः कर्त्तव्यम्। तदाह गृह्यासंग्रहः।

"द्रव्याणामुपक्लृप्तानां होमीयानां यथाविधि।
प्रक्षिपन् वीक्षणं कुर्य्यादद्भिरभ्युक्षणं तथा"।

इति। तदिदं द्रव्यासादनं स्थण्डिलोपलेपनात् परत एव करणीयम्। कस्मात्? आचार्य्येण तथैव सूचितत्वात्। आचार्य्य-पुत्रोऽप्याह गृह्यासंग्रहे।

"भूमेः समूहनं कृत्वा गोमयेनोपलिप्य च।
द्रव्याण्युत्तरतः स्थाप्य वर्षीं कुर्य्यादुदङ्मुखीम्"।

इति। तदनेनोपलेपनात् परं द्रव्यासादनमभिधाय, "लक्षणं तत् प्रवक्ष्यामि"—इत्यादिना लक्षणमग्निस्थापनादिकञ्च परतो-ऽभिहितवान्। अथैवमुदगग्नेर्द्रव्यासादनं कर्म्मप्रदीपोक्तं विरुध्यते। नैष दोषः। भविष्यताऽप्यग्निनोदीच्याः संबन्धोपपत्तेः। तथाच "पुरो-डाशकपालेन तुषानुपवपति"—इत्यत्र यथा भविष्यता पुरोडाशेन कपालस्याभिसंबन्धो निर्णीतः, तथैवात्रापि भविष्यतैवाग्निना उत्त-रस्याः संबन्धो बोद्धव्यः। अग्निस्थापनात् पूर्व्वमेव द्रव्यासादनस्योप-देशादनन्यगतेर्वचनात्॥ १९॥

यानि चानुकल्पमुदाहरिष्यामः॥ २०॥

यानि तैलादीन्यनुकल्पं प्रत्युदाहरिष्यामः। चशब्दात् यानि च उलूखलादीन्युदाहरिष्यामः, तान्युपकल्पयते॥ २०॥ ०॥

अथेदानीमुपवसतो व्रतमुच्यते,—

न तदहः प्रस्तृज्येत॥ २१॥

तदहस्तस्मिन्नहनि, न प्रस्तृज्येत प्रकर्षेण त्यजेत् गृहम्—

इत्यर्थाद्गम्यते। सृज्यतिस्त्यजतिकर्म्मा। तदनेनास्य प्रवासो-
निषिध्यते। प्रसृज्येत—प्रकर्षेण दूरं गच्छेत्—इति वा व्याख्येयम्॥
२१॥०॥

दूरादपि गृहानभ्येयात्॥२२॥

अभ्येयात् आगच्छेत्। स्वयं होतुम्। तदहरिति वर्त्तते॥२२॥०॥

अबहुवादी स्यात्॥२३॥

बहु वदितुं शीलं यस्य,—सोऽयं बहुवादी, स न भवति,—
इत्यबहुवादी, स्यात्, तदहरिति वर्त्तत एव। तदच,—तात्को-
ल्यार्थकनिणिप्रत्ययात् तथैव बहुवादी न भवेत्, व्याख्यानादौ
स्वल्पदोषएव बहुकथनेऽपि,—इति दर्शयति॥२३॥०॥

अन्यतस्तु धनं क्रीणीयान्न विक्रीणीत॥२४॥

अन्यतः सकाशात् धनं द्रव्यं क्रीणीयात्, न तु स्वयं विक्री-
णीत अन्यस्मै। तदहरित्येव। तदच तुशब्दो भिन्नक्रमेण
योजनीयः, अनर्थको वा। "मितात्त्वरेष्वनर्थकम्"—इति वचनात्॥
२४॥०॥

सत्यं विवदिषेत्॥२५॥

ऋजुरचरार्थः। सत्यं वदेत्,—इति वक्तव्ये, सत्यं विवदिषेत्,
—इति सूचयन्नाचार्य्यो मनसाऽप्यसत्यं वक्तुं नेच्छेदित्युपदिशति॥
२५॥०॥

अथापराह्ण एवाप्लुत्यौपवसथिकं दम्पती भुञ्जी-

यातां; यदेनेयोः काम्यꣳस्यात्, सर्पिर्मिश्रꣳस्यात्; कुशलेन ॥ २६ ॥

अथ दर्भाद्याहरणानन्तरम्, आप्लुत्य, अपराह्ण एव दम्पती भुञ्जीयाताम्—इति भिन्नक्रमेण योजनीयम्। कुतः? पूर्वाह्ण एव स्नानस्याम्नानात्, तद्बाधे च कारणविशेषाभावात्। तथाच स्मरणम्।

"चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्।
तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले"।

इति। "अपराह्णे व्रतोपायनीयमश्नीयाताम्"—इति च तन्त्रान्तरे अपराह्ण एवानयोर्भोजनोपदेशात्। तस्माद् यथोक्तएवार्थः।

अह्नोऽपरो भागः, अपराह्णः। तत्रैव भुञ्जीयाताम्,—इत्येकभोजनमनयोर्नियम्यते,—द्विर्भोजनप्राप्तौ भोजनान्तरव्युदासार्थम्। किं भुञ्जीयाताम्? औपवसथिकम्। उपवसथेन संसृष्टं—तत्रापि यदविरुद्धम्। तत्रापि एनयोर्दम्पत्योर्यत् काम्यं कमनीयं रुचितम्—इत्येतत्। स्यात्, भवति। सर्पिर्मिश्रं घृतमिश्रञ्च स्यात्। यच्च कुशलेन सुखेन, परिणमति,—इति वाक्यशेषः। एतदुक्तं भवति। इत्थमौपवसथिकमन्नं भुञ्जीयातां, यत् भुक्तमनयोः सुखेन परिणमति, न मनागपि शरीरवैषम्यमुत्पादयति,—इति। एवं खल्वविघ्नेन श्वोयागः सम्पत्स्यते,—इत्यभिप्रायः। किम्पुनस्तदौपवसथिकम्? लवणादिवर्ज्जम्,—इति ब्रूमः। कुतः? गृह्यान्तरवचनात्। तथाचोक्तम्।

"लवणं मधु मांसञ्च चारं श्वो येन हूयते।
उपवासे न भुञ्जीत, नोरुरात्रौ च किञ्चन"।

इति। अत्र, उदराचौ किञ्चन न भुञ्जीत,—इत्युपादानात्, दिवा दैवादभोजने, रात्रेः प्रथमयामेऽपि भोजनं दर्शयति।

"दिवोदितानि कर्म्माणि स्वकाले न कृतानि चेत्।
शर्वर्य्याः प्रथमे यामे तानि कुर्य्यादतन्द्रितः"।

इति च स्मृत्यन्तरम् ॥ २६ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज-श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथम-प्रपाठकस्य पञ्चमी खण्डिका ॥ ० ॥

गोभिलीयगृह्यसूत्रे

प्रथमप्रपाठके षष्ठी खण्डिका।

अथेदानीमौपवसथिकभोजननियमदृढिम्ने ब्राह्मणमुदाहरति,—

मानतन्तव्यो होवाचाहुता वा एतस्य मानुष्याहुतिर्भवति; य औपवसथिकं नाश्नाति ॥ १ ॥

मानतन्तव्योनाम कश्चिदाचार्य्यः ह किल उवाच। किम् उवाच? तदुच्यते। न हुता अहुता फलरहिता,—इत्येतत्। वै—इत्यनर्थको निपातः। एतस्य, औपवसथिकम् अनश्नुवानस्य मानुष्याहुतिर्मनुष्योपकारार्था आहुतिः, सायंप्रातर्होमवैश्वदेवादिलक्षणा, भवति। हुताऽपि मानुष्यहुतिरहुता भवति— सर्व्वोऽपि होमो-निष्फलो भवतीत्यर्थः। मानुष्याहुतिः प्राणाग्निहोत्रलक्षणा वा। तथाच स्मर्य्यते।

"गृहस्थो ब्रह्मचारी च यस्त्वनश्नंस्तपश्चरेत्।
प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः"।

इति।

"अनड्वान् ब्रह्मचारी च आहिताग्निश्च ते त्रयः।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम्"।

इति चैवमादि। तथाचावश्यं होतव्या मानुष्याहुतिः प्राणाग्निहोत्रलक्षणा यस्य न हुता भवतीत्ययं प्रत्यवैतीत्यभिप्रायः। एतस्य,—

इति आचार्य्य एव विवृणोति। 'य औपवसथिकं नाश्नाति' न भुङ्क्ते ॥ १ ॥ ० ॥

किञ्च। स खल्वयम्,—

अनीश्वरो ह क्षोधुको भवत्यकाम्योजनानां पापवसीयसी हास्य प्रजा भवति॥ २॥

न ईश्वरोऽनीश्वरो ह किल भवति। सर्व्वैश्वर्य्यमस्य व्याहन्यते स्वस्य द्रव्येऽपि,—इत्यर्थः। क्षोधुकः क्षुद्युक्तः,—अतृप्तः सदा भवतीत्यर्थः। न काम्योऽकाम्योऽकमनीयोऽस्पृहणीयो जनानां लोकानां भवति। किञ्च। पापवसीयसी पापशीला, ह किल अस्य औपवसथिकमनश्नुवानस्य, प्रजा सन्ततिर्भवति। पापं प्रसिद्धं वसीयः पुण्यम्। तदुभयवत्यस्य प्रजा भवति,—इति वा वर्णनीयम् ॥२॥०॥

अनश्नुवानस्य दोषमभिधाय, अथेदानीं वैपरीत्येनाश्नुवानस्य गुणा अभिधीयन्ते,—

य औपवसथिकं भुङ्क्ते ईश्वरो ह भवत्यक्षोधुकः काम्यो जनानां वसीयसी हास्य प्रजा भवति ॥ ३ ॥

वसीयसी कल्याणी पुण्यवतीत्यनर्थान्तरम्। सुस्थिरा,—इति भट्टभाष्यम्। अपापवसीयसी,—इति पाठे,—पापवसीयसी व्याख्याता, सा न भवतीत्यपापवसीयसी। इतभाष्यमन्यत् ॥ ३ ॥ ० ॥

यस्मादौपवसथिकमनश्नुवानस्यैते दोषाः, अश्नुवानस्य चैते गुणा भवन्ति,—

तस्मात् यत् कामयेतौपवसथिकं भुञ्जीयाताम्॥ ४॥

यदौपवसथिकं कामयेत गृहपतिः, व्यत्ययाद्वा कामयेयातां दम्पती, तद्भुञ्जीयाताम्॥ ४॥ ०॥

अथेदानीमन्यदपि व्रतमभिधीयते,—

अध एवैताᳫं रात्रिᳫं शयीयाताम्॥ ५॥

अधो भूमावेव न पल्यङ्कादौ। स्वस्तरस्तु न निषिध्यते। एतां उपवसथदिवसीयां रात्रिं शयीयातां दम्पती॥ ५॥

तौ खलु जाग्रन्मिश्रावेवैताᳫं रात्रिं विहरेयातामितिहासमिश्रेण वा केनचिद्वा॥ ६॥

तौ दम्पती। खल्वित्यनर्थको निपातः। जाग्रन्मिश्रौ जाग्रदवस्थयैव स्वापं मिश्रयन्तौ, एतामौपवसथिकां रात्रिं विहरेयातां नयेयाताम्—इत्यर्थः। कथं जाग्रन्मिश्रौ भवेताम्? तदुच्यते। इतिहासमिश्रेण। भावप्रधानोऽयं निर्देशः। इत्थम्भावे तृतीया। इतिहासमिश्रतया—तदालोचनयेत्येतत्। इतिहासमिश्रेण केनचित् सद्व्यवहारेण वा,—इति वा व्याख्येयम्। अन्येनापि केनचित् पुण्यकथादिना वा,—इत्ययमभ्युपायो जाग्रन्मिश्रत्वे॥ ६॥

जुगुप्सेयातान्त्वेवाव्रत्येभ्यः कर्म्मभ्यः॥ ७॥

जुगुप्सेयातां निन्देताम्। अव्रत्येभ्यः, व्रते साधु व्रत्यं, तन्न भवतीत्यव्रत्यं,—व्रतविरुद्धमुच्यते। तेभ्यः कर्म्मभ्यः ग्राम्यधर्म्मादिभ्यः,—तानि कर्म्माणि त्यक्तुम्—इत्यर्थः। गोप्तुम् इच्छा वा जुगुप्सोच्यते। तदा

खल्वव्रत्येभ्यः आत्मानं रचितुम् इच्छेताम्—इति व्यक्तैव वचनव्यक्तिः। तुशब्दः सम्भवकालं व्यवच्छिनत्ति। एवशब्दश्च, प्रकृतं नियमयन् व्यतिरेके व्रतभङ्गमवगमयति। अतएव स्मर्य्यते,—

"स्मरणं कीर्त्तनं केलिः प्रेचणं गुह्यभाषणम्।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेवच।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
अनुरागात् कृतश्चैव ब्रह्मचर्य्यविरोधकम्।
विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलचणम्"।

इति।

"उपवासे तथा यौनं हन्ति सप्त कुलानि वै।
स्त्रीणां सम्प्रेचणात् स्पर्शात्ताभिः कङ्कथनादपि।
ब्रह्मचर्य्यं विपद्येत, न दारेष्वृतुसङ्गमात्"।

इति चैवमादि। अत्र च, सम्प्रेचणात्, सङ्कथनात्,—इत्यत्र सरागत्वं संशब्दस्यार्थः, माहचर्य्यात् स्पर्शेऽपि तथा,—इति शूलपाण्युपाध्यायाः। तुशब्दश्चशब्दार्थो वा,—गात्राभ्यङ्गादीनि समुच्चिनोति। कस्मात्?

"गात्राभ्यङ्गं शिरोऽभ्यङ्गं ताम्बूलञ्चानुलेपनम्।
व्रतस्थो वर्ज्जयेत् सर्व्वं यच्चान्यद्बलरागकृत्"।

इत्येवमादिस्मरणात् ॥ ७ ॥ ० ॥

न प्रवसन्नुपवसेदित्याहुः ॥ ८ ॥

प्रवसन् प्रवासमनुतिष्ठन् न उपवसेत्,—इत्याहुरेके आचार्य्याः।

एतस्मादेवावगम्यते,—प्रवसन्नप्युपवसेत्,—इत्यन्ये आचार्य्या मन्यन्ते—इति ॥ ८ ॥ ० ॥

यदा तु खलु प्रवसन् गृहपतिर्नोपवसति, तदाऽपि,—

पत्न्या व्रतं भवतीति ॥ ९ ॥

पत्न्या व्रतमौपवसथिकं भवति,—इति शाकुराचार्य्याः ॥ ९ ॥

तदेवं प्रवसता नोपवस्तव्यम्,—इत्येकेषामाचार्य्याणां मतं, प्रवसताऽप्युपवस्तव्यम्—इति चापरेषाम्। एतस्मिंश्च विकल्पे सति,—

यथा कामयेत, तथा कुर्य्यात् ॥ १० ॥

क्षतभाष्यमेतत् ॥ १० ॥ ० ॥

एवमेवाहिताग्नेरप्युपवसथो भवति ॥ ११ ॥

आहिताग्निः पञ्चाग्निरुच्यते। स च,—

"पवनः पावनस्त्रेता यस्य पञ्चाग्नयो गृहे"।

इति स्मृत्युक्तः। पवन आवसथ्योऽग्निः, पावनः सभ्योऽग्निः यः शीतापनोदनाद्यर्थं बहुषु देशेष्वपि विधीयते,—इति कुल्लूकभट्टः। त्रेता दक्षिणाग्निगार्हपत्याहवनीयलक्षणमग्नित्रयम्। स्पष्टमन्यत्। औपासनाग्निमधिकृत्य उपवसथस्य सूचितत्वादाहिताग्नेरेष न प्राप्नोतीत्येवमतिदिश्यते ॥ ११ ॥ ० ॥

यथाम्नायो विदध्यात् ॥ १२ ॥

आम्नायते अभ्यस्यते,—इत्याम्नायो वेद उच्यते। स खल्वाम्नायः

शाखान्तरीयोऽपि यदन्यद्विदध्यात्, तदपि कर्त्तव्यम्,—इति वाक्यशेषः। अध्वर्य्युप्रत्ययत्वादग्निहोत्रस्य तदाम्नायविहितं कुर्य्यादित्यभिप्रायः। चः समुच्चये, पूर्व्वोक्तमेव समुच्चिनोति ॥ १२ ॥ ० ॥

अथ पूर्व्वाह्ण एव प्रातराहुतिꣳ हुत्वाऽग्रेणाग्निं परिक्रम्य दक्षिणतोऽग्नेः प्रागग्रान् दर्भानास्तीर्य्य ॥ १३ ॥

अथापरदिने प्रातराहुतिं हुत्वा। सिद्धाया अपि प्रातराहुतेः पुनरभिधानं क्रमार्थम्। कथन्नाम? प्रातराहुतिं हुत्वा समिदाधानान्तं विधाय वक्ष्यमाणं कर्म्म कुर्य्यात्। कुतः?

"आधाय समिधञ्चैव ब्रह्माणमुपवेशयेत्"।

इति कर्म्मप्रदीपदर्शनात्। "अग्निमुपसमाधाय दक्षिणतो-ब्रह्मासनमास्तीर्य्य"—इति च गृह्यान्तरम्। नैतदेवम्। कस्मात्? स्वशास्त्रविरोधात्। तथाच गृह्यासंग्रहः।

"लेखनाभ्युक्षणे कृत्वा निहितेऽग्नौ समिद्दहेत्।
ततो भूमिजपं कृत्वा कुर्य्यात् परिसमूहनम्।
ब्रह्माणमुपसंकल्प्य चरुश्रपणमारभेत्"।

इति। कर्म्मप्रदीपोक्तस्तु क्रम आधानविषयः। कथं ज्ञायते? तत्रैव तदभिधानात्। गृह्यान्तरमप्यन्येषामेव न त्वस्माकम। स्वशास्त्रविरोधापत्तेः। कात्यायनादिभिर्हि तत् सूचितम्। ते किल काण्वादिशाखिनां सूत्रकाराः। तथाच भूमिजपं तूष्णीं परिसमूहनञ्च कृत्वा वक्ष्यमाणं कुर्य्यादित्ययमत्र कर्म्मक्रमः। अधिकमग्रे वक्ष्यामः। तदयमर्थः। प्रातराहुतिं हुत्वा पूर्व्वाह्ण एव—प्रतिपद्भावेऽपि,—

इत्यवोचाम। अग्रेण पूर्व्वया दिशा, अग्निं परिक्रम्य अग्निं प्रदक्षिणीकृत्य गत्वा, दक्षिणतो दक्षिणस्यां दिश्यग्नेः। सार्व्व-विभक्तिकस्तसिल्।

"उदग्धारामविच्छिन्नामाज्यमारभ्य दक्षिणाम्।
दद्याद्ब्रह्मासनस्थाने सर्व्वकर्म्मसु नित्यशः"।

इति गृह्यासंग्रहवचनात्, अविच्छिन्नां वारिधारां दत्वा, प्रागग्रान् दर्भान् आस्तीर्य्य, ब्रह्मोपवेशनार्थम्। निरस्यति,—इति वक्ष्यमाणेन सम्बन्धः। तच्च निरसनं ब्रह्मणः कर्म,—इति वक्ष्यामः। ततश्च, एतदन्तं कर्म्म याजमानिकम्। कथन्तर्हि आस्तरणनिरसनयोः सम्बन्धः? समानकर्त्तृकत्वाभावात्। कुतः पुनः समानकर्त्तृकत्वमन्तरेण न सम्बन्ध उपपद्यते? क्त्वाप्रत्ययबलात्,—इति चेत्;—इति चेत् भवान् पश्यति क्त्वाप्रत्ययबलादेतदवगम्यते; समानकर्त्तृकया कयाचित् क्रियया समस्य सम्बन्धेन भवितव्यम्,—इति। अत्रोच्यते। नान्यथोपपत्तेः। नैष दोषः। कस्मात्? अन्यथाऽप्युपपत्तेः क्त्वाप्रत्ययस्य। कथम? पूर्व्वकालतामात्रार्थतया। तच्चाप्येष दृश्यते,—इति वक्ष्यामः। 'अन्यचेष्टेत्'—इति वा व्यवहिततरेण वक्ष्यमाणेन सम्बन्धो वर्णनीयः। एवं किल भट्टनारायणादयो व्याचचक्षिरे। श्लोकश्चात्र भवति।

"येन यस्याभिसम्बन्धो दूरस्थस्यापि तस्य सः।
अर्थतो ह्यसमर्थानामानन्तर्य्यमकारणम्"।

इति। अतिक्रान्तकंवन्ध्यश्च गोभिले ग्रहीतव्य इति चोक्तं गोभिलपुत्रेण। तच्च पुरस्तादुपदर्शितम्॥ १३॥ ०॥

अथेदानीं ब्राह्मं कर्म्म अभिधीयते,—

तेषां पुरस्तात् प्रत्यङ्मुखस्तिष्ठन् सव्यस्य पाणेरङ्गुष्ठेनोपकनिष्ठिकया चाङ्गुल्या ब्रह्माऽऽसनात् तृणमभिसंगृह्य दक्षिणापरमष्टमं देशं निरस्यति,—निरस्तः परावसुरिति ॥ १४ ॥

तेषां यजमानास्तृतानां दर्भाणां, पुरस्तात् पूर्व्वस्यां दिशि, प्रत्यङ्मुखः पश्चिमाभिमुखः, तिष्ठन् ऊर्द्धः सन्, सव्यस्य वामस्य, पाणेः करस्य, अङ्गुष्ठेन, उपकनिष्ठिकया—कनिष्ठसमीपदेशस्था अङ्गुली उपकनिष्ठा अनामिका च उच्यते, उपकनिष्ठैव उपकनिष्ठिका, तया च अङ्गुल्या, ब्रह्मा ब्रह्मतया परिकल्पितः इदानीमपि कयाचिद्विवक्षया ब्रह्मा—इत्युच्यते। आसनात्—तदर्थकल्पितात् यजमानास्तृतात् कुशमयात्, तृणं दर्भरूपम्, अभि संगृह्य गृहीत्वा, दक्षिणापरं—दक्षिणस्याश्च अपरस्याश्च दिशोरन्तरालम्, अतएव,—अष्टमम् उभयदिगष्टमांशं, देशं दिग्विभागं; नैऋतकोणम्,—इत्येतत्। तं प्रति, निरस्यति प्रक्षिपति;—निरस्तः परावसुः,—इति, अनेन मन्त्रेण।

तदिदं निरसनं ब्राह्मं कर्म्म—इति विज्ञायते। कुतः? ब्रह्मा,—इति कर्तृनिर्देशात्। कात्यायनसूत्रणाच्च। स खल्वाचार्य्योऽन्यत्रैव याजमानं कर्म्म सूत्रयित्वा, "सर्व्वत्र ब्रह्मा दक्षिणत उदङ्मुखः कुर्य्यादृते भ्योऽन्यत्"—इति ब्राह्मं कर्म्म वक्तुमुपक्रममाणः तत्रैव प्रकरणे,—"तद्दक्षिणतो निरस्तः परावसुरिति दक्षिणा तृणं निरस्येत्, आवसोः सदने सीदामीत्युपविशेत्"—इति सूत्रयाञ्चकार। तदनेन,

निरसनं ब्राह्मं कर्म्म,—इत्यवगच्छामः। अतएव तेनैव "दक्षिणार्द्धं तु सदसः पूर्व्वमुपवेशनं प्रस्तोतुः प्रत्युपवेशनं ब्रह्मोपवेशनेन; निरस्तः परावसुरिति दक्षिणा तृणं निरस्येत्, आवसोः सदने सीदामीत्युपविशेत्"--इति ब्राह्मं कर्म्म निरसनमुपवेशनञ्च अन्यचातिदिष्टम्। एतस्माच्च कारणात् नात्र आसनेन ब्रह्मणः सम्बन्धः, अपितु निरसनेनैव,--इत्यवगन्तव्यम्।

ये तु ब्रुवते,—'नात्र ब्रह्मेत्यासनेन सम्बन्धः, उपवेशनात् पूर्वं तत्सम्बन्धाभावात्'—इति। तान् प्रति वक्तव्यम्। तदर्थपरिकल्पितत्वादासनस्य अस्त्यत्र कोऽपि सम्बन्धः—इत्यकामेनापि वाच्यम्। लोकेऽपि देवाद्यर्थपरिकल्पितासनादौ देवासनादिव्यपदेशाः शतशो दृश्यन्ते। "लोके येष्वर्थेषु प्रसिद्धानि पदानि, तानि सति सम्भवे तदर्थान्येव सूत्रेषु"—इति खल्वनुक्रमणिका शास्त्रतात्पर्य्यविदाम्। "पुरोडाशकपालेन तुषानुपवपति"—इति च भविष्यता पुरोडाशेन कपालस्य व्यपदेशो दृश्यते। तस्मात्,—यथा, "प्रैतु होतुश्चमसः"—इत्यत्र, होता यत्र चमति चमिष्यति अचमीद्वा स होतुश्चमसः,—इति चमसिनां शेषभक्षाधिकरणे निर्णीतं, तथा अत्रापि ब्रह्मा यत्र आस्ते आसिष्यते आसिष्ट वा, तद्ब्रह्मासनम्,—इति शक्यते वक्तुम्। अनयैव दिशा,—ब्रह्मासनमास्तीर्य्य,—इति, दद्याद्ब्रह्मासनस्थाने,—इति, ब्रह्मासने निधाय,—इति चैवमादयः शतशः व्यपदेशाः समुपपद्यन्ते। एतावन्मात्रे पुनरत्र कारणेऽभ्युपगम्यमाने ब्रह्मासनात्—इति यथाश्रुत एवार्थो वर्णनीयः स्यात्। ब्रह्मासनयोरिदानीमपि सम्बन्धस्य अस्माभिरुपपादितत्वात्।

श्रुत्या खल्वासनसम्बन्धो ब्रह्मणोऽत्रावगम्यते, वाक्येन च व्यवहित-योजनया निरसनसम्बन्धश्चिकीर्षितः।

कथन्तर्हि प्रकृतेऽपि निरसनेन सम्बन्धः ? ननु श्रुत्या आसन-सम्बन्ध एव स्यात्। स्यादेतदेवं, यदि शास्त्रान्तरमस्यां वर्णनायां कारणं न स्यात्। अस्ति चात्र स्पष्टं शास्त्रान्तरम्। आसन-सम्बन्धेऽपि ब्रह्मणो न ज्ञायते,—को निरस्यति ?—इति। अवश्यमत्र कर्त्ता कश्चित् कल्पयितव्यः। स तावदुपस्थितत्वात् बलवच्छास्त्रान्तरबलाच्च ब्रह्मैव कल्पयितुमुचितः। न खल्वत्र यजमानः कर्त्ता साक्षादुपदिश्यते, सन्निधीयते वा। क्त्वाश्रुतेः पूर्व्वापरीभावमात्रेणापि चरितार्थत्वात्। स खल्वत्र चिकल्पयिषितः। न तु शक्यते कल्पयितुम्। ग्रन्थान्तरविरोधात्। तदपि खल्वस्म-च्छास्त्रमेव, किमिति यदृच्छाकल्पनया उपरुध्येत !। उभयसम्ब-न्धस्य च वक्तुमावश्यकत्वे, निरसनसम्बन्ध एव तावदुचितो वर्णयि-तुम्। गुणप्रधानभावेनोभाभ्यामन्वये च प्रधानानुरूपैव विभक्ति-रभियुक्तैरनुमन्यते। तस्मादस्मदुक्तमेव समाधानमादरणीयम् ॥ १४ ॥ ० ॥

अप उपस्पृश्याथ ब्रह्माऽऽसन उपविशत्यावसोः सदने सीदामीति ॥ १५ ॥

अप उदकम्, उपस्पृश्याचम्य स्पृष्ट्वा वा, अथानन्तरं ब्रह्मा आसने यथोक्ते उपविशति,—आवसोः सदने सीदामीत्यनेन मन्त्रेण। तदत्र सूत्रमनवद्यमेव,—'आवसोः सदने सीद'—इति यजमानो ब्रूयात्। एतदन्तमेव कर्म्म याजमानिकम्। सीदामि,—

इत्यभिधाय ब्रह्मा उपविशेत्'—इति भवदेवभट्टकल्पना समुन्नमिता ॥ १५ ॥ ० ॥

स खल्वयम्,

अग्निमभिमुखो वाग्यतः प्राञ्जलिरास्त आकर्म्मणः पर्य्यवसानात् ॥ १६ ॥

अग्निम् अभिमुखः आभिमुख्येनाग्निमुखः,—उदङ्मुख इत्यर्थः। वाग्यतो नियमितवचनः प्राञ्जलिः प्रकृष्टोऽञ्जलिर्यस्य, सोऽयं प्राञ्जलिः कृताञ्जलिपुटः सन् आस्ते। कियन्तं कालमास्ते? आ कर्म्मणः पर्य्यवसानात्। परि सर्व्वतोभावेन कर्म्मणः अवसानं समाप्तिः कर्म्मणः पर्य्यवसानम्, तत्पर्य्यन्तम्। किमिदं कर्म? यत् क्रियते यजमानेन, तदिदं यागादि कर्म। कुत्र पुनरस्य सर्व्वतोभावेन अवसानम्? दक्षिणादाने—इति ब्रूमः। कुतः? तत्र तद्विधानात्। कर्म्मान्ते खल्वेषा विधीयते। अदत्तायां खल्वस्यां कृतमपि कर्म न परिसमाप्यते, निष्फलत्वात्। अतएव,—'हतो यज्ञस्त्वदक्षिणः'—इति स्मरन्ति। आह, दक्षिणायाः अनेन अङ्गत्वम् केवलमुच्यते, तदभावे च कर्मणो वैगुण्यात् निन्देयम्? तर्हि व्यक्तमस्याम् अदत्तायां कर्म न परिसमाप्यते, अपि तु दत्तायामेव,—इति यथोक्त एवार्थः। अतएव,—आ वसोः सौदामि,—इति ब्रह्मोपवेशनमन्त्रलिङ्गमनुगृह्यते। भट्टनारायणप्रभृतयस्तु वर्णयन्ति—'कर्म्म, कृताकृतप्रत्यवेक्षणम्'—इति ॥ १६ ॥ ० ॥

स खलु वाग्यतोऽपि,—

भाषेत यज्ञसंसिद्धिम् ॥ १७ ॥

भाषेत वदेत्, यज्ञसंसिद्धिं यज्ञस्य सम्यक् सिद्ध्यनुकूलां वाचम्;—यदा खल्वन्यथैव होत्रा कर्म क्रियते, तदा यज्ञस्य सम्यक् सिद्ध्यर्थम्,—एतदेवं कुरु, कृत्वा चेतदेतत् कुरु,—इत्येवमादिलक्षणाम्। एतदन्यच्च अस्य वाग्यतत्वम्—इत्यर्थः ॥ १७ ॥

तत्रापि—

नायज्ञियां वाचं वदेत् ॥ १८ ॥

अयज्ञियां यज्ञानर्हामसंस्कृतां वाचं न वदेत्। भवति चात्र ब्राह्मणम्। "साधुभिर्भाषितव्यं, नापभ्रंसितवै न म्लेच्छितवै"—इति ॥ १८ ॥ ० ॥

यद्ययज्ञियां वाचं वदेत्; वैष्णवीमृचं यजुर्वा जपेत् ॥ १९ ॥

यदि कुतश्चित् कारणात् अयज्ञियामसंस्कृतां वाचं वदेत्,—तर्हि वैष्णवीं विष्णुदेवताकाम् ऋचम्—इदं विष्णुर्विचक्रमे,—इत्यादिलक्षणां जपेत्। मुख्यश्चायं पक्षः, इह वाग्शब्दाश्रवणात्। तदसम्भवे, यजुर्वा जपेत्। यजुश्च, विष्णोः शिरोऽसि—इत्यादिलक्षणम्,—इति भट्टनारायणोपाध्यायाः। विष्णोरराटमसि—इत्यादिलक्षणम्,—इति रघुनन्दनादयः। तदत्र भगवन्तो भूमिदेवाः प्रमाणम् ॥ १९ ॥ ० ॥

अपिवा नमोविष्णवे इति ब्रूयात् ॥ २० ॥

अपिवा, ऋग्यजुषोर्जपासम्भवे, नमो विष्णवे इत्येवं ब्रूयात् ॥ २० ॥

यद्युवा उभयं चिकीर्षेद्धौत्रञ्चैव ब्रह्मत्वञ्चैवैतेनैव कल्पेन छत्रं वोत्तरासङ्गं वोदकमण्डलुं दर्भवटुं वा ब्रह्मासने निधाय, तेनैव प्रत्यावज्याथान्यचेष्टेत् ॥ २१ ॥

यद्यसति ब्राह्मणान्तरे। उ वै,—इत्यनर्थकौ निपातौ। एवमेके। यद्युवा,—इति निपातसमुदायो यद्यर्थे। एवमपरे। उभयं चिकीर्षेत् कर्त्तुमिच्छेत्। तदनेन लिङ्गेन विधिरनुमीयते:— असम्भवे उभयमपि स्वयं कुर्य्यात्,—इति। तदिदमभिहित-मस्माभिः,—'अथ यदि दधि पयो यवागूं वा'—इत्येवमादिके सूत्रे। किं पुनस्तदुभयम्? तदुच्यते। हौत्रं होतुः कर्म चैव, ब्रह्मत्वं ब्रह्मणः कर्म चैव। तर्हि, एतेनैव कल्पेन पूर्व्वोक्तयैव आवृता, अयेणाग्निम्—इत्येवमादिकया। एवकारकरणात्,—आवसोः सदने सीदामि,—इति मन्त्रोऽपि एवमेवाविकृतः पठनीयः,—इत्यवगम्यते। छायया त्रायते—इति छत्रम् आतपत्रं वा, उत्तरासङ्गमुत्तरीयं वा, उदक-मण्डलुम् उदकपूरितं कमण्डलुं वा, दर्भवटुं कुशब्राह्मणं वा,—

स खल्वयं दर्भवटुर्यथा निर्म्मातव्यः, तदाह गृह्यासंग्रहपरिशिष्टम्।

"ऊर्द्धकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः"।

इति। अत्र च,—

"द्विरावृत्त्याथ मध्ये वै अर्द्धावृत्त्याऽन्तदेशतः।
ग्रन्थिः प्रदक्षिणावर्त्तः स ब्रह्मग्रन्थिसंज्ञकः"।

इति पुराणवाक्यमप्यनुसन्धेयम्। दर्भपरिमाणन्त्वत्र नास्ति,—इत्याह कर्मप्रदीपः।

"यज्ञवास्तुनि मुष्ट्यां च स्तम्बे दर्भवटौ तथा ।
दर्भसङ्ख्या न विहिता विष्टरास्तरणेष्वपि" ।

इति । एवञ्च,—

"पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन च विष्टरः" ।

इति वचनं यदि समूलं, तदा सम्भवासम्भवाभ्यां नियमानियमयोर्व्यवस्थितो विकल्पः,—इति परिशिष्टप्रकाशः । शाखान्तरीयम्,—इति तत्त्वकारः । वस्तुतस्तु पञ्चाशद्भिर्वा अनियतसंख्यकैर्वा कुशैर्ब्रह्मा भवेदिति विकल्प आदरणीयः । इयोरेव स्वशास्त्रे उपदिष्टत्वात् । कात्यायनः किन्तु कर्मप्रदीपे दर्भवटौ दर्भसंख्या न विहितेत्याह । आचार्य्यपुत्रस्तु गृह्यासंग्रहे,

"कतिभिस्तु भवेद्ब्रह्मा कतिभिर्विष्टरः स्मृतः ?
पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन तु विष्टरः" ।

इति पञ्चाशद्भिः कुशैर्ब्रह्मा भवतीत्यभिहितवान् । एवञ्चाचार्य्यपुत्रस्यैतद्वचनमित्यविदुषस्तत्त्वकारस्य शाखान्तरीयत्वकल्पनं कल्पनमेव ।

"पञ्चभिर्नवभिर्वापि साग्रैर्दक्षिणवेष्टितम् ।
ॐकारेणैव मन्त्रेण द्विजः कुर्य्यात् कुशद्विजम्" ।

इति संख्यान्तरं कौथुमादिव्यतिरिक्तविषयम् ।

तमिमं दर्भवटुं वा, ब्रह्मासने निधाय स्थापयित्वा, तेनैव पथा, येन पूर्व्वं परिक्रमणं कृतं तेनैव पथा अप्रदक्षिणेनाग्निं प्रत्याक्रम्य आगत्य पूर्व्वस्थानम्—इत्येतत् । अथानन्तरम्, अन्यत् वक्ष्यमाणं चेष्टेत् चेष्टेत, कुर्य्यादित्यर्थः ।

अथाऽऽह:— अथेतिविशिष्टमानन्तर्य्यं द्योतयति। किन्तत्? यथोपयोगमुत्तरतोऽग्नेर्द्रव्याणामधोमुखानामुदगग्राणां पूर्व्वपूर्व्वक्रमेण आसादनं, वीक्षणं, प्रोक्षणञ्च अद्भिः कृत्वा। तदेतत्। कुतः? शास्त्रान्तरदर्शनात्। तथाच कर्म्मप्रदीपः।

"प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः।

तत्तथाऽऽसादयेद् द्रव्यं यद् यथा विनियुज्यते"।

इति। सांख्यायनगृह्यम्। "उत्तरतोऽग्नेर्यथोपयोगमवाञ्चि पात्राण्यासादयेत्"—इति।

"द्रव्याणामुपक्लृप्तानां होमीयानां यथाक्रमम्।

अभिषिञ्चन् वीक्षणं कुर्य्यादद्भिरभ्युक्षणन्तथा"।

इति च स्मृत्यन्तरम्। इदञ्च द्रव्यासादनाद्यनन्तरं भूमिजपादिकं चर्व्वनङ्गे द्रष्टव्यम्। चर्व्वङ्गे तु कर्म्मणि द्रव्यासादनाद्यनन्तरमेव चरुश्रपणमाचार्य्यः सूचयिष्यति,—'अथोलूखलमुषले'—इत्यादि। ततश्च चर्व्वङ्गके कर्म्मणि, द्रव्यासादनाद्यनन्तरं चरुश्रपणं अनन्तरं भूमिजपादिकं कर्त्तव्यम्। अतएव, कर्म्मप्रदीपकृद्भिः, 'तिर्य्यगूर्द्ध-समिन्मात्रा'—इत्यादिना, 'शूर्पं वैणवमेवच'—इत्येवमन्तेन ग्रन्थेन चर्व्वङ्गमभिधाय,—'दक्षिणं वामतो बाह्यम्'—इत्यादिना भूमिजप-परिसमूहनहस्तविन्यासोऽभिहितः। तस्माद् ब्रह्मस्थापनद्रव्यासाद-नादिचरुश्रपणेभ्यः परं भूमिजपपरिसमूहनादिकम्—इति भवदेव-भट्टनारायणरघुनन्दनप्रभृतयः। भट्टभाष्ये तु,—भूमिजपं, ऋचेन परिसमूहनञ्च कृत्वा ब्रह्मस्थापनं कर्त्तव्यम्,—इत्युक्तम्। सरलापरि-शिष्टप्रकाशकाराभ्यान्तु,—भूमिजपानन्तरं चरुश्रपणम्—उक्तम्।

इदन्त्विह वक्तव्यम्। कर्म्मप्रदीपकृता पदार्थानामुपन्यासमात्रं कृतं न तु क्रमोऽपि तेषामभिहितः। तत्र चर्व्वङ्गमभिधाय भूमिजपप्रकाराभिधानात् खल्वानुमानिकः क्रमः परिचिकल्पयिषितः। स चायमाचार्य्यपुत्रोपदिष्टक्रमविरोधाद्भवितुं नार्हति। तथाच "लेखनाभ्युक्षणे कृत्वा"—इत्यादि पुरस्तादुदाहृतम्। तस्मादाचार्य्यपुत्रवचनात् भूमिजपं त्र्यृचेन परिसमूहनञ्च कृत्वा ब्रह्मस्थापनं कर्त्तव्यं ततश्चरुश्रपणमित्यादरणीयम्। आचार्य्योऽपि ब्रह्मस्थापनात् परं चरुश्रपणं सूचयिष्यति। अन्यच्चेष्टेदित्यनर्थकं तर्हि, ननु "अथोलुखलमुषले"—इति सूचयिष्यत्येव। नानर्थकम्। कथं कृत्वा? सामान्यविशेषभावोपपत्तेः। 'अन्यच्चेष्टेत्' इति सामान्यतः सूचयित्वा अथोलूखलमुषले,—इति विशेषतः सूचणमुपपद्यते। सामान्यप्राप्तेस्तु विशेषकथनमपुनरुक्तमेव। शास्त्रे चास्मिन् पुनरुक्तिरनुमतैवाचार्य्यस्येति च निवेदितमधस्तादेव। आदरार्थत्वाच्च। आदरार्थमपि पुनरुपादानं शास्त्रे बहुलमुपलभ्यते। यत्र चरुर्नास्ति, तत्र, अन्यदाज्यसंस्कारादिकमित्यभिप्रायेण वा वचनमेतदुपपादनीयम्। द्रव्यासादनन्तु आस्तां तावदिदानीं, यावदग्निस्थापनादपि पूर्व्वं करणीयमिति पुरस्तादेव व्यवस्थापितम्। सांख्यायनसूत्रन्तु नास्माकमित्यनुदाहरणम्॥ २१॥ ०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथमप्रपाठकस्य षष्ठी खण्डिका॥ ०॥

प्रथमप्रपाठके सप्तमी खण्डिका।

अथोलूखलमुषले प्रक्षाल्य सूर्पञ्च पश्चादग्नेः प्रागग्रान् दर्भानास्तीर्य्योपसादयति ॥ १ ॥

अथेति आनन्तर्य्यार्थे पूर्व्वप्रकृतार्थे वा। पूर्व्वमासादिते उलूखलमुषले सूर्पञ्च—इत्येतत् त्रयम्—

"मुषलोलूखले वार्क्षे स्वायते सुदृढ़े तथा।
इच्छाप्रमाणे भवतः सूर्पं वैणवमेवच"।

इति कर्म्मप्रदीपोक्तलक्षणम्, प्रक्षाल्य, पश्चादग्नेः प्रागग्रान् दर्भानास्तीर्य्य तत्रोपसादयति स्थापयतीत्यर्थः। पूर्व्वं खल्वग्नेरुत्तरतः समासादितानां सूर्पोलूखलमुषलानामिदानीमग्नेः पश्चिमतः स्थापनं कर्त्तव्यं निर्वापाद्यर्थम्। तत्रोलूखलमुषले खदिरादियज्ञियवृक्षमये। "वारुणान्यज्ञोमसंयुक्तानि"—इति वचनात् वारुणमयानि वा। 'सूर्पं वैणवमेवच,'—इत्यत्र, 'सूर्पं चैषिकमेवच,'—इति केचित् पठन्ति। तत्रैषिकग्रहणं वैणवस्याप्युपलक्षणार्थमिति भट्टभाष्यम्। विससामकरणं पृथक् संस्कारप्रज्ञापनार्थम् ॥ १ ॥ ० ॥

अथ हविर्निर्व्वपति व्रीहीन् वा यवान् वा कंसेन वा चरुस्थाल्या वा ॥ २ ॥

अथानन्तरम् आसादिते तस्मिन्नुलूखले हविर्निर्व्वपति प्रक्षिपति।

हविर्विशिनष्टि,—'व्रीहीन् वा यवान् वा'। केन निर्वपति ? तदुच्यते। कंसेन वा चरुस्थाल्या वा ॥ २ ॥ ० ॥

कथं निर्वपति ? तदभिधीयते—

अमुष्मै त्वा जुष्टं निर्वपामीति देवतानामादेशꣳ सकृत्; द्विस्तूष्णीम् ॥ ३ ॥

अमुष्मै त्वा जुष्टं निर्वपामीति अनेन मन्त्रेण, देवतायाः वेदमेयत्यागोद्देश्यायाः नाम्न आदेशः—आदिश्यते इत्यादेशः समुच्चारणं यथा भवति, तथा सकृदेकवारं निर्वपति, 'द्विः' वारद्वयं तूष्णीममन्त्रं निर्वपतीतिसम्बन्धः। तेन, 'अग्नये त्वा जुष्टं निर्वपामि'—इत्येवमादिमन्त्रेण सकृन्निरूप्य तूष्णीं द्विर्निर्वपेत् ।

अत्र च यावता निरुप्तेन होमो निर्वर्त्त्यते किञ्चिच्चावशिष्यते, तावत् परिमितमेव हविर्निर्वप्तव्यम्। बहुदैवत्ये च चरौ न प्रत्येकमेवानुनिर्वापौ कर्त्तव्यौ, किन्तु तन्त्रेण द्वावेवानुनिर्वापौ सर्वशेषे करणीयौ। तदेतत् सर्वं कर्मप्रदीपः स्पष्टयाञ्चकार। तथा चोक्तम् ।

"चरुः समशनीयोयस्तथा गोयज्ञकर्माणि ।
वृषभोत्सर्ज्जने चैव अश्वयज्ञे तथैवच ।
आवर्षां वा प्रदोषे यः कृष्यारम्भे तथैवच ।
कथमेतेषु निर्वापाः ? कथञ्चैव जुहोतयः ?
देवतासंख्यया ग्राह्या निर्वापास्तु पृथक् पृथक् ।
तूष्णीं द्विरेव गृह्णीयात् होमश्चापि पृथक् पृथक् ।
यावता होमनिर्वृत्तिर्भवेद्या यत्र कीर्त्तिता ।

शेषञ्चेव भवेत् किञ्चित्तावन्तं निर्वपेच्चरुम् ”।

इति । अत्र, एतेषु इति, एतत्प्रकारेष्वन्येष्वपीत्यर्थः । प्रकारान्तरमाह गृह्यासंग्रहः ।

“ चतुर्मुष्टिश्चरुः कार्य्यश्चतुर्णामुत्तरोऽपिवा ” ।

इति मुष्टिः पञ्चमिति गृह्यासंग्रहभाष्ये वक्ष्यामः ॥ ३ ॥ ० ॥

अथ पश्चात् प्राङ्मुखोऽवहन्तुमुपक्रमते ; दक्षिणोत्तराभ्यां पाणिभ्याम् ॥ ४ ॥

अथेति पूर्वप्रकृतार्थम् । अथ पूर्वप्रकृतेन आभादितेन मुषलेन पश्चादनन्तरं प्राङ्मुखः प्राङ्मुख आसीनः, पूर्वप्रकृतानेव निरुप्तान् व्रीहीन् वा यवान् वा अवहन्तुम् । अवहननं कण्डनम्-इत्याख्यायते । उपक्रमते आरभेत । कथम् ? दक्षिणोत्तराभ्यां, दक्षिणः करः उत्तरः उपरिगतो ययोः पाण्योस्ताभ्यां दक्षिणोत्तराभ्यां पाणिभ्यां गृहीतेन मुषलेनेत्यर्थः । “उपक्रमते इति वचनादुपक्रम एवायं नियमः । ततश्च शिष्येनापि पश्चादवहननं कारयतो न दोषः”—इति भट्टभाष्यम ॥ ४ ॥ ० ॥

त्रिः फलीकृतांस्तण्डुलान् त्रिर्देवेभ्यः प्रक्षालयेद्-द्विर्मनुष्येभ्यः सकृत् पितृभ्य इति ॥ ५ ॥

त्रिर्वारत्रयम् अवघातेन फलीकृतान्—फल निष्पत्तौ—इति स्मरणात् निष्पत्तीकृतान् तण्डुलान् कृतच्छटनानित्यर्थोलभ्यते । एतदुक्तं भवति । मुषलेन तथाऽवहन्तव्यं यथा वारत्रयावघातेन तण्डुला निष्पद्यन्ते—इति । तथाच स्मरणम् ।

"कण्डनं सेचनञ्चैव तथैवोलूखलक्रिया ।

सकृदेव पितॄणां स्याद्दैवे त्रिलं विधीयते"।

इति। अन्ये त्वाहुः—'फलीकरणं तण्डुलानां कंबूकापनयनं छटनमिति प्रसिद्धम्। सकृत् कण्डनेनैवापनीततुषांस्तण्डुलान् कृत्वा ततः त्रिः फलीकृतान् कटितान्'—इति। तदिदं सकृत् कण्डन-वचनमसङ्गतम्। दैवे त्रिलम्—इति स्मरणात्। अपरे तु व्याचक्षते,—'त्रिः फलीकृतान् त्रिधा वितुषीकृतान् कण्डनप्रच्छटनाभ्यामिति शेषः',—इति। तदेतत् मनीषिभिश्चिन्तनीयम्। तानिमांस्तण्डुलान् त्रिर्विरचय्य देवेभ्यः प्रक्षालयेदित्याहुरन्वन्ति आचार्य्याः। अनेनैव सूत्रशेषोव्याख्यातः ॥ ५ ॥ ० ॥

पवित्रान्तर्हिताꣳस्तण्डुलानावपेत् ॥ ६ ॥

प्रक्षालितांस्तण्डुलान् पवित्रान्तर्हितान्। पवित्रम्

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेवच।

प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्"।

इति कर्मप्रदीपोक्तलक्षणम्, अन्तर्हितं व्यवहितं येषां, तान् पवित्रान्तर्हितान् कृत्वा आवपेत् निःक्षिपेत् चरुस्थाल्याम्। चरुस्था-ल्यामुत्तराग्रं पवित्रं निःक्षिप्य तण्डुलान्निःक्षिपेत्—इति तत्त्वकार-प्रभृतयः ॥ ६ ॥ ० ॥

कुशलश्शृतमिव स्थालीपाकꣳश्रपयेत् प्रदक्षिणमुदा-युवन् ॥ ७ ॥

कुशलः पाक-निपुणो भण्यते। तेन शृतं पक्कमिव स्थालीपाकं

अपयेत् पचेत्। इवेति निपातः। कीदृशं पुनः शृतं कुशलशृत-मिव भवति? उच्यते। अदग्धम् अकठिनम् अनतिशिथिलम् अवीतरसम् किल शृतं कुशलशृतमिव भवतीत्याचक्ष्महे। कुतः? लोकप्रसिद्धेः। कर्म्मप्रदीपोऽप्याह।

"स्वशाखोक्तश्चरुः स्विन्नोऽप्यदग्धोऽकठिनः शुभः।
न चातिशिथिलः पाच्यो न च वीतरसो भवेत्"।

इति। प्रदक्षिणं दक्षिणावर्त्तेन यथा भवति, तथा उदायुवन्—'यु मिश्रणे'—इत स्मरणान्मेक्षणेनोर्द्धमौषन्मिश्रयन्नवघट्टयन्नित्येतत्। अपयेदितिसम्बन्धः। मेक्षणेन—इति कुतो लभ्यते? 'तास्मिन्नेवाग्नौ श्रपयत्योदनचरुञ्च मांसचरुञ्च पृथङ्मेक्षणाभ्यां प्रदक्षिणमुदायुवन्,—इत्यन्यशाखायां दर्शनात् ॥ ७ ॥ ० ॥

शृतमभिघार्य्योदगुद्वास्य प्रत्यभिघारयेत् ॥ ८ ॥

शृतं पक्वं स्फुटितं चरुम् अभिघार्य्य आज्यस्रुवेणाप्लाव्य उदगुत्त-रस्याम् अग्नेः उद्वास्य उत्तार्य्य प्रत्यभिघारयेत् पुनस्तथाऽऽप्लावयेत्। अभिघारणं चेदं शृतं पवित्रान्तर्हितं कृत्वा करणीयम्। तथाच गृह्यासंग्रहः।

'पवित्रान्तर्हितं कृत्वा चरुं प्राज्ञोऽभिघारयेत्।
उद्वास्य चैव विधिना एवं तन्त्रं न लुप्यते"।

इति। ॥ ८ ॥ ० ॥

अग्निमुपसमाधाय कुशैः समन्तं परिस्तृणुयात्; पुर-स्ताद्दक्षिणतउत्तरतः पश्चादिति ॥ ९ ॥

अग्निम् उपसमाधाय समिद्भिः समिध्य प्रज्वाल्य—इत्येतत्। कुशैः पूर्व्वमासादितैः विशाखानि प्रति लूनैः समन्तं समन्तात् सर्व्वतः सर्व्वासु दिक्षु इत्यर्थः। परिस्तृणुयात् आच्छादयेत् विकिरेत् वा। कथम्? पूर्वस्यां दक्षिणस्याम् उत्तरस्यां पश्चात्—इत्यनेन क्रमेण। ॥८॥०॥

सर्व्वतस्त्रिवृतं पञ्चवृतं वा ॥१०॥

सर्व्वतः सर्वासु दिक्षु त्रिवृतं वारत्रयं, पञ्चवृतं पञ्चकृत्वो वा, परिस्तृणुयात्—इत्यनुवर्त्तते ॥१०॥०॥

कथम्पुनरेकं परिस्तरणं सम्पद्यते? यस्य त्रिः पञ्चकृत्वो वा करणमुपदिश्यते। तदुच्यते,—

बहुलमयुग्मसꣳहतम् ॥११॥

बहुलं बहुतृणकम्। अयुग्मसंहतं,—युग्मञ्च संहतञ्च युग्मसंहतम्—इति द्वन्द्वैकवद्भावः, तन्न भवतीत्ययुग्मसंहतम्, अयुग्ममसंहतञ्चेत्यर्थः। केचित्तथैव पठन्ति। असंहतम् असंलग्नं पृथक् पृथगित्यनर्थान्तरम्। तदेवं प्रतिदिशमयुग्मैः परस्परमसंलग्नैर्बहुभिस्तृणैरेकम्परिस्तरणं सम्पद्यते, तस्य खल्वस्य त्रिः पञ्चकृत्वो वा करणमुपदिश्यते—इत्यर्थः। तत्त्वकारेणाप्यभिहितं—'प्रतिदिशं दर्भत्रयेणावृतानि कृत्वा तेषां मूलानि तथैवाच्छादयेत्'—इति। तत्र दर्भत्रयेणेति न नियमपरं वाक्यम। कस्मात्? परिस्तरणे दर्भसंख्यानियमाभावात्। तच्च पुरस्तादुदाहृतमस्माभिः। तदिदं परिस्तरणं पूर्वस्याम् उत्तरान्ता-द्दक्षिणान्तं यावत्, दक्षिणस्यां पूर्वान्तात् पश्चिमान्तं यावत्, यथा

दक्षिणस्यां तथोत्तरस्यां, यथा पूर्वस्यां तथा पश्चाद्दिशि कर्त्तव्यम्। कुतः पुनरेवमुच्यते? कुशानां प्रागग्रत्वानुरोधात्। 'प्राची सौम्या-पराजिता'—इति च स्मरणादिति वदन्ति।

तदेतत् परिस्तरणस्वरूपप्रतिपादनपरं सूत्रम्,—'बहुलमयुग्म-संहतम्'—इति, न तु 'त्रिवृतं पञ्चवृतं वा'—इत्यस्य विशेषार्थम्। बहुलमयुग्मम्—इत्यनुवादापत्तेः। यच्च,—"त्रिवृतं पञ्चवृतं वा"—इत्यनेनैवायुग्मत्वे सिद्धे अयुग्ममित्येकावृतस्यापि प्राप्त्यर्थम्। तथाच गृह्यान्तरम्। "सकृत् त्रिर्वा प्रदक्षिणं प्रतिदिशमग्नेस्तृणोति"—इति रघुनन्दनादृतं भट्टनारायणादिमतम्। तदसङ्गतम्। न ह्येतत् विशेषार्थं सूत्रं, किन्तर्हि?—परिस्तरणस्वरूपप्रतिपादनार्थम्—इत्यवोचाम। न खल्वदर्शिते परिस्तरणस्वरूपे त्रिवृतं पञ्चवृतं वा—इति समञ्जसं वचनम्। अदर्शिते हि स्वरूपे कस्य त्रिवृत् पञ्चवृद्वा उपदिश्येत। तदिदमर्थतः सूत्रं—'तच्चोदकेषु मन्त्राख्या'—इतिवदादितो द्रष्टव्यम्। तदेवं स्थिते, अयुग्मम्—इत्यस्य कुत एवानुवादापत्तिः?—येन तत्परिहारार्थमेकाऽप्यावृत् परिकल्प्येत। कथमन्यथा, बहुलम्—इत्यत्र अनुवादता परिहरणीया? नित्यानु-वादतया परिहारश्चान्यत्रापि समानः। गृह्यान्तरमपि प्रदक्षिणं परिस्तरणं विदधत् कौथुमादीनामन्यत्रावतिष्ठते। 'पुरस्ताद्दक्षिणत उत्तरतः पश्चात्'—इति स्वाचार्यः सूचयाञ्चकार॥ ११॥ ०॥

अथेदानीं परिस्तरणप्रकारोऽभिधीयते,—

प्रागग्रैरग्रैर्मूलानि च्छादयन्॥ १२॥

प्रागग्रैः प्राक्कृताग्रैः कुशैः पश्चादावृतैरग्रप्रदेशैर्न मध्येनापि

मूलैः पूर्वास्तृतानां कुशानां मूलानि च्छादयन् स्तृन्वन् परिस्तृणुयात् ॥ १२ ॥ ० ॥

एकस्तावदयं परिस्तरणप्रकार उक्तः, अथेदानीमन्योऽपि प्रकार उच्यते,—

पश्चाद्वाऽऽस्तीर्य्य दक्षिणतः प्राञ्चं प्रकर्षति तथोत्तरेण ॥ १३ ॥

पश्चाद्दिश्यग्नेरास्तीर्य दक्षिणतः प्राञ्चं प्रकर्षति प्रकिरन्नयति, तथा तेनैव प्रकारेणोत्तरेणोत्तरतः प्राञ्चं प्रकर्षति । उभयहस्तेन कुशान् गृहीत्वा दक्षिणहस्तगृहीतैर्दक्षिणतः परिस्तृणोति सव्यहस्तगृहीतैरपि सव्यतः—इति भट्टनारायणोपाध्यायाः ॥ १३ ॥ ० ॥

दक्षिणोत्तराण्यग्राणि कुर्य्यात् ॥ १४ ॥

दक्षिणानि च तान्युत्तराणि चेति दक्षिणोत्तराणि कुशाग्राणि कुर्य्यात् । दक्षिणहस्तगृहीतानि कुशाग्राण्युत्तराणि उपरिष्टात्—ऊर्द्ध्वं पूर्वस्यां दिशि—इत्येतत् । अर्थात् सव्यहस्तगृहीतान्यधराणि पश्चाद्दिशीत्यर्थः ।

एवं वा,—

दक्षिणानि च उत्तराणि च—इति विग्रहः । दक्षिणस्यामग्राणि दक्षिणदिग्गतानि, उत्तरस्याञ्चोत्तराणि—उत्तरदिग्गतानि कुर्य्यात् ॥ १४ ॥ ० ॥

एष परिस्तरणन्यायः सर्व्वेष्वाहुतिमत्सु ॥ १५ ॥

एषोऽनन्तरोक्तः परिस्तरणप्रकारः सर्व्वस्वाकृतिमत्सु—यत्र यत्र हूयते तत्र तत्र भवत्यन्यत्र सायंप्रातर्होमादिभ्यः। स्तरणादधः प्रोक्तेष्वन्येष्वपि चिप्रहोमेषु न भवति परिस्तरणमिति ह्यवोचाम। यत्र पुनस्तरणं क्रियते, तत्रापि परिस्तरणं न करणीयम्। स्तरणमेव तत्र परिस्तरणस्थानीयो भवति। तदाह गृह्यासंग्रहः।

"ब्रह्माणं स्तरणं विद्यात्तदर्थञ्च न कल्पितः"।

इति ॥ १५ ॥ ० ॥

कुशानां तत्प्रतिनिधीनाञ्च त्वभावे,—

परिधीनप्येके कुर्व्वन्ति शामीलान् पार्णान् वा ॥ १६ ॥

परिधीन्—

"बाहुमात्राः परिधय ऋजवः सत्वचोऽव्रणाः।
त्रयोभवन्त्यशीर्णाग्रा एकेषान्तु चतुर्दिशम्"।

इति कर्मप्रदीपोक्तलक्षणसंख्याकान्, एके आचार्य्याः कुर्व्वन्ति परिस्तरणार्थम। तानेव विशिनष्टि। शामीलान् शमीमयान्, तदसम्भवे पार्णान् पलाशमयान् वा। परिधीनां विन्यासप्रकार-माह कर्मप्रदीपः।

"प्रागग्रावभितः पश्चादुदगग्रमथापरम्।
न्यसेत् परिधिमन्यञ्चेदुदगग्रः स पूर्वतः"।

इति। त इमे परिधयो गृह्यकर्मासु न करणीयाः। कुशाद्यभावेऽप्युदकाञ्जलिभिरेव तत्र परिधिकृत्यं निर्व्वर्त्त्यते। तथाच गृह्यासंग्रहः।

"परिधींस्तु न कुर्व्वीत गृह्याकर्मसु याज्ञिकः ।
उदकाञ्जलयस्तिस्रस्ते वै परिधयः स्मृताः" ।

इति ॥ १६ ॥ ० ॥

उत्तरतोऽपां पूर्णः स्रुवः प्रणीता ॥ १७ ॥

उत्तरतः उत्तरस्यां दिश्यग्नेरपाम् उदकेन पूर्णः सम्भृतः स्रुवो-यथोक्तलक्षणः प्रणीता भवति । तदनेन संस्कारविशेषादाप एवा-भिधीयन्ते । ताभिश्च पर्य्युक्षणपवित्रमार्ज्जनादय उदकार्थाः कर्त्तव्याः—इत्यभिप्रायः । "प्रणीताभिरुदकार्थः कार्य्यः"—इति च गृह्यान्तरम् ॥ १७ ॥ ० ॥

भावे न वा स्यादित्येके ॥ १८ ॥

भावः सत्तेत्यनर्थान्तरम् । भावे अन्यस्य महतः पात्रस्य, अनन्त-रोक्तः स्रुवः स्याद्वा अदृष्टार्थम्, न वा स्यात्,—इत्येके आचार्य्या-मन्यन्ते । सेयं विहितप्रतिषिद्धा प्रणीता गृह्याकर्मसु नोपकल्प-यितव्या । कुतः ?

"विहितप्रतिषिद्धाञ्च प्रणीतां नोपकल्पयेत्" ;

इति गृह्यासंग्रहोक्तेः ॥ १८ ॥ ० ॥

बर्हिषि स्थालीपाकमासाद्येध्ममभ्याधायाज्यꣳ संस्कु-रुते ॥ १९ ॥

बर्हिषि आस्तृते, स्थालीपाकं चरुम् आसाद्य स्थापयित्वा, इध्मं यथोक्तलक्षणम् अभ्याधाय,

"इध्मोऽप्येधार्थमेवाग्नेर्हविराकृतिषु स्मृतः"।

इति कर्म्मप्रदीपदर्शनात्,

"इध्मः सन्नहनादानं चरुश्रपणमेवच।

तूष्णीमेतानि कुर्व्वीत समस्तञ्चेध्ममादधेत्"।

इति गृह्यासंग्रहवचनाच्च अमन्त्रकमग्नौ प्रक्षिप्य अन्यत्राज्य-होमादिभ्यः। इज्यते अनेनेत्याज्यं संस्कुरुते वक्ष्यमाणेन विधिना॥ १९॥ ०॥

किन्तदाज्यम्?—इत्यत आह,—

सर्पिस्तैलं दधि पयो यवागूं वा॥ २०॥

सर्पिर्घृतम्। अयं तावन्मुख्यः कल्पः। तदलाभे तैलं तिलस्नेहम्। तदसम्भवे दधि। तदभावे पयः क्षीरम्। तस्याप्यलाभे यवागूं वा। संस्कुरुते—इति प्रतिपदं सम्बध्यते। सर्व्वमेतदाज्यमुच्यते, इत्यभि-प्रायः। तदाह गृह्यासंग्रहः।

"अग्निना चैव मन्त्रेण पवित्रेण च चक्षुषा।

चतुर्भिरेव यत् पूतं तदाज्यमितरद्घृतम्।

घृतं वा यदि वा तैलं पयो वा यदि यावकम्।

आज्यस्थाने नियुक्तानामाज्यशब्दोविधीयते"।

इति॥ २०॥ ०॥

तत एव वर्हिषः प्रादेशमात्रे पवित्रे कुरुते॥ २१॥

ततस्तस्मादास्तीर्णशेषादेव वर्हिषः सकाशात्,—इति अन्यद्

बर्हिरास्तृतं व्यवच्छिद्यते। यस्मादेव बर्हिषः कुशमादाय आस्तरणं कृतं, तस्मादेव बर्हिषः,—इत्यर्थः। अन्ये त्वाहुः,—तत एव आस्तृता-देव बर्हिषः—इति। तदसङ्गतम्। कस्मात्? उच्यते। न खल्वेतत् सम्भवति एकमेव बर्हिः स्तरणाय च पवित्रकरणाय च—इति। न खल्वेकैव कुक्कुटी रन्धनाय च कल्प्यते प्रसवाय च!। न चैकत्र-विनियुक्तानां बर्हिषामसति विशेषवचने अन्यत्र विनियोगः शक्यते वक्तुम्। इदमेव विशेषवचनम्—इति चेत्। न, प्रमाणाभावात्। नास्ति अत्र किञ्चित् प्रमाणं भवदभिमत एवार्थोऽस्य वचनस्य—इति। अन्यथा खल्वेतदस्माभिर्व्याख्यातम्। अस्ति च विनियुक्तशेषं बर्हिरिति तदेव ग्रहीतुमुचितम्। तथा चोक्तम्। "विरोधे च श्रुतिविशेषाद-व्यक्तः शेषे"—इति। ततो विस्तीर्णशेषादिति च भट्टभाष्यम्।

प्रादेशमात्रे विस्तृततर्ज्जन्यङ्गुष्ठप्रमाणे। प्रमाणार्थे मात्रट्। पवित्रे कुरुते। द्विवचनं दलापेक्षम्। प्रादेशमात्रस्य बर्हिर्द्वयस्य खल्वत्र पवित्रीकरणमुपदिश्यते। न हि द्विदलपवित्रस्य द्वित्वं शक्यते वक्तुम्। 'बर्हिषः प्रादेशमात्रे'—इत्यभिधानात्। तथाच कर्मप्रदीपः।

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्।
एतदेव हि पिञ्जूल्या लक्षणं समुदाहृतम्।
आज्यस्योत्पवनार्थं यत्तदप्येतावदेव तु"।

इति आज्यस्योत्पवनार्थं द्विदलमेव पवित्रमाह। "समावप्रच्छि-न्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे करोति"—इति च ब्राह्मणम्॥ २१॥ ०॥

ओषधिमन्तर्धाय च्छिनत्ति न नखेन पवित्रे स्थो-वैष्णव्याविति ॥ २२ ॥

ओषधिं व्रीह्यादिकम् अन्तर्धाय अन्तरा कृत्वा, 'पवित्रे स्थो-वैष्णव्यौ'—इत्यनेन मन्त्रेण च्छिनत्ति वृश्चति। न नखेन न करजेन,—इति ओषध्यन्यदप्यन्तर्धाय च्छिनत्ति,—इति दर्शयति। ॥ २२ ॥ ० ॥

अथैने अद्भिरनुमार्ष्टि, विष्णोर्मनसा पूते स्थ इति ॥ २३ ॥

अथानन्तरमेवाविमुञ्चन् एने पवित्रे अद्भिः प्रणीताद्भिरनुमार्ष्टि सव्यहस्तेन मूलप्रदेशे गृहीत्वा दक्षिणहस्तेनानुमृजेत् विष्णोर्मनसा पूते स्थः—इत्यनेन मन्त्रेण ॥ २३ ॥ ० ॥

सम्पूयोत्पुनात्युदगग्राभ्यां पवित्राभ्याम् ॥ २४ ॥

प्रक्रान्तलाद्राज्यं, सम्पूय—

"पवित्रमन्तरा कृत्वा स्थाल्यामाज्यं समावपेत्।
एतत् सम्पूयनं नाम पश्चादुत्पवनं स्मृतम्"।

इत्युत्क्रमेण, आज्यस्थाल्याम्—

"आज्यस्थाली च कर्त्तव्या तैजसद्रव्यसम्भवा।
महीमयी वा कर्त्तव्या सर्व्वास्वाज्याहुतिषु च ॥
आज्यस्थाल्याः प्रमाणन्तु यथाकामन्तु कारयेत्।
सुदृढामव्रणां भद्रामाज्यस्थालीं प्रचक्षते" ॥

इति कर्म्मप्रदीपोक्तलक्षणायां निधाय। मक्षिकादिकमपनीय,—

इति मरुता। उदगग्राभ्यां पवित्राभ्यां पवित्रघटकदलाभ्याम्,—इत्यर्थः। उत्पुनाति ऊर्द्धं शोधयति॥२४॥०॥

कथम् उत्पुनाति? तदुच्यते—

अङ्गुष्ठाभ्याञ्चोपकनिष्ठिकाभ्याञ्चाङ्गुलिभ्यामभिसंगृह्य प्राक्शस्त्रिरुत्पुनाति,—देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिरिति सकृद् यजुषा द्विस्तूष्णीम्॥२५॥

अङ्गुष्ठाभ्याम्—इत्येवमादिद्विवचनं पाणिद्वयार्थम्। अङ्गुष्ठाभ्यामुपकनिष्ठिकाभ्याञ्चाङ्गुलिभ्याम् अभिसंगृह्य प्रकृतत्वात् पवित्रे गृहीत्वा। मूलदेशस्य सव्यहस्तेन पूर्व्वमेव धृतत्वात् अग्रे दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां मूले च वामहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा, "अन्तयोर्गृहीत्वाऽङ्गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्याम्"—इति गृह्यान्तरदर्शनात् कुशपत्रयोरुदगग्रत्वानुरोधात् उत्पवनस्य सौकर्य्यार्थञ्च दक्षिणहस्तोपरिभावेनाधोमुखव्यस्तपाणिरिति भवदेवभट्टादयः। प्राक्शः प्राग्गतं यथा भवति तथा त्रिः वारत्रयम् उत्पुनाति आज्यमग्नौ निःक्षिपति। त्रिरित्येतद्विभजति,—'देवस्त्वा'—इत्यनेन इतिकरणान्तेन यजुषा सकृदेकवारं, तूष्णीम् अमन्त्रकञ्च द्विर्व्वारद्वयम्॥२५॥०॥

अथैने अद्भिरभ्युक्ष्याग्नावप्युत्सृजेत्॥२६॥

अथानन्तरमेवाविमुच्यैने पवित्रे सव्येन गृहीत्वा दक्षिणेन

प्रणीताद्भिरभ्युक्ष्य दक्षिणेनैव अग्नौ अप्युत्सृजेत् त्यजेत्। अपि-रुपसर्गः॥ २६॥ ०॥

अथैतदाज्यमधिश्रित्योदगुदासयेत्॥ २७॥

अथानन्तरम् एतदनन्तरोक्तं सर्पिरादिरूपमाज्यम् अधिश्रित्य अग्नेरुपरि कृत्वा उदगुत्तरस्याम् अग्नेः, उदासयेत् स्थापयेत्। आज्यमिति योग्यत्वादाज्यपात्रम्—इत्यर्थः। तदनेन आज्यपात्रमपि संस्क्रियते—इति; अकृत् संस्कृताज्यपात्रे यदाज्यान्तरं निःक्षिप्यते, न तत्र संस्कारान्तरापेक्षा। तदाह गृह्यासंग्रहः।

"यथा सिमन्तिनी नारी पूर्व्वगर्भेण संस्कृता।
एवमाज्यस्य संस्कारः संस्कारविधिचोदितः॥
आज्यस्य हविषां चैव आज्ये पूर्व्वक्रियाविधिः।
तस्य संपवनं पूर्व्वं चरोः पर्य्युक्षणं परम्"॥

इति। अत्र च घृततैलपयसामधिश्रयणं कुर्य्यान्न दध्नः यवा-ग्वास्तु विकल्पः,—इति भट्टनारायणः। आचार्य्यपुत्रस्त्वाह गृह्या-संग्रहे।

"आज्यानां सर्पिरादीनां संस्कारे विधिचोदिते।
अनधिश्रयणं दध्नः शेषाणां श्रयणं स्मृतम्"॥

इति॥ २७॥ ०॥

एवमाज्यस्य सꣳस्करणकल्पो भवतीति॥ २८॥

एवम् अनेन प्रकारेण आज्यस्य संस्करणकल्पो भवति, यत्र यत्राज्यं संस्क्रियते तत्र तत्रैवं कर्त्तव्यम्—इत्यभिप्रायः। इतिः

खण्डिकापरिसमाप्त्यर्थः, स्रुवादिसंस्कारसमुच्चयार्थो वा। तथाच गृह्यान्तरम्। "स्रुवं प्रतप्य दर्भैः संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात्"—इति। कर्म्मप्रदीपोऽप्याह।

"तेषां प्राक्तूप्रः कुशैः कार्य्यः सम्प्रमार्गो जुहृषता।
प्रतापनञ्च लिप्तानां प्रक्षाल्योष्णेन वारिणा" ॥

इति ॥ २८ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथमप्रपाठकस्य सप्तमी खण्डिका ॥ ० ॥

गोभिलीयगृह्यसूत्रे

प्रथमप्रपाठके अष्टमी खण्डिका।

पूर्व्वमाज्यमपरः स्थालीपाकः ॥ १ ॥

पूर्व्वापरदेशत्वादनयोरपि पूर्व्वापरव्यपदेशः। पूर्व्वस्याम् आज्यम् आसादयितव्यम्, अपरस्याञ्च स्थालीपाकः आसादयितव्यः—इति वाक्यशेषः। पूर्व्वं खल्वग्नेरुत्तरतः समासादितयोरनयोरिदानीं क्रियासौकर्य्यार्थमग्नेः पश्चिमतः पूर्व्वापरभावेन समासादनम्—इति बोद्धव्यम्। तथाच गृह्यान्तरम्। "होत्रग्न्योरन्तरा आज्यहविषी आसादयेत् पूर्व्वं चाज्यम्"—इति। इदानीं हविषः पश्चिमतः समासादनादेव वक्ष्यत्याचार्य्यः,—"अथैतद्धविरुच्छिष्टमुदगुदास्य"—इति ॥ १ ॥ ० ॥

पर्य्युक्ष्य स्थालीपाक आज्यमानीय मेक्षणेनोपघातꣳ होतुमेवोपक्रमते ॥ २ ॥

अदितेऽनुमन्यस्व,—इत्येवमादिना अग्निं पर्य्युक्ष्य स्थालीपाके चरौ आज्यम् आनीय प्रक्षिप्य। "स्रुवमाचमनादेशे"—इति वचनात् स्रुवमात्रमाज्यं चरौ प्रक्षिप्येत्यर्थः। मेक्षणेन यथोक्तेन उपघातम्—उपघातनामा यथा भवति होमः तथा होतुमेव उपक्रमते प्रारभते।

विध्यर्थे लट्। प्रारभेत—इत्यर्थः। उपघातं होतुम्, उपघातनामानं होमं कर्त्तुम्—इति वा व्याख्येयम्। अन्ये लाङ्कः। उपहत्यावदाय होतुमेवोपक्रमते—इति। एवशब्दोऽवधारणार्थः। होतुमेवोपक्रमते, नान्यत् किञ्चिदभिघारणादिकं कुर्य्यादित्यर्थः। "चरावाज्यमानीय प्रपदविरूपाक्षौ जपित्वा समिधमादाय जुहुयादेव"—इति भट्टभाष्यम्। तदनेनोपघातहोमे अभिघारणादिकम् आज्यभागौ च न भवतीति सूचयति।

द्विविधः किल होमो याज्ञिकप्रसिद्धः,—उपघातः उपस्तीर्णाभिघारितश्च। चरावाज्यं निःक्षिप्य विनैव अभिघारणादिकं यद्धूयते, स उपघातः. यच्च स्रुचि स्रुवेणाज्येन अभिघार्य्य चरुमवदाय पुनराज्येनाभिघार्य्य हूयते, तदुपस्तीर्णाभिधारितमित्याख्यायते। स्रुवेण स्रुचि यदाज्यं प्रथमं गृह्यते तदुपस्तीर्णं; हविरवदायानन्तरं यदाज्यं दीयते तदभिघारितम्—इति व्यपदिश्यते। यथोपस्तीर्णाभिधारितं होतव्यं तदुपरिष्टाद्युत्पादयिष्यति, यथोपघातहोमस्तदत्र सूच्यते। तथाच गृह्यासंग्रहः।

> "पाणिना मेक्षणेनाथ स्रुवेणैव तु यद्धविः।
> हूयते चानुपस्तीर्य्य उपघातः स उच्यते।
> यद्युपघातं जुहुयाच्चरावाज्यं समावपेत्।
> मेक्षणेन तु होतव्यं नाज्यभागौ न स्विष्टकृत्"।

इति। तदेवम्, उपघातः—इति पारिभाषिकी संज्ञा होमविशेषस्य। तस्मात्—हिंसार्थाच्चैककर्मकादिति तृतीयान्तोपपदेन णमा उपघातपदव्युत्पत्तिरप्रामाणिकी। उपघातं जुहुयात्—इत्यादौ

तृतीयान्तोपपदाभावाच्च। स खल्वयमुपघातहोमः समगनीयचरु-पितृयज्ञचर्व्वोः, अन्यत्रापि बहुदेवत्ये चरौ, अन्वष्टक्यचरौ च भवति। तदाह कर्म्मप्रदीपः।

"चरौ समगनीये तु पितृयज्ञचरौ तथा।
होतव्यं मेक्षणेनान्यदुपस्तीर्य्याभिघारितम्"।

इति।

"चरौ तु बहुदैवत्ये होमस्तस्योपघातवत्"।

इति च स्मरणम्। वक्ष्यति चान्वष्टक्ये—"कंसे चरुं समवदाय मेक्षणेनोपघातं जुहुयात्"—इति। तत्रान्वष्टक्यपितृयज्ञयोः क्षिप्रहोमधर्म्मः, समगनीये तु ब्रह्मोपवेशनादितन्त्रधर्म्मः,—इति भट्टनारायणोपाध्यायाः। एतेन, यत् कश्चिदाह। अभावविकल्पोऽयमुपस्तीर्णाभिघारितहोमाशक्तावुपघातहोमः,—इति। यच्चापरश्चाह। उत्तरसूत्रादेव पूर्व्वसूत्रक्रमस्योपघातहोमस्य प्रतिषेधोऽनुमीयते,—इति। तदुभयमपि पुरुषबुद्धिप्रेक्षामूलमित्युपेक्षणीयम्। वृषोत्सर्गहोमस्य तु बहुदैवतत्वेऽपि नोपघातत्वम्। तदाह कर्म्मप्रदीपः।

"एतेभ्य एव जुहुयान्मेक्षणेनावदाय च।
स्रुच्याहुतीश्चरोः पृथक् स्विष्टेदाज्याभिघारितम्"।

इति।

"चतुर्गृहीतं कृत्वाऽऽज्यमाभिर्ऋग्भिः पृथक् पृथक्।
स्वाहाकारावसानाभिर्जुहुयाद्विधिवत् सदा"।

इति च॥ २॥ ०॥

यद्युवा उपस्तीर्णाभिघारितं जुहुषेत्, आज्यभागावेव प्रथमौ जुहुयात् ॥ ३ ॥

उ वै—इत्यनर्थकौ निपातौ। यदि उपस्तीर्णाभिघारितं यथोक्तलक्षणं होतुमिच्छेत्, तर्हि आज्यभागावेव प्रथमौ जुहुयात्। एवकारोऽवधारणार्थः। यद्युपस्तीर्णाभिघारितं जुहुषेत्, तदैव आज्यभागौ प्रथमौ जुहुयात्—इत्येवमवधियते। तस्मादिमावाज्यभागौ उपघातहोमे न भवतः—इति दर्शयति।

भट्टनारायणस्त्वाह,—'यत्र यत्र ब्रह्मोपवेशनादि, तत्र तत्रोभयोर्विकल्पयोराज्यभागौ प्रथमौ जुहुयादेव'—इति। सेयं निर्व्वासनिका व्यवस्था। कस्मात्? उपस्तीर्णाभिघारितेनानयोराज्यभागयोरेकवाक्यत्वात्। प्रमाणविशेषस्य चाभावात्। यद्युपस्तीर्णाभिघारितं होतुमिच्छेत्, आज्यभागौ जुहुयात्—इति स्पष्टैकवाक्यता। न खलु भङ्क्त्वा वाक्यमन्यत्र कल्पयितुमुचितौ। आचार्य्यपुत्त्रश्च उपघातहोमे साक्षादाज्यभागौ निषिषेध। तच्चोदाहृतमस्माभिः पूर्व्वस्मिन् सूत्रे। वक्ष्यति चाचार्य्यः—'नाज्यभागौ न स्विष्टकृत्'—इति।

केचिदत्र,—जुहुषेत्—इत्यत्र जुहुयादिति प्रकल्प्य सूत्रद्वयं कल्पयन्ति। तत्र च,—यद्युवा उपस्तीर्णाभिघारितं जुहुयात्—इत्येकम्, आज्यभागावेव प्रथमौ जुहुयात्—इति चापरं सूत्रं मन्यन्ते। यद्युवा—इत्येतस्य च अथवा—इत्यर्थमाचक्षते ॥ ३ ॥ ० ॥

कथमाज्यभागौ जुहुयात्? तदुच्यते।

चतुर्गृहीतमाज्यं गृहीत्वा पञ्चावत्तन्तु भृगूणाम्, अग्नये स्वाहेत्युत्तरतः सोमाय स्वाहेति दक्षिणतः प्राक्शोऽजुहुयात्॥ ४॥

चतुर्गृहीतं चतुःकृत्वो गृहीतम्। केन गृहीतम्? स्रुवेण। कस्मात्? आज्यग्रहणे तस्य गुणत्वात्। कस्मिन् गृहीतम्? स्रुचि। कस्मात्? 'जुहूः प्रदाने गुणभूता'—इति तान्त्रिकसमयात्। "यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोति, यस्य खादिरो न सोऽन्नात् परिच्यवते"—इति च शैनकीयसमाम्नाये श्रवणात्। तथा चोक्तम्। "द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादःस्यात्"—इति। "अनेन गृहीतं जुह्वा जुहोति"—इति च गृह्यान्तरम्। तदेवं स्रुवेण स्रुचि चतुर्गृहीतमाज्यं गृहीत्वा। अश्वालम्भनमालभेत—इत्यादिवत् इहापि प्रत्ययार्थमात्रविवक्षा। कृत्वा—इत्यर्थः। पञ्चावत्तं पञ्चकृत्वो गृहीतं तु भृगूणाम्, अपत्यप्रत्ययस्य लोपात् भृगोरपत्यानामित्यर्थः। 'भृगूणां भृगुगोत्राणाम्'—इति सरलावृत्तिरप्येतमेवार्थमाह। 'भृगुगोत्राणां भार्गवप्रवराणाञ्च'—इति भवदेवभट्टः। 'भार्गवप्रवराणाम्'—इति भट्टनारायणपाध्यायः। "पञ्चावदानानि पञ्चार्षेयाणाम्"—इति गृह्यान्तरम्। स्मरन्ति चापरे।

"जामदग्न्या वत्सविदावार्ष्टिषेणस्तथैवच।
भार्गवाश्च्यवना श्चौर्व्वाः पञ्चावत्तिन ईरिताः"।

इति। तदस्तु किं विस्तरेण।

सूत्रशेषमिदानीं विव्रियते। तदेवं स्रुचि आज्यं गृहीत्वा

अग्नये स्वाहा—इत्यग्नेरुत्तरभागे प्राग्गतं यथा भवति तथा जुहुयात्। एवं तथैव गृहीत्वा, सोमाय स्वाहा—इत्यग्नेर्दक्षिणभागे प्राग्गतं जुहुयात्। अन्यास्त्वाहुतयोऽग्नेर्मध्यभागे होतव्याः—इत्यर्थादवगम्यते। वक्ष्यति च आचार्य्यः,—"अग्नये स्वाहेति मध्ये जुहुयात्"—इति। तथाच शांख्यायनगृह्यम्। "उत्तरमाग्नेयं दक्षिणे सौम्यं मध्येऽन्याहुतयः"—इति ॥ ४ ॥ ० ॥

अथ हविष उपस्तीर्य्यावद्यति ॥ ५ ॥

अथानन्तरं हविषश्चरोरवद्यति,—अवदाय चरुं गृह्णातीत्यर्थः। किं कृत्वा? उपस्तीर्य्य—प्रकृतत्वादाज्यस्रुवेणास्राव्य, स्रुचम्—इत्यर्थात् ॥ ५ ॥ ० ॥

कथमवद्यति? तदुच्यते;—

मध्यात् पूर्व्वार्द्धाच्चतुरवत्ती चेद्भवति, मध्यात् पूर्व्वार्द्धात् पश्चार्द्धादिति पञ्चावत्ती चेद्भवति ॥ ६ ॥

मध्यात् चरोर्मध्यप्रदेशात्। पूर्व्वार्द्धात्, चरोरित्येव। चशब्दश्च समुच्चयार्थो लुप्तवत् द्रष्टव्यः। मध्यात् पूर्व्वार्द्धाच्च—इत्यर्थः। तथाच गृह्यान्तरम्। "मध्यात् पूर्वार्द्धाच्च हविषोऽवद्यति"—इति। चतुरवत्ती, चत्वार्य्यवदानानि यस्य, सोयं चतुरवत्ती—इत्युच्यते। चेद् यदि चतुरवत्ती भवत्यवदाता, तर्हि चरोर्मध्यात् पूर्वार्द्धाच्चावद्यति—इति गतेन संबन्धः। एवं खल्वाज्याभिघारणं चर्व्ववदानद्वयं पुनरभिघारणञ्च—इति चत्वार्य्यवदानानि सम्पद्यन्ते। यदि पुनः पञ्चावत्ती भवत्यवदाता, तदा चरोर्मध्यात् पूर्वार्द्धात् पश्चा-

द्धात्—पश्चिमार्द्धाच्च अवद्यतीत्यर्थः। इतिशब्दः चशब्दार्थः समुच्चये। इति एवम् अवदानम्—इति वा व्याख्येयम्। मध्यात्,—इत्यत्र मध्यमादिति केचित् पठन्ति। तत्रापि मध्यमस्थानादित्यर्थो न भिद्यते॥ ६॥ ०॥

अभिघारयत्यवदानानि॥ ७॥

अभिघारयत्याज्यस्रुवेणाप्लावयति अवदानानि यथाश्रुति गृहीतानि। बहुवचनं व्यक्तिभेदापेक्षया, वक्ष्यमाणस्विष्टहोमपक्षापेक्षया वा॥ ७॥ ०॥

प्रत्यनक्त्यवदानस्थानान्ययातयामतायै॥ ८॥

अवदानानां स्थानान्यवदानस्थानानि। यस्मात् प्रदेशादवद्यते तदवदानस्थानम्। तान्यवदानस्थानानि मेक्षणक्षतस्थानानीत्यर्थः। बहुवचनं पूर्ववद्वर्णनीयम्। तानि खल्ववदानस्थानानि प्रति, अनक्ति अक्तानि करोति आज्यस्रुवेणाप्लावयतीत्येतत्। किमर्थमनक्ति? अयातयामतायै। यागायोग्यता यातयामतेत्युच्यते। न यातयामता अयातयामता, तस्यै। एतदुक्तं भवति। मेक्षणक्षतेन यातयामता चरोरुत्पद्यते, आज्याप्लावनेन पुनरयातयामता तस्य भवति—इति। अयातयामतायाः,—इति पाठे, फलमपि हेतुरित्युक्तेर्हेतौ पञ्चमी द्रष्टव्या॥ ८॥ ०॥

एवं खल्ववदाय,—

अग्नये स्वाहेति मध्ये जुहुयात्॥ ९॥

मध्ये अग्नेरेव॥ ९॥ ०॥

कति जुहुयात् ? उच्यते,—

सकृद्वा चिर्व्वैतेन कल्पेन ॥ १० ॥

एतेन कल्पेनानन्तरोक्तया आवृता,—इत्यादरार्थमुक्तम्। सकृद्वा चिर्व्वा जुहुयात्। वाशब्दद्वयं तुल्यवद्विकल्पार्थम्। त्रिलपक्षे च, "एका देया तिस्रो देयाः"—इत्यादिवत् श्रेयसो भूयस्त्वं कल्पयितव्यम्। अन्ये त्वाहुः,—अभावविकल्पोऽयम्, त्रिलपक्षाशक्तौ सकृत्,—इति ॥ १० ॥ ० ॥

अथ स्विष्टकृत उपस्तीर्य्यावद्यत्युत्तरार्द्धपूर्व्वार्द्धात् सकृदेव भूयिष्ठं, द्विरभिघारयेत् ॥ ११ ॥

"प्राक् स्विष्टकृत आवापः"—इति वचनात् अथ प्रधानहोमानन्तरं स्विष्टकृतोऽवद्यति स्विष्टकृदर्थमवद्यति। किं कृत्वा ? उपस्तीर्य्य—आज्यस्रुवेण स्रुचमाश्राव्य। कथमवद्यति? चरोरुत्तरार्द्धपूर्वार्द्धात्। उत्तरार्द्धश्च पूर्वार्द्धश्च तस्मात्। अपराजिताया दिशः—इत्येतत्। दिगन्तरालानि खलु दिशोर्दिशोर्लक्षणसाङ्कर्य्यात् पदार्थतत्त्वनिपुणा व्यवहरन्ति। तथा चोक्तम्। "तथा दिगन्तरालानि"—इति। अर्द्धशब्दः खल्वत्र विषमांशवाची। अपराजितायादिशश्चेदवद्यते, तर्हि उत्तरार्द्धादप्यवद्यते पूर्वार्द्धादपि—इति शक्यते वक्तुम्। तस्मादपराजिताया दिशः सकृदेकवारमेव भूयिष्ठं बहुतरमवद्यति। अवद्य च द्विरभिघारयेत् वारद्वयमाज्यस्रुवेणाश्रावयेत्। एवं किल चत्वार्य्यवदानानि सम्पद्यन्ते ॥ ११ ॥ ० ॥

यद्यु पञ्चावत्ती स्यात् द्विरुपस्तीर्य्यावदाय द्विरभिघारयेत्॥ १२॥

उ—इत्यनर्थकोनिपातः। यदि पञ्चावत्ती भवेत्, तर्हि द्विराज्यमवदाय पुनर्द्विराज्ञावयेत् पञ्चावदानसम्पत्त्यर्थम्। यद्यु वा—इति पाठे, उ वा—इति निपातौ, यद्युवा—इति वा निपातसमुदायो-यद्यर्थः॥ १२॥ ०॥

न प्रत्यनक्त्यवदानस्थानꣳयातयामतायै॥ १३॥

स्विष्टकृतोऽवद्य च अवदानस्थानं यातयामतायै यातयामतानिवृत्तये न प्रत्यनक्ति नाज्यस्रुवेणाज्ञावयति। कुतः? स्विष्टकृद्धोमानन्तरं तेन चरुणा होमान्तराभावात्, होमार्थमेव चाज्ञावनस्य विहितत्वात्। तस्मादिदानीं यातयामतायामपि नास्ति चतिरिति न प्रत्यनक्त्यमवदानस्थानम्—इत्यभिप्रायः। तदत्र यातयामतायै—इति निवृत्तौ तदर्थ्ये चतुर्थी बोद्धव्या।

यातयामतायाः—इति पाठेऽपि यातयामतां निवर्त्तयितुम्—इति स एवार्थः। अथवा यातयामताया इति हेतौ पञ्चमी। हेतोर्व्वचनात् यत्रायातयामता इष्यते, तत्रावदानस्थानं प्रत्यनक्ति, इदानीन्तु सा नेष्यते—इति न प्रत्यनक्त्यवदानस्थानम्—इति॥ १३॥ ०॥

अग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्धपूर्वार्द्धे जुहुयात्॥ १४॥

उत्तरार्द्धपूर्वार्द्धे अग्नेरेव। कृतभाष्यमन्यत्॥ १४॥ ०॥

महाव्याहृतिभिराज्येनाभिजुहुयात् ॥ १५ ॥

भूर्भुवः स्वरिति महाव्याहृतयस्तिस्रः प्रसिद्धाः । कर्म्मप्रदीपोऽप्याह ।

"भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः" ।

इति । ताभिर्महाव्याहृतिभिस्तिसृभिराज्येन, द्रवद्रव्यकत्वात् स्रुवेण अभिजुहुयात् आहुतित्रयम् । अभिरुपसर्गः । स खल्वयं महाव्याहृतिहोमः चरुहोमात् परस्तात् एव कर्त्तव्यः न तु पुरस्तादपि । कस्मात् ? इदानीमेवोपदेशात् । आज्यहोमात्तु पुरस्तात् परस्ताच्च कर्त्तव्यः,—इत्युपरिष्टादवक्ष्यति ॥ १५ ॥ ० ॥

प्राक् स्विष्टकृत आवापः ॥ १६ ॥

प्राक् पूर्वं स्विष्टकृतः स्विष्टकृद्धोमात्, आ उप्यते—इत्यावापः प्रधानहोमः कर्त्तव्यः,—इति सूत्रशेषः । एवञ्च मुख्यहोमे कृते यदि चरुर्नष्टो दुष्टो वा भवति तदाऽन्यः पाच्यः, मुख्ये हुते चेन्नाशदुष्टी स्यातां तदा आज्येनैव स्विष्टकृद्धोमः—इति सरला ।

अत्र ब्रूमः । अर्थकर्म्मत्वे स्विष्टकृद्धोमस्य तत्र च शेषस्य प्रतिपादने सत्येतदेवं स्यात् । न त्वेवम् । कुतः ? "एकदेशद्रव्यश्चोत्पत्तौ विद्यमानसंयोगात्"—इति सिद्धान्तात् स्विष्टकृद्धोमस्य प्रतिपत्तित्वात् । प्रतिपत्तेश्च प्रतिपाद्याभावे लोप एव आकरे निरूपितः । यजतित्वेऽपि स्विष्टकृतः प्रस्तरप्रहरणवत् प्रतिपत्तित्वं न विरुध्यते । शेषश्रुतिश्च न शेषिणं प्रयोजयति । न चेत् शेषिणं प्रयोजयति; न तरां तत्प्रतिनिधिमपि । शेषप्रतिनिधिं तर्हि प्रयोजयतु ? न—इति ब्रूमः । कस्मात् ? विद्यमानसंयो-

णादेव। न खल्वेतत् शेषमपि प्रयोजयितुं शक्नोति, प्रतिपत्तेः प्रतिपाद्यप्रयोजकतायामसामर्थ्यात्। सति प्रतिपाद्ये खल्वियं प्रवर्त्तते। अन्यथा अर्थकर्मणः प्रतिपत्तेर्व्विशेषो न स्यात्।

तस्मात् यथा,—सर्व्वावदानेन शेषाभावात् शौवाच्यात् स्विष्टकृदिड़ं नेष्यते साकंप्रस्थाय्ये च, तद्दत्रापि शेषापचारे शेषाभावस्याविशेषात् स्विष्टकृच्च यष्टव्यो भवति। अतएव,—मुख्यमात्रोपयोगिन्यपि शौष्ठ्यादौ सति तदेवादेयं तत्र लोपएव शेषकार्य्याणां स्विष्टकृदादीनाम्, न तु तन्निष्पादनसमर्थमपि नीवारादिकम्—इति सिद्धान्तः। अतएव च,—स्विष्टकृदर्थमवत्तस्य हविषोऽपचारे न पुनरवदातव्यम्, अपि तु प्रतिपाद्यमानाभावात् लोप एव स्विष्टकृतः स्यात्—इति षष्ठाध्याये निरूपितम्। तथा चोक्तम्। "अपि वा शेषभाजां स्यात् विशिष्टकारणत्वात्"—इति। कथमन्यथा तत्रापि अन्यत् न प्रतिनिधीयते!। एवं खल्वाचार्य्याणां लोपवचनं प्रलापमात्रं स्यात्। तस्मान्न किञ्चिदेतत्।

मुख्यहोमार्थमवत्ते च हविषि नष्टे दुष्टे वा खल्वाज्येन होतव्यं न पुनरवदातव्यं, न वा अन्यत् पाच्यम्। कुतः? "निर्देशाद्वा अन्यदागमयेत्"—इति सिद्धान्तात्। "यस्य सर्व्वाणि हवींषि नश्येयुर्दुष्येयुर्व्वा अपहरेयुर्व्वा, आज्येन ता देवताः परिसंख्याय यजेरन्"—इति च हविर्नाशे आज्यविधानात्। "तत्र सर्वशब्दस्य निमित्तविशेषणत्वेनाविवक्षितत्वात् नाशमात्रे सर्वत्राज्यस्य विधिः"—इत्यधिकरणमालायां माधवाचार्य्याः।

यास्तु प्रायश्चित्ताहुतयस्ता अपि स्विष्टकृद्धोमादर्व्वागेव होतव्याः—

इत्येके मन्यन्ते। तदसङ्गतम्। तासामप्रधानत्वात्। आगन्तुकानामन्तएवाभिनिवेशस्य न्याय्यत्वाच्च। आगन्तुकाः खल्वेता आहुतयः प्रायश्चित्तरूपत्वात्। प्रायश्चित्ताहुतयो हि प्रकृतहोमवैगुण्यदोषोपशमनाय विधीयन्ते,—इति प्रकृतहोमात् परत एव होतुमुचिताः। महाव्याहृतिहोमान्तेनैव हि प्रकृतहोमनिष्पत्तिः। तस्मात् महाव्याहृतिहोमं कृत्वा कर्म्मापवर्गविहितां समिधमाधाय प्रायश्चित्ताहुतयो होतव्याः। ताः खल्वेताः हविषोऽनादेशादाज्येन आज्यतन्त्रेण हूयन्ते।

स खल्वयं प्रायश्चित्तहोमः,—व्यस्तसमस्तमहाव्याहृतिभिर्वा, अज्ञातम्—इत्यादिमन्त्रेण वा, प्राजापत्यमन्त्रेण वा कर्त्तव्यः। कुतः? "तस्मादेतामेव जुहुयात् अपिवाऽज्ञातं यदनाज्ञातम्"—इत्यवमादिकायां श्रुतौ विकल्पोपदेशात्। यदाह कर्म्मप्रदीपः।

"यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत्।
चतस्रस्तत्र विज्ञेयाः स्त्रीपाणिग्रहणे यथा॥
अपिवाऽज्ञातमित्येषा प्राजापत्याऽपिवाऽऽहुतिः।
होतव्या, त्रिविकल्पोऽयं प्रायश्चित्तविधिः स्मृतः"॥

इति। तदत्र त्रिविकल्पः—इत्यनेन कल्पान्तरस्य प्रतिषेधोऽवगम्यते। केचित् पुनरत्र, "पाहि नोऽग्नएनसे स्वाहा"—इत्यादिकं प्रायश्चित्तहोममाचक्षते। तदसारम्। इह तस्यानुपदेशात्। 'यदपि शाट्यायनकं कुथुम्यान्तरमपपाठस्तमधीयते। तदप्यप्रमाणम्। अनार्षत्वात्। परिशिष्टमध्यान्तःपातित्वामस्यावाच्च',—इति भट्टनारायणोपाध्यायाः। शाट्यायनहोमस्य समूलत्वेऽपि शाख्यन्तरीयत्वम्

—इति तत्प्रकारः। शाट्यायनपठितोहोमः शाट्यायनिनां स्यात् न कौथुमादीनामिति युक्तमस्य शाखान्तरीयत्वम्। कौथुमादीनान्तु कर्म्मप्रदीपोक्त एव प्रकार इति नैवात्र किञ्चिदक्तव्यमस्ति।

एतत् सर्व्वप्रायश्चित्तं चिप्रहोमवर्ज्जं सर्वत्रैव स्यात्—इति भट्टभाष्यम्। श्रुतिश्चात्र भवति। "यच्चावगतं यच्चानवगतं सर्वस्यैषैव प्रायश्चित्तिः"—इति ॥ १६ ॥ ० ॥

गणेष्वेकं परिसमूहनमिध्मो वर्हिः पर्य्युक्षणमाज्यमाज्यभागौ च ॥ १७ ॥

गणेषु एकदा क्रियमाणेषु अनेकहोमेषु एकं परिसमूहनम्। एकशब्दः परस्तादपि प्रत्येकमनुषञ्जनीयः। अनेनैव सूत्रशेषो व्याख्यातः। प्रत्येकं तन्त्रविधाने प्राप्ते यानि तन्त्रेण कर्त्तुं शक्यन्ते, तेषां तन्त्रभाव इहोपदिश्यते। परिकीर्त्तनञ्च परिसमूहनादीनामुदाहरणप्रपञ्चार्थं न परिसंख्यानार्थम्। तेन उलूखलमुषलादिकमपि एकमेव भवतीति द्रष्टव्यम्। गणेषु—इति सामान्यतोऽभिधानात् विभिन्नदेवताकेष्वपि होमेषु एकदा क्रियमाणेषु एकमेव परिसमूहनादिकम्—इत्यवगम्यते। तथाच गृह्यान्तरम्।

"पाकयज्ञान् समासाद्य एकाज्यानेकवर्हिषः।
एकस्विष्टकृतः कुर्य्यान्नानाऽपि सति दैवते"॥

इति ॥ १७ ॥ ० ॥

सर्व्वेभ्यः समवदाय सकृदेव सौविष्टकृतं जुहोति ॥ १८ ॥

गणेषु—इत्येव। अनुवृत्तरार्थः। सकृदेकवारं न पृथक् पृथ-

गित्यभिप्रायः। उपलक्षणमेतत् महाव्याहृत्यादापि मह्ददेव भवति—इति सरला॥ १८॥ ०॥

हुत्वैतन्मेक्षणमनुप्रहरेत्॥ १९॥

एतत्—इति सन्निकर्षातिशयात् सौविष्टकृतं ब्रूमः। एतत् सौविष्टकृतं हुत्वा मेक्षणमनुप्रहरेत् अग्नौ क्षिपेत्। सेयं कर्म्मार्थस्य मेक्षणस्य अनन्तरमेव कर्म्मणः प्रतिपत्तिराम्नाता। अन्ये त्वाहुः,—हुत्वेति वचनात् महाव्याहृतिभिरपि हुत्वा मेक्षणमनुप्रहरेत् न स्विष्टकृद्धोमादनन्तरमेव—इति। स खल्वयं मेक्षणप्रक्षेपः अन्यब्रह्मकेषु होमेषु प्रत्येतव्यः। कुतः? अत्र चरुशेषस्य तस्मै प्रतिपादयितव्यत्वस्य वक्ष्यमाणत्वात्, अन्यत्र च मेक्षणेनैवोद्धृत्य तद्भोजनस्य सूचणात्। न चानुप्रहृतेन मेक्षणेनोद्धरणं शक्यं कर्त्तुम्। तस्माद् यथोक्त एवार्थः। यद्यप्यनुप्रहरतिर्यजतिवचनो दृष्टः, "अष्टावष्टौ शकलान्याहवनीयेऽनुप्रहरेयुः—इति सूत्रकारवचनात्। तथापि प्रस्तरप्रहरणवत् प्रतिपत्तिरेवासौ॥ १९॥ ०॥

प्रक्षाल्य वैनेनोद्धृत्य भुञ्जीत॥ २०॥

प्रक्षाल्य वा मेक्षणम्, एनेन एतेन मेक्षणेनोद्धृत्य चरुशेषं भुञ्जीत यजमानः। एनः प्रकृत्यरमेतदर्थः। एतेन—इति वा पाठः। अन्ये पुनर्—एनं प्रकृत्यन्तरमविद्वांसो भाषन्ते,—प्रक्षाल्य वाऽनेन,—इति पाठे प्राप्ते छान्दसोऽयं प्रयोगः,—इति। यत्र हौत्रं ब्रह्मत्वञ्चोभयमपि स्वयमेव करोति, सोऽस्य विषयः। यत्र च अन्यो ब्रह्मा भवति, तत्र वक्ष्यति,—अथैतद्धविरुच्छिष्टम्—इत्यादि॥ २०॥ ०॥

न स्रुवमनुप्रहरेदित्येक आहुः ॥ २१ ॥

स्रुवमग्नौ न क्षिपेदित्येके आचार्य्या वदन्ति। अस्मादेवाव-गम्यते,—स्रुवमग्नौ क्षिपेत्—इत्यन्ये वदन्ति—इति। तस्मात् स्रुवमग्नौ क्षिपेद्वा न वा क्षिपेदिति विकल्पः ॥ २१ ॥ ० ॥

आग्नेय एवानाहिताग्नेरुभयोर्दर्शपौर्णमासयोः स्थाली-पाकः स्यात् ॥ २२ ॥

अनाहिताग्निः श्रौताग्निरहितः स्मार्त्ताग्निरित्येतत्। स्पष्टमन्यत् ॥ २२ ॥ ० ॥

आग्नेयो वाऽग्नीषोमीयो वाऽऽहिताग्नेः पौर्णमास्याम् ॥ २३ ॥

स्पष्टार्थं सूत्रम् ॥ २३ ॥ ० ॥

ऐन्द्रो वैन्द्राग्नो वा माहेन्द्रो वा अमावस्यायाम् ॥ २४ ॥

आहिताग्नेरेव। ऋजुरर्थः। अनेके विनिवेशविकल्पमाहुः,—ऐन्द्रमाहेन्द्रौ सोमयाजिनः, ऐन्द्राग्नस्त्वसोमयाजिनः। तत्रापि एकेन इष्टवत ऐन्द्रो बहुभिरिष्टवतो माहेन्द्रः—इति। अन्ये तु—इच्छा-विकल्पमाहुः ॥ २४ ॥ ० ॥

अपि वाऽऽहिताग्नेरप्युभयोर्दर्शपौर्णमासयोराग्नेय एव स्यात् ॥ २५ ॥

स्पष्टार्थम् ॥ २५ ॥ ० ॥

समिधमाधायानुपर्य्युक्ष्य यज्ञवास्तु करोति ॥ २६ ॥

समिधमाधायानुपर्य्युक्ष्येतु क्रमार्थम्। तदिदमभिधानं क्रमार्थं भवति। कथन्नाम? समिधमाधायानुपर्य्युक्ष्य अनन्तरं यज्ञवास्तु-एतन्नामकं कर्म्म करोति ॥ २६ ॥ ० ॥

कथं करोति? उच्यते।

ततएव वर्हिषः कुशमुष्टिमादायाज्ये वा हविषि वा त्रिरवदध्यादग्राणि मध्यानि मूलानीत्यक्तꣳरिहाणा व्यन्तु वय इति ॥ २७ ॥

ततस्तस्मादाहृतादेव वर्हिषः—इति नियमादन्यद्वर्हिर्व्यवच्छिद्यते। शेषादेव वर्हिषः—इति कुतो न वर्द्धते? उच्यते। प्रधानकर्म्मापवर्गविहितमिदं प्रतिपत्तिरेव भवितुमुचितम्। आहृतानां वर्हिषामिदानीं प्रतिपिपादयिषितत्वात्। प्रतिपत्तिप्राये वचनाच्च। व्याख्यातारस्त्वेवमेव प्रतिपन्नाः। तच्च वक्ष्यामः। 'कुशमुष्टिम्' अनियतसङ्ख्याकम्, आदाय गृहीत्वा आज्ये यथोक्ते वा, हविषि चरौ वा त्रिरवदध्यात् वारत्रयमक्तयेत् अग्राणि मध्यानि मूलानि—इति। प्रकृतं कुशमुष्टिम् अग्रादिस्थानत्रयेषु त्रिरक्तयेत्—एकैकस्थानं प्रत्येकैकम् अञ्जनम्—इत्यर्थः। अक्तं रिहाणा व्यन्तु वयः—इत्यनेन मन्त्रेण वारत्रयं पठितेन। कुतः? प्रधानानुयायित्वात् गुणानाम्।

"कर्म्मावृत्तौ तु मन्त्रस्याप्यावृत्तिर्गृह्यकर्म्मणि"।

इति चाभियुक्तवचनात्। यत्र खल्वनावृत्तिरिष्यते मन्त्राणां, प्रायेण तत्रोत्तरत्र तूष्णीमिति करोति, 'सकृद् यजुषा द्विस्तूष्णीम्'—इत्येवमादौ ॥ २७ ॥ ० ॥

अथैनमद्भिरभ्युक्ष्याग्नावप्यर्जयेत्,—यः पशूनामधिपतौ रुद्रस्तन्तिचरो वृषा पशूनस्माकं मा हिꣳसीरेतदस्तु हुतन्तव स्वाहेति ॥ २८ ॥

अथानन्तरमेवानिमुक्तमेनं कुशमुष्टिमद्भिरभ्युक्ष्य अग्नौ अप्यर्जयेत् क्षिपेत् दाहयेद्वा। अपिरुपसर्गः। अपवर्जयेत् इति पाठेऽपि स एवार्थः। यः पशूनाम् इत्यनेन मन्त्रेण ॥ २८ ॥ ० ॥

एतद् यज्ञवास्त्वित्याचक्षते ॥ २९ ॥

तत एव वर्हिषः इत्यारभ्य यदुक्तं, तदेतत् कर्म्म यज्ञवास्तु—इत्याचक्षते आचार्य्याः। किमर्थं पुनरिदमुच्यते? उच्यते। यज्ञवास्तु करोति इत्युक्तं, किमिदं यज्ञवास्तु इति न ज्ञायते, तदिदमनेन निगमनेन ज्ञाप्यते। अवचने खल्वेतस्य हविःशेषार्पणमपि यज्ञवास्तु इत्याशङ्क्येत। तदिदं प्रतिपत्तिकर्म्म। कृतार्थानां वर्हिषामिह विनियोगाम्नानात्,—इत्याहुः। तेषां, नष्टेषु वर्हिःष्विदं न भवितुमर्हति। कस्मात्? प्रतिपत्तेः प्रतिपाद्यप्रयोजकत्वाभावात्।

ननु यज्ञवास्तु इति समाख्यालभ्यार्थसिद्ध्यर्थं वर्हिरन्यदुपादीयताम्? अन्यथा खल्ववास्तुर्यज्ञः स्यात्। उच्यते। काममवास्तुर्यज्ञः स्यात्। न प्रतिनिधिः। न खल्वेतदर्थकर्म्म। प्रतिपत्तीनाञ्च प्रतिपाद्याभावे लोपमवोचाम। अपिच। एवमप्यवास्तुर्यज्ञः स्यादेव। कुतः? तत एव वर्हिषः कुशमुष्टिमादाय यद्धूयते, तदेतत् यज्ञवास्त्वाचक्षते। तस्मादन्यस्मिन् वर्हिष्युपादीयमानेऽपि न स होमो यज्ञवास्तुर्भवति। समाख्यालभ्यार्थसिद्ध्यर्थम् इति चेत्। इति

चेद्भवान् पश्यति समाख्यालभ्यार्थसिद्ध्यर्थमन्यदपि बर्हिरुपादेयम्—इति। तत्र ब्रूमः। नासामर्थ्यात्। नैतत् सम्भवति। कुतः? तदुच्यते। नैव समाख्या वदति अन्यद्बर्हिरुपादेयम्—इति। समाख्यालभ्यार्थसिद्ध्यर्थमनुमीयते खल्वेतत्। प्रत्यक्षन्तु आस्तृतमेव बर्हिः। न च प्रत्यक्षं नियममुपरुध्य आनुमानिकमन्यद्बर्हिः शक्यमुपादातुम्। अनुमानस्य प्रत्यक्षबाधायामसामर्थ्यात्। दुर्ब्बला च समाख्या न बलवत्तरं वाक्यं बाधितुं प्रभवति। नियमः खल्वेवमुपरुध्येत।

अथैवम्, एतद् यज्ञवास्त्वित्याचक्षते—इति पुनः सूत्रणमनर्थकम्? इति चेत्। काममनर्थकं भवतु न तु शक्नोत्यन्यद्दातुम्। सकृदुच्चरितेऽप्यस्य यावानर्थः शतकृत्वोऽप्युच्चारणे तावानेव प्रतीयते, न ततोऽधिकः। समाख्या च पूर्व्वेणापि वाक्येनावगम्यते—इति भवतामपि पुनः सूत्रणमनर्थकमेव। तदेतत् पुनरुपादानं निगमनरूपम् इत्यभिहितमस्माभिः। तत् कुत एवानर्थक्यमस्य। अवास्तुर्यज्ञः स्यात्? इति चेत्। नैषदोषः। स्तुत्यर्थत्वात् समाख्यायाः। न खल्वियं 'यज्ञस्य वेश्मभूः'। कथन्नाम? एवमयं होमो यदसौ यज्ञवास्त्विति। प्रत्यक्षन्तु यज्ञस्यागो यजमाने वर्त्तते, विष्णुश्च न कस्मिंश्चित्। स्विष्टकृदादिवच्चैतदवगन्तव्यम्। यथा शोभनाभिलषितकारित्वस्य समाख्यालभ्यत्वेऽपि प्रतिपत्तिरेवासौ। यथा वा व्यतिरेके निन्दावचनेऽपि तत्रापि प्रतिपत्तिरेव श्राद्धे शेषभोजनम्। एवमिहापि प्रतिपत्तिरेवैतदित्यविरुद्धम्। स्तुत्यैव केवलप्रतिपत्तित्वमस्य निरस्यते,—इति चेत्, श्राद्धशेषभोजनादावपि निरस्यताम्। तथा च तत्राप्यपचारे प्रतिनिधिरापद्येत। न चैवमिष्यते। तथात्वे-

ऽपि वा न प्रतिनिधिः, नियमस्यार्थवत्त्वात्। तथापि किं स्तुतेः प्रयोजनम्?—इति चेत्। अफलायां प्रतिपत्तौ कथं प्रवर्त्तेत—इति प्ररोचनमेव—इत्यस्तु किं विस्तरेण। अन्ये तु मन्यन्ते,—यद्यप्येतत् प्रतिपत्तिरेव, तथापि एतद् यज्ञवास्त्वित्याचक्षते,—इति गुणार्थं पुनरुपादानात् नात्यन्तमिदं प्रतिपत्तिरिति दर्शयति। तस्मादपचारेऽप्यास्तृतानां बर्हिषां समाख्यालभ्यार्थसिद्ध्यर्थमन्यदपि बर्हिरादाय होतव्यम्। इतरथा अवास्तुर्यज्ञः स्यात्—इति।

वयन्तु पश्यामः। नासौ प्रतिपत्तिः, किन्त्वर्थकर्मैवैतत्। कुतः? प्रतिपत्तितायां प्रमाणाभावात्। यद्यास्तृतमेव बर्हिरिह प्रतिपाद्येत, भवेदियं प्रतिपत्तिः। न तु प्रतिपाद्यते। किन्तु स्तृतशेषाद्बर्हिषः कुशमुष्टिरादीयते। कथं ज्ञायते? व्यवहितत्वात् स्तृतस्य बर्हिषः। सन्निहितत्वाच्च स्तृतशेषस्य। निर्देशसामान्याच्च। किमिदं निर्देशसामान्यम्? उच्यते। "तत एव बर्हिषः प्रादेशमात्रे पवित्रे कुरुते" इति पूर्व्वं निर्दिष्टम्। तत्र च स्तृतशेषादेव बर्हिषः,—इति व्यवस्थापितम्। तद्वदिहापि निर्दिश्यते "ततएव बर्हिषः कुशमुष्टिमादाय"—इति। तदिदं निर्देशसामान्यम्। तस्माच्च प्रतिपद्यामहे पूर्व्ववदिहापि स्तृतशेषमेव बर्हिरभिप्रेतम्,—इति। ततएव बर्हिषः,—इति निर्देशे हि स्तृतशेषमेव बर्हिः पूर्व्ववदिहाप्यागच्छति हृदयम्। आगच्छति चेत्, न युज्यते विना कारणमुत्स्रष्टुम्।

स्तृतानां बर्हिषामिदानीं प्रतिपिपादयिषितत्वात्,—इति चेत्। इति चेत् भवान् पश्यति स्तृतानि बर्हींषि इदानीं प्रतिपिपादयिषितानि। एतस्मात् कारणात् हृदयमागतमपि स्तृतशेषं

बर्हिरुत्सृज्यते,—इति । नैतत् । प्रमाणाभावात् । न हि स्तृतानि बर्हींषि इदानीं प्रतिपिपादयिषितानि,—इत्यत्र किञ्चित्प्रमाणमस्ति। प्रतिपत्तिप्राये वचनादिति चेत् । न । असिद्धेः । कथमसिद्धिः ? आग्नेयादीनामप्रतिपत्तीनां सन्निहिततरत्वात् । किञ्च । प्रतिपत्ति-प्राये वचनात् खल्वानुमानिकं प्रतिपत्तित्वं परिचिकल्पयिषितम् । तच्च न्यायविरोधात् विनियुक्तविनियोगापरवचनविरोधाच्च नार्हति भवितुम्। तथाच न्यायः। "विरोधे च श्रुतिविशेषादव्यक्तः शेषे"— इति । तथा गृह्यासंग्रहः ।

"स्तृतेभ्यो न प्रचिन्वीयात् यावमात्रं स्तृतं स्तृतम् ।
स्तृतशेषात्ततो गृह्य यज्ञवास्तुक्रिया तथा" ।

इति । तस्मात् स्तृतशेषादेव बर्हिषः कुशमुष्टिमादाय,—इति व्याख्येयम् । यज्ञवास्तुक्रियां कृत्वा चाज्येन पूर्णाहुतिर्होतव्या । तदपि स एवानुपदमाह ।

"यज्ञवास्तुक्रियां कृत्वा विधिदृष्टेन कर्मणा ।
आज्यधारामविच्छिन्नां जुहुयात् सार्व्वकामिकीम्" ।

इति । पूर्णाहुतिरियमिति कुतो ज्ञायते ? सार्व्वकामिकी-मिति वचनात्। "पूर्णाहुत्या सर्व्वान् कामानाप्नोति"—इति हि ब्राह्मणम् ॥ २९ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्या-त्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथमप्रपाठकस्य अष्टमी खण्डिका ॥ ० ॥

अथैतद्धविरुच्छिष्टमुदगुद्वास्योद्धृत्य ब्रह्मणे प्रयच्छेत् ॥ १ ॥

अथेत्यानन्तर्य्यार्थम्। प्रदक्षिणप्रणीताविमोकोदपात्रपूरणानि कृत्वा अनन्तरम्—इति भट्टभाष्यम्। 'एतत्' अभिप्रेतं, हविः, उच्छिष्टम् अवशिष्टम्, उदगुद्वास्य। एतस्मादवगम्यते—होमकाले होत्रग्न्योरन्तरा हविषः समासादनम्—इति। उद्धृत्य पात्रान्तरे कृत्वा ब्रह्मणे प्रयच्छेत् प्रदद्यात्। एतत्—इति कतमदिह अभिप्रेयते? समशनीयनवयज्ञवास्तुपशमनादिचरुभ्योऽन्यत्—इति ब्रूमः। कुतः? तत्र तत्र अन्यस्या अन्यस्याः प्रतिपत्तेरुपदेशात्। एतच्चावसरे प्रदर्शयिष्यामः। अनर्थकं तर्हि। तत्र तत्र प्रतिपत्त्यन्तरविधानादेव हविरुच्छिष्टस्य ब्रह्मणे प्रदानं न भविष्यतीति चेत्। न। एतदित्य नुक्तौ तत्र तत्र प्रतिपत्तिद्वयमाशङ्कीत कश्चिदित्येतदित्युक्तम्। उच्छिष्टग्रहणेनाप्राधान्यं द्योतयन् प्रतिपत्तित्वमस्य ज्ञापयति। तेनाप्रदत्तएवैतस्मिन्नष्टे दुष्टे वा प्रदानार्थं नान्यद्धविरुत्पाद्यमिति। अयमप्यर्थ एतदित्यनेनोपोद्वल्यते। स्वयमुभयकरणे तु चरुशेषं स्वयमेव भुञ्जीत, ब्राह्मणन्त्वन्नान्तरेण तर्पयेदिति वृद्धाः ॥ १ ॥ ० ॥

किं ब्रह्मणे चरुशेषस्य प्रदानमात्रम्?। न। किन्तर्हि?—

तं तितर्पयिषेत् ॥ २ ॥

तं ब्रह्माणं तर्पयितुमिच्छेत् । यथा असौ तृप्यति, तथा कर्त्तव्यम्—इत्यर्थः । तर्पयेत्—इति वक्तव्ये मनोविशुद्धिप्रदर्शनार्थं तितर्पयिषेत्—इत्यभिहितम् । कथं नाम? श्रद्धादिगुणवता मनसा ब्रह्माणं तर्पयितुमिच्छेत् तत्कृतमतिशयविशेषं जानानः । तथाच स्मरणम् ।

"श्रद्धाविधिसमायुक्तं कर्म्म यत् क्रियते नृभिः ।
सुविशुद्धेन भावेन तदानन्त्याय कल्पते"।

इति ।

"देशकालाश्रमक्षेत्रद्रव्यदातृमनोगुणाः ।
सुकृतस्यापि दानस्य फलातिशयहेतवः" ।

इति चैवमादि । श्रद्धारहितस्य खल्वन्नमभोज्यमाहुराचार्य्याः । तच्चेह विस्तरभयान् न प्रस्तूयते ॥ १ ॥ ० ॥

कस्मात् पुनः कारणात् ब्रह्मणः तर्पणे प्रयत्नातिशयः उपदिश्यते? तदुच्यते,—

ब्राह्मणस्य तृप्तिमनु तृप्यामीति ह यज्ञस्य वेदयन्ते ॥ ३ ॥

ब्राह्मणस्य तृप्तिम्, अनु पश्चात् लक्षीकृत्य वा, अहं तृप्यामि,—ब्राह्मणस्य तृप्तौ जातायां मम तृप्तिर्भवति—इत्येतत् । इति एवं ह किल यज्ञस्य अभिप्रायं वेदयन्ते ज्ञापयन्त्याचार्य्याः । एतस्मात्

कारणात् तं तितर्पयिषेत्। सोऽयं ब्राह्मणशब्दो ब्रह्मपरोवर्णनीयः, उपक्रमानुग्रहार्थम् ॥ ३ ॥ ० ॥

यस्मादेवं ब्रह्मणस्तर्पणम्, तस्मात् चरुशेषस्य अपचारे तेन वा दृप्त्यसम्भवे, अन्येनापि अन्नेन तं तर्पयेत्—इत्याह,—

अथ यदस्यान्यदन्नमुपसिद्धं स्यात् ॥ ४ ॥

अथेत्यानन्तर्य्यार्थम्। अथ अनन्तरमेव भोजयेत् नात्मीयं भोजनकालमपि प्रतीक्षेत—इत्यर्थः। अस्य यजमानस्य यत् किञ्चिदन्यदन्नम्, उप समीपे तत्कालस्य सिद्धं निष्पन्नं स्यात् भवति, तेन निषिद्धातिरिक्तेन तं तितर्पयिषेत्—इति गतेन सम्बध्यते। प्रदानस्य प्रतिपत्तित्वेऽपि वचनप्रमाण्यादन्नान्तरमुपादेयम्। चरुशेषप्रादानादनन्तरमन्यदप्यन्नं प्रयच्छेत्—इति वा वर्णनीयम् ॥ ४ ॥ ० ॥

अथ ब्राह्मणान् भक्तेनोपेप्सेत् ॥ ५ ॥

अथ स्वपाकसिद्धानन्तरं ब्राह्मणान् भक्तेन अन्नेन उपेप्सेत् तर्पयितुमिच्छेत्। उपेत्ययमुपसर्गः। अत्रापि गौरवं, मनसोविशुद्धिप्रदर्शनार्थम्। अपवर्गे तावदभिरूपभोजनं विहितम्, तदत्र कृतेन ब्रह्मतर्पणेनैव कृतं मा मंस्त,—इति पुनरिदमसूचयदाचार्य्यः ॥ ५ ॥ ० ॥

पूर्णपात्रो दक्षिणा तं ब्रह्मणे दद्यात् ॥ ६ ॥

पूर्णपात्रः पूर्णपात्रम्। पुंस्त्वं छान्दसम्। तदिदं पूर्णपात्रं दक्षिणा—इत्युत्सर्गः। तं ब्रह्मणे दद्यात्। दक्षिणाग्रहणं ब्रह्मणोऽभावेऽप्यन्यस्मै दानार्थम्। कथं नाम? दक्षिणेयम्—इति कृत्वा स्वयं

कर्मकरणेऽप्यन्यस्मै अवश्यं देया। व्यतिरेके वैगुण्यापत्तेः। "हतो-यज्ञस्त्वदक्षिणः"—इति हि स्मरन्ति। तदाह कर्मप्रदीपः।

"ब्रह्मणे दक्षिणा देया यत्र या परिकीर्त्तिता।
कर्मान्तेऽनुच्यमानायां पूर्णपात्रादिका भवेत्।
विदध्याद्धौत्रमन्यश्चेद्दक्षिणाऽर्द्धहरो भवेत्।
स्वयञ्चेदुभयं कुर्य्यादन्यस्मै प्रतिपादयेत्"।

इति। पूर्णपात्रादिका,—इत्यादिपदात् दक्षिणाविशेषालाभे मूलादिकमपि संगृह्णाति। तथाच मैत्रायणीयपरिशिष्टम्। "दक्षिणाऽलाभे मूलानां भक्ष्याणां दक्षिणां ददाति"-इति। तदत्र, यत्र या—इति सर्व्वनाम्ना व्याप्त्यवगमात् कर्मान्ते—इति च सामान्याभिधानात्, दक्षिणामात्रमेव ब्रह्मणे देयम्—इत्युपदिशति। न च प्रधानकर्मदक्षिणानामन्यस्मै दानं शिष्यते—इति विशेषोपदेशविरहादपि ब्रह्मण एव तेषां देयता पर्य्यस्यति। स खल्वयमाचार्य्यस्यास्पष्टोऽभिप्रायः कर्मप्रदीपकृता स्पष्टीकृतः—इत्या-स्थेयम्।

न चैतत्सूत्रानुसारात् कर्मान्त—इति ब्रह्मसाध्यहोमान्तपरम्--इतियुक्तम्, एतद्विवरणरूपत्वात्तस्य। न ह्यत्रापि होमदक्षिणेयम्—इत्युच्यते, किन्तु प्रकरणादनुमीयते, वाक्यन्तु अविशेषाद्ब्रह्मणे दक्षिणादानमुपदिशति। दुर्बलञ्च प्रकरणं वाक्यात्—इत्यवोचाम। अपिच। इयमपि दक्षिणा प्रधानस्यैव कर्मणः। परमेतत् होमात्मकम्—इति नैतावता किञ्चिदपचीयते। तथात्वे वा दर्शादियागप्रस्तावात् तस्यैव दक्षिणा ब्रह्मणे देया—इत्यापतति।

स चायं पर्य्यनुयोगः सामान्याभिधानबलादेव परिहर्त्तव्यः। स चान्यत्रापि समानः। विदध्याद्धौत्रम्—इति तु होमप्रस्तावादा प्रायेण गृह्यकर्मणां सहोमकत्वाद्वा समाम्नातम्। न खल्वन्यत्रैतत् निषिध्यते। एकस्मिन्नुपदेशस्य विशेषोपदेशविरहे अन्यस्मिन्नपि कल्पनीयः—इति निबन्धारो मन्यन्ते। तस्मात् अन्यैरपि ऋत्विग्भि-र्व्विभज्यैव दक्षिणा ग्रहीतव्या। न्यायस्याविशेषात्।

अपिच। सहोमके कर्मणि ब्रह्मणः सद्भावात् कर्मदक्षिणायास्च ब्रह्मणे देयत्वस्रवणात् होतुः किं तत्र दक्षिणा नास्त्येव?—इत्या-शङ्कायां, 'विदध्याद्धौत्रमन्यश्चेत्'—इति वचनारम्भो न्याय्य एव,—इति न किञ्चिदनुचितम्। स खल्वयमुत्सर्गोविधिरिति यत्र स्पष्ट-मन्यस्मै आचार्य्यादिकाय दक्षिणाविशेषस्य दानमुपदिश्यते, तत्र नैतत् प्रवर्त्तते। अब्रह्मके तु कर्मणि सुतरामन्यस्मै दक्षिणा दातव्या। ब्रह्मणे—इति कर्मकारयितुरुपलक्षणत्वे तु प्रागेव नानुपपत्तिः। सेयं भट्टनारायणादीनां बहूनामनुमता व्यवस्था। तत्त्वकारस्तु,—होमदक्षि-णैव ब्रह्मणे देया, कर्मान्ते—इति ब्रह्मसाध्यहोमान्तपरम्—इत्येक-त्राभिदधानः, कर्म्मान्ते—इति यथाश्रुतमेव ब्रह्मणे—इति कर्मकारयि-तुरुपलक्षणम्—इति पुनरन्यत्र ब्रुवाणः शास्त्रार्थमाकुलयाञ्चकार।

यदाऽप्यन्यस्मै दक्षिणा दीयते, तदाऽपि कुलर्त्विजे गुरवे वा देया, तयोः प्रतिग्रहवैमुख्यादिना ग्रहणासम्भवे बहुतरायां वा दक्षिणायामन्यस्मै अपि दातुमिच्छायां तदनुमत्या, दूरस्थत्वे च तयोस्ताभ्यामुद्दिश्य मनसा दत्त्वैव देया। तदप्याह कर्मप्रदीप एव।

"कुलर्त्विजमधीयानं सन्निकृष्टं गुरुं तथा।

नातिक्रमेत् सदा दित्सन् यदीच्छेदात्मनो हितम् ।
अहमस्मै ददानीति एवमाभाष्य दीयते ।
नैतावप्टष्ट्वा ददतः पात्रेऽपि फलमस्ति हि ।
दूरस्थाभ्यामपि द्वाभ्यां प्रदाय मनसा वरम् ।
इतरेभ्यस्ततोदद्यादेष दानविधिः स्मृतः"।

इति। सूत्रद्वयं वैतत्, 'पूर्णपात्रो दक्षिणा'–इति 'तं ब्रह्मणे दद्यात्'–इति च। तत्र, 'पूर्णपात्रो दक्षिणा'–इत्यनेन पूर्णपात्रं दक्षिणा भवति कर्म्मणामनुच्यमानायां दक्षिणायाम्,–इत्युच्यते। कथं ज्ञायते? अनुच्यमानायां दक्षिणायां पूर्णपात्रादिका दक्षिणा भवति इति कर्म्मप्रदीपवचनात्।

'तं ब्रह्मणे दद्यात्'–इत्यनेन ब्रह्मणे दक्षिणायादानमुपदिश्यते। तदनेन तच्छब्देन दक्षिणैव परामृश्यते न पूर्णपात्रम्। कस्मात्? सन्निहिततरत्वाद्दक्षिणायाः। व्यवेतत्वाच्च पूर्णपात्रस्य। अर्थवत्त्वाच्च। दक्षिणादानेन हि नः प्रयोजनं, न पूर्णपात्रदानेन। लिङ्गव्यत्ययस्त्वन्यत्रापि समानः। 'ब्रह्मणे दक्षिणा देया'–इति कात्यायनवचनाच्चैतदेवं प्रतिपत्तव्यम्। स खल्वस्पष्टानां गोभिलीयानां पदार्थानां प्रदीपवत् स्पष्टमुपदेष्टेत्यवोचाम ॥ ६ ॥ ० ॥

किमिदं पूर्णपात्रं नाम? तदुच्यते,–

कꣳसं चमसं वाऽन्नस्य पूरयित्वा कृतस्य वाऽकृतस्य वाऽपि वा फलानामेवैतं पूर्णपात्रमित्याचक्षते ॥ ७॥

कंसं कांस्यभाजनम्, चमसं वानस्पत्यं पात्रं वा, अन्नस्य पूरयित्व

अन्नैर्व्वर्द्धयित्वा। अन्नस्य—इत्येतदविशिनष्टि, कृतस्य वा अकृतस्य वा। अपि वा अथवा अन्नासम्भवे फलानामेव—फलैरेव भोज्यरित्येवकारकरणादुपदिश्यति, अन्यच्च फलमभोज्यं व्यवच्छिनत्ति। पूरयित्वा, एतं पूर्णपात्रम्—इत्याचक्षते आचार्य्याः। एतत् कंसादिकं पूर्णपात्रमाचक्षते। कथं कृत्वा? अन्नस्य पूरयित्वा स्थापितम्—इत्यर्थः। कियन्मितस्य पुनरन्नस्य पूरणम्? तदाह गृह्यासङ्ग्रहः।

"अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्।
पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते"।

इति। असम्भवे पुनरेतस्य परिमाणस्य यावताऽन्नेन बहुभोक्तुः पुरुषस्य तृप्तिः सम्पद्यते, तावतोऽप्यन्नस्य पूरितं पात्रं पूर्णपात्रं भवति। तदाह कर्मप्रदीपः।

"यावता बहुभोक्तुस्तु तृप्तिः पूर्णेन जायते।
नावरार्द्धं ततः कुर्य्यात् पूर्णपात्रमितिस्थितिः"।

इति॥ ७॥

ब्रह्मैवैकऋत्विक्॥ ८॥

दर्शपौर्णमासप्रस्तावादिदमुच्यते। तेन सायं प्रातर्होमवैश्वदेवादीनामब्रह्मत्वेऽपि न क्षतिः। एक एव ब्रह्मा ऋत्विग्भवति। किमनेनोक्तम्? इदमनेनोक्तम्—एक एव ब्रह्मा सर्व्वकर्मसु ऋत्विक् कर्त्तव्योन पुनरेकस्मिन् कर्मण्येको ब्रह्मा अन्यस्मिंश्चान्यः अपरापरस्मिंश्चापरापरः—इति। तदनेन,—यजमानेन ऋत्विगत्याज्यो भवतीत्युपदिश्यति। तथाच स्मरणम्।

"ऋत्विग्याज्यमदुष्टं यस्त्यजेदनपकारिणम्।
अदुष्टमृत्विजं याज्यो विनेयौ तावुभावपि।
क्रमागतेष्वेष धर्मो वृतेष्वृत्विक्षु च स्वयम्।
यादृच्छिके तु संयोज्ये तत्त्यागे नास्ति किल्बिषम्"।

इति। तथा मनुः।

"ऋत्विजं यस्त्यजेद् याज्यो याज्यञ्चर्त्विक् त्यजेत्तु यः।
शक्तं कर्मण्यदुष्टञ्च तयोर्दण्डः शतं शतम्"।

इति। अथवा। एकोऽब्रह्मैव ऋत्विगिति ब्रह्मणे दक्षिणा दाने हेतुवचनमेतत्। होताऽप्यस्त्वन्य ऋत्विगित्याशङ्कयामुत्तरं सूत्रं प्रवक्ष्यति॥ ८॥ ०॥

पाकयज्ञेषु स्वयꣳहोता भवति॥ ९॥

पाकयज्ञेषु अल्पयज्ञेषु प्रशस्तयज्ञेषु वा। कस्मात्? उभयत्र पाकशब्ददर्शनात्। दृश्यते ह्यल्पे पाकशब्दः,—योऽस्मात् पाकतरः—इति। तं पाकेन मनसाऽपश्यम्—इति, यो मा पाकेन मनसा—इति च प्रशंसायां पाकशब्दः प्रयुक्तः। स चाल्पयमर्थो गृह्यान्तरवृत्तिकारैर्निरूपितः। तत्त्वकारादयस्तु मन्यन्ते,—पाकयज्ञः—पाकाङ्गकयज्ञो वृषोत्सर्गादिः—इति। वयन्तु, एकाग्नौ ये यज्ञाः तान् पाकयज्ञानवगच्छामः। कस्मात्? अस्माकमेव ग्रन्थान्तरे समाम्नानात्। तथाच लाट्यायनसूत्रम्। "पाकयज्ञा इत्याचक्षते एकाग्नौ यज्ञान्"—इति।

तेषु पाकयज्ञेषु स्वयं—स्वयमेव होता भवति। तदिदं स्वयमेव होतृत्वं प्रशस्तम्—इत्यवगम्यते। कुतः?

"स्वयं होमे फलं यत्तु तदन्येन न जायते"।

इति स्मरणात्। अन्यो होतैव कुतो न व्यवच्छिद्यते? स्वयमशक्तौ पाकयज्ञलोपापत्तेः। न चैतदुचितम्। जुहुयाद्वा हावयेद्वा—इति सामान्यतः सूत्रणात्। न प्रवसन्नुपवसेत्—इति च प्रवासदर्शनात्।

"निःक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजन्तथा।
प्रवसेत् कार्य्यवान् विप्रो वृथैव न चिरं क्वचित्"।

इति च कर्म्मप्रदीपवचनात्। तथाच स्मृत्यन्तरम्।

"मनसा नैत्यिकं कर्म प्रवसन्नप्यतन्द्रितः।
उपविश्य शुचिः सर्व्वं यथाकालमनुद्रवेत्"।

इति॥ ६॥ ०॥

पूर्णपात्रोऽवमः पाकयज्ञानां दक्षिणा॥ १०॥

पूर्णपात्रः—इति पुंस्त्वं व्याख्यातम्। पूर्णपात्रम् अवमं सर्व्वनिकृष्टं पाकयज्ञानां दक्षिणा। नातोऽप्यल्पतरी तेषां दक्षिणा अस्तीत्यर्थः॥ १०॥ ०॥

अपरिमितं परार्द्धम्॥ ११॥

न परिमितम् अपरिमितं बहु—इत्यभिप्रेतम्। तदिदम् अपरिमितं परार्द्धं प्रशस्तं भवति दक्षिणा पाकयज्ञानाम्। परार्द्धम्—इति केचित् पठन्ति। परार्द्धं खल्वन्तिममङ्कस्थानमुच्यते गणितेषु।

तथाच अपरिमितं वरार्द्धपर्य्यन्तमपि पाकयज्ञानां दक्षिणा—इति तत्रार्थः ॥ ११ ॥ ० ॥

एतस्मिन्नर्थे दृष्टान्तमुपन्यस्यति,—

अपि ह सुदाः पैजवन ऐन्द्राग्नेन स्थालीपाकेनेष्ट्वा शतꣳसहस्राणि ददौ ॥ १२ ॥

अपिरन्यानपि समुच्चिनोति। ह—इत्यैतिह्यार्थको निपातः। शोभनं ददाति—इति सुदा नामतः, पिजवनस्य अपत्यं पुमान् पैजवनोऽपि ह किल ऐन्द्राग्नेन स्थालीपाकेन इष्ट्वा शतं सहस्राणि शतगुणितानि सहस्राणि लक्षम्—इत्येतत्। ददौ, दक्षिणाम्—इति प्रकरणाल्लभ्यते। कस्य वस्तुनः शतं सहस्राणि? गवाम्—इति ब्रूमः। कस्मात्? संख्यामात्रकीर्त्तनात्। संख्यामात्रकीर्त्तने च प्रायेण गा एव संख्येयतया व्यवहरन्ति याज्ञिकाः। शतदक्षिणेनाहं यक्ष्ये द्वादशशतदक्षिणेन—इति खल्वाहुः। "संख्यामात्रे च दक्षिणा गावः"—इति च द्राह्यायणसूत्रात् ॥ १२ ॥ ० ॥

एवं तावत् सायं प्रातर्होमवैश्वदेवबलिहरणदर्शपौर्णमासाख्यानि नित्यानि कर्म्माण्युक्तानि। तेषां च स्वे स्वे काले यावज्जीविकोऽभ्यासः न्यायविद्भिर्निरूपितः। एवञ्च कालस्य बहुलात् कदाचित्,—

अथ यदि गृह्योऽग्नौ सायं प्रातर्होमयोर्व्वा दर्शपूर्ण-मासयोर्व्वा हव्यं वा होतारं वा नाधिगच्छेत्; कथं कुर्य्यादिति ॥ १३ ॥

अथेति पूर्व्वप्रकृतार्थम्। अथैतयोर्गृह्येऽग्नौ यावज्जीवं कर्त्तव्ययोः

सायंप्रातर्होमयोर्वा, दर्शपूर्णमासयोर्वा। प्रदर्शनमेतत् वैश्वदेवस्यापि। देवादन्यस्माद्वा कस्माच्चित् कारणात् हव्यं हवनीयं वस्तु वा, होतारं हवनकर्त्तारं वा स्वयमशक्तौ, यदि न अधिगच्छेत् न लभेत, तर्हि कथं कुर्य्यात्। किं स्वस्वकालात्ययमात्रेण लुप्यतएव तत्तत् कर्म्म, उतास्ति कश्चित् कालावधिरियति काले अतीते इति। एवमादि संशयच्छिदिषयैतत् पृच्छ्यते ॥ १३ ॥ ० ॥

एवं पृष्ट आह,—

आ सायमाहुतेः प्रातराहुतिर्नात्येत्याऽऽप्रातराहुतेः सायमाहुतिराऽमावास्यायाः पौर्णमासं नात्येत्याऽऽपौर्णमास्या आमावास्यम् ॥ १४ ॥

आ सायमाहुतेः सायमाहुतिपर्य्यन्तम्। सेयं सायमाहुतिर्म्मर्य्यादा अवधिः सीमेत्येतत्। प्रातराहुतिः नात्येति नातिक्रामति। सा खल्वियं स्वकाले अहुता प्रातराहुतिरिदानीं प्रायश्चित्तात्मकं महाव्याहृतिहोमं कृत्वा होतव्या। प्रायश्चित्तात्मकं महाव्याहृतिहोमं कृत्वेति कुत एतत्? श्रुतौ विधानादित्याह। तथाच ब्राह्मणम्। "स होवाच किं होष्यसीति, प्रायश्चित्तमिति, किं प्रायश्चित्तमिति, सर्व्वप्रायश्चित्तमिति, किं सर्व्वप्रायश्चित्तमिति, महाव्याहृतीरेवमब्रुवन्"—इत्यादि। तथाच गृह्यान्तरम्।

"स्वकाले सायमाहुत्या अप्राप्तौ होतृहव्ययोः।
प्राक् प्रातराहुतेः कालः प्रायश्चित्ते कृते सति।
प्राक् सायमाहुतेः प्रातर्होमकालाऽनतिक्रमः।

प्राक् पौर्णमासाद्दर्शस्य प्रागदर्शादितरस्य च"।

इति। एतेनैवसूत्रशेषोव्याख्यातः। तदिदं प्रदर्शनार्थं परिकीर्त्तनं सायमाहुत्यादीनां न नियमार्थम्। कुतः? याज्ञिकसमयात्। तथाचोक्तं त्रिकाण्डमण्डनेन।

"मुख्यकाले यदाऽवश्यं कर्म्म कर्त्तुं न शक्यते।
गौणकालेऽपि कर्त्तव्यं गौणोऽप्यत्रेदृशो भवेत्।
आ सायमाहुतेः कालात् कालः स्यात् प्रातराहुतेः।
प्रातराहुतिकालात् प्राक् कालः स्यात् सायमाहुतेः।
पूर्णमासस्य कालोऽस्ति पुरा दर्शस्य कालतः।
स्यात् साकमेधकालोऽपि आ सुनासीरकालतः।
सुनासीरीयकालोऽप्याऽऽवैश्वदेविककालतः।
श्यामाकैर्व्रीहिभिश्चैव यवैरन्योन्यकालतः।
प्राग्यष्टुं युज्यतेऽवश्यं नैव त्वाग्रयणात्ययः।
दक्षिणायनकाले या पश्विज्या योत्तरायणे।
अन्योन्यकालतः पूर्व्वं यष्टुं युक्ते उभे अपि।
एवमागामियागीयमुख्यकालादधस्तनः।
स्वकालादुत्तरो गौणः कालः पूर्व्वस्य कर्म्मणः।
यदाऽऽगामिक्रियामुख्यकालस्याप्यन्तरालवत्।
गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्म्मणि"।

इति। सर्व्वमेव प्राक्तनकर्म्म प्रायश्चित्तहोमानन्तरमेव गौणकाले करणीयम्। सायमाहुत्यादौ तथा दर्शनात्।

"गौणेषु तेषु कालेषु कर्म्म चोदितमारभेत्।

प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत्"।

इति स्मरणाच्च। वैश्वदेवस्य पुनरतिक्रमे अभोजनमपि कृत्वा कालान्तरे तदाचरणम्। तथाच गृह्यान्तरम्।

"वैश्वदेवे त्वतिक्रान्ते अहोरात्रमभोजनम्।
प्रायश्चित्तमथो कृत्वा पुनः सन्तनुयाद्व्रतम्"।

इति। प्रथमवैश्वदेवातिक्रमे दिवा अभोजनं, द्वितीयवैश्वदेवातिक्रमे च रात्रावभोजनम्—इति परिशिष्टप्रकाशः। वैश्वदेवद्वयातिक्रमे तु विशेषमाह कर्म्मप्रदीपः।

"परेणाग्नौ कृते स्वार्थं परस्याग्नौ कृते स्वयम्।
पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च।
अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा।
भोजने पतितान्नस्य चरुर्व्वैश्वानरो भवेत्"।

इति। प्राक् सूर्य्यास्तमयात् प्रथमो वैश्वदेवो नात्येति, प्राक् च रात्रेः सार्द्धात् प्रहरात् द्वितीयः। कुतः? यतस्तावानेव भोजनकालः। तथाच कर्म्मप्रदीपः।

"मुनिभिर्द्दिरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्।
अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः"।

इति ॥ १४ ॥ ० ॥

एतेनैवावकाशेन हव्यं वा होतारं वा लिप्सेत ॥ १५ ॥

एतेन—इति गौणकालपरामर्शः। लिप्सेत लब्धुमिच्छेत्। लिप्सेत्—इति पाठे व्यत्ययात् परस्मैपदम्। प्राप्तस्याप्यादरार्थम-

भिधानम्। कथं नाम? तथा क्षिप्येत यथा गौणकालो नात्येति, तस्याप्यतिक्रमे कर्मैव लुप्यते,—इत्यभिप्रायः। कृच्छ्रन्यत्। यदा पुनर्लभ्यते, तदा होतव्यम्। तदाह कर्मप्रदीपः।

"पौर्णमासात्यये हव्यं होता वा यद्दहर्भवेत्।
तदहर्जुहुयादेवमामावस्यात्ययेऽपि च"।

इति ॥ १५ ॥ ० ॥

अपि वा यज्ञियानामेवोषधिवनस्पतीनां फलानि वा पलाशानि वा श्रपयित्वा जुहुयात् ॥ १६ ॥

अपि वा—इति पक्षान्तरमुपदिश्यते। एतेनाप्यत्रकाशेन हविष्यनुपलभ्यमाने यज्ञियानां यज्ञार्हाणामनिषिद्धानाम्—इत्येतत्। ओषधीनाम्—

"व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः।
यवाश्चौषधयः सप्त विपदो घ्नन्ति धारिताः"।

इति कर्मप्रदीपोक्तानाम्। वनस्पतीनां वृक्षाणाञ्च,—

"अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः"।

इत्युक्तलक्षणानां वा फलानि शस्यानि वा; पलाशानि छदनानि पत्राणि वा, यथोपपन्नानि; श्रपयित्वा स्थालीपाकविधिना, जुहुयात् ॥ १६ ॥ ० ॥

अप्यप एवान्ततो जुहुयादिति ह स्माह पाकयज्ञश्चैडो हुतं ह्येव ॥ १७ ॥

अन्ततः सर्वासम्पत्तौ अप उदकम् अपि जुहुयादेव, न तु

अद्भिः कथं होमः—इत्याशङ्कीत। सर्वालाभे उदकमप्यन्ततो मध्यत-एवाग्नेर्जुहुयात् न तस्युपशमाशङ्कां कुर्य्यादिति वा व्याख्येयम्। इति ह किल आहस्म उवाच, नामतः पाकयज्ञः इड़ाया अपत्यम् ऐड़ः कश्चिदाचार्य्यः; हुतमेव भवत्येवमपि हुते। हिशब्दो यस्मादर्थे। यस्मादेवमपि हुते हुतमेव भवति न अहुतम्—इति पाकयज्ञ आहस्म, तस्मादप एवान्ततो जुहुयादित्यर्थः॥ १७॥ ०॥

अहुतस्य प्रायश्चित्तं भवतीति॥ १८॥

हुत—इति कर्त्तरि निष्ठा। न हुतं येन—इति वा विग्रहः। अहुतस्य उदकस्याप्यलाभात् होममकुर्वतः प्रायश्चित्तं भवति। किं पुनस्तत् प्रायश्चित्तम्? पुनराधानम्—इति ब्रूमः। कुतः?

"होमद्वयात्यये दर्शपूर्णमासात्यये तथा।
पुनरेवाग्निमादध्यादिति भार्गवशासनम्"।

इति स्मरणात्। इतिरन्यान्यपि पुनराधाननिमित्तानि समुच्चिनोति। तानि च,—

"असमक्षन्तु दम्पत्योर्होतव्यं नर्त्विगादिना।
द्वयोरप्यसमक्षन्तु भवेद्धुतमनर्थकम्"।

इत्येवमादीनि कर्मप्रदीपादिष्वनुसन्धेयानि। पुनराधान-प्रकारश्च,—

"पूर्व्वैव योनिः पूर्व्वाऽऽवृत्पुनराधानकर्म्मणि"।

इत्यादिना कर्म्मप्रदीप एव अभिहितः॥ १८॥ ०॥

नाव्रतो ब्राह्मणः स्यादिति ॥ १९ ॥

व्रतरहितो ब्राह्मणो न स्यादल्पमपि कालम्। "मुहूर्त्तमपि नाव्रतो ब्राह्मणः स्यात्"—इति पाठे व्यक्त एवार्थः। इतिर्हेतौ। यस्मात् नाव्रतो ब्राह्मणः स्यात्, तस्मात् पुनराधाननिमित्ते जाते, अविलम्बमेवादध्यादित्यभिप्रायः ॥ १९ ॥ ० ॥

अथाप्युदाहरन्ति ॥ २० ॥

ऋजुरक्षरार्थः। प्रकृतस्य प्रायश्चित्तं पुनराधानमुक्तम्, अथेदानीमन्यदपि पक्षान्तरं तत्र दर्शयितुं ब्राह्मणवाक्योदाहरणाभासरूपं सूत्रम् ॥ २० ॥ ० ॥

यावन्न हूयेताऽभोजनेनैव तावत् सन्तनुयात् ॥ २१ ॥

हविषोऽलाभे यावन्न हूयेत हूयते, अभोजनेनैव तावत् तावन्तं कालं सन्तनुयात् सन्ततमविच्छिन्नमलुप्तं कुर्य्यादग्निव्रतम्—इत्यर्थः। यावता कालेन हविर्लभ्यते, तावति काले अभोजनेऽपि व्रतमलुप्तं भवतीत्यभिप्रायः ॥ २१ ॥ ० ॥

किमभोजनेनैव व्रतं सम्पद्यते ? न। किन्तर्हि ?—

अथ यदाऽधिगच्छेत् प्रति जुहुयात् ॥ २२ ॥

यदा पुनरधिगच्छेल्लभेत हविः, तदा अथ,—सायमाद्युपक्रमत्वात् कर्मणां सायमादिकालं प्रतीक्ष्य, प्रति जुहुयात्। यावन्न हूयते तावन्तं कालमभोजनेन क्षपयित्वा यदा हविरुपलभ्यते तदा

तदानीमेव न जुहुयात्, किन्तु सायमादिकालं प्रतीक्ष्य प्रति जुहुयादित्यर्थः। प्रतिशब्दो होमस्य प्रकारविशेषद्योतनार्थः। कतमः पुनरसौ प्रकारः? उच्यते। अतिक्रान्ताः सर्वा अग्निदेवत्या आहुतीर्व्विगणय्य तावन्ति हवींषि पात्रे कृत्वा,—अग्नये स्वाहा— इति सकृदेव जुहुयात्। एवं प्राजापत्याः। एवम् अपरापराः। तदाह कर्मप्रदीपः।

> "आह्वयमानेऽनश्नंस्तिष्ठेत् नयेत् कालं समाहितः।
> सम्पन्ने तु यथा तत्र हूयते तदिहोच्यते।
> अहुताः परिसङ्ख्याय पात्रे कृत्वाऽऽहुतीः, सकृत्।
> मन्त्रेण विधिवद्धुत्वा एवमेवापरा अपि"।

इति ॥ २२ ॥ ० ॥

एवमप्यस्य व्रतꣳसन्ततं भवतीति ॥ २३॥

एवम् अपि कृते अस्य व्रतिनो व्रतं नियमः सन्ततम् अविलुप्तं भवति। तस्मात् पुनराधानं न कर्त्तव्यम्—इत्यभिप्रायः। इतिः ब्राह्मणवाक्यावसानज्ञापनार्थः, प्रकरणपरिसमाप्त्यर्थो वा॥ २३ ॥ ०॥

एषोऽत ऊर्द्ध्वꣳहविराहुतिषु न्यायः ॥ २४ ॥

अत ऊर्द्ध्वम् अस्मात् परतो वक्ष्यमाण एष न्यायो हविराहुतिषु— हूयते—इति हविः; अविशेषात् समिदाज्यपश्वपूपशाकादिकं सर्व्वमुच्यते, तस्य हविष आहुतिषु बोद्धव्यः—इति परिभाष्यते।

पराचीनस्यापि बुद्धा सन्निकृष्य एतदा परामर्शः। न्यायग्रहणं कचिदाम्नातस्यापि प्रतिषेधार्थम्। यथा समाम्नातोऽपि मन्त्रान्ते स्वाहाकारः स्वाहान्ते मन्त्रे नाद्रियते, अन्याय्यत्वात्। तच्चोत्तरत्र वक्ष्यामः। एवमन्यदपि ऊह्यम्।

एवं वा—

एषोऽनन्तरोक्तो न्यायः प्रकारः—इत्येतत्। अत ऊर्द्धं वक्ष्यमाणासु हविराहुतिषु द्रष्टव्यः—इत्युक्तः प्रकारः सर्वत्रातिदिश्यते। न्याय-ग्रहणेन किमुक्तं भवति? एतदनेनोक्तं भवति;—अत ऊर्द्धं ये क्षिप्रहोमा ब्रह्मचारिसमिदाधानादयो वक्ष्यन्ते, तेषु क्षिप्रहोमोक्त एव प्रकारो भवति। ये पुनस्तन्त्रहोमाः वैवाहिकहोमादयः, तेषु ब्रह्मोपवेशनादि तन्त्रं द्रष्टव्यम्। तथा कचित् प्राप्तोऽप्यर्थो-ऽर्थाभावान्निवर्त्तते। किमुदाहरणम्? इदमुदाहरणम्। आज्य-तन्त्रेषु मुषलोलूखलसूर्पादयो निवर्त्तन्ते, पाक्याहुतिषु मेक्षणस्रुगा-दयः—इति। सोऽयं न्यायशब्दस्यार्थः॥ २४॥ ०॥

मन्त्रान्ते स्वाहाकारः॥ २५॥

होममन्त्राणाम् अन्ते अवसाने स्वाहाकारः कर्त्तव्यः—इति सूत्र-शेषः। अधिकाराद्धोममन्त्राणामेवान्ते स्वाहाकारः कर्त्तव्यो न जपादिष्वपि। तत्रापि ये मन्त्राः स्वाहाकाररहिता एव पठ्यन्ते, यथा अग्ने प्रायश्चित्ते इत्यादयः, तदन्त एव स्वाहाकारः स्यात्। न त्वाम्नातस्वाहाकारान्तेष्वपि अग्निरेतु प्रथम इत्येवमादिषु। किं

कारणम्? हविस्त्यागार्थः खल्वयं स्वाहाकारः—इति आम्नात स्वाहाकारान्तेषु मन्त्रेषु नैष विधिरुपतिष्ठते। तत्र स्वाम्नाते-नैव स्वाहाकारेण हविस्त्यागः कृतः—इत्यपरस्याम्नानमनर्थकं भवति। तथाच तान्त्रिकाः पठन्ति।

"नमोऽन्ते न नमो दद्यात् स्वाहान्ते द्विठमेवच।
पूजायामाहुतौ चापि सर्वत्रायं विधिः स्मृतः"।

इति। यत्र च मन्त्रादितोऽपि समाम्नातः स्वाहाकारो हविस्त्या-गार्थो भवति, तत्राप्यग्नौकरणहोमे मन्त्रान्ते स्वाहाकारान्तरं न कर्त्तव्यमेव। न्यायस्याविशेषात्। तत्र हि स्वाहाकारेण हवि-स्त्यागं कृत्वा परतो मन्त्रः समापनीयः। तदाह कर्मप्रदीपः।

"स्वाहां कुर्य्यान्न चात्रान्ते न चैव जुहुयाद्धविः।
स्वाहाकारेण हुत्वाऽग्नौ पश्चान्मन्त्रं समापयेत्"।

इति। होममन्त्राणाञ्चादौ न प्रत्येकम् ॐकारः करणीयः। तदप्याह स एव।

"नोङ्कुर्य्याद्धोममन्त्राणां पृथगादिषु कुत्रचित्।
अन्येषाञ्च विकृष्टानां कालेनाऽऽचमनादिना"।

इति ॥ २५ ॥ ० ॥

आज्याहुतिष्वाज्यमेव सꣳस्कृत्योपघातं जुहुयात् नाज्यभागौ न स्विष्टकृत् ॥ २६ ॥

आज्यस्य यथोक्तस्याऽऽहुतिषु—यत्राज्यमेव हूयते—इत्यर्थः। तेषु

चतुर्थीकर्म्मादिषु। आज्यं संस्कृत्यैव उपघातं यथा भवति तथा जुहुयात्, द्रवद्रव्यकत्वात् स्रुवेण—इत्यर्थः। एवकारेण यद्व्यवच्छिद्यते, तदप्युच्यते सुखावबोधार्थम्। नाज्यभागावत्र भवतः न च स्विष्टकृदपि भवति। तदेते अतिदेशागता इह प्रतिषिध्यन्ते॥ २६॥ ०॥

आज्याहुतिष्वनादेशे पुरस्ताच्चोपरिष्टाच्च महाव्याहृतिभिर्होमः॥ २७॥

आज्याहुतिषु आज्यमात्राहुतिषु, यत्राज्यमेव हूयते न चर्व्वादिकं तत्रेत्यर्थः। आहुतेरनादेशे च। मध्यात् पूर्व्वार्द्धादितिवच्चशब्दः समुच्चयार्थो लुप्तवत् द्रष्टव्यः। यत्र होम एव नादिश्यते उपदिश्यते चाग्निरवगम्यते वा किञ्चिदन्यद्धोमलिङ्गं, तत्र गर्भाधानपुंसवनशुङ्गाकर्म्मसीमन्तकरणचूड़ाकरणादिषु प्रधानकर्म्मणो गर्भाधानाऽंसाभिमर्शनादेः पुरस्ताच्च उपरिष्टाच्च,—आद्यन्तयोरित्यर्थः। महाव्याहृतयः तिस्रः व्याख्याताः, ताभिर्होमः कर्त्तव्यः—इति वाक्यशेषः। एवं खल्वग्नेरुपदेशस्तत्र तत्रार्थवान् भवति। इतरथाऽनर्थको वा स्यात्, अदृष्टार्थो वा कल्प्येत। तथा च "पश्चादग्नेरुदगग्रेषु दर्भेषु"—इत्यादिना तत्र तत्राग्निमुपदेक्ष्यति। मनुरपि सहोमकत्वमेषामाह।

"गार्भैर्होमैर्जातकर्म्मचौड़मौञ्जीनिबन्धनैः।
बैजिकं गार्भिकञ्चैनो द्विजानामपमृज्यते"।

इति ब्रुवाणः। चन्द्रदर्शनादावपि तर्हि पुरस्ताच्चोपरिष्टाच्च महाव्याहृतिभिर्होतव्यम्? न। तत्राग्नेरप्युपदेशाभावात्। अतएव,—

"अहोमकेष्वपि भवेत् यथोक्तं चन्द्रदर्शने"।

इति कर्म्मप्रदीपेऽपि चन्द्रदर्शनस्याहोमकत्वमुक्तम्। गर्भाधानेऽपि होममवसरे उपपादयिष्यामः।

अन्ये तु वर्णयन्ति,—'आज्याहुतिष्वनादेशे आज्याहुतयोऽपि यत्र नादिश्यन्ते—होम एव यत्र नादिश्यते—इत्यर्थः। न पुनराज्याहुतिषु अनादेशे च—इति व्याख्यानं युक्तं, चकाराध्याहारदोषात्'—इति। अत्र ब्रूमः। आज्याहुतयो यत्र नादिश्यन्ते—इति वर्णनायां चर्व्वाहुतिष्वतिप्रसङ्गः। आज्याहुतयोऽपि यत्र नादिश्यन्ते—इत्यर्थकल्पने च व्यक्तमपेरध्याहारः। आज्यपदस्यैवमनतिप्रयोजनं स्यात्। आहुतिष्वनादेशे—इति खल्वभिप्रेयते। तस्मादस्मदुक्तमेव व्याख्यानमादरणीयम्। द्योतको हि चशब्दस्तात्पर्य्यस्येष्यते। तच्चेत् तात्पर्य्यमन्यस्मादपि कारणादवगम्यते, अकिञ्चित्करं तदकीर्त्तनं भवति। आज्याहुतिषु—इति सप्तमीनिर्द्देशस्यैवं तात्पर्य्यमुपोद्बलयति। आज्याहुतिष्वनादेशे—इति चासमासकरणं प्रत्येकमन्वयं द्योतयति ॥ २७ ॥ ० ॥

यथा पाणिग्रहणे; तथा चूड़ाकर्म्मण्युपनयने गोदाने च ॥ २८ ॥

यथा पाणिग्रहणे महाव्याहृतिभिः व्यस्तसमस्ताभिस्तत्र आहु-

तयो ह्रयन्ते । तथाच पाणिग्रहणे वक्ष्यत्याचार्य्यः,—महाव्याहृतिभिश्च पृथक्, समस्ताभिश्चतुर्थीम्—इति । तथा चूड़ाकर्म्मणि । तथा शब्दः प्रत्येकमभिसम्बध्यते । तथोपनयने, तथा गोदाने च,—इत्यतिदिश्यते । सोऽयमनागतातिदेशः । चूड़ाकर्म्मादिव्यतिरिक्तेषु तु तिस्र एवाहुतयो भवन्ति ॥ १८ ॥ ० ॥

अपवृत्ते कर्म्मणि वामदेव्यगानꣳ शान्त्यर्थꣳ शान्त्यर्थम् ॥ २९ ॥

अपवृत्ते समाप्ते कर्म्मणि वामदेव्यगानं, कर्त्तव्यम्—इति परिभाष्यते । तस्मात् सर्व्वेषामेव कर्म्मणामपवर्गे वामदेव्यं साम गातव्यम् । कर्म्मणि—इति सामान्येनोपदेशाच्च । बहूनाञ्च कर्म्मणामेकदा करणे अन्ततः सकृदेव वामदेव्यं गातव्यं न प्रत्येकमन्ते । तदाह कर्म्मप्रदीपः ।

"अहोमकेष्वपि भवेत् यथोक्तं चन्द्रदर्शने ।
वामदेव्यं गणेष्वन्ते बल्यन्ते वैश्वदेविके" ।

इति । गानस्य अशक्तावपि ऋचो वारत्रयं पठनीयाः । तदप्याह स एव ।

"अन्ते च वामदेव्यस्य गानं कुर्य्यादृचस्त्रिधा" ।

इति । शान्त्यर्थम्—इति विहितं वामदेव्यगानमनेन स्तूयते—इत्यर्थवादोऽयम् । उभयस्मिन् विधीयमाने हि वाक्यं भिद्येत । वामदेव्यगानं कर्त्तव्यम्, तच्च शान्त्यर्थं भवति—इति । तस्मात्,—

"उदुम्बरो यूपो भवति ऊर्ग् वा उदुम्बर ऊर्क् पशव ऊर्ज्जं वास्मा-ऊर्ज्जं पशूनाप्नोति ऊर्ज्जाऽवरुध्यै"—इतिवदिहापि स्तुतिरेव प्रयोजनं न फलविधिः। अन्ये त्वाहुः,—ग्रान्थ्यर्थम्—इति वचनात्नातीव अस्य नित्यत्वम्—इति। ग्रान्थ्यर्थं ग्रान्थ्यर्थम्—इत्यभ्यासः प्रपाठक-परिसमाप्तिं द्योतयति ॥ २८ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये प्रथमप्रपाठकस्य नवमी खण्डिका समाप्ता ॥ ० ॥

समाप्तश्चायं प्रथमः प्रपाठकः ॥ ॐ

द्वितीयप्रपाठके प्रथमा खण्डिका ।



एवन्तावत् प्रथमे प्रपाठके अग्निसमाधानम्, समाहिताग्नेश्चावश्यकर्त्तव्यं सायंप्रातर्होमादिकम्, देवसवितरित्यादेश्च मन्त्रस्य पर्य्युक्षणे विनियोगो निरूपितम् । समाधानञ्चाग्नेर्जायायाः पाणिं जिघृक्षोरभिहितम् । अथेदानीं कथं जायायाः पाणिर्गृह्यते, देवसवितरित्यादेः परेषाञ्च मन्त्राणां विनियोगः,—इत्येवमर्थजातं निरूपयितुं द्वितीयः प्रपाठक आरभ्यते । प्रसङ्गागतञ्चान्यत् । तत्र तावत् "देव सवितः"—इति मन्त्रादूर्द्धं पाणिग्रहणलिङ्गामन्त्राः पठ्यन्ते । तद्विनियोगविवक्षया पाणिग्रहणमेव प्रथमं निरूप्यते,—

पुण्ये नक्षत्रे दारान् कुर्व्वीत ॥ १ ॥

पुण्ये शोभने, नक्षत्रे ऋक्षे । "उदगयने पूर्व्वपक्षे पुण्येऽहनि"—इति सिद्धत्वादेतदवाच्यम्—इति चेत् । न । दारकर्म्मणि तिथि-वारयोगकरणापेक्षया नक्षत्रस्यादरातिशयार्थत्वात् । दाराः गृहाः पञ्चालाः—इत्येवमादयो नित्यबहुवचनान्ताः शब्दाः पुंलिङ्गाः । दारान् सहधर्म्मचारिणीम्, पत्नीम्—इत्यनर्थान्तरम् । वक्ष्यमाणेन पाणिग्रहणविधिना कुर्व्वीत ॥ १ ॥ ० ॥

कीदृशान् दारान् कुर्व्वीत ? तदाह

लक्षणप्रशस्तान् कुशलेन ॥ २ ॥

प्रशस्तम् अवैधव्यादिसूचकं लक्षणं चिह्नं येषां, त इमे प्रशस्त-

लक्षणाः मन्त्रो व्यत्ययेन लक्षणप्रशस्ता इत्युच्यन्ते। तान्। लक्षणेन शोभनलक्षणेन प्रशस्तान् श्रेष्ठान्—इति वाऽर्थः। दारान् कुर्व्वीत—इति दारसम्बन्धविवक्षया इत्थं निर्देशः। कथमवगम्यन्ते लक्षणानि? तदुच्यते। कुशलेन स्त्रीलक्षणविदा। स्त्रीणां लक्षणानि शुभाशुभसूचकानि यो वेत्ति सोऽयं स्त्रीलक्षणविद् उच्यते। तेन परीक्षितान्—इत्यर्थः। तथाच स्मरणम्।

"सदा गृही सुखं भुङ्क्ते स्त्री लक्षणवती यदि।
अतः सुखसमृद्ध्यर्थमादौ लक्षणमीक्षयेत्"।

इति। इयमपरा सूत्रयोजना। लक्षणविदा कर्त्रा लक्षणेन शोभनलक्षणेन प्रशस्तान् अन्तर्भूतणिजर्थतया प्रशंसितान् दारान् कुर्व्वीत। लक्षणशब्दः शोभनलक्षणार्थोऽन्यत्रापि दृश्यते* ॥ १ ॥

---

* केचिदेतत्सूत्रानन्तरम्—"अनार्षशुल्करहिताम्"—इति सूत्रमधिकं पठन्ति। "आर्षशुल्कं गोमिथुनादि, तदितरशुल्कनीतां त्यजेत्"—इति व्याचक्षते च। तदिदं सूत्रमनार्षमिति प्रतिभाति। तथाहि। पूर्व्वं "दारान् कुर्व्वीत"—इति सूत्रयित्वा, तद्विशेषणत्वविवक्षयैव च—"लक्षणप्रशस्तान्"—इति, किमिति "अनार्षशुल्करहितान्"—इति नासूत्रयत्। "तदलाभे पिशाचान्"—इत्युत्तरं सूत्रमप्येवं सत्युपपद्यते। तत्र हि तच्छब्देन स्त्रीलक्षणविदः परामर्शः। एतच्चानयोरेव सूत्रयोरानन्तर्य्ये सुश्लिष्टं स्यात्। न पुनरन्तरा सूत्रान्तरेण व्यवधाने। अपिच। अनार्षशुल्करहिताम्—इत्यनेनार्षेऽपि गोमिथुनस्य शुल्करूपता प्रतीयते। सोऽयमर्थो न्यायविरुद्धो मनुविरुद्धश्च। तथाच मनुः।

"आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत्।
अल्पोऽप्येवं महान् वापि विक्रयस्तावदेव सः"।

इति। सूत्रपुस्तकेषु सर्व्वेष्वस्मदवलोकितेषु सोसाइटिभाष्यपुस्तकेषु च, अनार्षशुल्करहिताम्—इति सूत्रं न दृश्यते।

तदलाभे पिण्डान् ॥ ३ ॥

तदिति प्रकृतः स्त्रीलक्षणवित् परामृश्यते । तस्य स्त्रीलक्षणविदोऽलाभे पिण्डान् कुर्व्वीत ॥ ३ ॥ ० ॥

कुतो मृदमादाय पिण्डाः कर्त्तव्याः ? तदाह—

वेद्याः सीतायाः ह्रदाद्गोष्ठाच्चतुष्पथादादेवनादादहनादीरिणात् ॥ ४ ॥

वेदिरग्निष्टोमोदौ विहिता । सीता लाङ्गलपद्धतिरित्यर्थान्तरम् । कृष्टं चेत्यम्—इत्येके । ह्रदोऽगाधजलाशयो ग्रीष्मेऽपि यः शोषं नैति । गावो यत्र तिष्ठन्ति तद्गोष्ठम् । चतुष्पथः प्रसिद्धः । आदीव्यते यत्र तदादेवनं द्यूतस्थानम् । आदह्यते यत्र तदादहनं श्मशानम् । यत्रोप्तं बीजं न प्ररोहति तदीरिणम् ऊषरम्—इत्येकोऽर्थः । एतेभ्यो वेद्यादिस्थानेभ्यो मृदमादाय पृथगेव पिण्डान् कुर्व्वीत । पृथगिति कुतो वर्ण्यते ? असमासकरणादित्याह । सर्व्वेभ्यः सम्भार्य्यम्—इति चोत्तरव्याख्यानात् । एवं खल्वष्टौ पिण्डा भवन्ति ॥ ४ ॥ ० ॥

सर्व्वेभ्यः सम्भार्य्यं नवमम् ॥ ५ ॥

सर्व्वेभ्यो वेद्यादिस्थानेभ्यः स्तोकस्तोकां मृदं सम्भृत्याहृत्य क्रियते—इति सम्भार्य्यं नवमं पिण्डं कुर्व्वीत ॥ ५ ॥ ० ॥

समान् कृतलक्षणान् ॥ ६ ॥

समान् समानान् प्रमाणतः, कृतं लक्षणं येषां तान् कृतलक्षणांश्च

पिण्डान् कुर्व्वीत। लक्षणं चिह्नम्—इत्यनर्थान्तरम्। यतमः पिण्डो-यतमस्या मृदस्तच्चिह्नं कर्त्तव्यं वक्ष्यमाणार्थम् ॥ ६ ॥ ० ॥

ताम् खल्विमान् पिण्डान्—

पाणावाधाय कुमार्य्या उपनामयेदृतमेव प्रथमम्हतं नात्येति कश्चनर्त्ते इयं पृथिवी श्रिता सर्व्वमिदमसौ भूयादिति, तस्यानाम गृहीत्वैषामेकं गृहाणेति ब्रूयात् ॥ ७ ॥

स्वकीये पाणौ हस्ते आधाय कृत्वा कुमार्य्याः कन्यायाः उप समीपे नामयेत् स्थापयेत्, ऋतमेव प्रथमम्—इत्यनेन मन्त्रेणेतिकारान्तेनेत्यर्थः। किं कृत्वा ? असावित्यस्मिन् मन्त्रस्थाने तस्याः कुमार्य्या-नाम गृहीत्वा उच्चार्य्य। तेन 'सर्व्वमिदं गौरीदा भूयात्'—इत्येवमादिकः प्रयोगः। एवं स्थापयित्वा, पुनः, तस्या नाम गृहीत्वा योग्यत्वात् सम्बोधनविभक्त्या उच्चार्य्य—एषामेकं गृहाण—इति ब्रूयात्। 'गौरीदे! एषामेकं गृहाण'—इत्यादिः प्रयोगः। तदिदं तस्या नाम गृहीत्वेति मध्यपठितं मध्यमणिन्यायेनोभाभ्यां सम्बध्यते। अतएव गृहाणेति सम्बोध्यमानार्थापेक्षो मध्यमपुरुषोऽप्याख्यातेनोपपद्यते ॥ ७ ॥ ० ॥

पूर्व्वेषां चतुर्णां गृह्णन्तीमुपयच्छेत् ॥ ८ ॥

पूर्व्वेषां चतुर्णां वेदि-सीता-ह्रद-गोष्ठमृत्तिकानिर्म्मितानां पिण्डानाम्

एकतमं पिण्डं गृह्णन्तीं (छान्दसोऽयं प्रयोगः) गृह्णतीम् आददानां कुमारीमुपयच्छेत् विवाहयेदित्यर्थः ॥ ८ ॥ ० ॥

सम्भार्य्यमपि त्वेके ॥ ९ ॥

सम्भार्य्यमपि पिण्डमाददानामुपयच्छेदित्येके आचार्य्या मन्यन्ते। अस्मादेवावगम्यते,—सम्भार्य्यमाददानां नोपयच्छेदित्यन्ये मन्यन्ते—इति। तस्मात् सम्भार्य्यमाददानामिच्छयोपयच्छेद्वा न वोपयच्छेत् —इति सिद्धम्। किं कारणम्? शुभाशुभयोर्मिश्रत्वम्। कुतः पुनरेतत्? प्रत्येकशः फलार्थवाददर्शनात् सम्भार्य्यस्य च सर्व्व-घटितत्वात्। तथाच गृह्यासंग्रहः।

"वेदिपिण्डात् क्रियावती सीतायाः फलते कृषिः।
अचोभ्या च ह्रदे ज्ञेया गोष्ठे भवति गोमती।
चतुष्पथे प्रकीर्णा स्यात् द्यूतस्थाने कलिप्रिया।
श्मशाने म्रियते भर्त्ता वन्ध्या भवति चोषरे।
नवमे सर्व्व एवैते कन्यायाः परिगृह्यन्ते"।

इति। शाखान्तरेऽप्येवमेव प्रायः फलवादाः श्रूयन्ते। किन्तु तत्र क्रियावत्त्वादिकमपत्यगतमिति विशेषः। तथा चोक्तम्।

"गृह्णाना वेदिपिण्डञ्च प्रसूते याज्ञिकान् सुतान्।
सीतापिण्डन्तु गृह्णाना सुतान् सूते कृषीवलान्।
सर्व्वकामसमृद्धांश्च तृतीयस्य परिग्रहात्।
गोष्ठपिण्डग्रहाच्चापि गोमिनः सुखिनस्तथा।
इतश्चेतश्च गन्तारः पञ्चमेनान्विताः सुताः।

षष्ठेन तु गृहीतेन भवन्ति द्यूतसेविनः।
श्मशानपिण्डग्रहणाद्विधवा जायते ध्रुवम्।
वन्ध्या वा विधवा वा स्यादष्टमग्रहणादपि।
मिश्रमेतद्भवेत् सर्व्वं यतः पूर्व्वोदितं फलम्।
नवमस्य ग्रहस्तस्मात् शुभो वा यदि वाऽशुभः"।

इति ॥ ९ ॥ ० ॥

अथेदानीमासन्नविवाहायाः कन्यायाः स्नपनमभिधीयते,—

क्लीतकैर्यवैर्म्माषैर्व्वाऽऽप्लुताᳪ सुहृत् सुरोत्तमेन सशरीरां त्रिर्मूर्द्धन्यभिषिञ्चेत्—काम वेद ते नाम मदो नामासीति, समानयामुमिति पतिनाम गृह्णीयात्, स्वाहाकारान्ताभिरुपस्थमुत्तराभ्यां प्लावयेत् ॥ १० ॥

क्लीतकैः क्लिन्नकैः चूर्णीकृत्योदकेन द्रवीकृतैरित्येतत्। कैः? यवैर्माषैर्व्वा। यवमाषौ प्रसिद्धौ। वाशब्दो विकल्पार्थः। "मसूरयवमाषाणां श्लक्ष्णचूर्णान्येकीकृत्य"—इति भवदेवभट्टवचनमप्रमाणम्। तदेभिर्यवैर्माषैर्व्वा आप्लुतां कृतसर्व्वाङ्गोद्वर्त्तनां, सुहृत् मित्रं स्निग्धहृदयः—इत्यनर्थान्तरम्। सह शरीरेण वर्त्तमानां कन्यां मूर्द्धनि शिरसि त्रिर्व्वारत्रयम् अभिषिञ्चेत्। मूर्द्धनि तथाऽभिषेक्तव्यं यथा सर्व्वमेव शरीरमभिषिक्तं भवतीत्यर्थः। केन अभिषिञ्चेत्? सुरोत्तमेन। धरुणा सुराऽररिन्दानीत्युदकनामसु नैघण्टुककाण्डे पाठादुदकनामैतत्—यत् सुरेति। तदयमर्थः। उदकेन

उत्तमेन शोभनगन्धवर्णादियुक्तेन अभिषिञ्चेत्। सुरैव कस्मान्नोच्यते ? उच्यते। सुरा हि नामात्यन्तमपवित्रं यदस्याः प्राणस्पर्शयोरपि प्रायश्चित्तमुपदिशन्ति। तथाच स्मर्य्यते।

"सुराया गन्धमाघ्राय स्नात्वाऽऽज्यं प्राश्य शुध्यति।
स्पर्शे प्रतिग्रहे चैव त्र्यहं पीत्वा तथोदकम्"।

इति। "सुरापानसमं तैलम्"—इति च सुरापानस्यात्यन्तनिन्द्यतां दर्शयति। वचनबलाददोषः ?—इति चेत्। न। अन्यथोपपत्तेः। अन्यथाऽपि वचनमुपपद्यते—इति नास्ति वचनस्य बलम्। न खल्वविरोधेन सम्भवति वचनार्थे विरुद्धमर्थं प्रकल्प्य वचनबलाददोषः—इतीयं कल्पना साधीयसी भवति। अन्यथोपपन्नञ्च वचनं न सामान्यस्यापि शास्त्रस्य बाधकं भवितुमर्हति—इति चमसिनां शेषभक्षाधिकरणे दर्शितम्। तस्मादुदकेनैवाभिषेकः। तथाच गृह्यासंग्रहः।

"सर्व्वयज्ञेषु विप्राणामद्भिः पूर्व्वं प्रवर्त्तते।
तस्मात् सुरोत्तमा ह्यापो अद्भिरेवाभिषेचयेत्"॥

इति। किं तूष्णीमभिषिञ्चेत् ? न। कथं तर्हि ? काम वेद ते नाम मदोनामासि—इत्येवमादिभिः ऋग्भिः। कतिभिः ऋग्भिः ? स्वाहाकारान्ताभिः। अस्मिन् प्रदेशे स्वाहाकारान्ता यावत्य ऋचः सन्ति तावतीभिः,—तिसृभिरित्यर्थः। तस्मादेकैकामृचमुच्चार्य्य एकैकोऽभिषेकः कर्त्तव्यः। उत्तराभ्यान्तु द्वाभ्याम् ऋग्भ्याम् उपस्थं योनिं प्लावयेत्। एतदुक्तं भवति। तिसृभिरेव ऋग्भिः तथा शिरस्यभिषेकः कर्त्तव्यो यथा सर्व्वं शरीरमभिषिक्तं भवति, परसुत्तराभ्यां

तथाऽभिषेक्तव्यं यथोपस्थो विशेषतः प्लावितो भवति—इति। अथेदानीं मन्त्रे विशेषमाह। समानयामुमित्यत्र अमुमित्यस्मिन् मन्त्रस्थाने समानयामुकमित्यभिषेक्तव्यायाः कन्यायाः भविष्यतः पत्युर्नाम गृह्णीयात् उच्चारयेत्। तदिदं सूत्रमसृत्य पाठक्रममनुसृत्यार्थक्रमं व्याख्यातम् ॥ १० ॥ ० ॥

ज्ञातिकर्म्मैतत् ॥ ११ ॥

एतत् कन्यास्नपनं ज्ञातेर्मातापित्रोरन्यस्य कुलीनस्य सुहृदः कर्म्म। ज्ञातिकर्म्मत्वादेवेदं नातीवावश्यकमित्यवगम्यते। एवमेके। अयञ्चाभिषेको दौर्भाग्यालक्ष्म्युपसर्गाणां नोदनार्थे शाखान्तरेष्वपि पठ्यते, तस्मात् प्रयत्नतः कर्त्तव्यः। एवमन्ये। तदत्र भगवन्तो-भूमिदेवाः प्रमाणम् ॥ ११ ॥ ० ॥

अथेदानीं पाणिग्रहणमभिधीयते,—

पाणिग्रहणे पुरस्ताच्छालाया अग्निरुपसमाहितो-भवति ॥ १२ ॥

पाणिग्रहणे कर्म्मणि प्रक्रान्ते पुरस्तादग्रतः शालायाः गृहस्य—चत्वर इत्यर्थः। अग्निरुपसमाहितः स्थापितो भवति, पूर्व्वोक्तामावृतं कृत्वा। अनुपदेशात् कर्त्तुरनियमः। तेन यावद्वरो वधूमादाय गृहान्निष्क्रम्यागच्छति, तावदन्य एव कश्चिदग्निं स्थापयति। आवृतमपि स एव करोति। अतएव सूत्रयिष्यति—"बर्हिषोऽन्तं कटान्तं प्रापयेत्"—इति।

यद्यप्याचार्य्येण कन्याप्रदानं प्रतिग्रहश्च न सूचितम्, तथापि "अलङ्कृत्य कन्यामुदकपूर्वां दद्यात्"—इत्येवमादिग्रह्यान्तरदर्शनात् तदप्यादरणीयम्। पाणिग्रहणे शिष्यजिज्ञासा समुत्कटेति तन्निरचिमिषया क्रमप्राप्तानां पाणिग्रहणलिङ्गानां मन्त्राणां विनियोगविवक्षया वा खल्वाचार्य्यैतदेव सूचयाञ्चकार, न कन्याप्रदानम्—इति चिन्त्यते। प्रदानञ्चेदं कन्यादातुः कर्म्म, न प्रतिग्रहीतुः। प्रतिग्रहोऽपि दानाधीन एव ॥ १२ ॥ ० ॥

अथ जन्यानामेको ध्रुवाणामपां कलसं पूरयित्वा सहोदकुम्भः प्रावृतो वाग्यतोऽग्रेणाग्निं परिक्रम्य दक्षिणत उदङ्मुखोऽवतिष्ठते ॥ १३ ॥

अथानन्तरं स्थापितेऽग्नावित्यर्थः। जन्याः नवोढ़ाज्ञातयो वरस्निग्धा वा। तेषामेकोऽन्यतमः ध्रुवाणां सन्ततानां सम्यग्विसृतानाम्,—

"महानदीषु या आपः कौप्यान्यास्च ह्रदेषु च।
गन्धवर्णरसैर्युक्ता ध्रुवास्ता इति निश्चयः" ॥

इति गृह्यासंग्रहोक्तलक्षणानाम्। अपां, ध्रुवाभिरद्भिरित्येतत्। कलसं कुम्भं पूरयित्वा वर्द्धयित्वा, सह उदकुम्भेन उदकपूरितेन कुम्भेन वर्त्तमानः—तमादायेत्यर्थः। प्रावृतो वस्त्रेणाच्छादितः। कृतोष्णीषः- इत्यन्ये। वस्तुतस्तु, प्रावृत इत्यनेन प्रावृतांसोऽभिप्रेयते। स खल्वयं गन्धमाल्यैरुदकुम्भमलङ्कृत्य धारयेत्। तथाच गृह्यासंग्रहः।

"गन्धमाल्यैरलङ्कृत्य सकुम्भो वाग्यतः शुचिः।

धारयेत्त्रिषु वर्णेषु प्रावृतांसो द्विजोत्तम" ॥

इति। 'वाग्यतोऽग्रेणाग्निं परिक्रम्य'—इति सूत्रभाष्यम्। दक्षिणतो दक्षिणस्यां दिश्यग्नेः ब्रह्मासनं परित्यज्य इत्यर्थाक्षयते। उदङ्मुखः कौवेरीदिगभिमुखः अवतिष्ठते ऊर्द्ध्वमिष्ठति। अपूर्वस्थितिरनुपविष्टतां बोधयति। अत्रापि वाग्यमनलोपे पूर्वोक्तमेव प्रायश्चित्तं, कारणस्याविशेषात्—इति द्रष्टव्यम्। एवमन्यत्रापि ॥ १३ ॥ ० ॥

प्राजनेनान्यः ॥ १४ ॥

प्राजनेन सह प्रतोदेन अन्यः कुम्भधारिणोऽपरः जन्यः प्रावृतो वाग्यतोऽग्रेणाग्निं परिक्रम्य दक्षिणत उदङ्मुखोऽवतिष्ठते ॥ १४ ॥ ० ॥

शमीपलाशमिश्रांश्च लाजांश्चतुरञ्जलिमात्रान् सूर्पेणोपसादयन्ति पश्चादग्नेः ॥ १५ ॥

शमी प्रसिद्धा। तस्याः पलाशानि पत्राणि, तन्मिश्रान् लाजान्—

"अक्षतास्तु यवाः प्रोक्ता भ्रष्टा धाना भवन्ति ते।
भ्रष्टास्तु व्रीहयो लाजा घटा याष्टिक उच्यते" ॥

इत्युक्तलक्षणान्। चत्वारोऽञ्जलयः परिमाणमेषाम्—इति चतुरञ्जलिमात्रान्। परिमाणे मात्रट्। यावद्भिश्चत्वारोऽञ्जलयः पूर्यन्ते तावतः—इत्येतत्। सूर्पेणोपसादयन्ति सूर्पस्थान् कृत्वा स्थापयन्ति पश्चादग्नेः। बहुवचनात् कर्त्तुरनियमः। चः समुच्चये पूर्वोक्तमेव समुच्चिनोति ॥ १५ ॥ ० ॥

दृशत्पुत्रश्च ॥ १६ ॥

दृशत् शिला पेषणाधारात्मिका, पुत्रश्चोपलः पेषणकरणस्वरूपः। सा च स चेतिद्वन्द्वेकवद्भावः तच्चोपसादयन्ति पश्चादग्नेः। कुतः पुनः पुत्र उपल इति वर्ण्यते? सन्निधानादित्याह। सन्निहितैव दृशज्जातिरागच्छति हृदयमिति सैव पुत्रस्यापि कल्पयितुमुचिता। श्लोकमपि उदाहरन्ति।

"प्रसिद्धार्थस्य सान्निध्ये योऽप्रसिद्धार्थं उच्यते।
तत्सन्निधानसामर्थ्यात्तज्जातीयोऽवगम्यते" ॥

इति। दृशज्जातीयपुत्रस्यैवासादनं न तु दृशदः पुत्रस्य च—इति वा व्याख्येयम् ॥ १६ ॥ ० ॥

अथ यस्याः पाणिं ग्रहीष्यन् भवति सशिरस्का साऽऽप्लुता भवति ॥ १७ ॥

अथेति पूर्वोक्ताभिषेकानन्तरमिदानीमाप्लवनान्तरं दर्शयति। यस्याः कन्यायाः पाणिं ग्रहीष्यन् ग्रहीतुमिच्छन् भवति—ग्रहीष्यति वरः, सा कन्या सशिरस्का आप्लुता अविधवोपनीतमङ्गलोदकैः स्नाता भवति। अस्मिंश्चाप्लवने,

"सवर्णाभिरनिन्द्याभिरद्भिरक्षतमिश्रितैः।
स्नानं चतुर्भिः कलसैः स्त्रीभिः स्त्रीं यत्र प्लावनम्" ॥

इति गृह्यासंग्रहोक्तो विशेषो द्रष्टव्यः ॥ १७ ॥ ० ॥

अहतेन वसनेन पतिः परिदध्याद्,—या अकृन्तन्नित्येतयर्चा, परिधत्त धत्त वाससेति च ॥ १८ ॥

अहतेनाक्षुण्णेनाखण्डितेन यन्त्रनिर्मुक्तेन नवेनेत्यर्थः। आह-

तेन—इति केचित् पठन्ति। तदनाकरम्। वसनेन वाससा, पतिः यस्याः पाणिं गृहीष्यन् भवति तां परिदध्यात् अन्तर्भूतणिजर्थतया परिधापयेत् संयोजयेत्—अहतं वाससा परिधापयेदित्यर्थः। अत-एव परिधत्त—इति, परिधत्त—इति च मन्त्रलिङ्गमनुगृह्यते। गृह्यान्तरे परिधापनोपदेशाच्चैवमवगन्तव्यम्। तच्चोदाहरिष्यामः। वरस्य परिधापनोपदेशादेव वध्वाः परिधानमप्याक्षिप्यते। तद्विना तदनुपपत्तेः। आचार्य्यस्याध्यापनविधिनेव माणवकस्याध्ययनमप्या-क्षिप्यते—इति यद्वत्। या अकृन्तन्नित्येतया ऋचा, परिधत्त धत्त वाससा—इति मन्त्रेण च परिदध्यादिति गतेन सम्बन्धः। अथ एतया—इत्यवाच्यम्?—इति चेत्। न। स्वरवर्णनियमार्थत्वात्। कथं नाम? एतया एतद्भूतस्वरवर्णयैव न तु व्यत्यस्तस्वरवर्णयेत्यर्थः। तदनेन स्वरवर्णसम्पादनार्थमवश्यं यतितव्यम्—इति दर्शयति। तथा चोक्तम्।

> "मन्त्रो हीनः स्वरतो वर्णतो वा
> मिथ्याप्रयुक्तो न तमर्थमाह।
> स वाग्वज्रो यजमानं हिनस्ति
> यथेन्द्रशत्रुः स्वरतोऽपराधात्" ॥

इति। अत्र किञ्चिद्वक्तव्यमस्ति। द्वयी खल्वत्र परिधापनक्रिया-ऽवधार्य्यते। कस्मात्? भेदेनोपदेशात्। 'एतयर्चा'—इति, 'इति च'—इति चानयोर्मन्त्रयोर्भेदेनोपदेशो विभिन्नक्रियाविनियोगं मन्त्रयोरवगमयति। यदि पुनरेकस्यामेव परिधापनक्रियायामुभयो-र्विनियोगोऽभिप्रेयेत, तद्व्यर्थं भेदोपदेशेन। तस्मादसनद्वयपरिधापने

मन्त्रद्वयस्य विनियोगः—इत्यादिमो मन्त्रोऽधरीयवसनपरिधापने, ऽन्तिमश्चोत्तरीयवसनपरिधापने करणम्—इति शिष्यते। गृह्या-न्तरे चोपदेशात्। गृह्यान्तरे च वसनद्वयस्य—अधरीयस्य उत्तरी-यस्य च परिधापनमुपदिश्यते—इतीहापि तथैव वर्णयितुमुचितम्। तथाच गृह्यान्तरम्। "अथैनां वासः परिधापयति"—इति। "अथोत्तरीयम"—इति च।

"द्विकच्छः कच्छशेषश्च मुक्तकच्छस्तथैवच।
एकवासा अवासाश्च नग्नः पञ्चविधः स्मृतः" ॥

इत्येकवाससोनग्नत्वस्मरणाच्चैतदवगन्तव्यम् ॥ १८ ॥ ० ॥

प्रावृतां यज्ञोपवीतिनीमभ्युदानयन् जपेत्—सोमो-ददद्गन्धर्व्वायेति ॥ १९ ॥

प्रावृतां कृतोत्तरीयाम्। कथं प्रावृताम्? यज्ञोपवीतिनीं यज्ञोपवीतिनीमिव, यज्ञोपवीतवत् कृतोत्तरीयामित्यर्थः।

एवं वा—

प्रावृतां प्रकर्षेणावृताम् आच्छादिताम्,—"न नाभिं दर्शयेत् कुलवधूरागुल्फाभ्यां वासः परिदध्यात् न स्तनौ विवृतौ कुर्य्यात्"—इति कुलकरीत्या परिहिताधरीयवसनाम्—इत्येतत्। यज्ञोपवीतं यज्ञोपवीतवत् विन्यासविशिष्टमुत्तरीयं, तत् यस्या अस्ति, सेयं यज्ञोपवीतिनी, ताम्। यज्ञोपवीतवत् परिहितोत्तरीयवसनामि-त्यर्थः। तदाभ्यां पदाभ्यां पूर्व्वं सूचितयोर्वाससोर्विन्यासविशेषमिह

दर्शयति। यज्ञोपवीतपदञ्चोत्तरीयेऽपि प्रयुज्यते विन्यासविशेष-लाभार्थम्—इति पुरस्तादभिहितमस्माभिः।

यज्ञोपवीतवतीभिरेव कुतो न वर्त्तते? तदभावादित्याह। न खल्वस्ति योषितां यज्ञोपवीतं, येनानूद्येत। अनुमीयतामिति चेत्। स्यान्मतम्, अस्मादेवानुवादात् योषितामपि यज्ञोपवीतमनुमीय-ताम्। न। अन्यथोपपत्तेः। अन्यथैवोपपन्नोऽयमनुवादो न विधि-मनुमापयितुमलम्। अनन्यथासिद्धः खल्वनुवादो विधिमनुमाप-यति। सिद्धवदुपदेशाच्चासिद्धिः। सिद्धवत् खल्वेतदुपदिश्यते—यज्ञोपवीतिनीम्—इति। सिद्धं खल्वासां यज्ञोपवीतशब्दमुत्तरीयं न यज्ञोपवीतम्। तस्मादसिद्धिर्योषितां यज्ञोपवीतस्य।

नच ब्रूमः। यज्ञोपवीतिनीमित्यस्य यज्ञोपवीतवतीमित्ययमेवार्थः शब्दस्य श्रवणमात्रादवगम्यते। स खल्वयमर्थः श्रुत्याऽवगम्यते इति न युज्यते विना कारणमुत्स्रष्टुम्। यज्ञोपवीतवद्विन्यास-विशिष्टे चोत्तरीये यज्ञोपवीतशब्दो गौणः। न चात्र लक्षणाकारण-मस्ति। प्रमाणान्तरावगम्या हि सा न खल्वपि प्रमाणान्तराभावे भेत्तुमर्हति। न चात्र प्रमाणान्तरमस्ति। तथा चोक्तम्।

"गौणे यदपि सामर्थ्यं न प्रमाणान्तरं विना।
आविर्भवति मुख्ये तु शब्दादेवाविरस्ति तत्॥
तात्पर्य्यञ्च स्वतो मुख्ये गौणार्थपरता पुनः।
प्रमाणान्तरविज्ञेया तदभावान्न सिध्यति"॥

इति। योषितां यज्ञोपवीताभावादनुवादानुपपत्तिरिति चेत्। न। प्रावृतामित्यनुवादेन प्रावरणस्येव यज्ञोपवीतिनीमित्यनुवादेन

यज्ञोपवीतस्यापि विध्यनुमानोपपत्तेः। अग्निमेऽपि सूत्रे अनुवादाद्विधेरनुमाने न विवादः। अन्यथोपपत्तेरिति चेत्। इति चेत् भवान् पश्यति, अन्यथाऽपि उत्तरीये गौणतयाऽप्युपपद्यमानोऽयमनुवादो न विधिमनुमापयितुमर्हतीति। तन्न; गौणतायाः प्रमाणाभावेनासम्भवात्,—इत्युक्तमादावेव। एतेन सिद्धवदुपदेशोऽपि व्याख्यातः। अपिच पुराकल्पे किल पुंसामिव योषितामपि यज्ञोपवीतमासीत्। तदाह यमः।

"पुराकल्पे कुमारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनं च वेदानां सावित्रीवचनं तथा॥
पिता पितृव्यो भ्राता वा नैनामध्यापयेत् परः।
स्वगृहे चैव कन्याया भैक्षचर्य्या विधीयते॥
वर्ज्जयेदजिनं चीरं जटाधारणमेवच"।

इति। तथा हारीतः। "द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च"—इति। तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे भिक्षाचर्य्या इति। वधूनां तूपस्थिते विवाहे कथञ्चिदुपनयनमात्रं कृत्वा विवाहः कर्त्तव्य इति माधवाचार्य्याः। तस्मात्, यज्ञोपवीतिनीमित्यस्य यज्ञोपवीतवतीमिति यथाश्रुत एवार्थ आदरणीयः॥

तामिमां प्रावृतां यज्ञोपवीतिनीं वधूं अभ्युदानयन्—"पिता प्रत्तामादाय गृहीत्वा निष्क्रामयति"—इति गृह्यान्तरदर्शनात् करेण करे गृहीत्वा गृहादग्नेरभिमुखीमानयन् जपेत् पतिः—सोमोऽददिदित्येतं मन्त्रम्॥ १९॥ ०॥

पश्चादग्नेः संवेष्टितं कटमेवंजातीयं वाऽन्यत् पदा प्रवर्त्तयन्तीं वाचयेत्—प्र मे पतियानः पन्थाः कल्पतामिति ॥ २० ॥

पश्चादग्नेरित्युक्तार्थम्। संवेष्टितं सम्यग्वेष्टितमधस्तोपरि च पार्श्वे चाच्छादितमहतेन वसनेनेत्यर्थः। कटं, कटः प्रसिद्धः वीरणपर्य्यैर्व्यते। तस्य खल्वसम्भवे एवंजातीयं तृणजातीयम् अन्यद्वा किञ्चित् तृणवेष्टकादि, पदा चरणेन प्रवर्त्तयन्तीं प्रसारयन्तीम्—अग्निसमीपं नयन्तीं वधूं वाचयेत् भाषयेत् पतिः। किं वाचयेत्? प्र मे पतियानः—इत्येतं मन्त्रम्। गतमन्यत्। अत्रानुवादाद्विधिरनुमीयते,—वरवध्वोरुपवेशनार्थं कटः कर्त्तव्यः इति। कर्त्तुश्चानियमः। एतदुक्तं भवति, वरेण नीयमाना वधूः चरणेन कटं प्रसार्य्याग्निसमीपं नयत्युपवेशनार्थम्, मन्त्रञ्च तत्कालमेव पठति—इति। अत्र विशेषमाह गृह्यासंग्रहः।

"यदा निष्क्रामयेत् कन्यां वरः पाणिं जिघृक्षयन्।
अग्निं प्रदक्षिणं कृत्वा कटप्रान्तीणं पदं नयेत्।
पदा प्रपद्य पन्थानं पतियानं जपेद्वधूः।
वरो वाऽत्र जपेन्मन्त्रमा कटान्तादिति स्थितिः"।

इति ॥ २० ॥ ० ॥

स्वयं जपेदजपन्त्यां प्रास्यादिति ॥ २१ ॥

लज्जया अन्येन वा केनचित् कारणेन तं मन्त्रमजपन्त्यां वध्वां पतिः स्वयमेव जपेत्। तत्र च, प्र मे—इत्येतस्मिन् मन्त्रस्थाने प्रास्यादित्येष विशेषः कार्य्यः ॥ २१ ॥ ० ॥

पदा प्रवर्त्तयन्तीति क्रम। तत् कियन्तं प्रवर्त्तयेत् ? उच्यते,—

बर्हिषोऽन्तं कटान्तं प्रापयेत् ॥ २२ ॥

बर्हिषः—इति जात्याश्रयमेकवचनम्। बर्हिषाम् आस्तृतानामन्तं कटस्यान्तं प्रापयेत्। अयमर्थः। कटस्तथा पदा प्रवर्त्तयितव्यो वध्वा, यथा तदन्तभाग आस्तृतबर्हिषां किञ्चिदुपरि स्यादिति। तस्मादवगच्छामः,—यावद्वासः परिधाप्य वरो वधूमादायागच्छति, तावद्बर्हिरास्तरणादिका सर्व्वाऽप्याहुदन्येनैव कर्त्तव्या—इति।

रघुनन्दनस्त्वाह—"अन्तशब्दौ समीपवचनौ, आस्तृतबर्हिषां कटस्य च समीपं देशं—कटबर्हिषोरन्तरालरूपं वधूं प्रापयेत् पतिः"—इति। तदसङ्गतम्। उपात्तं कर्त्तृद्वयमुत्क्रम्यानुषङ्गेन वध्वाः कर्म्मत्वकल्पनाऽनौचित्यात्। नाप्यन्तरालदेशं गतया वध्वा किञ्चित् प्रयोजनमस्ति। उपविष्टया खल्वेतथा प्रयोजनम्। "प्रापयेत्"—इत्यत्र "प्रेरयेत्"—इति केचित् पठन्ति। तदापि तथैवार्थः ॥ २२ ॥ ० ॥

एवं वरगृहीतकरा वधूरागत्य,—

पूर्व्वे कटान्ते दक्षिणतः पाणिग्राहस्योपविशति ॥ २३ ॥

पूर्वे कटान्ते कटस्य पूर्वस्मिन् भागे दक्षिणतोदक्षिणस्यां दिशि उपविशति। कस्य दक्षिणतः ? पाणिग्राहस्य। यः पाणिमस्याग्रहीष्यति, तस्य ॥ २३ ॥ ० ॥

दक्षिणेन पाणिना दक्षिणमंसमन्वारब्धायाः षडाज्याहुतीर्जुहोत्यग्निरेतु प्रथम इत्येतत्प्रभृतिभिः ॥ २४ ॥

दक्षिणेन सव्येतरेण। वामाचारा योषितः—इति ख्यापयते।

तस्मात् सन्निहितत्वाच्च सव्येनैवेदमन्वारम्भणं मा भूदिति कृत्वाचार्य्यो दक्षिणेनेत्याह। अन्वारब्धायाः—इति कर्त्तरि निष्ठा। षष्ठी चेयं सम्बन्धार्था। तदयमर्थः। दक्षिणेन पाणिना दक्षिणमंसं स्पृष्ट्वं वरस्येत्यर्थात्। अन्वारब्धायाः अन्वारभमाणायां वध्वां, पाणिग्राहः षड़ाज्याहुतीः षट्संख्याका आज्यहविष्का आहुतीर्जुहोति, अग्निरेतु—इत्येवमादिभिः षड्भिर्मन्त्रैः। होमस्य कृत्स्नाज्यहविष्कतया आज्यतन्त्रविहितो महाव्याहृतिहोमः पुरस्तादपि भवति। आज्यभागौ स्विष्टकृच्च न भवतीत्यवगन्तव्यम ॥२४॥०॥

महाव्याहृतिभिश्च पृथक् ॥ २५ ॥

महाव्याहृतिभिर्व्यस्ताभिः, अतएव पृथक् नानेत्यनर्थान्तरम्। एकैकशः—इत्येतत्। आज्याहुतीर्जुहोतीत्यनुवर्त्तते। एवं खलु तिस्र आहुतयो भवन्ति ॥ २५ ॥ ० ॥

समस्ताभिश्चतुर्थीम् ॥ २६ ॥

समस्ताभिर्महाव्याहृतिभिश्चतुर्थीमाज्याहुतिं जुहोति। सेयं संख्या महाव्याहृतिहोमापेक्षया बोद्धव्या। ताः हुकेताश्चतस्र आहुतयः षड़ाहुतीनां परस्तात् भवन्ति। कुतः? तथैवोपदेशात् ॥ २६ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये द्वितीयप्रपाठकस्य प्रथमा खण्डिका ॥ ० ॥

गोभिलीयगृह्यसूत्रे

द्वितीयप्रपाठके द्वितीया खण्डिका।

हुत्वोपोत्तिष्ठतः ॥ १ ॥

उपेति संहतहस्तत्वमुच्यते। तदनेन होमानन्तरं दम्पत्यो-रञ्जलिकरणमुपदिशति। विनियोगस्तु तस्योत्तरसूत्रे वच्यते। हुत्वा संहतहस्तौ दम्पती उत्तिष्ठतः। 'उप'—इत्यत्र, 'उपेत्य'—इति केचित् पठन्ति। उपेत्य अञ्जलिं बध्वा—इति व्याचक्षते च। आह। एककर्त्तृकत्वाभावात् कथं हुत्वेति क्वाप्रत्ययः? पाणिग्राहो हि जुहोति। उच्यते। पूर्व्वापरीभावमात्रमत्र क्वाप्रत्ययार्थः, न त्वेक-कर्त्तृकत्वमपि। तथाप्येव दृश्यते—"आज्याहुतिं हुत्वा मुख्यं धनं दद्यात्"—इत्येवमादौ बहुलम्। अत्र खल्वन्यो जुहोति, अन्यश्च ददाति। अध्वर्य्युर्हि जुहोति, यजमानश्च ददाति। होमं कुर्व्वाणस्य पत्युरंसमन्वारभमाणा वधूरपि कयाचिद्विवचया होमानुकूलचेष्टा-वती भवति—इत्यस्ति समानकर्त्तृकत्वम्—इति तत्त्वकारः।

अथ हुत्वेत्येतदवाच्यं नन्वभिधानादेव तत् प्राप्यते—इति चेत्। न। हुत्वा अनन्तरमेवोत्तिष्ठतः न तु तन्त्रसमापनादिकमपि कृत्वा—इत्येवमर्थत्वात् ॥ १ ॥ ० ॥

अनुपृष्ठं पतिः परिक्रम्य दक्षिणत उदङ्मुखोऽवति-ष्ठते वध्वञ्जलिं गृहीत्वा ॥ २ ॥

पृष्ठम् अनु लक्ष्मीकृत्य अनुपृष्ठं, बध्वा इत्यत्र। बध्वाः पृष्ठतः

पश्चिमया दिशा पतिः परिक्रम्य गत्वा, दक्षिणतो वध्वा एव, उद-ङ्मुखोऽवतिष्ठते ऊर्द्ध्वस्तिष्ठति हत्वा? वध्वञ्जलिं गृहीत्वा, स्वेनाञ्जलिना—इति भट्टनारायणभवदेवभट्टादयः। पूर्व्वमञ्जलि-करणमनयोः सूचितं तदुभयमेवमुपपद्यते। रघुनन्दनस्त्वाह—"वध्वञ्जलिं दक्षिणेन पाणिना गृहीत्वा"—इति। तदत्र पत्यु-रञ्जलिकरणस्यार्थवत्तां न पश्यामः।

स खल्वयमञ्जलिः पाणिग्रहणपर्य्यन्तं स्थास्यति। पतिश्च तावन्तं कालममुमञ्जलिमनापत्सु न त्यजेत्। तथाच गृह्यान्तरम्।

"कृत्वाऽऽज्यमथ जायाया अन्वारभ्याञ्जलिं पतिः।
न विमुञ्चेदनापत्सु यावत् पाणिग्रहो जपः"॥

इति ॥२॥०॥

पूर्व्वा माता लाजानादाय भ्राता वा वधूमाक्रा-मयेदश्मानं दक्षिणेन प्रपदेन ॥ ३ ॥

पूर्व्वा पूर्व्वदिश्यवस्थिता—इत्यर्थः। यत्तु—'पूर्व्वमातेत्येकं पदम्, पूर्व्वदिश्यवस्थिताया वध्वा एव माता'—इति। तदसुन्दरम्। समा-नाधिकरण्येनान्वयसम्भवे वैयधिकरण्येनान्वयानौचित्यस्य उद्भिदा-द्यधिकरणे दर्शितत्वात्। यच्च वर्णयन्ति—'पूर्व्वा बह्वीनां मातॄणां मध्ये या प्रथमा माता'—इति। तदप्यसङ्गतम्। असुख्यत्वापत्तेः। जनन्यां हि मातृशब्दं स्मरन्ति। सा त्वेकैव। मातृपदस्य पितृ-पत्नीपरत्वे च लक्षणाप्रसङ्गः। स चान्याय्यः। यः पुनरेवं समा-धत्ते—'एकमातृकायां पूर्व्वापदस्यानर्थक्यप्रसङ्गात्'—इति। सोऽप्यने-

नैव निरस्तः। किञ्च। स तावदविद्यमानमातृकायां मातृपद-
स्यार्थतत्त्वं पर्य्यनुयोक्तव्यः। तावतैव तूष्णीमासिष्यते।

सूत्रमिदानीं योज्यते। पूर्व्वदिश्यवस्थिता जननी भ्राता एक-
पितृजातो वा पूर्व्वदिश्यवस्थित एव। अन्यो वा ब्राह्मणः कश्चित्—
इति भवदेवरघुनन्दनौ। वधूं अश्मानम् आक्रामयेत्, दक्षिणेन
प्रपदेन पदापयेदित्यर्थः। किं कृत्वा? लाजान् शूर्पस्थितान् आदाय
गृहीत्वा। सव्येन पाणिना लाजान् शूर्पेण गृहीत्वा दक्षिणेन वधू-
मश्मानमाक्रामयेत्—इति भट्टभाष्यम्। अन्ये त्वाहुः—अञ्जलिनैव
लाजानादाय वधूमाक्रामयेत्—इति। अश्मानमाक्रामयेत् इति वच-
नादवगम्यते,—वध्वा अग्रतोऽश्मा निधातव्यः—इति ॥ ३ ॥ ० ॥

तया चाश्मन्याक्रम्यमाणे—

पाणिग्रहो जपति,—इममश्मानमारोहेति ॥ ४ ॥

स्पष्टार्थम् ॥ ४ ॥ ० ॥

सकृत् संगृहीतं लाजानामञ्जलिं भ्राता वध्वञ्जला-वावपति ॥ ५ ॥

सकृदेकवारं संगृहीतं सम्यक् गृहीतं, यथा न विकीर्य्यते तथा
गृहीतम्—इत्यर्थः। 'संगृहीतं कृत्वा'—इति केचित् पठन्ति। अकि-
रन् इत्यर्थः—इति वर्णयन्ति च। 'लाजानामञ्जलिम्' अञ्जलि-
परिमितान् लाजान्—इत्येतत्। लाजाञ्जलिम्—इति पाठेऽपि
तथैवार्थः। 'वध्वञ्जलौ' 'आवपति' ददाति। कः? भ्राता। माता
वा। कुतः? पूर्व्वत्र विकल्पश्रवणात्। अभावे चान्योऽपि ब्राह्मणः।

कस्मात्? कर्म्मणः प्रधानत्वात्। होमः खल्वत्र प्रधानं, तद्द्वारापो- गुणभावेनोपकरोति, तमपि भ्राता माता वा। न खलु गुणस्य गुणानुरोधेन प्रधानमेव न कर्त्तव्यम्—इति युक्तम्। मुख्यं कथं सगुणं स्यात्—इति खल्वमी गुणेषु प्रवर्त्तन्ते। स यदि गुणस्य गुणं विनिपातयति,—नास्य किञ्चिद्धीयते। न ह्यसौ गुणं सगुणं कर्त्तुं प्रवृत्तः। अथ यदि गुणं सगुणं कुर्व्वाणः प्रधानं विनिपातयति, स्वार्थोऽस्य हीयते,—अनर्थिका ह्यस्य प्रवृत्तिः स्यात्। तस्मादन्योऽप्या- वपेदिति सिद्धम्। भ्राता—इत्यत्र माता भ्रात्रादिर्व्वा—इति केचित् पठन्ति, तदा व्यक्त एवार्थः॥ ५॥ ०॥

तꣳ सोपस्तीर्णाभिघारितमग्नौ जुहोत्यविच्छिन्दत्य- ञ्जलिम्—इयं नार्य्युपब्रूते—इति॥ ६॥

तं लाजाञ्जलिं सोपस्तीर्णाभिघारितम्—उपस्तीर्णञ्च अभि- घारितञ्च उपस्तीर्णाभिघारितं तत्सहितम्—इत्यर्थः। तस्मात् लाजावापस्य पुरस्ताच्चोपरिष्टाच्च एतत्स्रुवेणाज्यावयितव्यम्। तत्र लाजानां सकृत्स्मात्रावापस्य सूचितत्वात् चौथ्याज्यावनान्यपेक्षितानि चतुरवत्तिनाम, अन्येषाञ्च चत्वारि। चतुरवत्तिनां तावत् पुरस्ता- देकमाज्यावनं परस्तात् द्वे आज्यावने। अन्येषान्तु पुरस्ताद्‌द्व्याज्यावन- द्वयं परस्तादपि। कस्मात्? छिद्रहृदवदाने तथा दर्शनात्।

सोपस्तीर्णाभिघारितम्—इत्युच्यते, न ज्ञायते,—कोवा उपस्तृ- णुयात् कोवा अभिघारयेत्?—इति। तद्वक्तव्यम्। उच्यते। माता भ्राता वा उपस्तृणुयात् अभिघारयेच्च। कस्मात्? यस्मात् लाजा-

वापे तावन्निर्विवादमनयोः कर्तृत्वं, तस्मादुपस्तरणाभिघारणयोरपि तयोरेव कर्तृत्वं कल्पयितुमुचितम्। लाजावापः खलु होमस्योपकरोति, उपस्तरणमपि तस्योपकरोति अभिघारणमपि। तस्मादितरत्र यः कर्ता इतरत्रापि स एव भवितुमर्हति। यः ह्येकमर्थं करोति, शक्नोति सोऽपरमपि कर्तुं, शक्नोति चेत् करिष्यतितराम्। न चान्यः कश्चिदिह सन्निहितः। वरस्तर्हि करोतु? नेत्युच्यते। कुतः? अशक्यत्वात्। अशक्यं हि वरस्योपस्तरणमभिघारणञ्च कर्तुम्। किं कारणम्? वध्वञ्जलिः खल्वेवं परित्यज्येत। तच्चानिष्टम्—इत्यवोचाम। अपि च। लाजानावपत उपस्तरणमर्थाद्वाक्षिप्यते। तद्विना तस्य कर्तुमशक्यत्वात्। तत्सामान्यादभिघारणेऽपि तथा। एतेन—यत् रघुनन्दनादयो वर्णयन्ति,—वर एवोपस्तृणोति अभिघारयति च—इति। तदसङ्गतम्। प्रमाणाभावाच्च। अत्र च शमीपलाशमिश्राणां लाजानां पूर्वस्मामादितानामभिघारणार्हता न केवलानामित्याह गृह्यासंग्रहः।

"सोमः प्रकृतिरेषा हि लाजानाश्रित्य तिष्ठति।
विरुद्धमाज्यं सोमेन नाभिघारणमर्हति॥
शमीपलाशमिश्राणां लाजानामभिघारणम्।
पूर्वाणां घृतमिश्राणामाचार्य्यैः कल्पितं तथा"॥

इति। सूत्रशेषोव्याख्यायते। अग्नौ जुहोतीत्युक्तार्थम्। कथं जुहोति? लाजाञ्जलिम् अविच्छिन्दती विच्छेदमकुर्वती—अञ्जलिभेदमकुर्वतीत्यर्थः। "अविच्छिन्नमञ्जलिम्"—इति पाठेऽपि तथैवार्थः। होमप्रकारश्च शाखान्तरे पठ्यते।

"अङ्गुल्यग्रैर्न होतव्यं तथा चाञ्जलिभेदतः।
अञ्जलीवामपार्श्वेन लाजहोमो विधीयते"।

इति। वस्तुतस्तु,

"तथा लाजाञ्जलिर्बध्वा हूयतेऽङ्गुलिपर्व्वभिः"।

इति गृह्यासंग्रहोक्तप्रकारेणास्माकमयं होमो भवति, न शाखान्तरोक्तप्रकारेण। स्वशाखाश्रयमुत्सृज्य परशाखाश्रयकरणस्य निषेधादिति द्रष्टव्यम्। केन मन्त्रेण जुहोति? इयं नार्य्युपब्रूते—इति मन्त्रेण वरेण पठितेन—इत्यर्थः।

कस्मात् पुनः कारणात् वरो मन्त्रं पठति? न माता न वा भ्राता न वा वधूरेव। उच्यते। माता तावत् न पठति, अमन्त्रत्वात्। नापि भ्राता, प्रमाणाभावात्। वरस्तु पठति शरीरार्द्धत्वस्मरणात्। "अर्द्धो ह वा एष आत्मनो यज्जाया"—इति च वाजसनेयिब्राह्मणे। शरीरार्द्धेन चेत् क्रियते, तर्हि स्वयमेव क्रियते—इति शक्यं वक्तुम्। पत्नीपाद्यमन्त्राणामप्यस्य पाठः समाम्नायते। पत्नी स्वयमेव पठतु—इति चेत्। न, अमन्त्रत्वात्। प्रमाणाभावाच्च। आक्षिप्यतामिति चेत्। न। अन्यथोपपत्तेः। काममाक्षिप्येत पत्न्या-मन्त्रपाठो यद्यन्यथा होमो नोपपद्येत। न तु नोपपद्यते। वाक्यादिति चेत्। इति चेत् पश्यसि वाक्यात् पत्न्या मन्त्रपाठः—इति। तदपि न। कुतः? वाक्याद्धि लिङ्गं बलीयः। लिङ्गं खल्वेतदुपलभ्यते—इयं नार्य्युपब्रूते—इति। अथ कस्मादियं श्रुतिरेव न भवति;—'इयं नार्य्युपब्रूते—इति जुहोति'—इति। नेत्युच्यते। होमकरणत्वमात्रं हि मन्त्रस्य श्रुत्याऽवगम्यते, न तु करणमन्त्रस्य

पन्थाः पाठोऽपि। एतेन वाक्यमपि व्याख्यातम्। तदपि तावदेव इतकृत्यं नातीवाक्षा मन्त्रपाठमाह। तस्मात् वधूर्जुहोति, वरो-मन्त्रं पठति—इति साधुक्तम्। कथमन्यो जुहोति अन्यश्च मन्त्रं पठति? शास्त्रतात्पर्य्यबलादित्याह। दृश्यते खल्वध्वर्युर्जुहोति होता वषट्करोति। तस्माद्वधूरेव मन्त्रं पठति—इत्यमीमांसकवचनं हेयम् ॥ ६ ॥ ० ॥

अर्य्यमणं नु देवं पूषणमित्युत्तरयोः ॥ ७ ॥

उत्तरयोर्लाजहोमयोर्यथाक्रमम् 'अर्य्यमणं नु देव' 'पूषणम्'—इत्येतौ मन्त्रौ विनियोक्तव्यौ। प्रसङ्गाल्लाघवाच्च अत्रैवैतदुच्यते। एकस्मादत्र हि लाजहोमात् परं परिणयनमभिधास्यति, ततोऽपरं होमम्। 'एवं त्रिः'—इति च सूचयिष्यति। होमद्वयस्यैव त्रित्वमिति चेत्। न। असम्भवात्। चतुरञ्जलिमात्राणां लाजा-नामामादनस्य सूचितत्वात्, एकाञ्जलिमात्रावापविधानाच्च ॥ ७ ॥ ० ॥

हुते पतिर्यथेतं परिव्रज्य* प्रदक्षिणमग्निं परिणयति मन्त्रवान् वा† ब्राह्मणः—कन्यला पितृभ्यः—इति ॥ ८ ॥

हुते—इत्येकवचनसंयोगादेकस्मिन्नेव लाजाहुते हुते—इत्यर्थः। अन्यथैतदनर्थकं स्यात्। हुते पतिः परिव्रज्य पुनरागत्य। कथं

---

* प्रतिक्रम्य—इति, परिक्रम्य—इति च पाठान्तरम्।

† अस्मदवलोकितेषु सर्व्वेषु सूत्रग्रन्थेषु इत्थमेव पाठः। तत्त्वकारस्तु समतरत्वापेक्षी 'वा'-शब्दं न पपाठ।

पुनरागन्तव्यम्? यथेतं, यथा येन प्रकारेण पत्नी-पृष्ठदेशेन इतं गतं गमनं कृतं पत्नीदक्षिणस्यां, तथैव पत्नी-पृष्ठदेशेन पुनरागन्तव्यम् इत्यर्थः। तदेवमागत्य प्रदक्षिणं यथा भवति तथा पत्नीमग्निं परिणयति परि सर्व्वतोभावेन नयति—अग्नेः प्रादक्षिण्येन भ्रामयेदित्येतत्। कन्यला—इत्यनेन मन्त्रेण। यातीयम्—इति मन्त्रलिङ्गात् मन्त्रं पठन् परिणयतीत्यर्थः। सोऽयं पतिरञ्जलिमविमुञ्चन्नेव पत्नीं परिणयति—इत्यवोचाम।

कस्याञ्चिदापदि पत्युरसामर्थ्ये—अन्यो वा मन्त्रवानधीतवेदो-ब्राह्मणः परिणयति। मन्त्रवान् वा ब्राह्मणः—इत्येकस्मादाशब्दा-दवगम्यते—जघन्योऽयं पक्षः—इति। अस्मिन्नपि कल्पे पतिरेव मन्त्रं पठति। कस्मात्? 'त्वया वयं द्विषोऽतिगाहेमहि'—इति मन्त्रलिङ्गात्।

तस्मात् मन्त्रलिङ्गविरोधादन्यो न परिणयति—इति रघुनन्दन-मतमसङ्गतम्। अर्थवत्त्वोपपत्तेश्च। मन्त्रवान् वा ब्राह्मणः—इति वचनस्यार्थवत्त्वमेवं सत्युपपद्यते। अन्यथाऽनर्थकं स्यात्। यच्च—मन्त्रवान् ब्राह्मणः पतिः—इति वर्णितम्। तदप्यनर्थकमेव। न खल्वस्य विशेषणस्य कमप्यर्थमुपलभामहे। सोऽयमनर्थिकां योज-नामनुजानानोऽर्थवतीञ्च प्रत्याचक्षाणः प्रेक्षावतामनपेक्षणीयवचनो-भवति। यदपि—व्यवहारापरिगृहीतत्वादन्यो न परिणयति—इत्युक्तम्। तदप्ययुक्तम्। आपत्कल्पत्वादेव तस्य कादाचित्कत्वा-वगमात्। अनाचाररूपस्य च व्यवहारापरिगृहीतत्वस्य अप्रवर्त्त-कत्वमेव परं, न प्रवृत्तिनिरोधकत्वम्। अनाचारस्य श्रुतिकल्प-

नानिमित्तत्वानुपपत्तेः। आचारस्यापि शास्त्रमपेक्ष्य दुर्ब्बलत्वं वक्ष्यामः।

अत्र चाग्निप्रदक्षिणे लाजादीनामपि प्रदक्षिणम्। तथाच स्मरणम्।

"लाजानाज्यं स्रुवं कुम्भं प्राजनाश्मानमेवच।
प्रदक्षिणानि कुर्य्यातां दम्पती न विनाऽग्निकम्।
प्राजयाहमुदग्राहं ब्रह्माणमृत्विजं तथा।
एतानि वाह्यतः कृत्वा शेषाणान्तु प्रदक्षिणम्।
दक्षिणां दिशमास्थाय यमोमृत्युश्च तिष्ठतः।
तयोस्तु रक्षणार्थाय तस्माद् ब्रह्मा वहिर्भवेत्"।

इति। यश्चायं होमात् परतः परिणयः सोऽयं ब्राह्म्यादिषु विवाहेषु द्रष्टव्यः। गान्धर्व्वादिषु पुनर्व्विवाहेषु प्रथममेव परिणयस्ततो होमः करणीयः। तथाच गृह्यासंग्रहः।

"ब्राह्मस्यार्षस्य दैवस्य प्राजापत्यस्य याज्ञिकैः।
पूर्व्वं होमविधिः प्रोक्तः पश्चात्परिणयः स्मृतः।
गान्धर्व्वासुरपैशाचा विवाहाराक्षसाश्च ये।
तेषां परिणयः पूर्व्वं पश्चाद्धोमो विधीयते"।

इति। अतश्चयमाचार्य्यो ब्राह्म्यादीन् प्रशस्तान् विवाहानभिप्रेत्य होमात् परतः परिणयनं सूचयाञ्चकारेति स्थिते। ब्राह्म्यादीनां प्राशस्त्यञ्च,

"चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः"।

इत्यादिस्मृत्यन्तरदर्शनादवसेयम्। इति ॥ ० ॥ ८ ॥ ० ॥

परिणीता तथैवावतिष्ठते तथाऽऽक्रामति, तथा जपति, तथाऽऽवपति, तथा जुहोति॥ ९॥

परिणीता वधूः, तथैव अनुपृष्ठगमनेन दक्षिणस्यामुदङ्मुखावस्थितेन पत्या गृहीताञ्जलिका प्राङ्मुखी, अवतिष्ठते ऊर्द्ध्वा तिष्ठति। तथा, यथा पूर्व्वं तेनैव प्रकारेण मात्रादिभिः प्रेर्य्यमाणा दक्षिणेन प्रपदेन, आक्रामति अश्मानम्। तथा पूर्व्ववत् जपति पाणिग्राहः—इममश्मानम्—इति मन्त्रम्। तथा पूर्व्वोक्तेनैव प्रकारेण, आवपति वध्वञ्जलौ माता भ्राता वा सकृत् संगृहीतं लाजाञ्जलिम्। तथा पूर्व्ववत्, उपस्तीर्णाभिघारितं लाजाञ्जलिमविच्छिन्दती वधूर्जुहोति—इयं नार्य्युपब्रूते—इति मन्त्रेण वरेण पठितेन। तथा—इति पूर्व्वोक्तातिदेशात् जपादीनां प्राचीना एव कर्त्तारो भवन्ति—इत्यवगन्तव्यम्॥ ०॥९॥०॥

एवं त्रिः॥ १०॥

एवम् अनन्तरोक्तं सर्व्वं त्रिः कर्त्तव्यम्। एवम्—इति प्रधानत्वादवस्थानादिका क्रिया भण्यते। तस्मात्—प्रथमेन सहैव त्रित्वम्। उत्तरयोर्द्वयोरेव मन्त्रान्तरोपदेशाच्च जुहोतीनां त्रित्वमवगम्यते। तत्सामान्यादन्यासामपि क्रियाणाम्, प्रागेव तु तदावृत्तामपि—इत्यवधेयम्। नाप्यन्यविधं त्रित्वं सम्भवति—इत्यवोचाम। अत्र च—इममश्मानम्—इति, कन्यला पितृभ्यः—इति च मन्त्रावावर्त्तनीयौ। उत्तरयोर्मन्त्रान्तरानुपदेशात्॥ ०॥ ॥ १०॥ ०॥

चतुर्थ्याञ्च वेलायाम्—

शूर्पेण शेषमग्नावोप्य प्रागुदीचीमभ्युत्क्रामयन्त्येकमिष इति ॥ ११ ॥

शूर्पेण शूर्पजिह्वया । कस्मात् ?

"एवं लाजहविःशेषं हूयते शूर्पजिह्वया"।

इति गृह्यासंग्रहवचनात् । शेषं लाजशेषम्—उपस्तीर्णाभिघारितम्—इति भवदेवभट्टादयः । शेषम्—इति वचनात् सर्व्वावापोऽवगम्यते, न किञ्चिदवशेष्यमित्यर्थः । 'अग्नौ' समिद्धे, 'ओप्य' आ उप्य—प्रचिप्य हुत्वेत्येतत् । 'आरोप्य'—इति पाठेऽपि तथैवार्थः । कथमिदं होतव्यम् ? तूष्णीम्—इति भट्टनारायणोपाध्यायाः । कस्मात् ? मन्त्रदेवतयोरनुपदेशात् । तस्मादत्र स्विष्टकृन्निवर्त्तते । इत्यमेव शेषस्योपचयात् । तथा गृह्यान्तरम् । "शूर्पपुटेनाभ्यात्मं तूष्णीं चतुर्थम्"—इति । 'चतुर्थवचनादत्र स्विष्टकृन्न स्यात्',—इति गार्ग्यनारायणः । 'तूष्णीं-वचनं प्रजापतिज्ञापनार्थम्'—इत्यपि स एव । युक्तञ्चैतत् । कुतः ?

"मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः"।

इति कर्म्मप्रदीपस्मरणात् । "त्रिः परिणीता प्राजापत्यं जुहोति"—इति च गृह्यान्तरम् । तस्माद्वधूः शेषं जुहोति, वरश्च प्रजापतिं ध्यायति—इति सिद्धम् । स्मरन्ति च ।

"शूर्पाग्रेणैव होतव्यं तूष्णीं निरवशेषतः ।

तस्यां तूष्णीन्तु जुह्वत्यां वरो ध्यायेत् प्रजापतिम्"।

इति ।

प्रजापतिं चतुर्थन्तं स्वाहायुक्तं वरः स्मरेत्।

इति चैवमादि। तस्मात्—"अग्नये स्विष्टकृते स्वाहेति लाजशेषं जुहुयात्"—इति भवदेवरघुनन्दनादिमतमसङ्गतम्। प्रमाणविशेषा-भावाच्च। एतदनन्तरं वामदेव्यगानम्—इति मरसाकल्पनायामपि प्रमाणं न पश्यामः।

तदेवं कृत्वा। पूर्व्वापरीभावमात्रं क्त्वाप्रत्ययार्थः। शेषहोमं कृत्वाऽवस्थितां वधूम्—इति वा वर्णनीयम्। प्रागुदीचीम्, अप-राजितां दिशम्, अभ्युत्क्रामयन्ति—आभिमुख्येन वरगृहीताञ्जलि-कामुत्क्रामयन्ति दक्षिणं पादमुत्थाप्य वामश्चानु—नयन्ति—एकमिषे—इत्येवमादिभिः सप्तभिर्मन्त्रैः। प्रतिमन्त्रमेकैकः पादन्यासः—इत्यर्थः। बहुवचनादनियतः कर्त्ता ॥०॥ ११ ॥०॥

सा चोत्क्रामन्ती—

दक्षिणेन प्रक्रम्य सव्येनानुक्रामेत् ॥ १२ ॥

दक्षिणेन पादेन प्रक्रम्य गत्वा, अनु पश्चात् सव्येन क्रामेत् गच्छेत्। सव्यं पादमग्रतो न कुर्य्यादित्यर्थः ॥०॥ १२ ॥०॥

ताञ्च क्रामन्तीं पतिः,

मा सव्येन दक्षिणमतिक्रामेति ब्रूयात् ॥ १३ ॥

सव्येन पादेन दक्षिणं पादं मा अतिक्राम—अग्रतो वामपाद-न्यासं मा कुरु—इति कथयेत्। आक्राम इति पाठे, सव्यपादेन दक्षिणपादस्याक्रान्तिं मा कुरु,—दक्षिणपादस्योपरि सव्यपादं मा कुरु—इत्यर्थः ॥०॥ १३ ॥०॥

एवं वध्वा सप्तपदाक्रमणे कृते तथैवावस्थितः पाणिग्राहः,—

ईक्षकान् प्रतिमन्त्रयेत् सुमङ्गलीरियं वधूरिति ॥१४॥

ईक्षकान् विवाहप्रेक्षकान्। प्रतिमन्त्रणमनुमन्त्रणमभिमन्त्रणमित्यनर्थान्तरम्। तच्चाच ईक्षकानवलोकयता कर्त्तव्यम्। योग्यत्वात्। तदाह कर्मप्रदीपः।

"स्पृशन्ननामिकाग्रेण क्वचिदालोकयन्नपि।
अनुमन्त्रणीयं सर्व्वत्र सर्व्वदैवानुमन्त्रयेत्"।

इति। अभिमन्त्रयेत,—इति क्वचित् पाठः। स्पष्टमन्यत् ॥०॥१४॥०॥

अपरेणाग्निमौदकोऽनुसंव्रज्य पाणिग्राहं मूर्द्धदेशेऽवसिञ्चति तथेतरा समञ्जन्त्वित्येतयर्चा ॥ १५ ॥

अपरेणाग्निम् अग्नेः पश्चिमया दिशा, अनु संव्रज्य आगत्य सप्तपदीस्थानमिति भवदेवभट्टः। औदको गृहीतोदकुम्भः पूर्व्वावस्थितः पाणिग्राहं मूर्द्धदेशे उत्तमाङ्गे अवसिञ्चति,—कलसस्थाभिरेवाभिरद्भिः। तथा तेनैव प्रकारेण इतरां वरेतरां वधूमपि अवसिञ्चति। समञ्जन्तु—इत्येतया ऋचा वरेण जप्यमानया—इत्यर्थः। कस्मात् पुनः कारणात् वर एव ऋचं जपति, न पुनरौदकः? लिङ्गात्—इत्याह। 'समापो हृदयानि नौ'—इति 'नौ' आवयोरित्युच्यते। न चैतत् वध्वा सहौदकस्योपपद्यते।

यच्च वर्णयन्ति,—'करणत्वात् कुम्भधारिणोऽयं पाठः न सिच्यमानस्य, नाविति तु युवयोरित्यर्थं छान्दसो व्यत्ययः'—इति।

तदसङ्गतम्। प्रमाणाभावात्। न खल्वौदकस्य मन्त्रपाठे प्रमाणमस्ति। करणत्वन्तु नानन्यथासिद्धम्—इत्यवोचाम। वाक्यमपि दुर्ब्बलमेव लिङ्गात्। न च वाक्यस्यापि तथा सामर्थ्यम्। न खल्वियं श्रुतिरित्यपि शक्यते वक्तुम्। सोऽयमकाण्ड एव यदृच्छया छान्दसं व्यत्ययमभ्युपगच्छन् वाक्यस्यानुरोधे लिङ्गमुपरुन्धन्ननभिनन्दनीय एव। 'मन्त्रलिङ्गाद् वर एवावसिञ्चति'—इति वीरेश्वरमतमप्यनादरणीयम्। औदकोऽवसिञ्चति—इति वचनविरोधात्। मन्त्रलिङ्गस्य च वरपाठमात्रेण कृतार्थत्वात्। तस्मादियमेवावधारणा,—पाणिग्राहो मन्त्रं जपति औदकोऽवसिञ्चति—इति। तथाच गृह्यासंग्रहः।

"विवाहे यो विधिः प्रोक्तो मन्त्रादाम्पत्यवाचकाः।

वरस्तु तान् जपेत् सर्व्वान् ऋत्विक् राजन्यवैश्ययोः"।

इति। इदमिदानीं सन्दिह्यते। किं वरस्य वध्वाश्च तन्त्रेणैवावसेकः उत भेदेन—अन्योऽवसेको वरस्य अन्यश्च वध्वाः?—इति। भेदेन—इति ब्रूमः। कुतः? तथेतराम्—इति भेदेनैवोपदेशात्। यदि पुनस्तन्त्रेणैवाऽवसेकः स्यात्, तर्हि स वध्वा इव वरस्यापि भवति। तत्रेतरवचनमसमञ्जसम् आपद्येत। तन्त्रेण चावसेके समस्याभिधानं स्यात्। तथा-शब्दाच्च। यथा वरस्यावसेकस्तेनैव प्रकारेण वध्वा अप्यवसेकः—इति भेदेनैवावसेकस्तथाशब्दादवगम्यते। अतएव मन्त्रोऽप्यावर्त्तनीयः। प्रधानावृत्तावङ्गावृत्तेर्युक्तत्वाच्च। तथाच सूत्रान्तरम्। "भेदे मन्त्रावृत्तिः समानत्वात्"—इति। तथा चोक्तम्।

"कर्म्मावृत्तौ तु मन्त्रस्याप्यावृत्तिरङ्गकर्म्मणि"।

इति। अस्माच्चावसेकात् परं प्राजनिनोऽनुगमनमाह गृह्यासंग्रहः।

"अवसिक्तं तु विधिना पाणिग्रहन्तु प्राजनी।

रक्षणार्थमनुगच्छेत् सप्ताहं अहमेववा"।

इति। सोऽयं "प्राजनेनान्यः"—इति सूत्रोपदिष्टस्य प्राजनिनो-विनियोगः॥ १५॥ ०॥

अवसिक्तायाः सव्येन पाणिनाऽञ्जलिमुपोद्गृह्य* दक्षिणेन पाणिना दक्षिणं पाणिंसाङ्गुष्ठमुत्तानं गृहीत्वैताः षट् पाणिग्रहणीया जपति—गृभ्णामि त—इति॥ १६॥

अवसिक्तायाः कृतावसेकायाः। नन्वेतदवाच्यं अर्थादेव प्राप्तत्वात्? देशलक्षणार्थम्—इत्याह। तेनावसेचनदेशस्थिताया एव वध्वाः पाणिग्रहणम्। अवसिक्तायाः—इति वचने श्रूयमाणे खल्ववसेचनं तावत् प्रतीयते, तत्प्रतीतौ च तस्य स्थानमप्यागच्छति हृदयं, तच्च युज्यते विना कारणमुत्स्रष्टुम्। यथा "अवस्तृतं यन्ति"—इत्यवस्तृतेन देशं लक्षयति; यस्मिन् देशेऽवस्तृतस्तं देशं यन्ति—इति,

---

* उपोद्गृह्योत्क्षिप्य—इति तत्त्वकारः पठति। उत्क्षिप्य अञ्जलि-सकाशात् दक्षिणं पाणिं विच्छिद्य—इति व्याख्याति च। परं सर्व्वेषु सूत्र-ग्रन्थेष्वस्मदवलोकितेषु भट्टभाष्ये च 'उत्क्षिप्य'—इति प्रतीकं न दृश्यते। नाप्यतीव समीचीनम्। तथाहि सव्येनाञ्जल्युपोद्ग्रहणस्य सूत्रणात् दक्षिण-स्याञ्जलिसंयोग एव नास्ति, कुतस्तद्विच्छेदसूचनम्। प्राचीनस्याञ्जलिग्रहण-मिदानीं निवृत्तं। दक्षिणेन पाणिना—इति परप्रतीकेन चास्य गतार्थता—इत्यवधेयम्।

"देशार्थां अवस्तश्रुतिः"—इति चतुर्थाध्याये निर्णीतं, तथा-ऽवापौत्यवगन्तव्यम्।

अवसित्ताया वध्वा अञ्जलिं सव्येन पाणिना, उपोद्गृह्य—उपेति सामीप्ये, उप समीपे अञ्जलेः—'मणिबन्धप्रदेशे'—इति भट्टनारायणोक्तमादरणीयम्। यच्च—मणिबन्धसमीपे ग्रहणम्—इति मतम्। तदसङ्गतम्। उपस्थितमञ्जलिमपेच्यैव सामीप्यवर्ण-नौचित्यात्। उद्गृह्य—उद्धृत्य गृहीत्वा, दक्षिणेन पाणिना स्वकीयेन, वध्वाः दक्षिणं पाणिं साङ्गुष्ठमङ्गुष्ठसहितम्, उत्तानम् ऊर्द्धतलं, गृहीत्वा, गृभ्णामि ते—इत्येवमादिकाः षट्संख्याकाः पाणि-ग्रहणीयाः पाणिग्रहणकर्म्मणि विनियुक्ताः ऋचः जपति पाणि-ग्राहः। 'उत्तानम्—इत्यनेन करस्य पृष्ठग्रहणं प्रतीयते'—इति रघुनन्दनवर्णनन्वसारमेव। नियमतस्तत्प्रतीतौ कारणविशेषा-भावात्। न ह्युत्तानस्य करस्योपरिष्टाद्ग्रहणं न सम्भवति—इति शक्यते वक्तुम्। मानाभावात्। "उत्तानेनोत्तानं गृह्णाति नीचेन चोत्तानम्"—इति शास्त्रान्तरे चोत्तानस्यापि करस्योपरिष्टादपि ग्रहणोपदेशात् ॥ १६ ॥ ० ॥

समाप्तासूद्वहन्ति* ॥ १७ ॥

समाप्तासु पाणिग्रहणक्रियासु पाणिग्रहणीयास्वृक्षु वा रथेनाश्वा-

---

* सर्व्वेषु सूत्रग्रन्थेषु इत्यमेव सूत्रमत्रैव च खण्डिका समाप्तिः। भट्टभाष्ये तु—समाप्तासु—इति सूत्रच्छेदः खण्डिकासमाप्तिश्चात्रैव दृश्यते। उद्वहन्ति—इति परसूत्रावयवतया तत्रोपलभ्यते। तत्त्वकारेण तु समस्तमेव सूत्रमुत्तरसूत्रेण सहैकत्र लिखितम्।

दिना वा वधूमुदहन्ति उत्थाप्य नयन्ति। वरसहायाः। समाप्ता-
स्विति सूचणाद्चैव पाणिग्रहणक्रियायाः परिसमाप्तिः अत्रैव च
तन्त्रसमापनम्।

दक्षिणा चानादेशात् पूर्णपात्रादिका। सोऽयं विवाहः।
इतः परमुत्तरविवाहः। केचित् 'समाप्तासु'—इति सूत्रच्छेदं मन्यन्ते।
'समाप्तासु पाणिग्रहणीयासु। किम्? तन्त्रं समापयेदिति वाक्य-
शेषः'—इति व्याचक्षते च। उदहन्ति—इति तु उत्तरखण्डिकायाः
प्रथमसूत्रप्रतीकम्—इति मन्यन्ते॥ १७॥ ०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज-
श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीय-गृह्यसूत्रभाष्ये द्वितीय-
प्रपाठकस्य द्वितीया खण्डिका॥ ०॥

द्वितीयप्रपाठके तृतीया खण्डिका।

उद्वहन्ति—इत्युक्तम्। कुत्र उद्वहन्ति? तदभिधीयते,—

प्रागुदीच्यां दिशि यद्ब्राह्मणकुलमभिरूपम् ॥ १ ॥

प्रागुदीच्यामैशान्यां दिशि यद्ब्राह्मणकुलं ब्राह्मणगृहं, तपः-स्वाध्यायव्रतादिभिरभिरूपं रमणीयं भवति, तत्र उद्वहन्ति—इति गतेन सम्बन्धः। तत्राग्निरुपसमाहितो भवतीत्यनागतेन वा। प्रागुदीच्यामभिरूपब्राह्मणकुलस्यालाभे अन्यस्यामपि दिशि अन्यस्मिन्नपि ब्राह्मणकुले उद्वहेयुः। दिक् आभिरूप्यञ्च ब्राह्मणकुलं विशिंषदस्य गुणो भवति। स चेदुपादीयमानो प्रधानमुपरुणद्धि गुणत्वमस्य नावकल्पते। गुणो हि प्रधानमुपकर्त्तुं व्याप्रियते, नैतदुपरोद्धुम्। अतएव वेद्यामेवान्ततः कर्म कर्त्तव्यम्। कर्मणः प्रधानत्वात्। तथाच गृह्यान्तरम्। "अथोत्तरविवाहः प्रागुदीच्यामन्यत्र वा ब्राह्मणकुले मन्त्रवति वेद्यां वा"—इति। अस्मादप्यवगम्यते,—इतः प्रभृति उत्तरविवाहसमाख्यानं कर्म—इति ॥ १ ॥ ० ॥

तत्राग्निरुपसमाहितो भवति ॥ २ ॥

तत्र ब्राह्मणकुले अग्निरुपसमाहितः लक्षणं कृत्वा स्थापितो-भवति। लक्षणं कृत्वा—इति सूत्रशेषतयैव केचित् पठन्ति। वेद्याञ्च

करणे प्रधानमात्रस्यैव कर्त्तव्यता, आवृत्त्व तन्त्रेणैव स्यात् । कुतः ? "गणेष्वेकं परिसमूहनम्"—इति वचनात् । एवञ्च वेद्यां करणपक्षे एतस्यापि कर्म्मणोऽनन्तरमेव तन्त्रसमापनं न तु पाणिग्रहणकर्म्मणः परत एव—इति बोद्धव्यम् ॥ २ ॥ ० ॥

अपरेणाग्निमानडुहं रोहितं चर्म्म प्राक्ग्रीवमुत्तर* लोमास्तीर्णं† भवति ॥ ३ ॥

अपरेणाग्निम् अपरस्यान्दिश्यग्नेः, आनडुहं वार्षभं रोहितं लोहितवर्णं चर्म्म—शुष्कमित्यर्थः । प्राग्ग्रीवं पूर्व्वशिरस्कम्, उत्तरे उपरिष्टाल्लोमानि यस्य, तदिदमुत्तरलोम, आस्तीर्णं प्रसारितं भवत्युपवेशनार्थं वध्वाः । कर्त्तुरनियमः । अत्रापि, लौहित्यस्य उपरिष्टाद्वा लोम्नामलाभे अन्यादृशमपि चर्म्मास्तीर्णं भवति । चर्म्मणः प्रधानत्वात् ॥ ३ ॥ ० ॥

तस्मिन्नेनां वाग्यतामुपवेशयन्ति ॥ ४ ॥

तस्मिन् चर्म्मणि एनां वधूं वाग्यतां नियमितवचनां कृतमौनाम्—इत्येतत् । उपवेशयन्ति, य एव केचित् ॥ ४ ॥ ० ॥

सा खल्वास्तएवनक्षत्रदर्शनात् ॥ ५ ॥

सा खल्वेवमुपविष्टा वाग्यता अभुञ्जाना आस्त एव नोत्तिष्ठति,—मूत्रपुरीषकरणादन्यत्र—इत्यर्थः । खल्वित्यनर्थको निपातः ।

---

* उपरिलोम—इति तत्त्वकारः पठति ।

† आस्तृतम्—इति तत्त्वकारः पठति ।

श्रश्नुवाना—इति कुतो वर्ण्यते? एवशब्दादित्याह। कथन्नाम? श्रास्त एव नान्यत् किञ्चिदपि भोजनादिकं कुर्य्यात्—इति। कियन्तं कालमास्ते? आ नक्षत्रदर्शनात्। नक्षत्रस्याभिमतस्य दर्शनपर्य्यन्तम् ॥ ५ ॥ ० ॥

प्रोक्ते नक्षत्रे षड़ाज्याहुती र्जुहोति—लेखासन्धिषित्येतत्प्रभृतिभिः । ६ ॥

यस्य नक्षत्रस्य दर्शनमपेक्षितं तस्मिन् प्रोक्ते—दृश्यमिदानीं वर्त्तते—इति केनापि कथिते। प्रोद्गते—इति पाठे उदिते—इत्यर्थः। षड़ाज्याहुतीर्जुहोति पतिः, लेखासन्धिषित्येतत्-प्रभृतिभिः षड्भिर्मन्त्रैः। तद्वाज्यतन्त्रविहितो महाव्याहृतिहोमः पुरस्ताच्चोपरिष्टाच्च भवति. श्राज्यभागौ स्विष्टकृच्च न भवन्तीत्यव-गन्तव्यम्। एवमन्यत्रापि ॥ ६ ॥ ० ॥

आहुतेराहुतेस्तु सम्पातं मूर्द्धनि वध्वा अवनयेत् ॥ ७ ॥

आहुतेराहुतेर्हुतायाः पश्चात् सम्पततीति सम्पातः स्रुवविग-लितघृतविन्दुरुच्यते। तथाच गृह्यासंग्रहः।

> हुत्वाऽऽज्यं परिशेषेण यत् द्रव्यमुपकल्पितम्।
> स्रुवेणैव तु तत् स्पृष्टं सम्पातन्त्वेव तं विदुः ॥

इति। तं सम्पातं। जात्यभिप्रायेणैकवचनम्। वध्वा मूर्द्धनि अवनयेत् पातयेत्। अथ, आहुतेराहुतेः—इति शक्यमवक्तुम्? नैवम्। आहुतेराहुतेः—इति सन्निहितपरिग्रहात् अनन्तरोक्तायाः षड़ाहुतेरेव सम्पातानां वध्वाः शिरस्यवनयनं, न महाव्याहृत्यादौ-

नामपि—इत्येवमर्थत्वात्। अतएव, तु-शब्द इतरासामाकृतीनां व्यवच्छेदकः सुखार्थो भवति॥ ७॥

हुत्वोपोत्थायोपनिष्क्रम्य ध्रुवं दर्शयति॥ ८॥

हुत्वा यथोक्ताज्यहोमादनन्तरमेव, न तु तन्त्रसमापनादपि परम्—इत्यर्थः। उप—इति सामीप्ये। वध्वाः समीप एवोत्थानं न व्यवधाने—इत्ययमर्थः। अतएव लोके अञ्चलमन्दामनरूढ़िः। उपनिष्क्रम्य,—उप समीपे होमस्थानस्य, निष्क्रम्य वहिर्गत्वा ध्रुवं तन्नामख्यातनक्षत्रविशेषं वधूं दर्शयति पतिः। ध्रुवं पश्य—इति प्रैषोऽर्थादवगम्यते॥ ८॥ ०॥

सा खल्वेवमुक्ता वधूर्ध्रुवमवलोक्य—

ध्रुवमसि ध्रुवाऽहं पतिकुले भूयासममुष्यासाविति पतिनाम गृह्णीयादात्मनश्च॥ ९॥

ध्रुवमसि—इत्यादिकं पठति। तत्र च, अमुष्य—इति षष्ठ्यन्त-स्थाने षष्ठ्यन्तं पतिनाम, असौ—इति प्रथमान्तस्थाने च प्रथमान्त-मात्मनो नाम वधूर्गृह्णीयात्। अथ वाग्यताया मन्त्रपाठो विरु-ध्यते? न विरोत्स्यते। कुतः? वाचनिकत्वादस्यार्थस्य। मनसैव वा मन्त्रं पठिष्यति। प्रतिषिद्धेऽपि वाग्व्यापारे मनसो व्यापार-स्याप्रतिषिद्धत्वात्॥ ९॥ ०॥

अरुन्धतीच॥ १०॥

सप्तर्षिसमीपवर्त्तिनीं काञ्चित् सूक्ष्मतमां तारामरुन्धतीमाच-

च्यते। तां च दर्शयति—इत्यनुवर्त्तते। अरुन्धतीं पश्य—इति प्रयोगः ॥ १० ॥ ० ॥

वधूश्चारुन्धतीं दृष्ट्वा जपति,—

रुद्धाहमस्मीत्येवमेव ॥ ११ ॥

स्पष्टमुच्चरार्थः। एवमेव—इति कोऽर्थः? उच्यते। एवमेव जप्तव्यम्, न तु पूर्ब्बवन्नाम गृह्णीयात्। सोऽयमस्यार्थः। एवं रघुनन्दनभवदेवभट्टादयः। एवमेव—इत्यनेन पूर्ब्बवदेव पत्युरात्मनश्च नाम ग्रहीतव्यम्। तत्र च, पत्युर्नाम्नः तृतीयान्तत्वम्—इत्ययमेव विशेषः। एवं भट्टनारायणोपाध्यायाः। इदमेव तावन्मतमनुमन्यामहे। कस्मात्? यस्मात् एवमेवेत्यवचनेऽपि तावन्मात्रस्यैव पाठः स्यात्। पत्युरात्मनश्च नामग्रहणस्य प्रापकाभावात्। तद्व्यावर्त्तनार्थम् 'एवमेव' वचनमनर्थकमेव स्यात्। तस्मात् 'एवमेव' शब्दस्यार्थवत्त्वार्थं व्यवहितस्यापि नामग्रहणस्य बुद्ध्या सन्निकृष्य एवमा परामर्शः॥ ११॥

अथैनामनुमन्त्रयते ध्रुवा द्यौरित्येतयर्चा ॥ १२ ॥

अथानन्तरमेव न तु तन्त्रसमापनमपि कृत्वा, ध्रुवा द्यौरिति मन्त्रेण एनां वधूमनुमन्त्रयते पतिरनामिकाग्रेण स्पृशन्। 'वधूं पश्यन्'—इति भवदेवभट्टः॥ १२॥ ०॥

अनुमन्त्रिता गुरुं गोत्रेणाभिवादयते ॥ १३ ॥

अनुमन्त्रितैव वधूरभिवादयते, न तु तन्त्रसमापनमपि प्रतीक्षते—इति पूर्ब्बवदर्थः। अभिवादनं पादग्रहणमित्यनर्थान्तरम्।

कमभिवादयते? गुरुम्। कः पुनरसौ? पतिरित्याह। कुतः? "पतिरेको गुरुः स्त्रीणाम्"—इति स्मरणात्। कथमभिवादयते? गोत्रेण। अभिवादनप्रयोगः परतो वक्ष्यते।

इदमिदानीं सन्दिह्यते। किं पितृगोत्रेणाभिवादयते, उत पतिगोत्रेण? पितृगोत्रेण इति ब्रूमः। कस्मात्? इदानीमपि तस्याः पितृगोत्रत्वात्। तत् कस्य हेतोः?

"विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु।
एकत्वमागता भर्त्तुः पिण्डे गोत्रे च सूतके"॥

इति भवदेवभट्टधृतमनुवचनात्। लिखितसंहितायामप्येतत्। वक्ष्यमाणवृहस्पतिवचनाच्च। यत् पुनर्हारीतस्मरणम्—

"स्वगोत्राद्भ्रश्यते नारी विवाहात् सप्तमे पदे।
पतिगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया"॥

इति। तत् सप्तमे पदे हृताया अन्येन पुनर्भूकृताया बोद्धव्यम्। तदेतदाह स एव।

"पदे तु सप्तमे या तु बलात् काचित् हृता भवेत्।
स्वामिगोत्रं भवेत्तस्यास्तच्च भूयो विशिष्यते॥
पैतृकत्वप्रसूतायास्ततः पौर्व्विकभर्तृकम्"।

इति। तच्च स्वामिगोत्रं भूयः पुनरपि विशिष्यते,—इति ब्रुवाणो विशेषान्तरमपि द्योतयति। तच्च प्राक्तनस्य वचनस्यैतद्वचनोक्तं पुनर्भूकरणमेव—इत्यवधार्य्यते। अन्यस्य विशेषस्यानुपलम्भात्—इत्यवधेयम्। यच्च वृहस्पतिस्मरणम्—

"पाणिग्रहणिका मन्त्राः पितृगोत्रापहारकाः

भर्तृगोत्रेण नारीणां देयं पिण्डादिकं ततः।

इति। तदपि पाणिग्रहणमन्त्राणां पितृगोत्रापहारकत्वमाह, न तेषामेव। केषां तर्हि? तेषां चतुर्थीहोममन्त्राणाञ्च। कस्मात्? यस्मादनन्तरमेवाह बृहस्पतिः।

"चतुर्थीहोममन्त्रेण त्वङ्मांसहृदयेन्द्रियैः।

भर्त्रा संयुज्यते पत्नी तद्गोत्रा तेन सा भवेत्"।

इति। अथवा। पाणिग्रहणिका मन्त्राः—इति वचनं सप्तमे पदे गतायां वध्वामवगन्तव्यं हारीतसमानार्थम्। तथाच मनुः।

"पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्।

तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे"।

इति—सप्तमे पदे गतायां वध्वां पाणिग्रहणमन्त्राणां निष्ठां स्मरति। तदिदं पाणिग्रहणात् परं सप्तपदीगमनमन्येषामेव नास्माकम्। अस्मदाचार्य्यैः पाणिग्रहणात् पूर्व्वमेव तत्सूचणात्। आश्वलायनपारस्कराभ्यां हि पाणिग्रहणात् परं तत् सूचितम्। यदपि शातातपस्मरणम्—

"संस्थितायान्तु भार्य्यायां सपिण्डीकरणान्तिकम्।

पैतृकं भजते गोत्रमूर्द्धन्तु पतिपैतृकम्।

एकमूर्त्तित्वमायाति सपिण्डीकरणे कृते।

पत्नी पतिपितॄणान्तु तस्मात्तद्गोत्रभागिनी"।

इति। तदपि चतुर्थीतः पूर्व्वमेव संस्थितायां बोद्धव्यम्। सपिण्डीकरणेनैकमूर्त्तित्वप्राप्तेरुत्तरवचने हेतुत्वकीर्त्तनात्। वृत्तायां खलु चतुर्थ्यां तयैव त्वगादिसंसर्गादेकमूर्त्तित्वं पूर्व्वमेव निष्पन्नम्—

इति, पुनरिदानीं सपिण्डीकरणस्य तत्र हेतुत्वोपन्यासो नोपपद्यते। एवमन्यान्यपि वचनानि व्याख्येयानि ।

सपिण्डीकरणपर्य्यन्तं पितृगोत्रभजनमासुरादिनिन्दितविवाहोढाविषयम्—इति स्मृतिमञ्जरीकारादिमतम् । तदपि सङ्गतम् ।

"आसुरादिविवाहेषु पितृगोत्रेण धर्म्मवित्" ।

इति वृद्धशातातपवचनात् । परं सपिण्डीकरणपर्य्यन्तमित्यवधिकीर्त्तनमप्रमाणम् । सपिण्डीकरणमपि तस्या न भर्त्रादिभिः किन्तु मात्रादिभिरित्यपि तेनैवोक्तम् । यथा ।

"तन्मात्रा तत्पितामह्या तत्स्वस्रा वा सपिण्डनम् ।
आसुरादिविवाहेषु विन्नानां योषितां भवेत्" ।

इति । तस्मादासुरादिविवाहोढानां पितृगोत्रमेव । अन्यासान्तु सप्तमे पदे बलात् हृताया अप्रसूतायाः पितृगोत्रं प्रसूतायाः पूर्व्वभर्त्तृगोत्रम् । इतरासां चतुर्थीहोमपर्य्यन्तं पितृगोत्रं ततः परं भर्त्तृगोत्रम् । चतुर्थीतः पूर्व्वं संस्थितायान्तु सपिण्डीकरणपर्य्यन्तं पितृगोत्रं सपिण्डीकरणात् परं भर्त्तृगोत्रमित्याख्येयम् ।

यच्च 'आसुरादिविवाहोढ़ाया अप्रजाया मृतायाः सपिण्डीकरणपर्य्यन्तं पितृगोत्रभागित्वं; तद्धने पितुरधिकारस्मरणात्, गोत्रस्वत्वयोश्च युगनद्धवाहित्वस्यौत्सर्गिकत्वात्'—इति नारायणोपाध्यायवर्णनम् । तन्मन्दम् । मरणादनन्तरमेव पितुरधिकारेण सपिण्डीकरणपर्य्यन्तमित्यवधिकरणानुपपत्तेः । मरणात् प्रागेकतरगोत्रग्रहणानध्यवसायापत्तेश्च । कथम्? यदि नामेयमप्रजैव संस्थास्यते, तर्हि सपिण्डीकरणादूर्द्धं भर्तृगोत्रमेषा प्रतिपत्स्यते । अथ सप्रजा,

तदा पूर्व्वमेव। न ह्यादितः एकतरदवधारयितुं शक्यते,—सप्रजा वा संस्थास्यते, अप्रजा वा—इति। तदिदानीमेकतरगोत्रपरिग्रहे न किञ्चित् कारणमस्ति। एतच्चानिष्टम्। तत्रैव व्यभिचाराच्च। अपुत्रस्य भर्त्तुरादितः संस्थाने ह्यस्यैव तद्धनमधिकरोति—इति भवन्मते तत्रैव गोत्रस्वत्वयोर्युगनद्धत्वाविहितं व्यभिचरति। तस्मान्न किञ्चिदेतत्।

अपरे पुनरप्रजाया विवाहात्प्रकोढ़ाया एव भर्त्ता प्रेतकृत्ये क्रियमाणे तत्पितृगोत्रेण कर्त्तव्यम्—इति प्रलपन्ति। रघुनन्दनस्तु,—हारीतवचनमवलम्ब्य सप्तपदीगमनात्; वृहस्पतिवचनञ्चाश्रित्य पाणिग्रहणात् गोत्रापहारमभिधाय, 'सपिण्डनस्य गोत्रापहारित्व-प्रतिपादकवचनं शाखान्तरीयं शिष्टव्यवहाराभावात्'—इति कल्पयामास। तदप्यनादरणीयम्। शिष्टव्यवहाराभावस्य शाखा-न्तरीयत्वहेतुत्वे महाविप्लवापत्तेः। प्रादेशिकस्य च व्यवहारा-भावस्याकिञ्चित्करत्वात्। मन्वादिवचनविरोधस्य तावताऽप्यप-रिहाराच्च।

सेयं शिष्टव्यवहाराभावव्यपदेशेन शाखान्तरीयत्वकल्पना, वचन-विरोधभयात् सुखपरिहारत्वाद्वा समुन्नमिता, न शिष्टव्यवहारा-भावात्—इति स्थिते। शिष्टव्यवहारस्यापि शास्त्रीयमर्थमन्यथ-यितुं नास्ति सामर्थ्यम्—इति वक्ष्यामः। अपि च। पाणिग्रहणात् पूर्व्वमेव वध्वाः संस्थाने कतरद्गोत्रमेतस्या भवतामनुमतम्—इति नावगच्छामः। "ऊढ़ानां भर्तृगोत्रता"—इति सामान्यस्याभिधानं विशेषवचनमपेक्ष्यैव प्रवर्त्तमानं न स्वातन्त्र्येण कञ्चिदर्थं साधयितुं

प्रभवति । विशेषवचनास्यानर्थक्यप्रसङ्गात् । अपि च । विवाहादपि गोत्रापहारः सप्तमे पदे गतायामेव वध्वां भवति । कुतः ?

"स्वगोत्रात् भ्रश्यते नारी विवाहात् सप्तमे पदे" ।

इति वचनात् । विवाहात् कारणात् यः स्वगोत्रभ्रंशः, स खल्वत्र सप्तमे पदे भवतीत्युच्यते । तत् कुत एव विवाहमात्राद्गोत्रभ्रंशः शक्यते वक्तुम् । न च भवत्कल्पनायां किञ्चित् प्रमाणमस्ति । तस्मादस्मदुक्त एव वचनार्थः ।

यदपि पतिगोत्रेण पत्युरभिवादनं वर्णितं, तदपि पूर्व्वोक्तवचनानामनवलोकनेनेति हेयमेव । सप्तमे पदे गोत्रापहारबोधकवचनस्य तु पुनर्भूविषयतया हारीतेनैव प्रतिपादनाच्च यदृच्छाकल्पितोऽयमर्थः प्रमाणपरतन्त्रैरतन्त्रीकर्त्तव्य एव विद्वद्भिरित्यस्तु किं विस्तरेण ॥ ० ॥ १३ ॥ ० ॥

वाग्यताया वध्वा उपवेशनमुक्तमित्येतावन्तं कालं वाग्यतैवेयमासीत् । अथेदानीं योऽयं पत्यभिवादो विहितः,—

सोऽस्या वाग्विसर्गः ॥ १४ ॥

ऋजुरर्थः । अत्रोत्तरविवाहकर्म्मणः परिसमाप्तिः—इति भट्टनारायणप्रभृतयो वृद्धाः । कथं ज्ञायते ? परत्र समशनीयचरुहोमोपदेशात् । समशनीयचरुहोमः खलु कर्म्मान्तरम् ।

"चरुः समशनीयोयस्तया गोयज्ञकर्म्मणि" ।

इत्यादौ गोयज्ञादिसाहचर्य्यात्तथाऽवगतेः । अर्थ्यमप्यन्तरालविहितं प्रक्रान्तस्य कर्म्मणः परिसमाप्तिं द्योतयति । स्वकर्म्मव्यापृतस्य तदनुपपत्तेः । उत्तरविवाहकर्म्मणो मध्ये ब्रह्मचर्य्यादिनियम-

विधानस्याश्लिष्टत्वाच्च। तस्माद्विवाहकर्म्मण इवोत्तरविवाहकर्म्मणः परिसमाप्तिः साक्षादसूचिताऽप्यर्थतः प्रतिपत्तव्या। तस्मात् तन्त्रसमापनमिदानीं करणीयम्। दक्षिणा चानुपदेशात् पूर्णपात्रादिका देया स्यादिति केचित्।

अन्ये त्वाहुः। नाचोत्तरविवाहकर्म्मणः परिसमाप्तिः। प्रमाणाभावात्। उत्तरसूत्रे ब्रह्मचर्य्यादिविधानात्—इति चेत्। एतदपि तादृगेव। न ह्युत्तरविवाहकर्म्मणः परत एव ब्रह्मचर्य्यादि विधातव्यम्—इत्यत्रापि किञ्चित्प्रमाणमस्ति। अपि च। ब्रह्मचर्य्यादिसूचनादानुमानिकी खल्वत्र कर्म्मणः परिसमाप्तिः। समशनीयचरुशेषप्रतिपत्तेस्तु परतः प्रत्यक्षामेव तामुपलभामहे। न खल्वनुमानं प्रत्यक्षमपि बाधितुमीष्टे। अथापि स्यात्—तस्यैव कर्म्मणः सा परिसमाप्तिः न उत्तरविवाहकर्म्मणः—इति। न—इति ब्रूमः। कुतः? समशनीयचरोर्होमस्य प्रतिपत्तेश्च सूचनादेव तदपवर्गस्य सुखमवगमात्। तदर्थमपवर्गस्य सूचनस्यानतिप्रयोजनत्वात्। तस्मात्तत्परत्वे प्रमाणाभावाच्च। तस्मादुत्तरविवाहकर्म्मणोऽपवर्गस्यान्यत्राऽसूचितत्वात् तस्यैव सोऽपवर्गः—इत्यपगच्छामः। दक्षिणा च गौरेवं सति कर्म्मणोऽनुरूपा स्यात्! अत इदानीं तन्त्रसमापनं न कर्त्तव्यम्—इति। तदत्र भगवन्तोभूमिदेवाः प्रमाणम् ॥०॥१४॥०॥

तावुभौ तत्प्रभृति त्रिरात्रमक्षारलवणाशिनौ ब्रह्मचारिणौ भूमौ सह शयीयाताम् ॥ १५ ॥

तावुभौ दम्पती, तत्प्रभृति विवाहकर्म्मारभ्य। तदिति विप्र-

कृष्टस्य विवाहकर्म्मणः परामर्शः। नोत्तरविवाहस्य पत्यभिवादनस्य वा। एवं ह्यन्येतदो निर्देशः स्यात्। अतो यदि दैवान्मानुषादा कुतश्चिदन्तरायाद्विवाहदिने पत्यभिवादनान्तं न क्रियते, तदापि तत एवारभ्य यथासम्भवममी नियमा भवन्ति।

त्रिरात्रं तिस्रो रात्रयो यत्र, चीर्ण्वोरात्राणि—इत्येतत्। अक्षारलवणाशिनौ, क्षारं राजिकादि, लवणं सैन्धवादि। क्षारत्वेऽपि लवणस्य ब्राह्मणपरिव्राजकन्यायात् पृथगुपादानम्। क्षारञ्च लवणञ्च क्षारलवणं, तन्न भवतीत्यक्षारलवणम्—

"गोक्षीरं गोघृतञ्चैव धान्यं मुद्गास्तिला यवाः।
अक्षारलवणा ह्येते क्षाराश्चान्ये प्रकीर्त्तिताः"॥

इति स्मृत्युक्तलक्षणं वा। अशितुं शीलं ययोः, तौ अक्षारलवणाशिनौ स्याताम्। यत्तु अक्षारलवणमकृत्रिमलवणम्—इति रघुनन्दनवर्णनम्। तदसङ्गतम्। क्षारपदस्य कृत्रिमपरत्वे लक्षणाप्रसङ्गात्। अथ, क्षारमृत्तिकादिकृतं लवणं क्षारलवणमुच्यते? एवमपि लक्षणैव। अपि च। एवं खल्वकृत्रिमलवणाशनसमकालमेवान्यस्मिन्नपि क्षारादावशिते दोषो वा न स्यात्, अकृत्रिमलवणादन्यदा किमपि न अशितव्यं स्यात्।

ननु "हविष्यमन्नं * * भुञ्जीत"—इति सूचयिष्यति, तेनैवाक्षारलवणाशनं सेत्स्यति? न—इति ब्रूमः। एतस्मिन्नसूचिते हि 'हैमन्तिकं सिताखिन्नम्'—इत्यादि पारिभाषिकस्य हविष्यस्य,—

"हविष्ये गोघृतं मुख्यं तदभावे तु माहिषम्"।

इत्येवमादिकस्य वा भोजनं स्यात् न अक्षारलवणस्य। अत-

इदानीमिदं सूचितम् । अन्यार्थलाभ निर्देशस्य । तथोत्तरच वच्यामः । परमार्थतस्तु परत्र "हविष्यमन्नम्"—इति सूचयन्नेत-देवाचारलवणं व्याकरोति । तथाच गृह्यासंग्रहः ।

"अयुक्तमम्लक्षारलवणैरपर्य्युषितमेवच ।

हविष्यमेतदन्नाद्यमसुरैश्चाप्यसंयुतम्" ॥

इति । अतएवोत्तरसूत्रे, हविष्यमन्नमित्युक्तार्थमिति भट्टनारायणेन व्याख्यातम् । 'ब्रह्मचारिणौ' च स्यातां दम्पती । 'तत्प्रभृति त्रिरात्रम्'—इत्यनुषज्यते । एवमुत्तरत्रापि । ब्रह्मचर्य्यमिह व्यवायवर्ज्जनमुच्यते । विवाहस्य वृत्तत्वात् व्यवायः प्राप्नोति । वैदेहेषु च मद्य एव व्यवायो दृष्टः । सोऽयमिदानीं प्रतिषिध्यते ।

"त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्" ।

इत्येवमादिके च कल्पे व्यवायस्य नासम्भवः—इति द्रष्टव्यम् । 'भूमौ' अधस्तात् 'सह' मिलित्वा 'शयीयातां' दम्पती । भूमाविति पर्य्यङ्कादीनां प्रतिषेधो न स्वस्तरकम्बलादीनाम् । सह—इत्येकस्वस्तरनियमार्थम् ॥ ० ॥ १५ ॥ ० ॥

अचार्घ्यमित्याहुः ॥ १६ ॥

अचैतस्मिन्नवसरे अर्घ्यमर्हणं वरस्य, कन्यापित्रा कर्त्तव्यमित्याहुराचार्य्याः । 'षडर्घ्या भवन्ति'—इति वच्यति । तत्र योविवाह्यः, सोऽयम् ॥ ० ॥ १६ ॥ ० ॥

आगतेष्वित्येके ॥ १७ ॥

विवाहार्थमागतमात्रेष्वेवार्हणं कर्त्तव्यमित्येके आचार्य्या मन्यन्ते ॥ ० ॥ १७ ॥ ० ॥

हविष्यमन्नं प्रथमं परिजपितं भुञ्जीत ॥ १८ ॥

हविष्यं माषकोद्रव्यादिवर्ज्जमन्नम् । अक्षारलवणमित्येतत् । हविषि साधु हविष्यं—इति भङ्ग्या वा होमोऽत्र सूच्यते इति होमावशिष्टमेव भुञ्जीत । युक्तञ्चैतत् ।

"अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् ।
यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते" ॥

इति स्मरणात् । "केवलाघो भवति केवलादी"—इति च ब्राह्मणम् । न चेदेवं, पूर्व्वमेव त्रिरात्रमक्षारलवणाशनसूचनात् 'हविष्यमन्नम्'—इति पुनरुपादानमनर्थकं स्यात् । अथवा । हविष्यमन्नमित्यनेन पूर्व्वोक्तमक्षारलवणं व्याख्यातमित्युक्तमादावेव । 'परिजपितम्' अन्नपाशेन मणिना—इत्यादिना इत्यर्थः । कुतः? उत्तरत्र तथा सूचनात् । प्रथमं भुञ्जीत, वरः । तदिदमस्य विवाहात् परतः प्रथमं भोजनम् । यत्तु—श्वशुरगृहे प्रथममिदं भोजनम्—इति वर्णयन्ति । तन्मन्दम् । मानाभावात् । श्वशुरगृहादागत्य प्रागुदीच्यां ब्राह्मणकुले चेदानीमस्यावस्थानात् ॥ ० ॥ १८ ॥ ० ॥

श्वोभूते वा समशनीयꣳस्थालीपाकं कुर्व्वीत ॥ १९ ॥

श्वः अनागतदिने भूते—प्रभाते जाते—इत्येतत् । वाशब्दो विकल्पार्थः । रात्रौ भोजनकालादुपरि विवाहे, होमविधिना वा भोजनकालातिक्रमे एतद् बोद्धव्यम् । सम्यगशनार्थं क्रियते इति समशनीयं स्थालीपाकं कुर्व्वीत ॥ ० ॥ १९ ॥ ० ॥

तस्य देवता अग्निः प्रजापतिर्व्विश्वेदेवा अनुमतिरिति ॥ २० ॥

तस्य—इति तच्छब्देन पूर्व्वदिने परदिने वा करणेऽपि स्थालीपाकस्यैता देवताः—इति दर्शयति। स्पष्टमन्यत्। असमासकरणं पृथङ्निर्व्वापहोमप्रज्ञापनार्थम्। देवतानाञ्च प्राधान्यात् चिस्तण्डुलानां प्रक्षालनम्। देवताभ्यः खल्वेताभ्यो मेक्षणेनोपघातं होतव्यम्। तदिदमधस्तादुक्तम् ॥ २० ॥ ० ॥

उद्धृत्य स्थालीपाकं व्यूह्यैकदेशं पाणिनाऽभिमृशेदन्नपाशेन मणिनेति ॥ २१ ॥

उद्धृत्य पात्रान्तरे कृत्वा स्थालीपाकमवशिष्टम्। व्यूह्य पात्रान्तरे स्थापयित्वा। एकदेशं न सर्व्वमपि भाण्डस्थमन्नम्। स्थालीपाकशेषात् एकदेशं पात्रान्तरेणावदाय पात्रान्तरे स्थापयित्वा—इत्येतत्। दक्षिणेन पाणिना अभिमृशेत् अन्नपाशेन मणिना—इति मन्त्रत्रयेणेत्यर्थः। अत्र असावित्यस्मिन् मन्त्रस्थाने सम्बोधनान्तं वधूनाम प्रयोक्तव्यम्। "असाविति नाम गृह्णाति"—इति सूत्रान्तरात्। अत्र, असावित्यूहं विनैव, विनैव होममशनमात्रञ्च लिखन् भवदेवोऽनादेयवचन एव ॥ ० ॥ २१ ॥ ० ॥

भुक्तोच्छिष्टं वध्वै प्रदाय यथार्थम् ॥ २२ ॥

परिजपितमन्नं पतिः किञ्चित् भुक्त्वा उच्छिष्टं वध्वै प्रदाय यथार्थम्—इति कर्म्मणः परिसमाप्तिरिह विज्ञायते। तदिदानीं

तत्त्वं समापयितव्यम्। यच्चोक्तं तत्त्वकारेण—"यद्यशक्तेः कुलाचाराद्वा तद्दिन एव धृतिहोमादि चतुर्थीहोमान्तं कर्म्म क्रियते, तदाऽभिमन्त्रितं कदलादिकं स्वयमाघ्राय वधूमाघ्रापयेत्"—इति। तदसङ्गतम्। कस्मात्? अशक्तेः स्वकालात् पूर्व्वं कर्म्मकरणे मानाभावात्। विहितकालादर्व्वाक् कृतस्यापि कर्म्मणः स्वस्यागते काले पुनः करणमेवानुशिष्यते।

"अकाले चेत् कृतं कर्म्म काले तस्य पुनः क्रिया"।

इत्यादिवचनैः। एतच्च स्वयमपि वर्णितम्। तत् कथमत्र विपरीतमुच्यते—इति स एव जानाति। अथास्तु कुलाचारादन्यत्रापि काले कर्म्मणः करणम्? नेत्युच्यते। न खल्वयमाजानिकः समाचारः। किन्तर्हि? आलस्यादर्व्वाचीनानां उपरिष्टादेव प्रवृत्तः—इत्यनुमीयते। न हि पूर्व्वेषामयथा क्रिया युक्ता सम्भावयितुम्। सोऽयमाचारः चाण्डालानाचार इव दुराचार एव न कुलाचारः। अपि च। स्मृतिमूलः खल्वाचारः तया विरोधे स्वयमेव बाध्यते न जातुचिदपि तां बाधितुमीष्टे। न हि पश्चिमसिद्धेनाचारेण पूर्व्वसिद्धं शास्त्रमुपरोद्धव्यं—इति युक्तम्। तथा चोक्तम्।

"स्मृतिमूलो हि सर्व्वत्र शिष्टाचारस्ततोऽत्र च।
अनुमेया स्मृतिः स्मृत्या बाध्या प्रत्यक्षया तु सा"॥

इति। गौतमोऽपि स्मरति। "देशजातिकुलधर्म्माश्चाम्नायैरविरुद्धाः प्रमाणम्"—इति। तथा वशिष्ठः। "देशधर्म्मजातिधर्म्मकुलधर्म्मान् श्रुत्यभावादब्रवीन्मनुः"—इति।

येषामपि आचारमूलकत्वं स्मृतीनाम्—इति दर्शनम्, तेषामपि

कृत्युक्त एव प्राक्तनाचारोऽनुसरणीयः न तूपरिष्टात् यदृच्छया प्रवृत्तः—इत्यास्थेयम्। पूर्व्वे खल्वृषयः साक्षात्कृतधर्म्माणः सर्व्वज्ञकल्पा लोकस्थितिचिकीर्षया यमाचारं प्रवर्त्तयन्तिस्म, नाथमर्व्वाचीनानामतथाभूतानां यदृच्छया कल्पितमात्रेणाचारेणोपरोद्धुमुचितः। "अथ खलूच्चावचा जनपदधर्म्मा ग्रामधर्म्माश्च तान् विवाहे प्रतीयात्" "यत्तु समानं तद्वक्ष्यामः"—इति गृह्यान्तरसूत्राभ्यामपि गृह्योक्तधर्म्माणां जनपदादिधर्म्माणाञ्च विरोधे गृह्योक्तधर्म्माणामेव करणम्—इति गृह्यकाराणां मतं विज्ञायते ॥ ० ॥ २२ ॥ ० ॥

गौर्दक्षिणा ॥ २३ ॥

समशनीयचरुहोमस्य,—इति केचित्। उत्तरविवाहकर्म्मणः,—इत्यन्ये ॥ २३ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये द्वितीयप्रपाठकस्य तृतीया खण्डिका ॥ ० ॥

द्वितीयप्रपाठके चतुर्थी खण्डिका।

अथ भर्तृगृहगमनार्थं वध्वाम्—

यानमारोहन्त्याᳬसुकिᳬसुकᳬशाल्मलिमित्येतामृचं जपेत् ॥ १ ॥

पाणिग्राहः—इति सम्बध्यते। आरोहन्त्याम्—इति निर्देशादारोहणकालीनत्वं जपस्य। एतामितिकरणाच्च रथासम्भवे अश्वादियानपक्षेऽपि एताम्—एवम्भूतामेव जपेत् न विलोपनमूहं वा कुर्यादित्यर्थः॥ १॥ ०॥

अध्वनि चतुष्पथान् प्रतिमन्त्रयेत नदीश्च विषमाणि च महावृक्षान् श्मशानञ्च,—मा विदन् परिपन्थिन—इति ॥ २ ॥

वध्वा सह अध्वनि मार्गे वर्त्तमानः पाणिग्राहः मा विदन्—इति मन्त्रेण चतुष्पथान् समीपस्थाननुमन्त्रयेत् अवलोकयन्। एवं नदीश्चेत्यादावपि व्याख्येयम्। नद्यः—

"धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते।
न ता नदीशब्दवहा गर्त्तास्ते परिकीर्त्तिताः"।

इति कर्म्मप्रदीपोक्तलक्षणाः। विषमाणि सिंहव्याघ्रचौरादि-भयाकुलानि, उन्नतानतानि वा। महावृक्षा अतिप्रवृद्धास्तरवः॥०॥ ॥२॥०॥

अक्षभङ्गे नद्धविमोक्षे यानविपर्य्यासेऽन्यासु चापत्सु यमेवाग्निं हरन्ति तमेवोपसमाधाय व्याहृतिभिर्हुत्वा-ऽन्यत् द्रव्यमाहृत्य यक्ष्यतेचिदभिश्रिषे—इत्याज्यशेषेणा-भ्यञ्ज्यात्॥ ३॥

अध्वनि अक्षभङ्गे। अक्षो रथचक्रं, तस्य भङ्गे। नद्धस्य योक्त्रा-दिबद्धस्य अश्वादेर्व्वा विमोचे। यानस्य रथस्य विपर्य्यासे औत्तरा-धर्य्यप्रातिलोम्ये अन्यथागमने वा। अन्यासु च आपत्सु यानात् परिपतनादिकासु चौरव्याघ्रादिकृतासु वा। यमेवाग्निमौपासनं हरन्ति नयन्ति,—यमेव वा कञ्चिदग्निं लौकिकं सन्निधौ लब्ध्वा आनयन्ति। 'तमेव' अग्निम् 'उपसमाधाय' इन्धनादिना सन्धुक्ष्य। तदेतद् यथार्थमभिप्रेतम्। कथन्नाम? शालाग्नेस्तत्रैव, अनग्नेस्तु यमेव लब्ध्वा आनयन्ति, तत्र—इति।

ननु यमेवाग्निं हरन्ति—इत्येतत् शक्यमवक्तुं, नित्यनैमित्तिक-काम्यहोमार्थमेव हि सोऽग्निरुपादीयते, अथोच्यते कारणं वक्तव्यम्? उच्यते। "सायमाहुत्युपक्रम एवात ऊर्द्ध्वं गृह्योऽग्नौ होमो विधी-यते"—इति सूत्रणात् सायमाहुतेः पूर्व्वमक्षभङ्गादौ जाते होमोऽयं विवाहाग्नौ न प्राप्नोति। तदर्थं 'यमेवाग्निं हरन्ति'—इति सूचितम्। 'व्याहृतिभिः' आज्येन स्रुवेण 'हुत्वा'। "व्याहृतिभिरिति

वचनं परिसङ्ख्यानार्थम् । तेन चिप्रहोमः स्यात् न तन्त्रहोमः । एवञ्च न्युब्जकरणपर्य्युक्षणे कृत्वा आज्यं संस्कृत्य समिधमाधाय प्रायश्चित्तार्थत्वात् व्याहृतिचतुष्टयं हुत्वा अनुपर्य्युक्षेत्"—इति भट्टभाष्यम् । ततश्च 'अन्यत्' अचादि 'द्रव्यं' आनीय, यच्चतेचिदित्यनया ऋचा न साम्ना, ऋगधिकारात् साम्नेति चावचनात् । 'आज्यशेषेण' होमावशिष्टेनाज्येन अभ्यञ्ज्यात् अभ्यञ्जयेत्—इत्यर्थः । कश्चित्तथैव पाठः । अभ्यञ्जनमिह सचणम् । अञ्जु व्यक्तिसचणगतिषु—इति स्मरणात् । अभ्युचणम्—इत्यसङ्गता वर्णना ॥ ० ॥ ३ ॥ ० ॥

वामदेव्यं गीत्वाऽऽरोहेत् ॥ ४ ॥

वामदेव्यं नाम साम गीत्वा वधूसहितः पतिर्यानमारोहेत् । आरोहयेत्—इति पाठे वधूं यानमारोहयेत्—इत्यर्थः । ननु इदमवाच्यम् 'अपवृत्ते कर्म्मणि वामदेव्यगानम्'—इति सिद्धत्वात् । नैवम् । कर्म्मापवर्गविहितादामदेव्यगानादपरस्यैव वामदेव्यगानस्यैतदर्थत्वात् । अन्ये त्वाहुः,—सिद्धस्यापि वामदेव्यगानस्य पुनरुपादानं क्रमार्थम् अन्यथा अनुपर्य्युक्षणान्त एव स्यात्—इति ॥ ० ॥ ४ ॥ ०॥

प्राप्तेषु वामदेव्यम् ॥ ५ ॥

वध्वा प्राप्तेषु पतिग्टहेषु वामदेव्यं गायेत् पतिः । वामदेव्यं गीत्वा प्रवेशयेत्—इति रघुनन्दनवर्णनायां प्रमाणं नास्ति । वधूश्चेदानीमपि यानस्थितैव वर्त्तते, ब्राह्मण्यः खल्वेनां यानादवरोपयिष्यन्ति ॥ ० ॥ ५ ॥ ० ॥

गृहागतां पतिपुत्रशीलसम्पन्ना ब्राह्मण्योऽवरोप्या-नडुहे चर्म्मण्युपवेशयन्ति—इह गावः प्रजायध्वमिति ॥ ॥ ६ ॥

पतिगृहागतां वधूम्। गृहं याताम्—इति पाठेऽपि पतिगृहं प्राप्तामित्येक एवार्थः। पतिः, पुत्राः, शीलं ब्रह्मण्यतादि त्रयोदशविधं हारीतोक्तम्। एतैः सम्पन्नाः—अवियुक्ताः ब्राह्मण्यः, अवरोप्य यानादवतार्य्य, आनडुहे चर्म्मण्युपवेशयन्ति—इत्युक्तार्थम्। इह गाव इतिमन्त्रेण वरेण पठितेनेत्यर्थः ॥ ० ॥ ६ ॥ ० ॥

तस्याः कुमारमुपस्थ आदध्युः ॥ ७ ॥

तस्या आनडुहे चर्म्मण्युपविष्टाया वध्वा उपस्थे उत्सङ्गे कुमारमकृतचूड़ं यं कञ्चिद्बालकमादध्युः स्थापयेयुः। ता एव ब्राह्मण्यः ॥ ० ॥ ७ ॥ ० ॥

तस्मै शकलोटानञ्जलावावपेयुः ॥ ८ ॥

तस्मै—इति व्यत्ययेन षष्ठ्यर्थे चतुर्थी। तस्य वधूत्सङ्गोपविष्टस्य कुमारस्याञ्जलौ शकलोटान् आवपेयुर्दद्युस्ता एव ब्राह्मण्यः। आह। क इमे शकलोटा नाम? उच्यते। शके कर्दमे लोटन्ति—इति शकलोटाः शालूकान्यूच्यन्ते। तानि च कह्लारकुमुदनीलोत्पल-मूलानि ॥ ० ॥ ८ ॥ ० ॥

फलानि वा ॥ ९ ॥

फलानि वा चूतादीनि तस्याञ्जलावावपेयुः ॥ ९ ॥ ० ॥

उत्थाप्य कुमारं ध्रुवा आज्याहुतीर्जुहोत्यष्टाविह धृतिरिति ॥ १० ॥

वधूत्सङ्गादुत्थाप्य कुमारम्, 'सन्निधावुपवेश्य'—इति भट्टनारायणः। ध्रुवाः ध्रुवफलकाः। ध्रुवत्वं स्थिरत्वं वा वध्वाः पतिगृहे जन्यते आभिरित्याहुतयो ध्रुवा इत्युच्यन्ते। अथवा। ध्रुवाः आवश्यकाः। यद्यपि सर्व्वासामप्याहुतीनामावश्यकत्वमस्ति, तथापि स्वगृहागमनात् परं सूचितत्वात् श्वशुरगृहावस्थानपक्षे एता आहुतयो न प्राप्नुवन्ति, इति, तत्राप्यवश्यमासां होतव्यत्वार्थन्तदुपादानम्। 'आज्याहुतीर्जुहोति'—इत्युक्तार्थम्। कियत्यः पुनस्ताः? अष्टौ। कथं जुहोति? इह धृतिरित्यष्टभिर्मन्त्रैः। अष्टाविति किमर्थम्? आहुतीनामष्टत्वप्रज्ञापनार्थम्। इह धृतिरिति कतमे मन्त्राः इहाभिप्रेयन्ते, तन्नैवावधार्य्यते। तस्मादष्टाविति वचनं सुखेन तदवगमार्थम्। 'आम्नाये द्रवमानत्वान्मन्त्रस्याहुतिद्वयमेकैकेन मन्त्रेण माभूदित्यष्टावित्युक्तम्'—इति भट्टभाष्यम्।

तद्च, इह धृतिः स्वाहा—इत्यादिः प्रयोगः। ननु स्वाहायोगे चतुर्थी प्राप्नोति? सत्यं प्राप्नोति, आम्नायविरोधात्तु न क्रियते। चतुर्थ्यां हि कृतायाम्—इह धृतिः इत्याम्नाय उपरुध्येत। 'मन्त्रान्ते स्वाहाकारः'—इति च सूचयन्नाचार्य्यः समाम्नायपठितस्य मन्त्रस्य स्वाहाकारान्तत्वमेव विशेषो नान्यः कश्चिदिति दर्शयति। तथाच कर्म्मप्रदीपः।

"धृतिहोमे न प्रयुञ्ज्याद्दोनामसु तथाऽष्टसु।

चतुर्थीमध्यदत्येतद्धोमान्नि न हि हूयते" ॥

इति ॥ ० ॥ १० ॥ ० ॥

समाप्तासु समिधमाधाय यथावयसं गुरून् गोत्रेणाभिवाद्य यथार्थम् ॥ ११ ॥

समाप्तासु—इति, समिधमाधाय—इति च, इयमपि क्रमार्थमुच्यते। कथन्नाम? समाप्तासु ध्रुवाहुतिषु अन्यास्वपि आज्यतन्त्रविहितास्वाहुतिषु समिधमाधायैव अभिवादयेत् न त्वनुपर्य्युक्षणादिकमपि कृत्वा। यथावयसं वयसोऽनतिक्रमेण—यो यो वयसा वृद्धस्तं तमित्यर्थः। गुरून् विद्यागुरुपितृमातृप्रभृतीन्। गोत्रेण अभिवाद्य—इत्युक्तार्थम्। तत्रापि प्रथमं विद्यागुरुमेवाभिवादयेत्। कुतः?

"लौकिकं वैदिकं वापि तथाऽऽध्यात्मिकमेव च।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत्" ॥

इति।

"न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत्"।

इति च स्मरणात्। पित्रोस्तु प्रथमं मातरमेव।

"सहस्रेण पितॄन् माता गौरवेणातिरिच्यते"।

इति गौरवातिरेकस्मरणात्।

"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता"।

इति च गौरवातिरेकस्य गुरोः पितृभ्यामादितोऽभिवादनस्य

दर्शनात्। तस्मात् मातुर्गौरवातिरेकस्मरणं पोषणरक्षार्थम्—इति मतमसङ्गतम्। अथ,—

"कृष्णोऽपि वसुदेवस्य पादौ जग्राह सत्वरम्।
देवक्याश्च महाबाहुर्बलदेवसहायवान्"।

इति पौराणिकलिङ्गात् क्रमः कल्प्यताम्? उच्यते। कल्पनीयः क्रमः—इति सत्यम्। स च तावत् स्मार्त्तेनैव लिङ्गेन कल्पयितुमुचितः। न तु एतदनादृत्य पौराणिकेन लिङ्गेन। कस्मात्? स्मृतेर्बलवत्त्वात्, विशेषतस्तु मनुस्मृतेः। 'भगवानपि सर्व्वात्मा'—इत्युपक्रम्य—

"ननाम दण्डवद्भूमौ मातरं पितरन्तथा"।

इति पुराणान्तरगतेन लिङ्गेन सत्प्रतिपक्षितत्वाच्च।

"मातरं पितरञ्चोभौ दृष्ट्वा पुत्त्रस्तु धर्म्मवित्।
प्रणम्य मातरं पश्चात् पितरं प्रणमेद्गुरुम्"।

इति पुराण एव प्रथमं मातुः प्रणामाभिधानाच्च। तस्मात्—पितुरादौ पादग्रहणं ततो मातुः—इति तत्त्वकारमतमसङ्गतम्। यथार्थम्—इति कर्म्मणः परिसमाप्तिरुच्यते। तेनानुपर्य्युक्षणादि तन्त्रमिदानीं समापयेत्। दक्षिणा चानादेशात् पूर्णपात्रादिका स्यात् ॥ ० ॥ ११ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज-श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये द्वितीयप्रपाठकस्य चतुर्थी खण्डिका ॥ ० ॥

अथातश्चतुर्थीकर्म्म ॥ १ ॥

अथेति पूर्व्वप्रकृतार्थम् । अथ विवाहरात्रेर्या चतुर्थी रात्रिः तस्यां कर्म्म चतुर्थीकर्म, वर्णयिष्यते—इति सूत्रशेषः । अथ, सन्निहितत्र्यहतिहोममेवापेक्ष्य चतुर्थी कथं न स्यात् ? तर्हि अथशब्दोऽनर्थकः स्यात् सन्निधानादेव तदवगतेः । तस्मादथेति विवाहस्य परामर्शः । चतुर्थी—इति स्त्रीलिङ्गनिर्द्देशाच्च चतुर्थी रात्रिरित्यवगम्यते । इतरथा चतुर्थकर्म्मेति निर्द्देशः स्यात् ।

"विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु ।
एकत्वमागता भर्त्तुः पिण्डे गोत्रे च सूतके" ।

इति ।

"चतुर्थीहोममन्त्रेण त्वङ्मांसहृदयेन्द्रियैः ।
भर्त्रा संयुज्यते पत्नी तद्गोत्रा तेन सा भवेत्" ।

इति चानयोर्व्वचनयोस्तात्पर्य्यपर्य्यालोचनयाऽप्येतदवगम्यते । कथम् ? इत्थम् । अत्र खल्वेकस्मिन् वचने चतुर्थेऽहनि रात्रौ गोत्रैक्यमनुशिष्यते । अन्यस्मिंस्तु तस्य चतुर्थीहोममन्त्रफलत्वम् । तस्मादनुमिनुमः,—विवाहाच्चतुर्थदिने रात्रावयं होमः—इति । एवं खल्वत्र रात्रेरपेक्षा दृष्टार्था भवति । अन्यथा अदृष्टार्थत्वमस्याः कल्पनीयम् । तच्चानिष्टम् ।

अतःशब्दो हेत्वर्थः। यस्मादेतस्मिन् कर्मण्यकृते याऽस्याः पापी लक्ष्मीः—इत्यादयो दोषाः शरीरादस्या नापयन्ति, अतः एतस्मात् कारणात् इदमवश्यं कर्त्तव्यम्—इत्यर्थः ॥ ० ॥ १ ॥ ० ॥

अग्निमुपसमाधाय प्रायश्चित्ताज्याहुतीर्जुहोति अग्ने प्रायश्चित्त इति चतुः ॥ २ ॥

अग्निमुपसमाधाय—इत्युक्तार्थम्। प्रायश्चित्तलिङ्गैर्मन्त्रैराज्याहुतयः प्रायश्चित्ताज्याहुतयः, ताः जुहोति, अग्ने प्रायश्चित्ते—इति मन्त्रेण। किं सकृत् ? न। कति तर्हि ? चतुः। अत्र, चतुरिति वीप्सितमवगन्तव्यम्। तत्र हेतुं वक्ष्यामः ॥ ० ॥ २ ॥ ० ॥

किं समाम्नायपठितमेव अग्ने प्रायश्चित्ते—इति मन्त्रमविशेषेण अभ्यस्य चतुश्चतुर्होतव्यम ? न। कथन्तर्हि ? उच्यते। प्रथमा तावदाहुतिर्यथापठितेनैव मन्त्रेण होतव्या। अन्यासु पुनराहुतिषु—

अग्नेः स्थाने वायु-चन्द्र-सूर्य्याः ॥ ३ ॥

क्रमशः प्रयोक्तव्याः—इति सूत्रशेषः। समाम्नायपाठादेतावानेव विशेषः न पुनरपरः कोऽपि। कुतः ? प्रथमस्यैव मन्त्रस्याग्निपदस्थाने वायु-चन्द्र-सूर्य्यपदप्रक्षेपमात्रेणाभ्यासोपदेशात्। तस्मात्, चतसृष्वप्याहुतिषु पापी लक्ष्मीः,—इति पदमेव स्यात् ॥ ० ॥ ३ ॥

समस्य पञ्चमीं बहुवदूह्य ॥ ४ ॥

समस्य अग्नि-वायु-चन्द्र-सूर्य्याः—इत्युच्चार्य्य, बहुवदूह्य प्रायश्चित्तयो यूयम्—इत्येवमादि बहुवचनमूहित्वा पञ्चमीमाहुतिं

जुहोति। अयमपि सूचितविशेषमात्रेण प्रथमस्यैव अग्ने प्रायश्चित्ते—इत्यादिमन्त्रस्याभ्यासोपदेशः। तेनात्रापि पापी लक्ष्मीः—इति पदमेव स्यात्। अत्रापि, पञ्चमीं पञ्चमीम्—इति वीप्सा बोद्धव्या।

अत्र किञ्चिदक्तव्यमस्ति। पठ्यमानमन्त्रकाण्डे प्रायश्चित्ताज्याहुतिलिङ्गाः पञ्च मन्त्राः पठ्यन्ते। तत्र, "अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्याः पापीलक्ष्मीस्तनूस्तामस्या अपजहि"—इति प्रथमो मन्त्रः। "वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम-उपधावामि याऽस्याः पतिघ्नी तनूस्तामस्या अपजहि"—इति द्वितीयो मन्त्रः। "चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्याः अपुत्र्या तनूस्तामस्या-अपजहि"—इति तृतीयो मन्त्रः। "सूर्य्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्या अपसव्या तनूस्तामस्या अपजहि"—इति चतुर्थो मन्त्रः। "अग्नि-वायु-चन्द्र-सूर्य्याः प्रायश्चित्तयो यूयं देवानां प्रायश्चित्तयः स्थ ब्राह्मणो वो-नाथकाम उपधावामि यास्याः पापीलक्ष्मीः पतिघ्नी अपुत्र्या अपसव्या तनूस्तामस्या अपहत"—इति पञ्चमो मन्त्रः। एवन्तावत् पञ्चमन्त्राः पठ्यन्ते।

तत्राचार्य्येण प्रथमेनैव मन्त्रेण पञ्च आहुतयः सूचिताः। प्रथमा तावदाहुतिर्यथापठितेनैव मन्त्रेण होतव्या। 'अग्ने'—इत्यस्य स्थाने, 'वायो'—इत्युक्त्वा तेनैव द्वितीया, 'चन्द्र'—इत्युक्त्वा तेनैव तृतीया, 'सूर्य्य'—इत्युक्त्वा तेनैव चतुर्थी, 'अग्नि-वायु-चन्द्र-सूर्य्याः'—इत्युच्चार्य्य

बहुवदूहित्वा तेनैव पञ्चमी। एवं प्रथमपठितेनैव मन्त्रेण पञ्च मन्त्राः सम्पद्यन्ते, पञ्च चाहुतयोभवन्ति। अत्र मन्त्रपञ्चक-एव पापी लक्ष्मीः—इति पदं स्यात्। सूचितविशेषमात्रेण प्रथम-पठितस्यैव मन्त्रस्याभ्यासोपदेशात्—इत्यवोचाम।

तत्र च, प्रथमपठितमन्त्रस्य अग्निपदस्थाने एकैकशो वायु-चन्द्र-सूर्य्यपदप्रक्षेपेण ये चत्वारो मन्त्राः सम्पद्यन्ते, याश्च चतस्र आहुतयो भवन्ति, तेषां चतुर्णां चतुर्धा अभ्यासः कर्त्तव्यः। कुतः? चतुश्चतुरिति वीप्सावलात्। तत्र, चतुर्णां मन्त्राणां चतुर्द्दे चत्वारो मन्त्राः चतुर्भिर्गुणिताः षोड़श सम्पद्यन्ते। आहुतयोऽपि षोड़शैव भवन्ति। एवं समस्ताग्नि-वायु-चन्द्र-सूर्य्यपदवान् बहुवच-नान्तः पञ्चमोऽपि मन्त्रः चतुर्द्धैवाभ्यसितव्यः, पञ्चमीं पञ्चमीमिति वीप्सावलादेव। एवञ्च समस्ताग्न्यादिपदवन्तो बहुवचनान्ता अपि मन्त्राश्चत्वार एव सम्पद्यन्ते। आहुतयश्च चतस्रो भवन्ति। एवं मिलित्वा प्रयोगकाले विंशतिर्मन्त्राः, विंशतिश्चाहुतयः सम्पद्यन्ते। तथाच "व्यस्तस्य चतुष्टयस्य समस्तस्य चैकस्य चतुर्धा आवृत्तिः सिद्धा"—इति नारायणोपाध्यायाः।

तदेवं चत्वारि मन्त्रपञ्चकानि भवन्ति। समस्य पञ्चमीम्—इति सर्व्वेषामेव बहुवचनान्तमन्त्राणां पञ्चमीत्वानुरोधात्। तत्र प्रथमं मन्त्रपञ्चकं यथा पठितव्यं, तथा पुरस्तादस्माभिर्दर्शितम्। उत्तर-पञ्चकत्रयेऽपि प्रथमपञ्चकमन्त्रा एवाभ्यसितव्याः। तत्र द्वितीयपञ्चके पापी लक्ष्मीः—इति पदस्थाने पतिघ्नी—इति पठितव्यम्। अयमेव विशेषः, अन्यत् सर्व्वं पूर्व्ववत्। एवं तृतीयपञ्चके तत्रैव स्थाने,

'अपुत्र्या'—इति, चतुर्थपञ्चके तत्रैव स्थाने 'अपसव्या'—इति विशेषः । सर्व्वमन्यत् पूर्व्ववदेव । कुतः पुनः पतिघ्न्यादिपदप्रयोगोवर्ण्यते ? न खल्वेतत् सूचितम् । उच्यते । मन्त्रसमाम्नाये पतिघ्न्यादिपदपाठबलादेवसुन्नीयते । अन्यथा तत्र मन्त्रपञ्चकपाठोऽनर्थक एव स्यात् । प्रथमपठितेनैव मन्त्रेण पञ्चमन्त्राणां सूचितत्वात् । तस्मात् द्वितीय-तृतीय-चतुर्थमन्त्रपाठः, तत्तत्पञ्चके पतिघ्न्यादिपदप्रक्षेपप्रज्ञापनार्थः । पञ्चममन्त्रपाठस्तु समस्ताघ्न्यादिपदवति मन्त्रे एकैकशः पापीलक्ष्म्यादिप्रत्येकपदपाठसूचनार्थः । तदेतत् सर्व्वं कर्म्मप्रदीपकृता कात्यायनेन स्पष्टीकृतम् ।

"मन्त्राम्नायेऽग्न इत्येतत् पञ्चकं लाघवार्थिभिः ।
पठ्यते, तत्प्रयोगे स्यात् मन्त्राणामेव विंशतिः ।
अग्नेः स्थाने वायु-चन्द्र-सूर्य्या बहुवदूह्य च ।
समस्य पञ्चमीं सूत्रे चतुस्रतुरिति श्रुतेः ।
प्रथमे पञ्चके पापीलक्ष्मीरिति पदं भवेत् ।
अपि पञ्चसु मन्त्रेषु इति मन्त्रविदो विदुः ।
द्वितीये तु पतिघ्नी स्यादपुत्र्येति तृतीयके ।
चतुर्थे त्वपसव्येति इदमाहुतिविंशकम्" ।

इति । "यद्यपि, सूत्रे वीप्सा न श्रूयते, तथापि कल्प्या । अन्यथा पापीलक्ष्मीपदावृत्त्या व्यस्तसमस्ताः पञ्चैवाहुतयः स्युः । तदा चाम्नायपठितस्य वायो—इत्यादिमन्त्रचतुष्टयस्य वधूदोषोपशमनार्थस्य प्रायश्चित्ताङ्गस्य बाधापत्तिः । आम्नायपठितस्य समस्ताघ्न्यादियुतस्य पञ्चमस्यापि, पापीलक्ष्मीः—इत्याद्येकैकपदव्याहारेण

वौधायने अनुरोधात्"—इति नारायणोपाध्यायाः। व्याख्यानान्तराणि परेषां न दूषितानि ग्रन्थगौरवभयात्॥ ० ॥ ४ ॥ ० ॥

आहुतेराहुतेस्तु सम्पातमुदपात्रेऽवनयेत् ॥ ५ ॥

कृतभाष्यमेतत्॥ ० ॥ ५ ॥ ० ॥

तेनैनाᳪ सकेशनखामभ्यज्य ह्रासयित्वाऽऽप्लावयन्ति ॥ ६ ॥

तेन उदकपात्रस्थसम्पाताज्येन एनां वधूं, सकेशनखां सह केशैश्च नखैश्च वर्त्तमानाम्, अभ्यज्य सचयित्वा, ह्रासयित्वा उदर्त्तनादिना तदभ्यञ्जनमपनीय। अथवा। ह्रासतिर्गतिकर्म्मा। तस्मात् प्रदेशात् प्रदेशमन्यं गमयित्वा। क्रामयित्वा—इति पाठे व्यक्त एवायमर्थः। वस्तुतस्तु, उदर्त्तनं नखरोमच्छेदनं मेखलायाः संसनञ्च ह्रासनमुच्यते। कथं ज्ञायते?

"उदर्त्तनं नखच्छेदो रोमच्छेदनमेवच।
संसनं मेखलायाश्च ह्रासनानि विदुर्बुधाः" ॥

इति गृह्यासंग्रहवचनात्। एतदविद्वांस एव 'क्रामयित्वा'—इति पठन्ति। आप्लावयन्ति स्नापयन्ति। बहुवचनादनियतः कर्त्ता। अत्र चतुर्थीकर्म्मणः परिसमाप्तिः॥ ० ॥ ६ ॥ ० ॥

ऊर्द्धं त्रिरात्रात् सम्भव इत्येके ॥ ७ ॥

प्रकृतात् त्रिरात्रादूर्द्धं परतः, सम्भवत्यनेन—इति सम्भवः सम्भोगः व्यवायः कर्त्तव्यः—इत्येके आचार्य्या मन्यन्ते। अथ, सूत्रमिदं ग्रन्थमवक्तुम्, सम्भवस्य रागत एव प्राप्तेः। विवाहात् प्रभृति

चिरात्रं ब्रह्मचर्य्यविधानाच्च तदूर्द्धं ब्रह्मचर्य्यनियमाभावस्यावगतेः। उच्यते। उपरिष्टात् स्नातकव्रतेषु सूचयिष्यति—"नाजातलोम्न्या सहोपहासमिच्छेत्"—इति, तदपवादार्थमिदमुच्यते। कथन्नाम? यद्यजातलोम्न्येवातीव पुरुषोपभोगाभिलाषिणी भवति, तर्हि चिरात्रादूर्द्धं तद्रचार्थं सम्भवितव्यम्। अपि च। ऋतुकालादन्यत्र रागमात्राधीनत्वात् सम्भवस्य स्त्रीणां तदभिलाषेऽपि पुंसो रागाभावादकरणमपि प्राप्नोति। तदनेन निरस्यते। अन्यथा खल्वभिलाषपरवशा कदाचिदकार्य्यमपि कुर्य्यात्। तस्माद्दिनाऽपि ऋतुकालं स्त्रीणां रक्षार्थं सम्भवितव्यम्—इति। रक्षणं खल्वासामवश्यमेव कर्त्तव्यम्। अकुर्व्वतो दोषश्रवणात्। तथा च मनुः।

"सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः"।

इति। सोऽयं रक्षणोपायः सम्भवोऽपि नियम्यते। तथाच स्मरणम्।

"यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्।
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः"।

इति।

"ऋतुकालाभिगमनं कार्य्यं पुंसा प्रयत्नतः।
सदैव वा, पर्व्ववर्ज्जं स्त्रीणामभिमतं हि यत्"।

इति चैवमादि॥०॥७॥८॥

यदर्त्तुमती भवत्युपरतशोणिता तदा सम्भवकालः॥८॥

यदा ऋतुमती भवति। ऋतुर्नाम गर्भधारणयोग्यावस्थोपल-

चितः कालविशेषः। स च शोणितनिःसरणादारभ्य षोड़शाहो-
रात्रात्मकः। तदाह मनुः।

"ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोड़श स्मृताः"।

इति। किम् ऋतुमत्यां सत्यामेव सम्भवकालः? न। कदा
तर्हि? यदा उपरतशोणिता अपगतरक्तयोनिद्वारा भवति तदा
सम्भवकालः पर्व्ववर्जम्। कुतः? "पर्व्ववर्जं व्रजेदृतौ"—इति स्मर-
णात्। अयमप्यकरणे दोषश्रवणान्नियम एव। तथाच स्मृत्यन्तरम्।

"ऋतुमतीन्तु यो भार्य्यां सन्निधौ नोपगच्छति।
अवाप्नोति स मन्दात्मा भ्रूणहत्यामृतावृतौ"।

इति। यच्च वर्णयन्ति—

"ऋतौ तु गर्भशङ्कित्वात् स्नानं मैथुनिनः स्मृतम्।
अनृतौ तु सदा कार्य्यं शौचं मूत्रपुरीषवत्"॥

इत्यनृतौ मैथुनिनः शौचविशेषोपदेशान्नेयं परिसंख्या, अपि तु
नियमसोऽयम्—इति। तदसङ्गतम्। अस्पृश्यस्पर्शनादिवत् यदृ-
च्छोपनतमैथुनानुवादेन तस्य कृतार्थत्वात्। तस्मादस्मदुक्तादेव-
हेतोर्नियमः। नेयं परिसंख्या भवितुमर्हति। निषेधरूपत्वात्तस्याः।
यथाऽऽहुः।

"अन्यार्थश्रूयमाणा च याऽन्यार्थप्रतिषेधिका।
परिसंख्या तु सा ज्ञेया यथा प्रोचितभोजनम्"॥

इति। तथात्वे 'सदैव वा'—इत्यादिस्मृत्यन्तरविरोधापत्तेः।
अकरणे दोषश्रवणानुपपत्तेश्च। दोषत्रयदुष्टा च सा न स्वल्पा-
श्रयितुमुचिता सम्भवन्त्यां गतौ। तथाचोक्तम्।

"श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्।
प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका"॥

इति। विधिस्तावदसौ न भवत्येव। स्वरसतः प्राप्तत्वात्। अत्यन्ताप्राप्तविषयो हि सः। तथाचाहुः।

"विधिर्विधायकं वाक्यं चोदनार्थं प्रवर्त्तकम्।
अत्यन्ताप्राप्तविषयं कर्त्तव्यास्त्वष्टका यथा"॥

इति। तस्माद्व्यतिरेके दोषश्रवणादावश्यकत्वावगतेर्नियम एवायम्। तथाचोक्तम्।

"स्वरुच्या क्रियमाणे तु यत्रावश्यं क्रिया क्वचित्।
नियमः सोऽत्र विज्ञेयः श्राद्धे मांसाशनं यथा"॥

इति ॥ ० ॥ ८ ॥ ० ॥

दक्षिणेन पाणिनोपस्थमभिमृशेद्विष्णुर्योनिं कल्पयत्वित्येतयर्चा गर्भं धेहि सिनीवालीति च ॥ ९ ॥

कुत्सितप्रदेशानां सव्येनेव पाणिना कृत्योपदेशात् प्रदेशस्य चास्य कुत्सितत्वात् सव्येनैवायमभिमर्शः स्यादिति दक्षिणेनेत्याह। दक्षिणेन पाणिना उपस्थं योनिमभिमृशेत् स्पृशेत् विष्णुर्योनिमित्येतया ऋचा गर्भं धेहीत्येतया च। पृथङ्निर्देशात् पृथगेव स्पर्शः। स खल्वयं स्पर्शो मन्त्रपाठसमकालमेव स्यात्। कुतः? उत्तरसूत्रात्। अतएव, उपस्थं स्पृशन् जपति—इति भवदेवभट्टोऽप्याहस्म। तस्मात्, मन्त्रपाठानन्तरं स्पर्शः—इति रघुनन्दनमतमसङ्गतम् ॥ ० ॥ ९ ॥ ० ॥

समाप्यर्चौ सम्भवतः ॥ १० ॥

ऋजुरक्षरार्थः। ननु, समाप्यर्चौ—इति शक्यमवक्तुम्। उच्यते। 'समाप्य सम्भवत—एव नेतरत् किमपि कुर्य्यात्। इतरथा कर्म्मापवर्गविहितं वामदेव्यगानमत्र स्यात्'—इति भट्टनारायणः। नैतत् सारम्। कुतः? यतो न खल्वभिमर्शोऽत्र कर्म्म, येन तदन्ते कर्म्मापवर्गविहितं वामदेव्यगानं प्रसज्येत। किन्तर्हि? सम्भवः—इति ब्रूमः। कस्मात्? तथैवोपक्रमात्। अतः सूत्राच्च। तत् कुत एवेदानीं वामदेव्यगानं प्रसज्येत, येन तन्निरासार्थमेतत् सूचितमुच्यते। सम्भवात् परतः खल्वेतत् स्यात्। "गर्भाधानवदुपेतो ब्रह्मगर्भं सन्दधाति"—इति शाखान्तरमपि, गर्भाधानविधिना; विष्णुर्योनिं कल्पयत्वित्यादिना, उपेतः स्त्रियमुपगतः—इति सम्भवादन्यदाहेदिति दर्शयति। तस्मात्, दर्शारम्भणीययोरिव कालार्थं वचनं वर्णनीयम्। कथन्नाम? ऋचौ समाप्य सम्भवत एव न पुनरन्तरा किञ्चिदन्यत् कुर्य्यात्—इति। तेन पूर्व्वञ्च सूचितोऽभिमर्शोऽपि ऋचोः परतो न स्यात्, किन्तु तत्पाठसमकालमेव—इति सिध्यति। यत्तु तत्त्वकारेण, ऋचोरन्ते स्पर्शं व्याख्यायापि, ऋचौ समाप्यैव संयोगं कुरुतः न मध्ये—इति वर्णितम्। तदप्यसङ्गतम्। न हि तन्मते ऋचोरनन्तरभाविनोऽभिमर्शादपि पराचीनस्य सम्भवस्य ऋचोर्मध्ये प्रसङ्गः शक्यते वक्तुं, येन तन्निरासार्थं समाप्यैव—इति नियमनमर्थवत्। तस्मादस्मदुक्तैवावधारणा।

तदस्य गर्भाधानस्य पुरस्ताच्चोपरिष्टाच्च महाव्याहृतिभिर्होतव्यम्। कस्मात्?

"अग्नेस्तु मारुतजो नाम गर्भाधाने विधीयते"।

इति गृह्यासंग्रहोक्तस्याग्नेरर्थवत्त्वोपपत्तेः। यत्र यत्र खल्वग्नि-रुच्यते न होमः, तत्र तत्रैवमवोचाम, "आज्याहुतिष्वनादेशे पुर-स्ताच्चोपरिष्टाच्च महाव्याहृतिभिर्होमः"—इत्यत्र। तदत्र पूर्णाहुतिर्न कर्त्तव्या। कुतः?

"विवाहे व्रतबन्धे च शालायां चौलकर्मणि।
गर्भाधानादिसंस्कारे पूर्णाहुतिं न कारयेत्"॥

इति स्मरणात्। केचिदत्र,—

"विवाहादिः कर्मगणो य उक्तो-
गर्भाधानं शुश्रुम यस्य चान्ते।
विवाहादावेकमेवात्र कुर्य्यात्
श्राद्धं नादौ कर्मणः कर्मणः स्यात्"॥

इति कर्मप्रदीपवचनं पश्यन्तः श्राद्धं निषेधन्ति। तदसङ्गतम्। यतो न खल्वेतत् गर्भाधाने श्राद्धं निषेधति। कुत्र तर्हि? गर्भाधानादर्व्वाचीनेषु विवाहादिषु प्रत्येकम्—इति ब्रूमः। कुतः? यस्य कर्मगणस्यान्ते गर्भाधानं शुश्रुम—इति गणाद्बहिर्भूतस्यैव गर्भाधानस्य गणलक्षणत्वावगतेः। तुकारार्थेन चकारेण तस्य गणवाह्यत्वप्रज्ञापनाच्च। ननु यथा विवाहो गणान्तर्भूतएव तदादि-त्वलक्षणः, तथा गर्भाधानमपि तथैवान्तलक्षणमस्तु। नैष दोषः। उक्तादेवहेतोस्तस्य गणवाह्यत्वप्रतिपत्तेः। वैयधिकरण्येन चोपदिष्टत्वात्। यस्यान्ते गर्भाधानं शुश्रुम—इति वैयधिकरण्येनोपदिश्यते। तेना-वगच्छामः, गणाद् बहिर्भूतमेव सद्गर्भाधानं तदन्तलक्षणम्—इति।

शुश्रुम—इति करणाच्च गर्भाधानस्य गणान्ते श्रवणमेव परं, न पुनरिदमपि तदन्तर्गतम्,— इति दर्शयति। सन्दिग्धश्च शास्त्रार्थः शास्त्रान्तरादवधार्य्यते। स्फुटमेव शास्त्रान्तरेषु श्राद्धमुपलभ्यते।

"निषेककाले सोमे च सीमन्तोन्नयने तथा।
ज्ञेयौ पुंसवने चैव श्राद्धं कर्म्माङ्गमेव च"।

इति।

"जन्मन्यथोपनयने विवाहे पुत्त्रकन्ययोः।
पितृनान्दीमुखान्नाम तर्पयेद्विधिपूर्व्वकम्।
देवव्रतेषु चाधानयज्ञपुंसवनेषु च।
नवान्नभोजने स्नाने ऊढ़ायाः प्रथमार्त्तवे"।

इति चैवमादौ वक्तव्यम्। यच्चोक्तं तत्प्रकारेण। अन्तशब्दोऽत्र गणस्यावयवार्थः दशान्तः पट इति वत्। समीपार्थत्वे उपलक्षणं स्यात्। ततश्च विशेषणत्वोपलक्षणत्वसन्देहे विशेषणत्वेन ग्रहणं कार्य्यमितित्वात्। गर्भाधाने श्राद्धविधायकं वचनं छन्दोगेतर-विषयमिति। तदसमीचीनम्। सिद्धे हि श्राद्धविधायकवचनस्य छन्दोगेतरविषयत्वेऽन्तशब्दोऽवयवार्थः स्यात्, सिद्धे चावयवार्थत्वे अन्तशब्दस्य श्राद्धविधायकवचनं छन्दोगेतरविषयमित्यन्योन्याश्रया-पत्तेः। स्मृत्यर्थसन्देहे स्मृत्यन्तरसंवादादेवार्थनिर्णय इति च स एवाह। तत्कथमन्यैवं ब्रवीतीति न खल्वधिगच्छामि।

'गर्भसंस्कारश्चायं गर्भाधानाख्यः पात्रद्वारेण स्यात्। ततश्च, सकृत्संस्कृते स्त्रीद्रव्ये यो यो गर्भ उत्पद्यते, स स संस्कृत एव भवति। तस्मात् सकृदेव स्यान्न प्रतिगर्भमपि। एवं पुंसवनसीम-

न्तोन्नयनयोरपि द्रष्टव्यम्'—इति भट्टनारायणप्रभृतयः। 'त्रयोऽप्यमी संस्काराः प्रतिगर्भमावर्त्तन्ते, अन्यथा परेषां गर्भाणामसंस्कारः स्यात्'—इति कर्कोपाध्यायाः। गर्भाधानं प्रतिगर्भमावर्त्तते न पुंसवनसीमन्तोन्नयने—इति विज्ञानेश्वरः। सीमन्तोन्नयनं प्रतिगर्भं नावर्त्तते, गर्भाधानपुंसवने आवर्त्तेते एव—इति शूलपाणिगार्ग्य-नारायणप्रभृतयः। किं पुनरत्र युक्तम्? गर्भाधानपुंसवनयोः प्रतिगर्भमावृत्तिर्न सीमन्तकरणस्य—इति ब्रूमः। कुतः पुनरियम-वधारणा? परतो वक्ष्यामः। गर्भाधानमपि प्रतिगर्भं नावर्त्तते—इति तु विप्रतिषिद्धमेव। असम्भवदुपलादस्य। तदन्तरेण गर्भसं-स्थितेरेवाभावात्। प्रतिऋतु खल्वेतदावर्त्तते। 'ऋतावृतौ'—इति स्मरणात्। अभिमर्शः स्यादावृत्त्या इत्यवोचाम। परमन्वाहार्य्यश्राद्धस्य नावृत्तिः।

"असकृद्यानि कर्म्माणि क्रियेरन् कर्म्मकारिणा।
प्रतिप्रयोगं नैव स्युर्मातरः श्राद्धमेव च"।

इति कर्म्मप्रदीपवचनात्। प्रतिमासकर्त्तव्यदर्शपौर्णमासादीना-मिव प्रतिऋतुकर्त्तव्यगर्भाधानस्याप्यविशेषात्। 'उढ़ायाः प्रथमा-र्त्तवे'—इति वचनाच्च ॥ ० ॥ १० ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्या-त्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये द्वितीयप्रपाठकस्य पञ्चमी खण्डिका ॥ ० ॥

गोभिलीयगृह्यसूत्रे

द्वितीयप्रपाठके षष्ठी खण्डिका।

गर्भाधानानन्तरं पुंसवनमुपदिशन्निदमाह—

तृतीयस्य गर्भमासस्यादिसदेशे पुंसवनस्य कालः॥ १॥

गर्भो यस्मिन् मासि जायते सोऽयं गर्भमासः। तस्य यस्तृतीयोमासः। संवत्सलक्षणा षष्ठी। तृतीयो यो गर्भमासः—गर्भादारभ्य यस्तृतीयोमासः—इति वा व्याख्येयम्। तदस्य आदिसदेशे आदिसमीपप्रदेशे प्रथमे तृतीयभागे—इत्येतत्। 'आदिमदश'—इति पाठान्तरम्। तदा व्यक्त एवायमर्थः। एतस्मिन् काले यत् पुण्यमहः, तत् पुंसवनस्य कालः। पुमान् सूयते येन कर्म्मणा तदिदं पुंसवनमिति गर्भसंस्कारकर्म्मविशेषस्य नामधेयम्। अनेन हि कर्म्मणा अव्यक्तलिङ्गं गर्भं पुमांसं करोति। 'पुंसवनात् पुंसीकरोति'—इति स्मरणात्। यदि पुनर्दैवान्मानुषाद्वा कुतश्चिदन्तरायात् यथोक्तकालोऽतिपतति, तदा कालान्तरे प्रायश्चित्तं कृत्वा करणीयम्। तथाच कर्मप्रदीपः।

"देवतानां विपर्य्यासे जुहोतिषु कथं भवेत्।
सर्व्वप्रायश्चित्तं कृत्वा क्रमेण जुहुयात् पुनः॥
संस्कारा अतिपत्येरन् स्वकालाच्चेत् कथञ्चन।
कृत्वैतदेव कर्त्तव्या ये तूपनयनादधः"॥

इति । उपनयनादधः—इति करणात् चूड़ाकरणपर्य्यन्तमेव सर्व्वप्रायश्चित्तहोमः प्रायश्चित्तम् । उपनयनातिपाते तु व्रात्यस्तोमः शास्त्रान्तरे पद्यते, स एव प्रायश्चित्तं दोषगुरुत्वात्—इत्यभिप्रायः ॥ ० ॥ १ ॥ ० ॥

प्रातः सशिरस्काऽऽप्लुतोदगग्रेषु दर्भेषु,* पश्चादग्नेरुदगग्रेषु दर्भेषु प्राच्युपविशति ॥ २ ॥

प्रातः उदयसन्निधौ । अन्यथा 'प्रागावर्त्तनात्'—इति प्राप्तत्वात् पुनरुक्तत्वापत्तेः । तथाच स्मरन्ति । "प्रातःकालोमुहूर्त्तांस्त्रीन्"—इति । 'उदगग्रेषु दर्भेषु' उपविश्य 'सशिरस्काऽऽप्लुता' सती, वधूः 'पश्चादग्नेरुदगग्रेषु दर्भेषु' 'प्राची' प्राङ्मुखी 'उपविशति',—दक्षिणतः पाणिग्राहस्य । कस्मात्? "दक्षिणतः पाणिग्राहस्योपविशति"—इति दर्शनात् ॥ ० ॥ २ ॥ ० ॥

उपविष्टायां खल्वस्यां महाव्याहृतिहोमान्तं कृत्वा—

पश्चात् पतिरवस्थाय दक्षिणेन पाणिना दक्षिणमꣳसमन्ववमृश्यानन्तर्हितं नाभिदेशमभिमृशेत् पुमाꣳसौ मित्रावरुणावित्येतयर्चा ॥ ३ ॥

'पश्चात्' पृष्ठदेशे 'पतिरवस्थाय' प्राङ्मुख ऊर्द्धः स्थित्वा, 'दक्षिणेन पाणिना' वध्वाः 'दक्षिणमंसं' 'अन्ववमृश्य' स्पृष्ट्वा, 'अनन्त-

---

* इत्थमेव सर्व्वत्र पाठः । संस्कारतत्त्वे तु अत्र 'उदगग्रेषु दर्भेषु'—इति न दृश्यते ।

हितम्' अव्यवहितं वस्त्राद्यनाच्छादितम्,—इत्येतत्। 'नाभिदेशम्' 'अभिमृशेत्' स्पृशेत्, पुमांसावितिमन्त्रेण। तूष्णीमंसस्याभिमर्शनं मन्त्रेण नाभिदेशस्य—इति भट्टनारायणप्रभृतयः। वस्तुतस्तु मन्त्राना-देशे व्याहृतयः प्रयोक्तव्या भवन्ति। तथाच गृह्यासंग्रहः।

"यत्र मन्त्रा न विद्यन्ते व्याहृतीस्तत्र योजयेत्।
मन्त्राणामेवचादेशे मन्त्रात् कर्म्म समाचरेत्"।

इति। चरुश्रपणादिकमेव तूष्णीं कर्त्तव्यम्। तदप्याह स एव।

"इध्मः सन्नहनादानं चरुश्रपणमेवच।
तूष्णीमेतानि कुर्व्वीत समस्तश्चेध्ममाददेत्"।

इति। तस्मात् व्याहृतिभिरंसस्याभिमर्शनं मन्त्रेण नाभिदे-शस्येत्यादरणीयम् ॥ ० ॥ ३ ॥ ० ॥

अथ यथार्थम् ॥ ४ ॥

अथानन्तरं यथार्थम्—इति कर्म्मणः परिसमाप्तिरुच्यते। तन्त्रसमापनमत्र कर्त्तव्यम्। दक्षिणा चानुपदेशात् पूर्णपात्रादिका स्यात्। एवमन्यत्र ॥ ० ॥ ४ ॥ ० ॥

अथापरम् ॥ ५ ॥

अथैतस्मात् पुंसवनकर्म्मणोऽनन्तरम्, अपरमन्यत् पुंसवनकर्म्म कर्त्तव्यम्। पाठादेवानन्तर्य्यलाभादथशब्दः पूर्व्वप्रकृतार्थो वा वर्ण-नीयः। पूर्व्ववदिदमपि पुंसवनं पूर्व्वप्रकृत एव काले करणीयम्—इत्यर्थः। तच्चैकदिने दिनद्वये वा—इति न गम्यते विशेषः।

एकदिने चेत् द्वयं क्रियते, तर्हि नान्दीमुखश्राद्धमपि तन्त्रेणैव कर्त्तव्यम् । तथाच कर्मप्रदीपः ।

"गणशः क्रियमाणे तु मातृभ्यः पूजनं सकृत् ।
सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु" ।

इति ॥ ० ॥ ५ ॥ ० ॥

प्रागुदीच्यां दिशि न्यग्रोधशुङ्गामुभयतःफलामस्रामामकृमिपरिसृप्तां त्रिःसप्तैर्यवैर्माषैर्वा परिक्रीयोत्थापयेत् ॥ ६ ॥

प्रागुदीच्यामैशान्यां दिश्यवस्थिता या न्यग्रोधस्य वटस्य शुङ्गा-

"लताग्रपल्लवो गूढ़ः शुङ्गेति परिगीयते ।
पतिव्रता व्रतवती ब्रह्मबन्धुस्तथाऽश्रुतः" ॥

इत्युक्तलक्षणा, मुकुलितपल्लवः—इत्येतत् । तामेतां शुङ्गां परिक्रीय क्रीत्वा उत्थापयेत् गृह्णीयात् । शुङ्गां विशिनष्टि । उभयतःफलाम्, उभयतः पार्श्वद्वये फले यस्याः सेयमुभयतःफला । ताम् । अस्रामाम् अम्लानाम् । अकृमिपरिसृप्ताम्, कृमिभिः परिसृप्ता परिव्याप्ता—कृमिपरिसृप्ता, सा न भवतीत्यकृमिपरिसृप्ता । ताम् । कृमयः प्रसिद्धाः । कियता मूल्येन परिक्रयणम्? त्रिःसप्तैः त्रिरावृत्तैः सप्तभिः । केचित्तथैव पठन्ति । एकविंशतिभिरित्येतत् । यवैर्माषैर्वा । यवान् माषान् वा वृक्षमूले निःक्षिप्य परिक्रयणम् । एवमेके । क्रयस्य वृक्षस्वामिनो न वृक्षात्, तेन वृक्षस्वामिने यवा माषा वा देयाः । एवमपरे ॥ ० ॥ ६ ॥ ० ॥

किमिदं परिक्रयणमुत्थापनञ्च तूष्णीमेव। न। कथन्तर्हि ? मन्त्रैः। कतमे पुनस्ते मन्त्राः ? उच्यते। परिक्रयणन्तावत्—

यद्यसि सौमी सोमाय त्वा राज्ञे परिक्रीणामि, यद्यसि वारुणी वरुणाय त्वा राज्ञे परिक्रीणामि, यद्यसि वसुभ्यो वसुभ्यस्त्वा परिक्रीणामि, यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा परिक्रीणामि, यद्यस्यादित्येभ्य आदित्येभ्यस्त्वा परिक्रीणामि, यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि, यद्यसि विश्वेभ्योदेवेभ्यो विश्वेभ्योदेवेभ्यस्त्वा परिक्रीणामि ॥ ७ ॥

एतैः सप्तभिः क्रयलिङ्गैर्मन्त्रैः प्रतिमन्त्रं यवचयेण माषचयेण वा कर्त्तव्यम् ॥ ० ॥ ७ ॥ ० ॥

ततश्च,—

ओषधयः सुमनसो भूत्वाऽस्यां वीर्य्यं समाधत्तेयं कर्म्म करिष्यतीत्युत्थाप्य तृणैः परिधायाहृत्य वैहायसीं निदध्यात् ॥ ८ ॥

ओषधय इत्यनेन मन्त्रेणेतिकारान्तेनेत्यर्थः। उत्थाप्य उत्तोल्य, तृणैः परिधाय वेष्टयित्वा, आहृत्य आनीय, वैहायसीं विहायःस्थामाकाशस्थां निदध्यात् धारयेत् ॥ ० ॥ ८ ॥ ० ॥

तां खल्वाहृतां गृह्णाम—

दृशदं प्रक्षाल्य ब्रह्मचारी व्रतवती वा ब्रह्मबन्धुः कुमारी वाऽप्रत्याहरन्ती पिनष्टि ॥ ९ ॥

दृषदं पेषणाधारात्मिकां शिलाञ्च पेषणकरणरूपां प्रक्षाल्य, पिनष्टि चूर्णीकरोति। कः पिनष्टि? ब्रह्मचारी प्रथमाश्रमी। व्रतवती पतिव्रता योषिद्वा। गर्भवती—इति भवदेवलेखोऽप्रमाणः। ब्राह्मणान् बन्धून् व्यपदिशति न स्वयं ब्राह्मणवृत्तो यः, सोऽयं ब्रह्मबन्धुरनधीतवेद इहाभिप्रेतः। तथा चोक्तम्।

"पतिव्रता व्रतवती ब्रह्मबन्धुस्तथाऽश्रुतः"।

इति। स वा। 'अब्रह्मबन्धुः'—इति केचित् पठन्ति। तदा ब्रह्मबन्धुर्यो न भवति सः, अधीत वेदः—इत्यर्थः। कुमारी अनूढ़ा स्त्री। सा वा। कथं पिनष्टि? अप्रत्याहरन्ती प्रत्याहरणमकुर्व्वती। कथन्नाम? तिर्य्यक् पुत्रकेण न पेषणं कर्त्तव्यम्। एवं खलु प्रत्याहरणं पुत्रकस्य स्यात्। कथन्तर्हि? उच्छ्रितपुत्रकेण आहत्याहत्य पेषणं कर्त्तव्यम्। अथवा। सकृत् प्रयोगेनैव यथा पेषणं निर्व्वहति, तथा कर्त्तव्यम्—इत्यप्रत्याहरणस्यार्थः ॥ ०॥ ९ ॥ ० ॥

वधूश्च—

प्रातः सशिरस्काऽऽप्लुतोदगग्रेषु गर्भेषु, पश्चादग्नेरुदगग्रेषु दर्भेषु* प्राक्शिराः संविशति ॥ १० ॥

प्राक्शिराः पूर्व्वदिगवस्थितशिरस्का। ईशानकोणमस्तका—

* संस्काररतत्त्वे तु, 'पश्चाद ग्नेरुदगग्रेषु दर्भेषु'–इति प्रतीकं नास्ति।

इति भवदेवमतमसङ्गतम्। संविशति स्वपिति कृतभाष्य-मन्यत् ॥ ० ॥ १० ॥ ० ॥

एवं संविष्टायां वध्वां—

पश्चात् पतिरवस्थाय दक्षिणस्य पाणेरङ्गुष्ठेनोपनिष्ठिकया चाङ्गुल्याऽभिसंगृह्य दक्षिणे नासिकास्रोतस्यवनयेत्—पुमानग्निः पुमानिन्द्र इत्येतयर्चा ॥११॥

पश्चादग्नेः पतिरवस्थाय। वध्वग्न्योरन्तराले—इत्यर्थः। पिष्टां शुङ्गामभिसंगृह्य गृहीत्वा, दक्षिणे सव्येतरे, नासिकास्रोतसि नासापुटरन्ध्रे वध्वा एव, अवनयेत् क्षिपेत् पुमानग्निरिति-मन्त्रेण। व्याख्यातमन्यत्। वस्त्रबद्धां शुङ्गां गृहीत्वा निष्पीड्य दक्षिणनासापुटे रसं निक्षिपेत्—इति भवदेवभट्टः। अत्रापि पुरस्ताच्चोपरिष्टाच्च महाव्याहृतिहोमो द्रष्टव्यः। एवमन्यत्र ॥ ० ॥ ११ । ० ॥

अथ यथार्थम् ॥ १२ ॥

कृतभाष्यं सूत्रम् । ० ॥ १२ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये द्वितीयप्रपाठकस्य षष्ठी खण्डिका ॥ ० ॥

द्वितीयप्रपाठके सप्तमी खण्डिका।

अथ सीमन्तकरणम्* प्रथमगर्भे ॥ १ ॥

अथानन्तरं सीमन्तकरणं वर्त्तिष्यते—इति सूत्रशेषः। सीमान-
मन्तति बध्नाति—इति सीमन्तः केशरचनाविशेषः। शकन्ध्वादित्वात्
साधु। तस्य वक्ष्यमाणेन विधिना करणम्—इति कर्म्मणो नाम-
धेयम्। तदिदं सीमन्तकरणं 'प्रथमगर्भे' प्रथमश्चासौ गर्भश्चेति
प्रथमगर्भस्तस्मिन् कर्त्तव्यम्, न द्वितीयादिष्वपि गर्भेषु। किं कार-
णम्? संस्कारः खल्वयं स्त्रीपात्रस्य तद्द्वारेण च गर्भस्य स्यात्।
कुतः? सीमन्तकरणम्—इति समाख्यानात्। तस्मात् सकृदेव
कर्त्तव्यम्। सकृत् संस्कृतपात्रजातानां सर्व्वेषामपत्यानां खल्वेवमेव
संस्कारः सम्पत्स्यते। स खल्वयं सूत्रार्थ आचार्य्यपुत्रेणापि दर्शितः।
तथाच गृह्यासंग्रहः।

"यथा सिमन्तिनी नारी पूर्व्वगर्भेण संस्कृता।
एवमाद्यस्य संस्कारः संस्कारविधिचोदितः"॥

इति। तदिदं सीमन्तकरणं प्रथमगर्भे सूत्रयन्नाचार्य्यो गर्भा-
धानपुंसवनयोः प्रतिगर्भमावृत्तिं दर्शयति। तथा हारीतः।

"सकृच्च कृतसंस्काराः सीमन्तेन कुलस्त्रियः।

---

* सीमन्तोन्नयनम्—इति तत्त्वकारः पठति।

यं यं गर्भं प्रसूयन्ते स गर्भः संस्कृतो भवेत्" ।

इति सीमन्तेन सकृत्‌कृतसंस्कारत्वे सर्व्वेषां गर्भाणां संस्कृतत्वं स्मरन् एतदेवाह । अन्यथा सीमन्तेनेत्यानर्थक्यापत्तेः । तथा आश्वलायनगृह्यपरिशिष्टम् । "सीमन्तोन्नयनं प्रथमे गर्भे, सीमन्तोन्नयनसंस्कारो गार्भपात्रसंस्कार इति श्रुतिरिति" । गर्भश्च पात्रञ्च गर्भपात्रे, तयोरयं गार्भपात्रः स चासौ संस्कारश्चेति स तथा । गर्भ उदरस्थमपत्यम् । पात्रं तदाधारः स्त्री । तदत्र 'सीमन्तोन्नयनं प्रथमे गर्भे'—इति सुव्यक्तमुपदेशात् गर्भाधानपुंसवनयोः प्रतिगर्भमावृत्तिरवगम्यते । अन्यथा सीमन्तोन्नयनपदस्य प्रसक्तगौनता स्यात् । श्रौतञ्चास्य गार्भपात्रसंस्कारत्वमुपन्यस्यन्मुनिरन्ययोः पात्रसंस्कारत्वं नास्तीति ज्ञापयति । 'यथा सिमन्तिनी'—इत्याचार्य्यपुत्रवाक्येऽपि सीमन्तिन्या नार्य्याः पूर्व्वगर्भेण संस्कृतत्ववचनादेवमवगम्यते । "सीमन्तोन्नयनं प्रथमगर्भे"—इति च गृह्यान्तरम् । तथा स्मृत्यन्तरम् । "विज्ञाते गर्भे तिष्येण पुंसवनं, तत् तृतीयेमास्यन्यत्र गृष्टेः"—इति । गृष्टिः प्रथमगर्भः—गार्ग्यनारायणः । तदत्र, प्रथमगर्भादन्यत्र तृतीये मासि पुंसवनम्—इति स्फुटमस्य प्रतिगर्भमावृत्तिः स्मर्य्यते । न चैतदसंस्कृतप्रथमगर्भविषयमिति मन्तव्यम् । तन्मात्रपरत्वे प्रमाणाभावात् । 'तिष्येण पुंसवनम्'—इति शाखान्तरविषयं स्मरणम् । "तिष्येणोपोषितायाः"—इत्यादि शाखान्तरगृह्यकारसूत्रणात् । 'अन्यत्र गृष्टेस्तृतीये मासि'—इत्यपि नादरणीयम् । आचार्य्यसूत्रविरोधात् । केवलमस्यावृत्तिप्रदर्शनार्थमिदमुक्तम् ।

तस्मात् गर्भाधानपुंसवनयोः गर्भसंस्कारतैव परं न तु पात्रसंस्कारताऽपि। तस्मात्ते प्रतिगर्भमावर्त्तनीये। कुतः पुनर्गर्भसंस्कारतैव तयोर्न पात्रसंस्कारतापि? पात्रसंस्कारतायां प्रमाणाभावात्। समाख्यानाच्च गर्भसंस्कारताऽवगतेः। "गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म्म-नामकरणान्नप्राशन-चौड़ोपनयनम्"—इति गौतमादिभिः पुरुषसंस्कारमध्ये गणनाच्च। तथाऽन्यच्च। "गर्भाधानवदुपेतो ब्रह्मगर्भं सन्दधाति, पुंसवनात् पुंसीकरोति"—इति।

"वैदिकैः कर्म्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।
कार्य्यः शरीरसंस्कारः पावनः प्रेत्यचेह च।
गार्भैर्होमैर्जातकर्म्मचौड़मञ्जीनिवन्धनैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः"॥

इति चैवमादि बहुलम्। ननु, उपस्थमभिमृशेत्—इति वचनादभिमर्शं उपस्थमपि संस्करोति? संस्करोतु नाम, किमतो भविष्यति? यद्येवमेतदतो भविष्यति। उपस्थस्य संस्कृतत्वात् सीमन्तकरणस्येव गर्भाधानस्यापि न पुनरावृत्तिरिति। मैवम्। न खल्वेतावता गर्भाधानस्यावृत्तिः शक्यते वारयितुं, तस्य गर्भसंस्कारत्वात् सम्भवद्रूपत्वाच्च। तदावृत्तौ तु प्रयोगवचनेन प्राप्तत्वात् दीक्षादिसंस्काराणामिवाभिमर्शस्याप्यावृत्तिर्भवत्येव। उलूखलादिसंस्कारवच्चैतदवगन्तव्यम्। यथा हि यागसाधनानामुलूखलादीनां संस्कारकर्म्माणि प्रोक्षणादीन्यपूर्व्वप्रयुक्तानि—इति संस्कृताप्युलूखलादयः उपादीयमानाः प्रयोगवचनबलात् पुनः प्रोक्षणादिभिः संस्क्रियन्ते यथा चावघातस्य वितुषीकरणार्थत्वेऽपि प्रयोग-

वचनेन प्राप्तत्वात् तण्डुलमप्युपादीयमानमवहन्यते। तथाऽत्रापि गर्भाधानसाधनस्योपस्थस्य संस्कारकर्म्मणोऽभिमर्शस्याप्यपूर्व्वप्रयुक्तत्वात् गर्भाधानान्तरे संस्कृतोऽप्युपस्थः प्रयोगवचनवलात् गर्भाधानान्तरे पुनः संस्करिष्यते। तस्मात्, अङ्गत्वादेव यावत्प्रधानमभिमर्शोऽप्यावर्त्त-नीयः—इति न किञ्चिदनुचितम्। पुंसवनेऽप्ययमेव न्यायश्चिन्तनीयः।

सीमन्तकरणमपि तर्हि प्रतिगर्भं क्रियताम्? ननु प्रयोग-वचनवलात् स्त्र्यपि पुनः संस्करिष्यते। न—इति ब्रूमः। कस्मात्? यस्मात् सीमन्तकरणमिति समाख्यानात् प्राधान्येन स्त्रीसंस्कार-त्वेनास्यावगम्यते—इति नैतत् प्रतिगर्भं क्रियते। शास्त्रप्रामाण्याच्च। सोऽयं शास्त्रोपोद्वलितोऽर्थः शास्त्रैकशरणैरादरणीयः। यत् पुनर्द्देवलवचनम्—

"सकृच्च संस्कृता नारी सर्व्वगर्भेषु संस्कृता।
यं यं गर्भं प्रसूयेत स गर्भः संस्कृतो भवेत्"।

इति। तदपि सीमन्तकरणाभिप्रायमेव वर्णनीयम्। सकल-वचनानां सामञ्जस्यात्। सकृत् संस्कृता नारी—इत्यस्योद्देश्यानुवादक तया च यथाप्राप्तानुवादस्यैव वर्णयितुमुचितत्वात्। न खल्वत्र सकृत् संस्कृतत्वं नार्य्या विधित्सितम्, अपि तु सकृत्संस्कृतायाः सर्व्वगर्भेषु संस्कृतत्वम्—इत्यनुवाद एवायम्। तस्मात् संस्कारोऽत्र सीमन्तकरणमेव। तत् हि सकृत् क्रियते। 'संस्कृता नारी'—इति वचनाच्च। सीमन्तकरणेन हि सा संस्क्रियते, न गर्भाधानपुंसवना-भ्याम्—इत्यवोचाम। तस्माद्गर्भाधानपुंसवनयोः प्रतिगर्भमावृत्तिर्न सीमन्तकरणस्य—इति सिद्धम्।

दैवाच्च सीमन्तकरणादर्व्वागेव गर्भनाशे पुनर्गर्भोत्पत्तौ तत् करणीयम्। अन्यथा खल्वस्य संस्कारस्याभावेन असंस्कृतं पात्र-मपत्यञ्च स्यात्। न चैतदुचितम्। शास्त्रान्तरबलाच्च। तथाच स्मरणम्।

"पूर्व्वञ्च स्रावितो यस्य गर्भो यस्याप्यसंस्कृतः।
द्वितीये गर्भसंस्कारस्तेन शुद्धिर्विधीयते"।

इति। तदिदं सीमन्तकरणविषयं वचनम्। न खल्वत्र प्रति-गर्भमावृत्तिर्निषिध्यते संस्कारस्य, किन्तर्हि? प्रथमगर्भविहितस्य संस्कारस्य दैवादकरणे गर्भान्तरे करणमुपदिश्यते। सीमन्तकरणञ्च प्रथमगर्भे विहितं, न गर्भाधानपुंसवने। तथा स्मृत्यन्तरम्।

"या नार्य्यकृतसीमन्ता प्रसूयेत कदाचन।
अङ्के निधाय तं बालं पुनः संस्कारमर्हति"।

इति। असंस्कृतगर्भप्रसवे द्वितीयगर्भे संस्कारस्तु प्रकृतबालविनाश-विषयो बोद्धव्यः॥०॥१॥०॥

यस्मिन् काले सीमन्तकरणं कर्त्तव्यं, तदाह—

चतुर्थे मासि षष्ठेऽष्टमे वा॥२॥

ऋजुरक्षरार्थः। वाशब्दैश्चात्रैते कालास्तुल्यवद्विकल्प्यन्ते। तस्मादेतेषु कालेषु यथोदगयनादि सम्पद्यते, स काल इहाद-रणीयः—इति भट्टभाष्यम्। अन्ये त्वाहुः—पूर्व्वपूर्व्वकालासम्भवे अपरापरः कालः—इति।

केचित् पुनर्गर्भाधानपुंसवनयोरपि प्रतिगर्भमावृत्तिमसहमानाः

'प्रथमगर्भे'—इति पूर्व्वसूत्रप्रतीकेनास्य एकसूत्रतां कल्पयन्तोवर्ण-यन्ति। 'प्रथमगर्भे'—इत्युपादानात् प्रथमगर्भे एव सीमन्तकरणे चतुर्थमासादिकालविकल्पः। कथञ्चिदकृत एवैतस्मिन् संस्कारे गर्भनाशे, गर्भान्तरोत्पत्तौ तु नायं कालविकल्पः। किन्तु "गर्भस्पन्दने सीमन्तोन्नयनं यावन्न बालप्रसवः"—इति शङ्खलि-खितोक्तकाल एव ग्राह्यः। तदिदमर्थं प्रथमगर्भे—इति वचनं न गर्भाधानपुंसवनकर्म्मणोरावृत्तिप्रज्ञापनार्थम्'—इति।

तदप्रमाणमसङ्गतञ्च। यदि तावत् इयं वचनव्यक्तिराश्रीयते,—सीमन्तकरणस्य प्रथमगर्भे एते कालविकल्पाः—इति। तदा गर्भा-न्तरे सीमन्तकरणं न प्राप्नोत्येव। कुतः? विहितस्य सीमन्तकर-णस्य प्रथमगर्भे चतुर्थमासादिकालविधानात् तदपि प्रथमगर्भे एवावतिष्ठते। अङ्गाधिकरणन्यायात्। न हि विहितकालादन्यत्र कर्म्मणः करणमस्ति। सन्दिग्धोपक्रमं हि वाक्यमुपसंहारवशान्नी-यते—इति च पूर्व्वोत्तरमीमांसयोरसकृदुपलभ्यते। तथाच सीमन्त-करणमात्रस्य प्रथमगर्भे विधानात् सिद्धा गर्भाधानपुंसवनयोः प्रतिगर्भमावृत्तिरित्यफलः प्रयासः। अथ, प्रथमगर्भे एवैते कालविकल्पाः, द्वितीये तु गर्भे नायं कालविकल्पः—इत्यभि-प्रायः, तर्हि द्वितीयादिष्वपि गर्भेषु कालान्तरे सीमन्तकरणं स्यादेव। तथाच वृद्धिमिष्टवतो मूलमपि ते नष्टम्—इत्यहो प्रमादः।

स्यान्मतं—शास्त्रान्तरबलान्न द्वितीयादिषु गर्भेषु सीमन्तकर-णम्—इति। एवन्तर्हि प्रथमे एव गर्भे सीमन्तकरणं शास्त्रार्थः—इति

'प्रथमगर्भे'—इति पूर्व्वसूत्रस्यैव प्रतीकम्—इति सिध्यति। एतत्-सूत्रप्रतीकत्वे खल्वभिप्रेयमाणे भवन्मते गर्भान्तरेष्वप्येनेवंकाले नित्य-वत् सीमन्तकरणमायाति। तच्चानिष्टम्। न चाकृते एव संस्कारे प्रथमगर्भविनाशविषयं तदिति वाच्यम्। तन्मात्रपरत्वे प्रमाणा-भावात्। अथ, शास्त्रान्तरादन्यत्र सीमन्तकरणाभावावगमादगत्या एवं कल्प्यते। तर्हि शास्त्रान्तरे सीमन्तकरणमात्रस्य प्रथमगर्भे उपदेशात् गर्भाधानपुंसवनयोः प्रतिगर्भमावृत्तिरिष्यताम्। न हि तयोरनावृत्तावस्मच्छास्त्रमस्ति, येन तद्विरोधात् शास्त्रान्तरमना-दरणीयं स्यात्। न च परशास्त्रमपि तयोरावृत्तिनिषेधकमुप-लभामहे। स्वशास्त्रञ्च किञ्चिदस्यार्थस्योपोद्बलकमुदाहराम। प्रथम-गर्भनाशे तु विशेषशास्त्रान्तरादपरगर्भे तत्करणमुक्तम्। तच्च भवतामप्यवलम्बनीयमेव। अन्यथा खल्वेतत् सीमन्तकरणं प्रथमगर्भ-विनाशेऽपि गर्भान्तरे वा न स्यात्, सर्व्वेष्वेव वा गर्भेष्वविशेषेण स्यात्। न चैवमिष्यते।

नापि गर्भान्तरे सीमन्तकरणे कालान्तरकल्पना युक्ता। प्रथमगर्भविनाशे लाघवेनापरगर्भमात्रविधिपरतया शास्त्रान्तरस्य वर्णयितुमुचितत्वात्। कालस्त्वावृद्दिव स एवानुवर्त्तिष्यते। यदि पुनः प्रथमे एव गर्भे एष कालविकल्पो द्वितीयगर्भे नैवानुवर्त्ति-तुमर्हति—इति निर्ब्बन्धातिशयः क्रियते। तथाप्येष एव कालस्तत्र कल्पयितुमुचितः। स्वशास्त्रानुग्रहात्। प्रथमगर्भस्थाने द्वितीय-गर्भमात्रविधानेन तदनुवृत्तौ बाधकाभावाच्च। शङ्खलिखितोक्त-स्तु कालो नास्माकमाम्नायते। केषां तर्हि? येषामसौ सूत्रकारः

येषां वा पारस्करीयादीनां संस्कार एव परमाम्नायते न कालः, तेषामिति ब्रूमः। न च तद्वचनस्य द्वितीयगर्भमात्रविषयतायां प्रमाणमस्ति। सीमन्तोन्नयनस्य खल्वेष कालो विहितः। स च शास्त्रान्तरबलात् प्रथमगर्भविषय एव। न त्वेकस्य वचनस्य प्रथमगर्भे एकेषां कालविधायकत्वं, गर्भान्तरे तु तेषामन्येषाञ्च—इत्यर्द्धजरतीयमुचितम्। तस्मादन्येषामेवैष कालविधिः। स खल्वयं कालोऽस्माकं चिकल्पयिषितः। तद्वरं स्वशास्त्रोक्त एव कल्प्यताम्। तस्मात्, शास्त्रान्तरानुमतं स्वशास्त्रोपोद्बलितस्य सूत्रच्छेदमननुजानानाः अन्यादृशमेव यदृच्छया कल्पयन्तो न न्यायेन सङ्गच्छन्ते। तदिदं शास्त्रैकशरणैरनादरणीयम् ॥ ० ॥ २ ॥ ० ॥

प्रातः सशिरस्काऽऽप्लुतोदगग्रेषु दर्भेषु, पश्चादग्नेरुदगग्रेषु दर्भेषु प्राच्युपविशति ॥ ३ ॥

कृतभाष्यं सूत्रम् ॥ ० ॥ ३ ॥ ० ॥

पश्चात् पतिरवस्थाय युग्मन्तमौदुम्बरꣳ शलाटुग्रथ्नमाबध्नाति अयमूर्ज्जावतो वृक्ष इति ॥ ४ ॥

पश्चात् पतिरवस्थाय—इत्युक्तार्थम्। युञ्जि युग्मानि फलानि यस्मिन्, सोऽयं युग्मान् तं युग्मन्तम्। युज्शब्दान्मतुपा सिद्धम्। अथवा। युग्ममिति च्छेदः युग्ममुभयतःफलम्। तं पूर्व्वमाहृतम्। उदुम्बरः प्रसिद्धः, तत्र भवमौदुम्बरम्। शलाटुग्रथ्नम्। शलाटु नीलं, ग्रथ्नः स्तवकः। तथा चोक्तम्।

"शलाटु नीलमित्युक्तं ग्रथ्नः स्तवक उच्यते"।

इति। शलाटुश्चासौ ग्रथ्नश्चेति शलाटुग्रथ्नः तं, नील-स्तवकमित्यर्थः। वध्वाः कण्ठे आवध्नाति अयमूर्ज्जावतोवृच-इत्यनेन मन्त्रेण ॥ ० ॥ ४ ॥ ० ॥

अथ सीमन्तमूर्द्धमुन्नयति* भूरिति दर्भपिञ्जूलीभि-रेव प्रथमं, भुवरिति† द्वितीयं, स्वरिति तृतीयम् ॥ ५ ॥

अथेति स्थाननियमार्थम्। तचास्य एव पतिः। सीमन्तो-व्याख्यातः। तम् ऊर्द्धमुन्नयति भूरित्यनेन मन्त्रेण। केन उन्नयति? दर्भपिञ्जूलीभिरेव।

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेवच।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥
एतदेव हि पिञ्जूल्या लक्षणं समुदाहृतम्।
आज्यस्योत्पवनार्थं यत् तदप्येतावदेव तु॥
एतत्प्रमाणामेवैके कौशीमेवार्द्रमञ्जरीम्।
शुष्कां वा शीर्णकुसुमां पिञ्जूलीं परिचक्षते"॥

इति कर्म्मप्रदीपोक्तलक्षणाभिः। 'दर्भपिञ्जूलीशब्देन प्रादेश-प्रमाणं कुशपत्त्रचयं कुशान्तरेण वेष्टितमुच्यते'-इति स्वतन्त्राज्ञा तु प्राज्ञैरवज्ञेयैव। कतमाभिर्दर्भपिञ्जूलीभिरुन्नयति? तिसृभि-रित्याह। कुतः? कपिञ्जलन्यायेन बहुवचनस्य तदर्थत्वस्यौत्सर्गिक-

* 'ऊर्द्धं नयति'-इति पाठान्तरम्।

† 'भुव इति'-इति पाठान्तरम्।

त्वात्। तदिदं प्रथममुत्त्वयनम्। भुवरिति द्वितीयं दर्भपिञ्जूलीभिरेव। स्वरिति तृतीयं दर्भपिञ्जूलीभिरेव। तदेवं तिसृभिस्तिसृभिरेकैकमुत्त्वयनमित्युत्त्वयनत्रित्वाद्दर्भपिञ्जूल्योऽपि नवैव सम्पद्यन्ते। तासाञ्च तिसृभिरेकमुत्त्वयनं, तावतीभिरपरं, तावतीभिरेवापरम्—इति भवदेवभट्टमतम्। अतएव, 'भूरिति दर्भपिञ्जूलीभिः'—इति सूचयित्वा 'प्रथमम्'—इति सूचितम्। यदि पुनस्तिस्र एव दर्भपिञ्जूल्यः स्युः, तर्हि आदित एव 'दर्भपिञ्जूलीभिः—इति सूचयित्वा 'भूरिति प्रथमं भुवरिति द्वितीयम्'—इति विनियोगममूषामसूचयिष्यत्। न चैवम्। तस्मादनुमिमीमहे, भूरिति प्रथमएवोत्त्वयने तिस्रो दर्भपिञ्जूल्यो व्याप्रियन्ते। एवमुत्तरयोः।

भट्टनारायणप्रभृतयस्तु वर्णयन्ति,—"दर्भपिञ्जूलीभिरित्येवकारकरणात् यावन्त्युत्त्वयनानि तावतीभिरेव, तिसृभिरित्यर्थः। प्रथमं द्वितीयं तृतीयम्—इति व्याहृतीनां पिञ्जूलीनाञ्च पृथग्विनियोगार्थम्। तथाचैकैकया पिञ्जूल्या एकैकमुत्त्वयनम्"—इति॥

तत्र ब्रूमः। यत्तावदुक्तं, प्रथम एवोत्त्वयने तिस्रोदर्भपिञ्जूल्यो व्याप्रियन्ते, एवमुत्तरयोः,—इति। एतदङ्गीकुर्मः। यत् पुनरुक्तम्, उत्त्वयनत्रित्वाद्दर्भपिञ्जूल्योऽपि नवैव संपद्यन्ते,—इति। एतत् नानुजानीमः। किं कारणम्? "भूरिति दर्भपिञ्जूलीभिरेव प्रथमं भुवरिति द्वितीयं स्वरिति तृतीयम्"—इति वचनादेवकाराच्च या एव दर्भपिञ्जूल्यः प्रथमेनोत्त्वयनेन संबध्यन्ते, ता एव द्वितीयेन, ता एव तृतीयेनेति तावत् प्रतीयते। प्रतीयते चेत्, न युज्यते विना कारण-

मुत्सृष्टुम् । तस्मात् तिस्र एव दर्भपिञ्जूल्यस्ताभिरेव प्रथममुन्नयनं ताभिरेव द्वितीयं ताभिरेव तृतीयमिति न दर्भपिञ्जूलीनां नवत्वं न वा एकैकया पिञ्जूल्या एकैकमुन्नयनमिति । तथाच गृह्यासंग्रहः ।

"सीमन्ते दर्भपिञ्जूल्यस्तिस्रस्ताभिस्त्रिरुन्नयेत्" ।

इति ॥ ० ॥ ५ ॥ ० ॥

अथ वीरतरेण येनादितेरित्येतयर्चा ॥ ६ ॥

अथेति व्याख्यातम् । वीरास्तरन्त्यनेन संग्रामम्,—इति वीरतरः शरः—इत्येके । वीरतरस्तरुविशेषः—इत्यपरे । तथाच कर्मप्रदीपः ।

"श्वाविच्छलाका शलली तथा वीरतरः शरः" ।

इति । अत्रापि 'वीरतरः शरः'—इत्येकेषां पाठः । 'वीरतर-स्तरुः'—इति चापरेषाम् । वाजसनेयिनान्तु वृक्षविशेषे रूढ़िः । तदत्र भगवन्तो भूमिदेवाः प्रमाणम् । तदनेन वीरतरेण, येनादि-तेरित्येतया ऋचा सीमन्तमूर्द्धमुन्नयति—इत्यनुवर्त्तते ॥ ० ॥ ६ ॥ ० ॥

अथ पूर्णचात्रेण राकामहमित्येतयर्चा ॥ ७ ॥

सूत्रपूर्णेन चात्रेण तर्कुणा, सीमन्तमूर्द्धमुन्नयति—इति प्रकृतं सम्बध्यते । गतमन्यत् ॥ ० ॥ ७ ॥ ० ॥

त्रिश्वेतया* च शलल्या यास्ते राके सुमतय इति ॥ ८ ॥

त्रिश्वेतया त्रिषु स्थानेषु श्वेतया शुक्लवर्णया, शलल्या शलली

* इत्थमेव पाठो भाष्यपुस्तकद्वये । सूत्रपुस्तकेषु संस्कारतत्त्वे च 'त्रिः श्वेतया'—इत्यशुद्धः पाठो दृश्यते ।

व्याख्याता, तया, यास्ते—इति मन्त्रेण, सीमन्तमूर्द्धमुन्नयति—इति च-शब्दस्यार्थः ॥ ७ ॥ ८ ॥ ० ॥

कृसरः स्थालीपाक उत्तरघृतस्तमवेक्षयेत् ९ ॥

कृसरः—

"तिलतण्डुलसम्पकः कृसरः सोऽभिधीयते"।

इति कर्म्मप्रदीपोक्तलक्षणः। स्थाल्यां यः पच्यते सोऽयं स्थालीपाकः। तदनेन स्थालीपाकात्मता कृसरस्य पाकोऽवगम्यते। निर्व्वपणन्त्वत्र नास्ति। तथाच गृह्यासंग्रहः।

"चूड़ाकर्मणि सीमन्ते यस्तु पाकः सदा गृहे।
विवाहे चैव लाजानां नोक्तोनिर्वपणो विधिः"।

इति। मनुष्यार्थत्वाच्च तिलतण्डुलानां प्रक्षालनम्। उत्तरे उपरि घृतं यस्य सोऽयमुत्तरघृतः, उपरिदत्तघृतः—इत्यर्थः। तमिमं कृसरं स्थालीपाकं अवेक्षयेत् पत्नीं दर्शयेत् पतिः। स खल्वयं कृसरः, स्थालीपाकात्मता यत्र कुत्रचित् येन केनापि पक्तव्यः। सिद्धस्य तस्यावेक्षणमात्रस्यैव सूत्रणात्। तस्मादवेक्षणार्थमेवास्यासादनम्—इति सिद्धम्। ननु—

"आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः"।

इति कर्मप्रदीपवचनात् मन्त्रस्य देवतायाश्चानादेशाच्च प्राजापत्य एव स्थालीपाकः कुतो न स्यात्। नैष दोषः। यत्र हि होमस्योपदेशो न मन्त्रस्य न वा देवतायाः, तत्रैव प्राजापत्यो मन्त्रः

प्रजापतिश्च देवता—इति शास्त्रमर्य्यादा। अतएव, जुहोतिषु—इति वचनमुपपद्यते। तदिदं वचनं सतीषु जुहोतिषु मन्त्रदेवतयोः प्राजापत्यत्वमुपदिशति न पुनर्जुहोतिमपि चोदयति। जुहोतिषु—इति सिद्धवदुपदेशात्।

अथैवं वृथापक्वः—इत्येव कुतो न सूचितम्? चूड़ाकरणे खल्वेवं सूचयिष्यति,—"कृसरः स्थालीपाको वृथापक्वः"—इति। तस्मादेवमसूचणादस्यत्र स्थालीपाकस्य प्रयोजनमित्यवगच्छामः। उच्यते। सत्यमस्ति प्रयोजनं स्थालीपाकस्य। अस्मादेव कारणात् वृथापक्वः—इति न सूचितम्। तच्च प्रयोजनं न होमः। असूचणात्। किन्तर्हि? अवेक्षणं भोजनञ्च। तथैव सूचणात्। तस्मात् यथोक्त एवार्थः॥ ०॥ ८॥ ०

एवं स्थालीपाकं पश्यन्तीं वधूम्—

किं पश्यसीत्युक्त्वा, प्रजामिति वाचयेत्॥ १०॥

किं पश्यसि?—इति मन्त्रभागं पतिरुक्त्वा, प्रजाम्—इति मन्त्रभागं वधूं भाषयेत्। एवञ्च, मन्त्रे मह्यं पत्युः—इति पदद्वयं वैयधिकरण्येन सम्बध्यते। मम वध्वाः;—पत्युः,—इत्यर्थः। तथाच लिङ्गस्य बलवत्त्वाद्भङ्क्त्वा वाक्यं, 'किं पश्यसि'—इति भागस्य प्रश्ने, 'प्रजाम्'—इत्यादिभागस्य च प्रतिवचने विनियोग आदरणीयः। भवदेवभट्टस्तु, किं पश्यसि—इत्यादि सर्व्वमेव मन्त्रं पतिः प्रश्नपूर्व्वमुच्चारयेत्। सर्व्वं भवदुक्तं पश्यामि—इति वधूर्ब्रूयादित्याह। तदत्र सूत्रसङ्गतिं नावगच्छामः। पत्युः सर्व्वमन्त्रपाठे च, किं

पश्यसि—इत्युक्ता—इति, प्रजामिति वाचयेत्—इति च, पृथगुपदेशोऽसङ्गतः स्यात्। "किं पश्यसि प्रजां पशून् सौभाग्यं मह्यं दीर्घायुष्ट्वं पत्युः"—इति हि मन्त्रः ॥ ० ॥ १० ॥ ० ॥

तꣳसा स्वयं भुञ्जीत ॥ ११ ॥

तमवेक्षितं क्षसरं स्थालीपाकम्। स्पष्टमन्यत् ॥ ० ॥ ११ ॥ ० ॥

वीरसूर्जीवसूर्जीवपत्नीति ब्राह्मण्यो मङ्गल्याभिर्वाग्भिरुपासीरन् ॥ १२ ॥

वीरान् विक्रान्तान् सूते—इति वीरसूः। जीवान् जीवतः सूते—इति जीवसूः। जीवस्य जीवतः पत्नी जीवपत्नी, अविधवेत्यर्थः। वाक्यत्रयेऽपि 'त्वं भव'—इति वाक्यशेषो बोद्धव्यः। इति एवंप्रकाराभिर्मङ्गल्याभिर्मङ्गलादनपेताभिर्वाग्भिर्ब्राह्मण्यो वधूमुपासीरन् गायेरन् अनुनयेयुरित्येतत्। "अविधवाः पुत्रवत्यो नार्य्यो वधूं वेद्यामुत्थाप्य कलसोदकेनाभ्युक्षणादिकं मङ्गलकृत्यं कुर्य्युः"—इति भवदेवकल्पनायान्तु प्रमाणं न पश्यामः। क्षसरभोजनमप्यस्मात् परं तेनोक्तं न युक्तमेव। पूर्वमेव तदुपदेशात्। 'इदानीमेव तन्त्रसमापनम्'—इति एके मन्यन्ते। कुतः? उत्तरत्र कर्म्मान्तरोपदेशेन पूर्वस्य कर्म्मणोऽपवर्गावगतेः। अन्ये तु 'प्रजाम्—इत्येतन्मन्त्रवाचनात् परमेव तन्त्रसमापनं ततः क्षसरभोजनमुपासनञ्च'—इति वर्णयन्ति ॥ ० ॥ १२ ॥ ० ॥

अथ सोष्यन्तीहोमः ॥ १३ ॥

अथेत्ययमपूर्व्वप्रकरणोपन्यासार्थः। सोष्यन्ती शूलायन्ती आसन्नप्रसवा—इत्येतत्। सुप्रसवे—इत्यस्माद्धातोः। तामिमां सोष्यन्तीं ज्ञात्वा यो होमः, सोऽयं सोष्यन्तीहोमः। कर्त्तव्यः—इति वाक्यशेषः ॥ ० ॥ १३ ॥ ० ॥

कस्मिन् काले कथञ्च होमोऽयं कर्त्तव्यः? उच्यते।

प्रतिष्ठिते वस्तौ परिस्तीर्य्याग्निमाज्याहुती जुहोति,—या तिरश्चीत्येतयर्चा विपश्चित् पुच्छमभवदिति च ॥ १४ ॥

वस्तिर्योनिद्वारम्। प्रतीत्ययमुपसर्गः। वस्तौ स्थिते गर्भे सतीत्येतत्। 'अग्निं परिस्तीर्य्य' अग्निपरिस्तरणं व्याख्यातं, तत्कृत्वा, द्वे आज्याहुती जुहोति, या तिरश्चीत्येतया ऋचा विपश्चिदित्येतया च। भेदेनोपदेशात् भेदेनैव होमः। अथ, अग्निं परिस्तीर्य्य—इति सिद्धत्वादवाच्यम्, अथोच्यते; कारणं वक्तव्यम्? परिसंख्यानार्थमित्याह। किमनेनोक्तं भवति? एतदनेनोक्तं भवति। अग्निपरिस्तरणमेव न तु ब्रह्मोपवेशनादिकमपि—इति। तस्मात् चिप्रहोमः स्यादितिसिद्धम्। परिस्तरणमात्रमेवात्राधिकम्। ननु, आज्यपदमप्यनर्थकं, हविषोऽनादेशे स्वत्वाज्येनैव हूयते। उच्यते। आज्यग्रहणमाज्यसंस्कारप्रज्ञापनार्थम्। तेनाज्यसंस्कारोऽपि कर्त्तव्यः॥ ० ॥ १४ ॥ ० ॥

पुमानयं जनिष्यतेऽसौनामेतिनामधेयं गृह्णाति ॥ १५ ॥

पुमानयं जनिष्यतेऽसौनाम—इत्यसावितिमन्त्रस्थाने जनिष्यमाणस्य हृदि कल्पितं नामधेयम्। नामैव नामधेयं, स्वार्थे धेयट्। गृह्णाति उच्चारयति ॥ ० ॥ १५ ॥ ० ॥

यत्तद्गुह्यमेव भवति ॥ १६ ॥

यन्नामधेयं गृह्णाति, तन्नामधेयं गुह्यम् अप्रकाशमेव भवति। एवकारात् सर्व्वदैवास्य गुह्यता बोद्धव्या ॥ ० ॥ १६ ॥ ० ॥

अथेदानीं जातकर्म्मोपदिदिक्षुरिदमाह—

यदाऽस्मै कुमारं जातमाचक्षीरन्नथ ब्रूयात्;—काङ्क्षत नाभिकृन्तनेन स्तनप्रतिधानेन चेति ॥ १७ ॥

यदा यस्मिन् काले अस्मै पित्रे कुमारं जातमाचक्षीरन् शिष्यादयः कथयेयुः, अथ तदा अनन्तरं वा, पिता ब्रूयात् व्यक्तं कथयेत्—उच्चैरुच्चारयेदित्येतत्। किं ब्रूयात्? उच्यते। काङ्क्षत प्रतिपालयत, नाभिकृन्तनेन स्तनप्रतिधानेन च। कथन्नाम? नाभिकृन्तनं स्तनप्रतिधानञ्च मा तावत् कुरुत—इति। तदिदमुच्चैरुच्चारयेत्। नाभिर्नाभिलग्ना नाड़ी नालमित्यनर्थान्तरम् ॥ ० ॥ १७ ॥ ० ॥

व्रीहियवौ पेषयेत्तयैवाऽऽवृता यथा शुङ्गाम् ॥ १८ ॥

व्रीहिश्च यवश्च व्रीहियवौ। समासकरणादुभावपि मिलितौ युगपत् पेषयेत् न त्वेकैकशः। तयैव परिपाट्या पेषयेत्; यया परिपाट्या शुङ्गां पूर्व्वोक्तां पेषयेत्। अन्यतरालाभेऽपि तत्प्रतिनिधि-

रुपादेयः। न तु प्रत्येकमेवादाय कर्म्म करणीयम्। इतरेतरयोग-स्यार्थवत्त्वोपपत्तेः। तथाच कर्म्मप्रदीपः।

"यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीणामिव शालयः"॥

इति। यच्च,—'उभयालाभे प्रत्येकम्—

"यथालाभोपपन्नेषु रौप्येषु तु विशेषतः"।

इति याज्ञवल्क्यवचने पात्रे तथा दर्शनेनान्यत्राप्यशक्या तथा कल्प्यते',—इति रघुनन्दनमतम्। तदसङ्गतम्। कस्मात्? यस्मात् न खलु याज्ञवल्क्येन श्राद्धपात्राणि वचनान्तरेणोक्तानि। नापि मिलितानां पात्राणां प्रत्येकमुपादानमनेन वचनेनोच्यते। न हि शास्त्रान्तरेऽपि समुच्चयेन पात्रविधिरस्ति। वैकल्पिकानां पात्राणां खल्वत्र यथालाभोपपन्नत्वमुच्यते। व्रीहियवौ त्वाचार्य्येण मिलिता-वुच्येते। तत् कथमत्र दर्शनं कल्पनामूलम्—इति कल्पयितैव जानाति। न ह्यत्रोद्गयनादिवदेकैकानुगुण्यद्योतकं वचनमस्ति। सेयं यदृच्छाकल्पना आचार्य्यवचनविरोधात् बुद्धिमद्भिरनादर-णीया॥०॥ १८॥०॥

तदेवं पिष्टौ व्रीहियवौ,—

दक्षिणस्य पाणेरङ्गुष्ठेनोपकनिष्ठिकया चाङ्गुल्याऽभि-संगृह्य कुमारस्य जिह्वायां निमार्ष्टीयमाज्ञेति॥ १९॥

निमार्ष्टि निश्च्योतयति। व्याख्यातमन्यत्। आह। कुमार-ग्रहणं किमर्थम्? कुमारीनिवृत्त्यर्थम्। एवमेके। तदसत्। कुतः?

एतयैवावृता स्त्रियाः—इति चूड़ाकरणान्तसंस्काराणां कुमार्य्या-अपि सूचणात्। मन्त्रनिवृत्त्यर्थं तर्हि? न। तत्र 'तूष्णीम्'—इति करणात्। कुमारग्रहणं तर्हि न कर्त्तव्यम्, अथ क्रियते, प्रयोजनं वक्तव्यम्? अधिकारार्थम्—इति ब्रूमः। तेनोपनयनादीनि व्रतानि कुमारस्यैव भवन्ति न कुमार्य्याः। ननु, 'गर्भाष्टमेषु ब्राह्मणमुपनयेत्'—इति सूचयिष्यति। स खल्वयं पुंलिङ्गनिर्देशः स्त्रियं व्यावर्त्तयिष्यति? न। कुतः? यतो न खल्वत्र ब्राह्मणो-विधित्सितः। किन्तर्हि? उपनयनव्रतम्। तदर्थं ब्राह्मणोऽनूद्यते। तस्मात् जातिनिर्देशाच्च लिङ्गमविवक्षितं स्यात्। यथा 'ब्राह्मणो-न हन्तव्यः'—इति ब्राह्मण्यपि न हन्यते। तस्मात् कुमारग्रहणम् उपनयनादिव्रतेषु कुमारीव्यावर्त्तनार्थम्। मनुरपि—

"अमन्त्रिका तु कार्य्येयं स्त्रीणामावृदशेषतः।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्।
वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिष्क्रिया"।

इत्याभ्यां वचनाभ्यां जातकर्मादिसंस्कारमुपनयनादिव्रताभावञ्च स्त्रिया दर्शयति। अथवा। प्राधान्यात् कुमारग्रहणं क्रियते। अनुपादेयलिङ्गाविवक्षया तु कुमार्य्यपि अवगम्यमाना न निरा-क्रियते। उपनयनव्रतादिकमपि तर्हि कुमार्य्याः स्यात्? न स्यात्। किं कारणम्? अध्ययनार्थानि हि तानि व्रतानि। स्त्रियाः खल्व-ध्ययनं नास्ति। 'स्त्रीशूद्रौ नाधीयेताम्'—इति हि ब्राह्मणम्। पुराकल्पे चासामध्ययनमासीत्, तद्विशेषश्च पूर्व्वमेवाभिहितः।

तदिदं जातकर्म्म। एवमेके। अपरे तु 'वक्ष्यमाणमपि सर्पिः-प्राशनं जातकर्म्मान्तर्गतम्'—इति मन्यन्ते। तदत्र जातकर्म्मणि अन्वाहार्य्यश्राद्धाभिधानं भवद्विरव्यासङ्गतम्। कस्मात्?

"नाष्टकासु भवेत् श्राद्धं न श्राद्धे श्राद्धमिष्यते।
न सोष्यन्तीजातकर्म्मप्रोषितागतकर्म्मसु" ॥

इति कर्म्मप्रदीपकृता निषेधात् ॥ ० ॥ १९ ॥ ० ॥

तथैव मेधाजननं सर्पिः प्राशयेत् ॥ २० ॥

तथैव—इयमाज्ञेतिमन्त्रेण, तथैव—दक्षिणस्य पाणेरङ्गुष्ठेनोपकनिष्ठिकया चाङ्गुल्या गृहीतं, मेधां धारणावतीं बुद्धिं जनयतीति मेधाजननं सर्पिर्घृतं प्राशयेत् पिता। सर्पिषो मेधाजननत्वञ्चायुर्व्वेद-प्रसिद्धम्। अन्ये तु वर्णयन्ति,—'तन्त्रान्तरप्रोक्तं मेधाजननं ब्राह्म्यादि, सर्पिश्च प्राशयेत्'—इति ॥ ० ॥ २० ॥ ० ॥

जातरूपेण वाऽऽदाय कुमारस्य मुखे जुहोति,—मेधान्ते मित्रावरुणावित्येतयर्चा सदसस्पतिमद्भुतमिति च ॥ २१ ॥

जातरूपेण सुवर्णेन। वाशब्दः समुच्चये। केचित् चशब्दमेव पठन्ति। जातरूपेण सर्पिरादाय। इत्यन्यत्। जुहोतिचोदना-बलात् स्वाहान्तता मन्त्रयोरवगम्यते। मन्त्रयोर्भेदेनोपदेशात् भेदेनैव होमः। केचित् पूर्व्वसूत्रेणास्यैकसूत्रतां मन्यमाना वर्णयन्ति। 'तथैव दक्षिणस्य पाणेरित्याद्युक्तप्रकारेण गृहीत्वा प्राशयेत्, जात-

रूपेण वा जुहोति। सोऽयं विकल्पः,—'हस्तेन वा गृहीतव्यं जातरूपेण वा'—इति। परमत्रापि पक्षे वाशब्दस्य समुच्चयार्थतैव युक्ता। कुतः? तथैव—इत्येवकारेण तन्नियमात्। विकल्पपक्षे खल्वयमुपरुध्येत! तस्मादेकसूत्रतापक्षे, 'दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां धृतेन जातरूपेण हुतं गृहीत्वा'—इति तत्कारव्याख्यानमादरणीयम्।

अत्रैके वर्णयन्ति,—'अन्नप्राशनञ्चैतदेव छन्दोगानाम्, अन्यस्याविधानात्'—इति। तेषामयमाशयः। सर्पिषः प्राशनोपदेशः तावदिहोपलभ्यते। सर्पिश्चान्नम्। तस्मादन्नप्राशनमेतत्। तदिह कर्मान्तरोपदेशादितः पूर्वमेव जातकर्मणः परिसमाप्तिरवगम्यते। अतो नानयोरैक्यमाशङ्कनीयम्। शास्त्रप्रामाण्यबलाच्चैकेनापि कर्मणा संस्कारद्वयनिष्पत्तावपि न किमप्यनुचितम्। ननु, षष्ठेऽन्नप्राशनं मासि—इति नियतकालत्वमन्नप्राशनस्य स्मर्य्यते नामकरणेन व्यवहितत्वञ्च। उच्यते। अस्मच्छास्त्रे खल्विदानीमेवान्नप्राशनमुपदिश्यते,—इत्यन्येषामेव नियतकालत्वं नामकरणेन व्यवहितत्वञ्च, नास्माकम्। नापि नियतकालत्वमस्मच्चान्नप्राशनस्य। अत एव यमः।

"ततोऽन्नप्राशनं षष्ठे मासि कार्य्यं यथाविधि।
अष्टमेवाऽथ कर्त्तव्यं यद्वेष्टं मङ्गलं कुले"॥

इति कालद्वयमुपदिश्य कालान्तरमपि कुलानुगतमुपदिशति। आचार्य्यः किलोपदेष्टा छन्दोगकुलधर्म्माणाम्। मनुरपि—

"षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले"।

इति तथैवोपदिशति। अन्ये तु मन्यन्ते। 'जातकर्माङ्गत्वादेतस्य नाम्नप्राशनत्वम्। न खल्वेकेन कर्मणा संस्कारद्वयनिष्पत्तिर्युक्ता। नियतकालत्वादन्नप्राशनस्य नामकरणेन व्यवहितत्वाच्च प्राङ्नाभिवर्द्धनात् करणं न युक्ततरम्। स्वशाखायामन्यस्य विधानाभावेऽपि पारशाखिकमेवानुष्ठेयम्। तस्मादध्वर्य्युभ्यो गृह्णीयात्। प्रधानहोमदेवतामात्रमेवाध्वर्य्युभ्यो गृहीतव्यम्, पूर्व्वापरेतिकर्त्तव्यताकलापस्तु स्वशाखोक्त एव स्यात्'—इति। तदत्र भगवन्तोऽभियुक्ता देवाः प्रमाणम्॥०॥ २१॥०॥

एतस्मिन् कर्मणि कृते पिता—

कृन्तत नाभिमिति ब्रूयात् स्तनञ्च प्रतिधत्तेति॥ २२॥

कृन्तत नाभिम्—इति, स्तनञ्च प्रतिधत्त—इति च ब्रूयात्॥०॥ २२॥०॥

अत ऊर्द्ध्वमसमालम्भनमादशरात्रात्॥ २३॥

अतः अस्मान्नाभिवर्द्धनात् स्तनप्रतिधानाच्च ऊर्द्ध्वं परतः, असमालम्भनमस्पर्शनम् आदशरात्रात् दशरात्रपर्य्यन्तम्। तेन, "सूतिकां स्पृष्ट्वा सचेलः स्नायात्"—इत्येवमादिस्मृतौ मातुरस्पृश्यत्वं यदभिहितं, तदस्मात् कर्मण ऊर्द्ध्वमिति बोद्धव्यम्॥०॥ २३॥०॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजश्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये द्वितीयप्रपाठकस्य सप्तमी खण्डिका॥०॥

द्वितीयप्रपाठके अष्टमी खण्डिका।

जननाद्यस्तृतीयो ज्यौत्स्नस्तस्य तृतीयायां प्रातः सशिरस्कं कुमारमाप्लाव्यास्तमिते वीते लोहितिम्न्यञ्जलिकृतः पितोपतिष्ठते ॥ १ ॥

जननात् जन्मत आरभ्य तृतीयो यो ज्यौत्स्नः ज्योत्स्नायुक्तः पक्षः शुक्लपक्षः—इत्येतत्। तस्य तृतीयायान्तिथौ प्रातः सशिरस्कं कुमारमाप्लाव्य स्नापयित्वा। रात्रौ कर्मणो विधानात् रात्रावेव स्नानं माभूदित्येवमर्थं प्रातरितिसूचितम्। अस्तमिते सवितरि, वीते विगते लोहितिम्नि लौहित्ये, सन्ध्योपरमे—इत्यर्थः। अञ्जलिकृतः कृतोऽञ्जलिर्येन सोऽयमञ्जलिकृतः। आहिताग्न्यादिपाठात् कृतशब्दस्य परनिपातः। पिता उपतिष्ठते आराधयति चन्द्रमसं तदभिमुखः सन्। कुतः? 'पितोपतिष्ठते * * अभिमुखश्चन्द्रमसम्'—इति लिङ्गात्। यत्तु,—दिशोऽनादेशात् 'प्राङ्मुखकरणस्यानादेशे'—इति सूत्रकारवचनात् प्राङ्मुख उपतिष्ठते—इति वर्णनम्। तदसङ्गतम्। शुक्लतृतीयायां चन्द्रमसः पश्चिमदिगवस्थितत्वेन प्राङ्मुखेन पित्रा तदाराधनवर्णनस्यानुचितत्वात्। लिङ्गविरोधाच्च। 'उत्तिष्ठते'—इति पाठे चन्द्राभिमुख ऊर्द्ध्वंस्तिष्ठति—इति व्याख्येयम् ॥ ० ॥ १ ॥ ० ॥

अथ माता शुचिना वसनेन कुमारमाच्छाद्य दक्षिणत उदञ्चं पित्रे प्रयच्छत्युदक्शिरसम् ॥ २ ॥

अथानन्तरमेव माता शुचिना निर्णिक्तेन वसनेन कुमारम् आच्छाद्य। आशिरोमर्य्यादायाम् ईषदर्थे वा। कथन्नाम? मुखवर्ज्जं छादयित्वा। दक्षिणतः पितुर्दक्षिणस्यां दिशि भूत्वा उदञ्चम् उत्तानम् उदक्शिरसञ्च कुमारं पित्रे प्रयच्छति प्रददाति ॥०॥ २ ॥०॥

प्रदाय च सा,—

अनुपृष्ठं परिक्रम्योत्तरतोऽवतिष्ठते ॥ ३ ॥

अनुपृष्ठं पत्युः पृष्ठदेशेन परिक्रम्य गत्वा उत्तरतः पत्युरुत्तरस्यां दिशि अवतिष्ठते ऊर्द्ध्वा तिष्ठति ॥ ० ॥ ३ ॥ ० ॥

अथ जपति,—यत्ते सुसीम इति; यथाऽयन्न प्रमीयेत पुत्रो जनित्र्या अधीति ॥ ४ ॥

अथेत्यानन्तर्य्यार्थम्। परिक्रम्योत्तरतः स्थितायां तस्याम् अनन्तरं पिता जपति, न तु परिक्रममाणायामेव। किं जपति? यत्ते सुसीम—इति ऋचम्। किमन्तः पुनरयं ऋचः? उच्यते। यथाऽयन्न प्रमीयेत पुत्रो जनित्र्या अधि—इत्येवमन्तः। तदिदं ऋचस्यान्तप्रज्ञापनार्थमुक्तम् ॥ ० ॥ ४ ॥ ० ॥

एवं जपित्वा अथ कुमारम्—

उदक्थं माचे प्रदाय यथार्थम् ॥ ५ ॥

ऋजुरचरार्थः। यथार्थमिति कर्म्मणः परिसमाप्तिरुच्यते। तेन वामदेव्यगानमिदानीं कर्त्तव्यम्। तथाच कर्म्मप्रदीपः।

"अहोमकेष्वपि भवेत् यथोक्तं चन्द्रदर्शने।
वामदेव्यं गणेष्वन्ते बल्यन्ते वैश्वदेविके"।

इति। तदिदं कर्म्म चन्द्रदर्शनमिति निष्क्रमणमिति चाख्यायते। केचिदत्र,—

"हस्त्यश्वचुद्रपशुस्वस्त्यर्थं परिविश्वतोः।
सूर्य्येन्दोः कर्मणी ये तु तयोः श्राद्धं न विद्यते"।

इति कर्म्मप्रदीपवचनपराद्धं पश्यन्तोऽन्वाहार्य्यश्राद्धं निषेधन्ति। तदसङ्गम्। पूर्वार्द्धानवलोकनात्। हस्त्यादीनां चुद्रपशूनाञ्च स्वस्त्ययनार्थं परिविश्यमाने सूर्य्ये चन्द्रमसि च ये कर्म्मणी वच्यमाणे, तयोः श्राद्धं नास्ति—इति स्वल्पार्थो वचनस्य॥०॥५॥०॥

अथ येऽत ऊर्द्ध्वं ज्यौत्स्नाः प्रथमोद्दिष्ट एव तेषु पितोपतिष्ठतेऽपामञ्जलिं पूरयित्वाऽभिमुखश्चन्द्रमसम् ॥ ६ ॥

अथेत्यपूर्वकर्म्मोपन्यासार्थम्। अन्ये तु वर्णयन्ति,—'अथ शब्दोऽधिकारानुवृत्त्यर्थः। कथन्नाम? पूर्ववदिदमपि चन्द्रदर्शन एव'—इति। अतोऽस्मात् तृतीयात् शुक्लपचादूर्द्ध्वं ये ज्यौत्स्नाः शुक्लपचाः, तेषु प्रथमोद्दिष्ट एव,—प्रथमं यः काल उद्दिष्टः कथितः तस्मिन्नेव काले तृतीयायामित्येतत्। प्रथमोदित एव,—इति पाठेऽपि प्रथममुदितः कथितो यः कालस्तस्मिन्निति स एवार्थः। अपरे

त्वाऊः,—'प्रथमोद्दिष्ट एव प्रथमोदित एव चन्द्रमसि प्रतिपदि द्वितीयायां वा, न यथापूर्वं तृतीयायाम्'—इति। पिता अभिमुखः सन् चन्द्रमसं उपतिष्ठते आराधयति। किं कृत्वा? अपामञ्जलिरञ्जलिं पूरयित्वा ॥ ० ॥ ६ ॥ ० ॥

तस्याञ्जलिम्—

यददश्चन्द्रमसीति सकृद्यजुषा द्विस्तूष्णीमुत्सृज्य यथार्थम्* ॥ ७ ॥

यददश्चन्द्रमसि—इति मन्त्रेण सकृच्चन्द्रमसं प्रत्युत्सृज्य अञ्जलिद्वयं तूष्णीमुत्सृजेत्। यथार्थमिति कर्म्मणः परिसमाप्तिरुच्यते। एतच्च कर्म्म देशान्तरस्थोऽपि कुर्य्यात्। मातृकुमारयोरस्मिन् कर्म्मण्यनङ्गत्वात्। कियन्तं कालं कुर्य्यात्? संवत्सरपर्य्यन्तम्। कुतः? तावतैव कृतत्वात्। वर्षान्तरेष्वपि तएव ज्यौत्स्नाः तएव मासाः तएव चर्त्तवः पुनरावर्त्तन्ते। 'अत ऊर्द्ध्वं ज्यौत्स्नेषु'—इत्यकृत्वा, 'ये अत ऊर्द्ध्वं ज्यौत्स्नाः तेषु'—इति करणाच्चैवमवगच्छामः। सर्व्वनाम्ना स्वल्पाभिमतेषु ज्यौत्स्नेष्वेतदुपदिश्यते। असमास-गुरु-क्रमभेद पुनर्व्वचनार्थापत्तयः स्वल्पार्थविशेषप्रतिपादनार्था भवन्ति। शिष्टाश्चैवमाचरन्ति ॥ ० ॥ ७ ॥ ० ॥

---

* एतत् सूत्रानन्तरं 'अत ऊर्द्धं ज्यौत्स्नेष्वेतत् कर्म्मासंवत्सरम्'—इति सूत्रतयैव संस्कारतस्त्वेऽधारि। परमस्मदवलोकितेषु सर्व्वेषु सूत्रग्रन्थेषु भाष्यपुस्तकद्वये च तददर्शनात् पूर्णता तन्निर्णयस्य भाष्ये दर्शनाच्च भाष्यप्रतीकमेव तत्।

जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामधेय-करणम् ॥ ८ ॥

जननात् जन्मदिवसात् आरभ्य दशरात्रे व्युष्टे अतिक्रान्ते, शतरात्रे व्युष्टे, संवत्सरे वा व्युष्टे नामधेयकरणं, नामैव नामधेयम्, तस्य करणम्—इति कर्म्मणो नामधेयम्। कर्त्तव्यम्—इति सूत्रशेषः। एकस्मादाशब्दात्रैते कालास्तुल्यवद्विकल्प्यन्ते। किन्तु यदि दैवा-न्मानुषाद्वा कुतश्चिदन्तरायात् दशरात्रे व्युष्टे नामधेयकरणं न सम्पद्यते तदा शतरात्रे व्युष्टे, तत्राप्यसम्पत्तौ संवत्सरे व्युष्टे—इति ॥ ० ॥ ८ ॥ ० ॥

अथ यस्तत् करिष्यन् भवति पश्चादग्नेरुदगग्रेषु दर्भेषु प्राङुपविशति ॥ ९ ॥

अथेति जातगृहनियमार्थम्। कथं नाम? यस्मिन् गृहे कुमारोजातः, तस्मिन् एव गृहे एतत् कर्त्तव्यम्। अन्यथा प्रागेव चन्द्रदर्शनात् कुमारस्य बहिर्गमनं स्यात्। तथा चोक्तं बह्वृचशा-खायाम्। 'तन्मध्ये जुहुयात् यस्मिन् जातः स्यात्'—इति। यः—इति सामान्याभिधानात् पितुरभावेऽन्योऽप्यधिकारी—इति दर्श-यति। यः कश्चित् पित्रादिः तत् नामधेयकरणं करिष्यन् कर्त्तुमिच्छन् भवति, स पश्चादग्नेरुदगग्रेषु दर्भेषु प्राङ्मुख उप-विशति। स खल्वयमग्निः शालाग्नेरपि लौकिक एव बोद्धव्यो न पुनः स्वयमाहितः। गर्भसंस्कारहोमानामेव तत्रानुज्ञानात्। नामधेयादौ लौकिकाग्नेरुपदेशाच्च। तथाच कर्म्मप्रदीपः।

"न खेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम् ।
स्वगर्भसत्क्रियार्थांश्च यावन्नासौ प्रजायते ।
अग्निस्तु नामधेयादौ होमे सर्व्वत्र लौकिकः ।
न हि पित्रा समानीतः पुत्त्रस्य भवति क्वचित्" ।

इति ॥ ० ॥ ९ ॥ ० ॥

अथ माता शुचिना वसनेन कुमारमाच्छाद्य दक्षिणत उदञ्चं कर्त्रे प्रयच्छत्युदक्शिरसम् ॥ १० ॥

कृतभाष्यं सूत्रम् ॥ ० ॥ १० ॥ ० ॥

प्रदाय च माता,—

अनुपृष्ठं परिक्रम्योत्तरत उपविशत्युदगग्रेषु दर्भेषु ॥ ११ ॥

उक्तार्थमेतत् ॥ ० ॥ ११ ॥ ० ॥

अथ जुहोति प्रजापतये तिथये नक्षत्राय देवताया इति ॥ १२ ॥

अथेत्यानन्तर्य्यार्थम् । कथं नाम? उपविष्टायां तस्यां कुमारं प्रदाय जुहोति । इतरथा गृहीतकुमारस्य हवनाऽसम्भवात् । एवमेके । गृहीतकुमार एव जुहोति । एवमपरे । कस्मै जुहोति? प्रजापतये जुहोति । यस्यां तिथौ कुमारोजातस्तस्यै तिथये जुहोति । यस्मिन् नक्षत्रे जातः तस्मै नक्षत्राय जुहोति । तिथेर्नक्षत्रस्य च या देवता तस्यै च जुहोति । अनादेशादाज्यं द्रव्यम् । इति-शब्दो होमस्य प्रकारविशेषं सूचयति । तत्र तिथयः

प्रतिपदाद्याः। तासां देवताश्चामावस्यापर्य्यन्तानां ब्रह्म-त्वष्ट-विष्णु-यम-सोम-कुमार-मुनि-वसु-पिशाच-धर्म्म-रुद्र-वायु-मन्मथ-यच-पितरः। पौर्णमास्यास्तु विश्वेदेवाः। तत्र तिथिहोमे, प्रतिपदे स्वाहा—इत्यादिकः प्रयोगः। तिथिदेवताहोमे विशेषमाह कर्म्म-प्रदीपः।

"नामधेये मुनि-वसु-पिशाचा बहुवत् सदा।
यचाश्च पितरो देवा यष्टव्यास्तिथिदेवताः।

इति। तेन, मुनि-वसु-पिशाच-यच-पितरो विश्वेदेवाश्च बहु-वचनान्ता होतव्याः, शेषा एकवचनान्ताः। नचत्राण्यश्विन्यादीनि। नचत्रहोमेऽपि विशेषमाह स एव।

"आग्नेयाद्येऽथ सर्पाद्ये विशाखाद्ये तथैवच।
आषाढ़ाद्ये धनिष्ठाद्ये अश्विन्याद्ये तथैवच।
द्वन्द्वान्येतानि बहुवद्दृचाणां जुहुयात् सदा।
द्वन्द्वद्वयं द्विवच्छेषमवशिष्टान्यथैकवत्"।

इति। कृत्तिकाद्ये द्वे नचत्रे, अश्लेषाद्ये द्वे, विशाखाद्ये द्वे, आषाढ़ाद्ये द्वे, धनिष्ठाद्ये द्वे, अश्विन्याद्ये द्वे,—एतानि द्विकानि;—कृत्तिकाभ्यः स्वाहा, रोहिणीभ्यः स्वाहा,—इत्यादिबहुवचनयुक्तानि जुहुयात्। शेषमवशिष्टं द्वन्द्वद्वयं—भाद्रपदाद्वयं फल्गुनीद्वयञ्च;—पूर्व्वभाद्रपदाभ्यां स्वाहा, उत्तरभाद्रपदाभ्यां स्वाहा,—इत्यादिद्विवचनयुक्तं जुहुयात्। अवशिष्टानि मृगशिरः प्रभृतीनि नचत्राणि,—मृगशिरसे स्वाहा,—इत्याद्येकवचनान्तानि जुहुयात्। तत्रापि लिङ्गनिर्णयस्तन्त्रान्तरे।

"हस्ता-स्वाति-श्रवणा अक्लीबे
मृगशिरो न पुंसि स्यात्।
पुंसि पुनर्व्वसुपुष्यौ
मूलन्वस्तौ स्त्रियः शेषाः"।

इति। तस्मात्, मूलायै स्वाहा—इति प्रामादिकः प्रयोगः। नक्षत्रदेवताश्च यथाक्रमम्, अश्वि-यम-अग्नि-प्रजापति-सोम-रुद्र-अदिति-बृहस्पति-सर्प-पितृ-भग-अर्य्यमन्-सवितृ-त्वष्टृ-वायु-इन्द्राग्नि-मित्र-इन्द्र-निर्ऋति-अप्-विश्वेदेव—विष्णु-वसु-वरुण-अजपाद्-अहि-र्बुध्न-पूषाणः। नक्षत्रदेवताहोमेऽपि विशेषमाह कर्म्मप्रदीपः।

"देवता अपि हूयन्ते बहुवत् सर्पवस्तपः।
देवाश्च पितरश्चैव द्विवद्देवाश्विनौ तथा"।

इति। तेन सर्पवस्तपो विश्वेदेवाः पितरश्च बहुवचनान्ताहोतव्याः। अश्विनौ द्विवचनान्तौ होतव्यौ। अर्थादन्यादेवता एकवचनान्ता होतव्याः। सोऽयं विशेषः,—इतिशब्देन द्योतितः॥ ०॥१२॥०॥

तस्य मुख्यान् प्राणान् संमृशन् कोऽसि कतमोऽसीत्येतं मन्त्रं जपति॥१३॥

तस्य कुमारस्य मुख्यान् मुखे भवान् प्राणान् प्राणनिर्गमोपायभूतान् सप्त च्छिद्रविशेषान्—मुखमक्षिणी नासिके कर्णावित्येतद्रूपानिति यावत्। संमृशन् संस्पृशन्। क्वचित्तथैव पाठः। कोऽसि—इत्येतं मन्त्रं जपति। अवसानोऽयं मन्त्रः॥ ०॥ १३॥ ०॥

तस्मिंश्च मन्त्रे,—

आहस्पत्यं मासं प्रविशासावित्यन्ते च मन्त्रस्य घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानान्तं कृतं नाम दध्यात् ॥ १४ ॥

'आहस्पत्यं मासं प्रविशासौ'—इत्यत्र असावित्यस्मिन् मन्त्रस्थाने, अन्ते च मन्त्रस्य 'परिददात्वसौ'—इत्यसाविति सर्व्वनामस्थाने, नाम दध्यात् उच्चारयेत्। कीदृशं नाम? उच्यते। कृतं कल्पितं, कृदन्तं वा। अथवा। कृतप्रथमान्तं, "द्वादशेऽहनि पिता नाम कुर्य्यात्"—इति श्रुतेः पित्रादिकृतं वा। नामैव विशिनष्टि। घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानान्तम्। घोषवदादि। वर्गाणां प्रथमद्वितीयाः शषसाश्चाघोषाः, तदन्ये व्यञ्जनवर्णा घोषवन्तः। घोषवदक्षरमादि यस्य नाम्नः, तत् घोषवदादि। अन्तरन्तस्थम्। अन्तस्थायरलवाः। अन्तर्मध्ये अन्तस्थमक्षरं यस्य तदन्तरन्तस्थम्। दीर्घाभिनिष्ठानान्तम्। दीर्घोद्विमात्रोवर्णः, अभिनिष्ठानं विसर्ज्जनीयमक्षरम्। राणायनीयानां लक्षणतन्त्रे प्रसिद्धा विसर्ज्जनीयस्याभिनिष्ठानाख्येति भट्टभाष्यम्। दीर्घश्च अभिनिष्ठानश्च दीर्घाभिष्ठाने, ते अन्ते यस्य तत् दीर्घाभिनिष्ठानान्तम्। एकस्मिन् नाम्नि, दीर्घस्य अभिनिष्ठानस्य च समुच्चयेनान्तत्वासम्भवादर्थादनयोर्व्विकल्पः;—दीर्घान्तम् अभिनिष्ठानान्तं वा। तद् यथा,—दीर्घान्तं नाम गोविन्दशर्म्मा—इत्यादिरूपं, अभिनिष्ठानान्तञ्च गोविन्दः—इत्यादिरूपम्।

इति भट्टनारायणप्रभृतयो वृद्धाः। गर्गोऽप्याह।

"आदौ घोषवदक्षरं यरलवान् मध्ये पुनः स्थापये-
दन्ते दीर्घविसर्ज्जनीयसहितं नाम प्रयत्नात् कृतम्"॥

इति। तथा चोभयथा दर्शनम्। "श्रुतश्रीकनाम्ने वराय"—इत्याश्वलायनगृह्यपरिशिष्टे। "गिरिशर्म्मैवमुक्तवान्"—इति कर्म्मप्रदीपे। एवमन्यत्र। गृह्यान्तरवृत्तिकारैरपि, द्व्यक्षरस्य चतुरक्षरस्य च नाम्न उदाहरणतया भवः इति विष्णुशर्म्मा इति चैवमादिकं लिखितम्। दीर्घाभिनिष्ठानान्तमित्यत्र 'दीर्घाभिनिष्ठानम्'—इति पठन्त्यन्ये। दीर्घेणाक्षरेण अभिनिस्तिष्ठते समाप्यते यन्नाम तद्दीर्घाभिनिष्ठानं, यथा गोविन्दशर्म्मा—इति व्याचक्षते च।

तदिदं नाम्नः प्रतीकत्रयमादिमध्यान्तभेदेन सूचितम्। ये त्वाहुः, शर्म्मादीनां न नामावयवत्वं किन्तु नामभिन्नत्वं तदुपपदत्वञ्च,—इति। ते तु न्यायेन न सङ्गच्छन्ते। परमप्रेक्षावान् खल्वाचार्य्यो नाम्न आदिं मध्यं चावयवं सूचयित्वा क्रमागतमवश्यसूचयितव्यमन्त्यमवयवमुपेक्ष्य नाम्न उपपदं सूचितवानित्यस्यासम्भवदुक्तिकत्वात्। को हि प्रेक्षावानेवमाचक्षीत। 'अयुगदान्तं स्त्रीणाम्'—इत्यग्रिमसूत्रे दाकारस्य नामावयवत्वस्य तेषामप्यनुमतत्वेनात्रापि तथैव वर्णयितुमुचितत्वाच्च। तात्पर्य्यभेदकल्पनस्यान्याय्यत्वात्। उत्तरसूत्रे दाकारस्य दीर्घाभिनिष्ठानयोरपवादरूपेण प्रवृत्तेस्तस्यैव तयोरपि नामप्रतीकत्वप्रतीतेश्च। पाठान्तरे तु शर्म्मेत्यस्य नामावयत्वे न सन्देहगन्धोऽपि। तथा स्नानसूत्रपरिशिष्टम्।

"गोत्रं स्वरान्तं सर्व्वत्र गोत्रस्याक्षय्यकर्म्मणि।

गोत्रन्तु तर्पणे प्रोक्तः कर्त्ता एवं न मुह्यति ।
सर्वत्रैव पितः प्रोक्तं पिता तर्पणकर्म्मणि ।
पितुरक्षय्यकाले तु अक्षय्यां तृप्तिमिच्छता ।
शर्म्मन्नर्घ्यादिके कार्य्ये शर्म्मा तर्पणकर्म्मणि ।
शर्म्मणोऽक्षय्यकाले च पितॄणां दत्तमक्षयम्" ।

इति । तदत्र गोत्रसंबन्धनाम्नामुल्लेखप्रकारोपदेशपरे ग्रन्थे गोत्रसंबन्धयोरुल्लेखप्रकारमुपदिश्य 'शर्मन्नर्घ्यादिके कार्य्ये'— इत्याद्यभिधानात् शर्म्मशब्दस्य नामप्रतीकत्वं स्पष्टमवगम्यते । तस्य नामभिन्नत्वे तदुपपदत्वे च क्रमागतस्य नाम्न उल्लेखप्रकारमनभिधाय तदुपपदस्योल्लेखप्रकाराभिधानमसङ्गतं भवेत् । न च सङ्गतं शास्त्रमसङ्गतं कर्त्तुमुचितम् । तथा मनुः ।

"नामधेयं दशम्यान्तु द्वादश्यां वाऽथ कारयेत् ।
पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे वा गुणान्विते ।
मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम् ।
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ।
शर्म्मवद्ब्राह्मणस्य स्यात् राज्ञोरक्षासमन्वितम् ।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रैष्यसंयुतम्" ।

इति । नामधेयमिति विशेष्यमुत्तरवचनद्वयेऽनुषञ्जनीयम् । शङ्खस्त्विमं वचनमन्यथा पठितवान् । तद्यथा ।

"शर्म्मान्तं ब्राह्मणस्योक्तं वर्म्मान्तं क्षत्रियस्य च ।
धनान्तञ्चैव वैश्यस्य दासान्तञ्चान्त्यजन्मनः ।

इति । शातातपस्याप्येतत् । यच्चाह यमः ।

"शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः।
भूतिर्गुप्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्"।

इति। भूतिर्दत्तश्चेति पाठान्तरम्। तदनेन शर्म्मा देवश्चेत्य-नयोर्विकल्पेनोत्तरप्रतीकत्वं विप्रनाम्नामिति तस्य मतं लक्ष्यते। अस्मिन् विषये मुनीनां मतभेदोपलम्भात्। यथैव तावत्, 'धनान्त-श्चैव वैश्यस्य'—इति, 'भूतिर्गुप्तश्च वैश्यस्य'—इति चैवमादि। चकारात् समुच्चयावगतिस्तु 'ब्राह्मणो वैल्वपालाशौ'—इत्यादिवत् समर्थनीया। तथाच 'ब्राह्मणो वैल्वपालाशौ'—इत्यत्र व्याख्यातं कुल्लूकभट्टेन, 'वैल्वः पालाशो वा दण्डः—इति वाशिष्ठे विकल्पदर्शनादेकस्यैव दण्डस्य धारणम्। विकल्पितयोरेवैकब्राह्मणसंबन्धात् समुच्चयो द्वन्द्वेनानू-द्यते'—इति। तद्वच्चापि स्यात्। कस्यचिद्विप्रस्य शर्म्मा,—इति कस्यचिच्च देवः,—इति सर्व्वथाऽपि खलु द्वयमेतद्विप्रस्यैव भवति न क्षत्रियादेरिति। न त्वेकस्मिन् नाम्नि देवशर्म्मणोः समुच्चयः। मन्वादिविरोधात्। तथात्वे वर्म्मत्रात्रोर्भूतिगुप्तयोरपि समुच्चयः स्यात्। वस्तुतस्तु मन्वादिभिः कैरपि देवशब्दस्य नामप्रतीकत्वानुप-देशात् प्रतीकद्वयाभिप्रायेण यमवचनं वर्णनीयम्। मन्वादिस्वर-स्यात्। तथाच शर्म्मादीनामेकप्रतीकत्वं, देवाववोधक-त्राणावद्योतक-भूत्यभिव्यञ्जक-शब्दानामपरप्रतीकत्वं तस्यार्थः। प्रतीकयोः पौर्व्वा-पर्य्यन्तु वचनान्तरानुसारेणावसेयम्। विष्णुपुराणम्।

"ततश्च नाम कुर्व्वीत पितैव दशमेऽहनि।
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम्।
शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रियस्य च।

गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः" ।

इति । नराख्यमेव प्रतीकद्वयेन विशिनष्टि: देवपूर्व्वमिति, शर्म्मवर्म्मादिसंयुतमिति च । तत्र च "देवपूर्व्वं श्राद्धं कुर्व्वीत"—इति "देवपूर्व्वं पितृभ्योऽन्नम्"—इति चैवमादिवत् देवः पूर्व्वोयस्येति बहुव्रीहिसमासाश्रयणेन देवबोधकशब्दस्य पूर्व्वप्रतीकत्वं शर्म्मवर्म्मादेश्चोत्तरप्रतीकत्वं पारिशेष्यादवसीयते । तथाच शङ्खलिखितौ । "देवतानक्षत्रादिसंबद्धं पिता नाम कुर्य्यात्"—इति । तथा शङ्खः । "कुलदेवतासंबद्धं पिता नाम कुर्य्यात्"—इति । इदं 'कुलसंबद्धं देवतासंबद्धं वा'—इति मदनपारिजाते व्याख्यातम् । आचार्य्योऽप्यभिवादनीये नाम्नि सूचयिष्यति, "देवताश्रयं वा नक्षत्राश्रयं वा गोत्राश्रयमप्येके"—इति ।

न च देवात् पूर्व्वं देवपूर्व्वमिति व्याख्यानं युक्तमिति वाच्यम् । पूर्व्वलिखितशास्त्रान्तरानुसारेण बहुव्रीहिसमासस्यैव युक्तत्वात् । तन्मते 'शर्म्मा देवश्च विप्रस्य'—इति यमवचनानुसारेण विप्रनाम्न एव देवशब्दपूर्व्ववर्त्तित्वेन वर्म्मादेश्च क्षत्रियादिनाममात्रविषयत्वेन देवपूर्व्वस्य नाम्नो वर्म्मादिसंयुतत्वानुपपत्तेश्च । क एवमाह देवपूर्व्वस्य नाम्नो वर्म्मादिसंयुतत्वमिति, तस्य शर्म्मसंयुतत्वमेव ब्रूमः । तच्चैतद्विप्रविषयमिति मन्यामहे । सत्यमेवं ब्रवीति भवान्, मन्यते चैवम् । न त्वेवं वाक्यार्थो घटते । किं कारणम्? देवपूर्व्वस्यैव नाम्नः शर्म्मवर्म्मादिसंयुतत्वस्य वचनादवगतेः । किञ्च भवतां देवपूर्व्वस्य नाम्नो विप्रविषयतया उपात्ते देवपूर्व्वे नाम्नि शर्म्मयुतत्वमन्वीयते इति वक्तव्यम् । उक्तञ्चैवमेव भवद्भिः । एवञ्च नामान्तरस्यानुपादानात्

वर्म्मादियुतत्वमिदानीं कुत्राचौयताम्। न ह्यनन्वितमेवेदमिति शक्यं वक्तुम्। तथा सति बालोन्मत्तादिवाक्यवदपार्थकमेतदित्यापतति। न चैतदुचितम्। न वा वृत्तिशब्दैकदेशार्थस्यैवमभिसंवन्धोऽनुमतः प्रामाणिकानाम्। तस्मात्, देवपूर्व्वस्य नाम्नः शर्म्मवर्म्मादिसंयुतत्वान्वयोपपत्तये पूर्व्वोक्तैव व्याख्या धीमद्भिरादरणीया।

तदत्र शर्म्मादिपदोत्तरमितिकारकरणात् 'गुप्तदासात्मकं नाम'—इति चाभिधानात् तावन्मात्रस्यैव परप्रतीकत्वं न देवादिशब्दस्यसुचितस्य। तथा शर्म्मादीनां नामावयवत्वञ्च सुव्यक्तं प्रतीयते। तत्त्वकृतस्तु, 'ततस्तु नाम कुर्व्वीत'—इत्यनेनोपपदत्वं नामभिन्नत्वञ्च शर्म्मादीनामिति, 'शर्म्मन्नर्घ्यादिके कार्य्ये'—इत्यत्र च शर्म्मेत्यनेन 'गोत्रसंवन्धनामानि' इत्येकवाक्यतया शर्म्मान्तं नाम प्रतीयते,—इति च परस्परविरुद्धमेव किमित्युक्तवन्त इति तएव प्रष्टव्याः॥ ०॥१४॥०॥

एतदतद्धितम्॥ १५॥

एतदिति नाम्नः परामर्शः। सूचितनाम्नस्तद्धितत्वासम्भवादेतदतद्धितान्तमिति व्याख्येयम्। दीर्घाभिनिष्ठानान्तत्वसूत्रणादेवातद्धितान्तत्वे सिद्धे पुनरुपादानं नियमार्थम्। एतदेव नामाऽतद्धितान्तं न पुनरन्यदिति नियम्यते। तेन, 'यत्तद्गुह्यमेव भवति'—इति 'अभिवादनीयं नामधेयं कल्पयित्वा'—इति चैवमादिनाम्नां तद्धितान्तत्वमपि स्यात्। पूर्व्वप्रतीकाभिप्रायं वा सूत्रं वर्णनीयम्। तत्राप्येतदितिकरणादन्येषां नाम्नां पूर्व्वप्रतीकस्य तद्धितान्तत्वमनिषिद्धम्॥ ०॥१५॥०॥

अयुग्दान्तं स्त्रीणाम् ॥ १६ ॥

अयुक् अयुग्माचरम्, दान्तं दाकारान्तं नाम स्त्रीणां दध्या-दित्यनुवर्त्तते। अयमेव विशेषः। सर्वमन्यत् पूर्ववत्। तेन, स्त्रीणां नाम 'गौरीदा'—इत्यादिरूपं—सिध्यति। यत्तु "दैव्यन्तास्तु स्त्रियः स्मृताः"—इति वचनम्। तत् कौथुमादिव्यतिरिक्तविषयम्। दादेव्योः समुच्चयमिच्छन्त्यन्ये। उदाहरन्ति च 'गौरी देवी दा'—इति ॥ ० ॥ १६ ॥ ० ॥

मात्रे चैव प्रथमं नामधेयमाख्याय यथार्थम् ॥ १७ ॥

तच्च नामधेयं प्रथमं पूर्वं मात्रे आख्याय कथयित्वा यथार्थ-मिति कर्म्मणः परिसमाप्तिरुच्यते तेन तत्समापनमिदानीं कुर्य्यात्। चशब्दात् पुरुषनाम्नः स्त्रीनाम्नश्च प्रथमं मात्रे कथनम्। एवशब्दो मातुरेव प्राथम्यं नियमयति। चैवेति वा निपातसमु-दायः ॥ ० ॥ १७ ॥ ० ॥

गौर्दक्षिणा ॥ १८ ॥

नामधेयकरणकर्म्मणः ॥ ० ॥ १८ ॥ ० ॥

कुमारस्य मासि मासि संवत्सरे सांवत्सरिकेषु वा पर्व्वस्वग्नीन्द्रौ द्यावापृथिवी विश्वान्देवांश्च यजेत ॥ १९ ॥

जननादयस्तृतीयोज्यौत्स्नः—इति जननाद्दशरात्रे व्युष्टे—इति च जन्मनः प्रकृतत्वात् 'कुमारस्य' जन्मतिथौ वक्ष्यमाणदेवता 'यजेत'। कियन्तं कालं यजेत?—इत्यत्राह 'मासि मासि', प्रतिमासमित्यर्थः।

तेन वत्सरपर्य्यन्तं यागः। ऊर्द्धं हि वत्सरात् तएव मासा आवर्त्तन्ते। 'संवत्सरे' वा, पूर्णे—इति वाक्यशेषः। अत्रापि जन्मतिथौ यजेत,—इति द्रष्टव्यम्। 'सांवत्सरिकेषु वा पर्वसु' यजेत। संवत्सरस्य इमानि सांवत्सरिकाणि, तेषु पर्वसु त्रयाणां ऋतूनामवसानतिथिषु—कार्त्तिकीफाल्गुन्याषाढ़ीषु। अथवा। द्वावत्र कालविकल्पौ। संवत्सरपर्य्यन्तं मासिमासि कुमारस्य जन्मतिथौ यजेत, सांवत्सरिकेषु वा पर्वसु यजेत। कतमाः पुनस्तादेवताः? उच्यते। 'अग्नीन्द्रौ'। 'द्यावापृथिव्यौ'। एते द्वन्द्वदेवते। 'विश्वान्देवांश्च' यजेत ॥ ० ॥ १९ ॥ ० ॥

दैवतमिष्ट्वा तिथिं नक्षत्रञ्च यजेत ॥ २० ॥

जन्मतिथेर्दैवतमिष्ट्वा जन्मतिथिम्, जन्मनक्षत्रस्य दैवतमिष्ट्वा जन्मनक्षत्रञ्च यजेत ॥ ० ॥ २० ॥ ० ॥

विप्रोष्य ज्येष्ठस्य पुत्रस्योभाभ्यां पाणिभ्यां मूर्द्धानं परिगृह्य जपेत्, यदा वा पिता म इति विद्यादुपेतस्य वाऽङ्गादङ्गात् सꣳस्रवसीति ॥ २१ ॥

विप्रोष्य प्रवासमनुभूय गृहमागतः पिता, ज्येष्ठस्य पुत्रस्य मूर्द्धानम्, उभाभ्यां पाणिभ्यां परिगृह्य अङ्गादङ्गादिति षड्वसानं त्रृचं जपेत्। यदा वा कुमारः, अयं मे पिता जनयिता,—इत्येवं विद्यात् जानीयात्, (शक्यर्थे लिङ्) ज्ञातुं शक्नोतीत्येतत्। तदा वा जपेत्। उपेतस्य उपनीतस्य वा कुमारस्य मूर्द्धानं परिगृह्य जपेत्। त इमे त्रयः कालविकल्पाः ॥ ० ॥ २१ ॥ ० ॥

पशूनां त्वा हिङ्कारेणाभिजिघ्रामीत्यभिजिघ्र यथा-र्थम् ॥ २२ ॥

पशूनामिति मन्त्रेण अभिजिघ्र आभिमुख्येनाघ्राय,—मूर्द्धान-मिति प्रकृतेन सम्बन्धः। यथार्थमिति कर्म्मणः परिसमाप्तिरुच्यते। तेन वामदेव्यमिदानीं गातव्यम्। अत्रापि मन्त्रे असावित्येतस्मिन् सर्वनाम्नि सम्बोधनविभक्त्या पुत्रनाम प्रयोक्तव्यम्। अभिजिघ्रामि गोविन्दशर्म्मन्,—इति। तदिदं प्रोषितागतकर्म्मेत्युच्यते ॥०॥२२॥०॥

एवमेवावरेषाम् ॥ २३ ॥

अवरेषां कनिष्ठानामप्येवमेव मूर्द्धालम्भनन्तदभिघ्राणञ्च कर्त्त-व्यम् ॥०॥२३॥०॥

यथाज्येष्ठं यथोपलम्भं वा ॥ २४ ॥

यो यो वयसा ज्येष्ठस्तस्य तस्य प्रथमं कर्त्तव्यम्, योयः पूर्वं सन्निधानमागच्छति तस्य तस्य वा ॥०॥२४॥०॥

स्त्रियास्तूष्णीं मूर्द्धन्यभिजिघ्रणं मूर्द्धन्यभिजिघ्रणम् ॥ २५ ॥

ऋजुरक्षरार्थः। ननु तूष्णीं मूर्द्धन्यभिजिघ्रणमिति सूत्रणात् मूर्द्धालम्भः समन्त्रकः प्राप्नोति ? न। मन्त्रलिङ्गविरोधात्।

"अमन्त्रिका तु कार्य्येयं स्त्रीणामावृदशेषतः।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्"।

इति स्मरणाच्च। तस्मात्, मूर्द्धालम्भोऽमन्त्रकः सिद्धः। अतो-ऽभिप्राणमाचस्य तूष्णीन्त्वं सूचितम्। तर्हि स्त्रियास्तूष्णीमित्येव कर्त्तुमुचितम्, अलं मूर्द्धन्यभिजिघ्रणमित्यनेन? उच्यते। एवं कुर्वन् अभिप्राणादन्यत् वक्ष्यमणं होमादिकं समन्त्रकमेव स्यादिति दर्श-यति। तथाच वक्ष्यति "मन्त्रेण तु होमः"—इति। तस्मान्न केवलं प्रोषितागतकर्म्मैव स्त्रियाः स्यात्, अपितु जातकर्म्मादिकमपि—इति सिद्धम्। ननु तथाप्यनर्थकम्। मन्त्रेण तु होमः—इति सूचणादेव तत्सिद्धेः। उच्यते। तस्य चूड़ाकरणकर्म्मणोऽनन्तरं सूचितत्वात् तन्मात्रविषयत्वमप्याशङ्कीत कश्चिन्मन्दमतिः कदाचि-दिति तन्निरासार्थमेतत् सूचितम्। पुनरुक्तं वैतदादरार्थम्। पुनरुक्तं खल्वाचार्य्यग्रन्थे विद्यत एवेत्यावेदितम। द्विर्वचनं प्रकरण-समाप्त्यर्थमादरार्थं वा ॥ ० ॥ २५ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज-श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये द्वितीय-प्रपाठकस्य अष्टमो खण्डिका ॥ ० ॥

—

द्वितीयप्रपाठके नवमी खण्डिका ।



अथातस्तृतीये वर्षे चूड़ाकरणम् ॥ १ ॥

अथशब्दः पूर्व्वप्रकृतार्थः । अथ पूर्व्वप्रकृतात् जन्मनस्तृतीये वर्षे वर्त्तमाने उदगयनादीनां समुच्चयोपलब्धौ चूड़ाकरणं कर्त्तव्यमिति सूत्रशेषः । कपुष्णिका-कपुच्छलाख्याः केशाश्चूड़ा इति कथ्यन्ते । तासां वक्ष्यमाणेन विधिना संस्करणं चूड़ाकरणमिति कर्म्मणो-नामधेयम् । अतःशब्दो हेत्वर्थः । यस्माद्बैजिकं गार्भिकञ्च पापमनेन कर्म्मणाऽपमृज्यते, तस्मादिदमवश्यं कर्त्तव्यमित्यर्थः । यथा मनुः ।

"गार्भैर्होमैर्जातकर्म्मचौड़मञ्जीनिबन्धनैः ।
बैजिकं गार्भिकञ्चैनो द्विजानामपमृज्यते" ।

इति । अन्ये तु वर्णयन्ति । 'अतःशब्दो हेत्वर्थे । यस्मात् श्रुत्यन्तरे अन्योऽपि पक्षः श्रूयते—"प्रथमेऽब्दे"—इति, सोऽपि द्रष्टव्यः । तथाच मनुः ।

"चूड़ाकर्म्म द्विजातीनां सर्व्वेषामेव धर्म्मतः ।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्" ।

इति ॥ ० ॥ १ ॥ ० ॥

पुरस्ताच्छालाया उपलिप्तेऽग्निरुपसमाहितो भवति ॥ २ ॥

व्याख्यातार्थमेतत् ॥ ० ॥ २ ॥ ० ॥

तत्रैतान्युपक्लृप्तानि भवन्ति ॥ ३ ॥

तत्र तस्मिन्नुपलिप्ते देशे एतानि वक्ष्यमाणानि उपसमीपे अग्नेः, क्लृप्तानि आसादितानि भवन्ति। कर्त्तुरनियमः ॥ ० ॥ ३ ॥ ० ॥

कानि पुनस्तानि? कस्यां वा दिशि अग्नेरासादयितव्यानि? उच्यते ।

एकविंशतिदर्भपिञ्जूल्य उष्णोदककंस औदुम्बरः क्षुर आदर्शो वा क्षुरपाणिर्नापित इति दक्षिणतः ॥ ४ ॥

एकविंशतिस्त्रिःसप्त । दर्भपिञ्जूल्यो व्याख्याताः । सप्त सप्त कृत्वा दर्भपिञ्जूल्यः स्थानत्रये आसादयितव्याः । एवमेकविंशतिस्ता भवन्ति। कुतः पुनर्भेदेनासादनम्? भेदेनैव विनियोगोपदेशात् । उदगग्राणाञ्चामूषामासादनं स्यात् । 'प्राचीसौम्यापराजिताः'—इति वचनात् । उष्णमुदकं यस्मिन् स उष्णोदकः, स चासौ कंसः—पात्रविशेषश्चेति उष्णोदककंसः । उदुम्बरस्यायमौदुम्बरः क्षुरः । स खल्वयमौदुम्बरः क्षुरस्ताम्रमय एव न दारुमयः । कुतः? 'प्रोह्यप्रच्छिन्दन्'—इत्युपरिष्टादनेन छेदनस्याशक्यमानत्वात् । सा खल्वाशङ्कैवमुपपन्ना भवति । न हि दारवेण केशच्छेदनं शक्यं कर्त्तुम्। तदभावे, आ सम्यक् दृश्यते मुखमस्मिन्—इत्यादर्शो दर्पणो वा। क्षुरं पाणौ यस्यासौ क्षुरपाणिर्नापितः । इत्येतानि

दक्षिणतोऽग्नेरुपक्लृप्तानि भवन्ति। प्राक्संस्थानाञ्चामीषामासादनं स्यात्। कुतः? प्रादक्षिण्योपपत्तेः। एवमुत्तरत्रापि प्रादक्षिण्येनासादनं बोद्धव्यम्॥०॥४॥०॥

आनडुहो गोमयः कृसरः स्थालीपाको वृथापक्व इत्युत्तरतः॥५॥

अनड्वान् वृषभस्तस्यायमानडुहोगोमयः, कृसरः स्थालीपाकः— इति पूर्व्वं व्याख्यातम्। स खल्वयं स्थालीपाको वृथापक्वः, संस्काररहितत्वात्, कर्मण्यव्याप्रियमाणत्वाच्च। इत्येतद्द्वयमुत्तरतोऽग्नेरासादयितव्यम्॥०॥५॥०॥

व्रीहियवैस्तिलमाषैरिति पृथक् पात्राणि पूरयित्वा पुरस्तादुपनिदध्युः॥६॥

व्रीह्यादयः प्रसिद्धाः। व्रीहियवैः—इतरेतरयोगनिर्देशात् मिश्रितैः। तिलमाषैर्मिश्रितैरेव। इतिशब्दादेषामलाभे अन्यैरप्येवं विधैः। पृथक् नाना, पात्राणि,—बहुवचनस्यार्थवत्त्वार्थं त्रीणि, पूरयित्वा, पुरस्तात् पूर्व्वस्यां दिश्यग्नेः, उपनिदध्युः स्थापयेयुः॥०॥६॥०॥

कृसरो नापिताय सर्व्वबीजानि चेति॥७॥

कृसरो नापिताय दातव्यः। सर्वबीजानि च तस्मै दातव्यानि। इतिना अन्यदपि पारितोषिकं देयमित्युपदिशति। सा खल्वियं

प्रतिपत्तिः कृसरस्य बौजपात्राणाञ्च प्रसङ्गादुचैव सूचिता। कर्म्मक्रम-एवायं कुतो न स्यात्? एतस्य प्रतिपत्तित्वे नापितस्य कर्म्ममूल्यतया दृष्टार्थत्वसम्भवात्। अन्यथा अदृष्टार्थत्वमस्य कल्पनीयं स्यात्। तच्चानिष्टम्। कृते च कर्म्मणि तन्मूल्यदानप्रसिद्धेः कर्म्मणोऽवसान-एवैतानि नापिताय देयानि॥०॥७॥०॥

अथ माता शुचिना वसनेन कुमारमाच्छाद्य पश्चा-दग्नेरुदगग्रेषु दर्भेषु प्राच्युपविशति॥८॥

अथेत्यानन्तर्य्यार्थम्। आज्यसंस्कारानन्तरमित्यर्थः। अथवा। अथेति द्रव्यासादनानन्तर्य्यमभिधत्ते। तथाच पूर्व्वसूत्रोक्तं कृसरादि-दानं प्रतिपत्तिरेवेत्यवधार्य्यते। व्याख्यातमन्यत्॥०॥८॥०॥

अथ यस्तत्करिष्यन् भवति, पश्चात् प्राङवतिष्ठते॥९॥

अथेति किञ्चित् पूर्व्वप्रकृतं स्मारयति। किन्तत्? 'यथा पाणिग्रहणे तथा चूडाकर्मणि'—इत्यतिदिष्टम्। तेनाच पुरस्ताचो-परिष्टाच चतस्र आहुतयो भवन्ति। यः कश्चित् पित्रादिः तत् कर्म करिष्यन् भवति, स महाव्याहृतिभिर्व्यस्तसमस्ताभिश्चतस्र-आहुतीर्हुत्वा अथानन्तरम्, गृहीतकुमारायामातुः पश्चात्, प्राङ् प्राङ्मुखः (क्वचित्तथैव पाठः) अवतिष्ठते ऊर्द्धस्तिष्ठति। ननु अग्नेः पश्चादित्येव कुतो न वर्ण्यते? आनर्थक्यादित्याह। एवं खल्वनर्थक-मेव पश्चादितिवचनं स्यात्। पश्चादग्नेरिति खल्वनुवर्त्तत एव। तस्माद् यथोक्त एवार्थः॥०॥९॥०॥

अथ जपत्यायमगात् सविता क्षुरेणेति सवितारं मनसा ध्यायन् नापितं प्रेक्षमाणः ॥ १० ॥

अथ तथाविधावस्थानानन्तरमेव, सवितारं सूर्य्यम्, मनसा श्रद्धादिगुणयुक्तेनेत्यर्थः। अन्यथा ध्यानस्य मानसिकत्वप्रसिद्धेर्मनसेत्यनर्थकं स्यात्। ध्यायन् चिन्तयन्, नापितं क्षुरपाणिं प्रेक्षमाणोऽवलोकयन् आयमगादित्येतं मन्त्रं जपति ॥ ० ॥ १० ॥ ० ॥

उष्णेन वाय उदकेनैधीति वायुं मनसा ध्यायन्नुष्णोदककꣳसं प्रेक्षमाणः ॥ ११ ॥

वायुं मनसा चिन्तयन्, उष्णोदकयुक्तं कंसपात्रञ्चावलोकयन् उष्णेन वाय—इति मन्त्रं जपति ॥ ० ॥ ११ ॥ ० ॥

दक्षिणेन पाणिनाऽप आदाय दक्षिणां कपुष्णिकामुन्दत्याप उन्दन्तु जीवस इति ॥ १२ ॥

दक्षिणेन पाणिना प्रकृतादुष्णोदककंसादप उष्णोदकमादाय गृहीत्वा कुमारस्य दक्षिणां कपुष्णिकामुन्दति क्लेदयति, आर्द्रां करोति—इत्येतत्। आप उन्दन्तु—इति मन्त्रेण। कं शिरः पुष्णाति शीतातपादितो रक्षणेन,—इति कपुष्णिका शिरसः पार्श्वद्वयावस्थिता केशजुटिका भण्यते। तथा चोक्तम्।

"कपुष्णिकाऽभितः केशा मूर्द्ध्नि पश्चात् कपुच्छलम्"।

इति ॥ ० ॥ १२ ॥ ० ॥

विष्णोर्दꣳष्ट्रोऽसीत्यौदुम्बरं क्षुरं प्रेक्षत आदर्शं वा॥ १३॥

प्रेक्षते अवलोकयति। प्रेक्षेत इति पाठे अवलोकयेदित्यर्थः। शिष्टमन्यत् ॥०॥१३॥०॥

ओषधे त्रायस्वैनमिति सप्त दर्भपिञ्जूलीर्दक्षिणायां कपुष्णिकायामभिशिरोग्रा निदधाति॥ १४॥

आसादितानामेकविंशतिदर्भपिञ्जूलीनां मध्यात् सप्त दर्भपिञ्जूलीर्गृहीत्वा कुमारस्य दक्षिणायां कपुष्णिकायाम्, ओषधे त्रायस्वेति मन्त्रेण निदधाति स्थापयति। कथम्? उच्यते। अभिशिरोऽग्राः, शिरसोऽभिमुखान्यग्राणि यासां, तथाविधाः॥ ०॥१४॥०॥

ता वामेन पाणिना निगृह्य दक्षिणेन पाणिनौदुम्बरं क्षुरं गृहीत्वाऽऽदर्शं वाऽभिनिदधाति स्वधिते मैनꣳहिꣳसीरिति॥ १५॥

ताः दर्भपिञ्जूलीर्दक्षिणकपुष्णिकास्थ, वामेन 'पाणिना' 'निगृह्य' निःशेषेण गृहीत्वा। 'ता वामेनाभिगृह्य'—इति पाठेऽप्येवमेवार्थः। 'दक्षिणेन पाणिना' 'औदुम्बरं क्षुरमादर्शं वा' पूर्व्वमासादितम्, 'अभि' सर्वतोभावेन, 'निदधाति' संलग्नं धारयति,—स्वधिते मैनमितिमन्त्रेण। क्षुर आदर्शो वा तथा निधा-

तव्यो यथा सर्व्वाः पिञ्जूल्यः सर्व्वाश्च दक्षिणकपुष्णिकास्तत्रग्नाः स्युरित्यर्थः ॥ ० ॥ १५ ॥ ० ॥

निधाय च.—

येन पूषा बृहस्पतेरिति त्रिः प्राञ्चं प्रोहत्यप्रच्छिन्दन् सकृद्यजुषा द्विस्तूष्णीम् ॥ १६ ॥

त्रिर्व्वारत्रयं प्राञ्चं प्राग्गतं प्रोहति प्रेरयति—प्रसारयतीत्येतत्। किं कुर्व्वन्? अप्रच्छिन्दन् केशच्छेदनमकुर्व्वन्। क्षुरस्तथा प्रसारयितव्यो यथा केशा न छिद्यन्ते,—इत्यर्थः। किं तूष्णीमेव प्रोहति? न। कथन्तर्हि? येन पूषा इति यजुषा सकृदेकवारं प्रोहति, तूष्णीं वारद्वयम् ॥ ० ॥ १६ ॥ ० ॥

अथायसेन प्रच्छिद्यानडुहे गोमये निदधाति ॥ १७ ॥

अथेति पूर्व्वप्रकृतार्थम्। यः पूर्व्वप्रकृतः क्षुरपाणिर्नापितः, तदीयेन आयसेन लौहमयेन क्षुरेण, प्रच्छिद्य प्रकर्षेण पिञ्जूलीभिः सहैव दक्षिणां कपुष्णिकां छित्वा, आनडुहे गोमये पूर्वमग्नेरुत्तरतः समासादिते, निदधाति स्थापयति। मन्त्रानुपदेशादृव्याहृतिभिरित्यर्थः ॥ ० ॥ १७ ॥ ० ॥

एतयैवावृता कपुच्छलम् ॥ १८ ॥

एतया अनन्तरोक्तयैवावृता परिपाट्या कपुच्छलं संस्कुर्य्यादिति वाक्यशेषः। के शिरसि पश्चाद्भागे पुच्छवत् लम्बते यः केशपाशः, स कपुच्छलः—इत्याख्यायते ॥ ० ॥ १८ ॥ ० ॥

एतयोत्तरां कपुष्णिकाम् ॥ १९ ॥

उत्तरशब्दो वामवचनः। वामामपि कपुष्णिकामेतयैवावृता संस्कुर्य्यात् ॥ ० ॥ १९ ॥ ० ॥

किमेतया समस्तयैवावृता,—अथ जपत्यायमगादित्येवमादिकया संस्कुर्य्यात्? न। कतमया तर्हि? उच्यते।

उन्दनप्रभृति त्वेवाभिनिवर्त्तयेत् ॥ २० ॥

प्राक्तनं सूत्रद्वयमनेन विशिष्यते। उन्दनप्रभृति क्लेदनप्रभृत्येव आवृतम्, अभि सर्व्वतोभावेन निवर्त्तयेत् आवर्त्तयेत्, न पुनः सर्व्वाऽप्यावृदावर्त्तनीया। तस्मात् 'दक्षिणेन पाणिनाऽप आदाय'—इत्येवमादिकामावृतमावर्त्तयेत्, न ततः पूर्व्वामपीत्यर्थः। तुशब्दो-विशेषणार्थः। कथन्नाम? कपुच्छले संस्क्रियमाणे कुमारमुदङ्मुखं धारयेत्; यथा प्राङ्मं प्रोक्षणादि कर्त्तुं शक्यते। 'उन्दनप्रभृति द्वेधा अभिनिर्व्वर्त्तयेत्'—इति केचित् पठन्ति। तच्च व्यक्त एवार्थः ॥ ० ॥ २० ॥ ० ॥

उभाभ्यां पाणिभ्यां मूर्द्धानं परिगृह्य जपेत् त्र्यायुषं जमदग्नेरिति ॥ २१ ॥

मूर्द्धानं कुमारस्य। स्पष्टमन्यत् ॥ ० ॥ २१ ॥ ० ॥

एतयैवावृता स्त्रियाः ॥ २२ ॥

एतया प्रकृतया आवृता स्त्रियाः सर्व्वं अधस्तनोक्ताः संस्कारा-

भवन्ति। न पुनरानन्तर्य्याच्चूडाकरणाभिप्रायमेव वचनं वर्णनीयम्। कुतः? एवकारेण व्याप्त्यवगमात्।

"अमन्त्रिका तु कार्य्येयं स्त्रीणामावृदशेषतः"।

इत्यादिवचनाच्च ॥ ० ॥ २२ ॥ ० ॥

किमेवम्भूतयैवावृता? न। कथन्तर्हि?

तूष्णीम् ॥ २३ ॥

मन्त्रवर्ज्जमित्यर्थः ॥ ० ॥ २३ ॥ ० ॥

किं सर्वमेव कर्म तूष्णीं भवति? न। कथन्तर्हि? उच्यते।

मन्त्रेण तु होमः ॥ २४ ॥

यो यो होमः पूर्वमभिहितः, स मन्त्रेणैव भवति। तुशब्दश्च-शब्दार्थः समुच्चये। तेनान्वाहार्य्यश्राद्धमपि मन्त्रवदेव स्यात्। तदन्यत्तूष्णीं कर्त्तव्यमित्यर्थः ॥ ० ॥ २४ ॥ ० ॥

उदगग्नेरुत्सृप्य कुशलीकारयन्ति यथागोत्रकुल-कल्पम् ॥ २५ ॥

अग्नेरुत्तरत उत्सृप्य गत्वा कुमारं कुशलीकारयन्ति नापितेन मुण्डयन्ति। कर्त्तुरनियमः। कथम्? यथागोत्रकुलकल्पम्। कल्पो विधिरित्यनर्थान्तरम्। यथा गोत्रविधिर्यथा च कुलविधि-स्तदनतिक्रमेणेत्यर्थः। गोत्रकल्पस्तावत्,—

"वाशिष्ठाः पञ्चचूड़ाः स्युस्त्रिचूड़ाः कुण्डपायिनः"।

इत्याद्युक्तः। तथा गृह्यासंग्रहः।

"दक्षिणाकपर्द्दाः शिष्टा आत्रेयास्त्रिकपर्द्दिनः।
आङ्गिरसः पञ्चचूड़ा मुण्डाभृगोः शिखिनोऽन्ये"।

इति। कुलकल्पोऽपि, यथा। भद्रादित्यानामायतनसन्निधाविति। कौथुमराणायनीयादीनां प्राक् समावर्त्तनात् सशिखमेव वपनम्। कुतः? "केशश्मश्रुरोमनखानि वापयीत शिखावर्ज्जम्"—इति तत्र विशेषोपदेशादर्व्वाक् सशिखवपनावगतेः। उक्तञ्च कर्म्मप्रदीपकृता।

"सशिखं वपनं कार्य्यमास्नानाद्ब्रह्मचारिणाम्।
आ शरीरविमोक्षाय ब्रह्मचर्य्यं न चेद्भवेत्"।

इति ॥ ० ॥ २५ ॥ ० ॥

आनडुहे गोमये केशान् कृत्वाऽरण्यꣳहृत्वा निखनन्ति॥ २६ ॥

पूर्व्वमासादिते आनडुहे गोमये समस्तान् केशान् निधाय, अरण्यं हृत्वा नीत्वा, निखनन्ति अरण्यएव। बहुवचनादनियतः कर्त्ता। 'अरण्यं गत्वा'—इति, 'अरण्ये गत्वा'—इति च पाठान्तरम्। तत्र व्यक्त एवार्थः ॥ ० ॥ २६ ॥ ० ॥

स्तम्बे हैके निदधति॥ २७ ॥

ह—इत्यैतिह्यार्थको निपातः। एके किलाचार्य्याः मौञ्जियवादिस्तम्बे तान् केशान् निदधति ॥ ० ॥ २७ ॥ ० ॥

यथार्थम् ॥ २८ ॥

तन्त्रसमापनं कर्त्तव्यमित्यर्थः । एवमेके । अपरे तु मन्यन्ते,—"यथार्थमिति यस्य येनार्थः प्रयोजनं स तं कुर्य्यात्—इति । कथन्नाम ? आयुषमित्यादिना मूर्द्धपरिग्रहे कृते उत्तरतोऽग्नेः कुशलीकारयन्ति, अमावपि कर्म्मशेषं समापयेत्"—इति ॥ ० ॥ २८ ॥ ० ॥

गौर्दक्षिणा ॥ २९ ॥

चूड़ाकरणकर्म्मणः ॥ ० ॥ २९ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज-श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये द्वितीय-प्रपाठकस्य नवमी खण्डिका ॥ ० ॥

द्वितीयप्रपाठके दशमी खण्डिका।

अत ऊर्द्धमुपनयनलिङ्गाः मन्त्राः, तेषां विनियोगं विवक्षुरिदमाह,—

गर्भाष्टमेषु ब्राह्मणमुपनयेत् ॥ १ ॥

गर्भाष्टमेषु, गर्भत आरभ्य गणनया ये अष्टमावर्षास्तेषु। बहुवचनं व्यक्त्यभिप्रायम्। तेषु वर्षेषु वर्त्तमानेषु यदोदगयनादीनां समुच्चयस्तदैव ब्राह्मणमुपनयेत् उपनयनकर्म्मणा योजयेत्। उपनयनं नाम, वेदाध्ययनार्थम् उप समीपे (गुरोः) नीयते येन कर्म्मणा तदुच्यते। तथाचाहुः।

"गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः।
बालो वेदाय तद्योगाद् बालस्योपनयं विदुः"।

इति। अपि चाहुः।

"गुरोर्व्रताय वेदस्य यमस्य नियमस्य च।
देवतानां समीपं वा येनासौ नीयते द्विजः"॥

इति ॥ ० ॥ १ ॥ ० ॥

गर्भैकादशेषु क्षत्रियम् ॥ २ ॥

उपनयेदिति वर्त्तते ॥ ० ॥ २ ॥ ० ॥

गर्भद्वादशेषु वैश्यम् ॥ ३ ॥

उपनयेत् ॥ ० ॥ ३ ॥ ० ॥

यदि दैवान्मानुषाद्वा कारणादुक्तकालातिपातः स्यात्, तदा कथम्? उच्यते।

आषोड़शाद्वर्षाद्ब्राह्मणस्यानतीतः कालोभवत्याद्वाविंशात् क्षत्रियस्याचतुर्व्विंशाद्वैश्यस्य ॥ ४ ॥

ऋजुरक्षरार्थः। अत्र किञ्चिद्वक्तव्यमस्ति। आङ्शब्दोऽत्राभिविधौ न मर्य्यादायाम्। कुतः? अभिविध्यर्थसम्भवे मर्य्यादाऽर्थस्यान्याय्यत्वात्। भट्टभाष्येऽप्युक्तम्। आङ् अभिविधौ। असम्भवे हि मर्य्यादायां कल्प्यते। यथा आ पर्व्वतात् क्षेत्राणि—इति। तथाच स्मृत्यन्तरम्।

"औपनायनिकः कालः परः षोड़शवार्षिकः।
द्वाविंशतिः परोऽन्यस्य स्याच्चतुर्विंशतिः परः"।

इति।

"विप्रस्य षोड़शाद्वर्षात् राज्ञो द्वाविंशतेः परम्।
वैश्यस्याष्टविकादब्दात् सावित्रीपतनं भवेत्"।

इति।

"षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता।
सावित्री नातिवर्त्तेत अत ऊर्द्धं निवर्त्तते"।

इति चैवमादि। यच्च यमवचनम्—

"पतिता यस्य सावित्री दशवर्षाणि पञ्च च।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः।
प्रायश्चित्तं भवेदेषां प्रोवाच वदतांवरः।

विवस्वतः सुतः श्रीमान् यमो धर्म्मार्थतत्त्ववित् ।
सशिखं वपनं कृत्वा व्रतं कुर्य्यात् समाहितः ।
हविष्यं भक्षयेदन्नं ब्राह्मणान् पञ्च सप्त वा ।
एकविंशतिरात्रन्तु पिबेत् प्रसृतियावकम् ।
अतो यावकशुद्धस्य तस्योपनयनं स्मृतम्" ।

इति । तत् पतितसावित्रीकत्वाभावेऽपि पञ्चदशवर्षोपरि प्रायश्चित्तविशेषोपदेशार्थम् । न पुनः पञ्चदशवर्षोपरि पतितसावित्रीकत्वमस्यार्थः । तथाविधवचनव्यक्तेरभावात् । लघुनः प्रायश्चित्तस्योपदेशाच्च । पतितसावित्रीकाणां हि व्रात्यस्तोमः क्रतुः प्रायश्चित्तम् । राजन्यवैश्ययोश्चाविशेषात् । तथा राजन्यवैश्ययोः,—इति ब्राह्मणवत् क्षत्त्रियवैश्ययोरपि पञ्चदशवर्षोपरि तत् प्रायश्चित्तमविशेषेणोपदिश्यते । तयोश्च पतितसावित्रीकत्वाभावेऽपि वचनबलात् तत्प्रायश्चित्तमित्यकामेनापि वाच्यम् । तत्सामान्यात् ब्राह्मणस्यापि तथैव वर्णयितुं युक्तम् । तस्मात् 'पतिता यस्य सावित्री'—इत्यस्य यस्य सावित्रीग्रहणं न सम्पन्नमित्ययमर्थः ।

न हि दश पञ्च च वर्षाणि सावित्री पततीति शक्यते वक्तुम् । भवतामपि तदूर्द्ध्वमेव पतनस्यानुमतत्वात् । विज्ञानेश्वरेणापि,—यस्योपनयने आपद्भावेन तत्कालातिक्रमस्तस्य यमोक्तप्रायश्चित्तमभिधाय,—अनापद्यतिक्रमे तु मानवं त्रैमासिकम्, तत्रैव पञ्चदशवर्षादूर्द्ध्वमपि कियत्कालातिक्रमे उद्दालकव्रतं व्रात्यस्तोमोवा,—इति वदता एतदेवमतमङ्गीकृतमित्यवगम्यते ।

तस्मात्, अस्माद्यमवचनादाषोडशमर्य्यादार्थतां ब्रुवन् शूलहस्तः

परास्तः। व्रात्यस्तोमे सपादनवधेनूनाम्, अत्र तु सपादधेनुत्रयाणां स्वयमेव सङ्कलितत्वेन वैषम्यापत्तेः। याज्ञवल्क्यटीकायां स्वयमेवाभिविध्यर्थतायावर्णनाच्च। पतितसावित्रीकपरतया वर्णने च क्षत्रियवैश्ययोरपि तावतैव पतितसावित्रीकताऽऽपत्तेः। न चैवमिष्यते।

रघुनन्दनस्तु,—यमवचनस्य प्रथमश्लोकार्द्धत्रयमात्रमुपन्यस्यन् परप्रतीकस्यापकुर्वाणः 'एभिः षोड़शवर्षोपरि यमेन पञ्चदशवर्षोपरि यत् पतनमभिहितं, तद्गर्भजन्मप्रभृतिगणनयाऽविरुद्धम्'—इत्याह। तदप्यनादरणीयम्। पूर्वोक्तयुक्त्या यमेन पञ्चदशवर्षोपरि पतनस्यानभिहितत्वात्। गर्भप्रभृतिगणनयाऽपि षोड़शवर्षान्तिमसासत्रयस्याऽसंग्रहाच्च। किञ्च। पतितसावित्रीकत्वाभावेऽपि "द्वादशषोड़शविंशतीश्चेदतीता अवरुद्धकाला भवन्ति"—इति पैठिनसिवचनात् द्वादशवर्षाद्युपरि प्रत्यवायाख्यत्वज्ञापनं स्वयमेव वर्णितम्। तत् किमत्रापि तथैव न वर्णितमिति स एव जानाति! तस्मात्, तन्मतेऽपि द्वादशवर्षोपरि ब्राह्मणस्य महाव्याहृतिहोमः प्रायश्चित्तम्, पञ्चदशवर्षोपरि यमोक्तमेकविंशतिरात्रव्रतम्, व्रात्यप्रायश्चित्तं पुनरतोऽप्यूर्द्धं भवितुं युक्तम्। ब्राह्मणस्य द्वादशवर्षोपरि महाव्याहृतिहोमः प्रायश्चित्तमपि स्वयमेवोक्तम्। ब्राह्मणस्य विशेषेण प्रायश्चित्तम्—इति वदन् यमोऽपि पुरस्तात् सामान्यप्रायश्चित्तमस्य बोधयति।

वयन्तु पश्यामः। ब्राह्मणस्य द्वादशवर्षोपरि महाव्याहृतिहोमप्रायश्चित्ताभिधानमप्यनुचितमेव। अष्टवर्षोपरि खल्वेतत् स्यात्।

कस्मात् कारणात्? तस्य मुख्यकालत्वात्। कुतस्तस्य मुख्यकालत्वम्? प्रथमोपदिष्टत्वात्। 'समर्थस्य चेपायोगः'—इति न्यायात्। "अष्टवर्षं ब्राह्मणमुपनयीत"—इति च श्रुतेः। तस्माद् ब्राह्मणस्याष्टवर्षोपरि, क्षत्रियस्यैकादशवर्षोपरि, वैश्यस्य द्वादशवर्षोपरि महाव्याहृतिहोमः प्रायश्चित्तम्। तथाच स्मरणम्।

"गौणेषु तेषु कालेषु कर्म्म चोदितमारभेत्।
प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत्"।

इति। यत्तु,—

"संस्कारा अतिपद्येरन् स्वकालाच्चेत् कथञ्चन।
हुत्वैतदेव कुर्व्वीत ये तूपनयनादधः"।

इति कर्म्मप्रदीपे, उपनयनादधः,—इति करणादुपनयनकालातिपाते न महाव्याहृतिहोमः प्रायश्चित्तमिति प्रतीयते। तद् गौणकालस्याप्यतिपाते बोद्धव्यम्। कुतः? अविरोधात्। उपनयनकालातिपाते च तदभावावगतेः। षोड़शवर्षादिपर्य्यन्तं खल्वनतीतकालता उपनयनस्याचार्य्येणोच्यते। एतदेवेत्येवकारकरणाच्चोपनयनात् पूर्व्वं महाव्याहृतिहोम एव प्रायश्चित्तम्, उपनयने तु न तावन्मात्रम्, अपितु व्रात्यस्तमोऽपीति वा वर्णनीयम्। एतच्च भवतोऽप्यनुमतम्।

पैठिनसिवचनेन तु ब्राह्मणस्य द्वादशवर्षोपरि प्रायश्चित्तान्तरम्। यमवचनात् तु सर्व्वेषामेव पञ्चदशवर्षोपर्य्येकविंशतिरात्रव्रतम्। क्षत्रियवैश्ययोः पुनः षोड़शविंशतिवर्षादूर्द्ध्वं प्रायश्चित्तान्तरं पैठिनसिवचनादन्वेयम्। सर्व्वेषान्तूत्तरावधेरूर्द्ध्वं व्रात्यस्तोमः,—इति

बोद्धव्यम् । अस्मिंस्तु पक्षे, षष्ठदशवर्षोपरि यथा ब्राह्मणस्य विशेषेण प्रायश्चित्तं भवेत्, तथा राजन्यवैश्ययोरपि विशेषेण प्रायश्चित्तं भवेदिति यमवचनस्यार्थः । तदनेन सर्व्वेषामेव सामान्यप्रायश्चित्तं पुरस्तादस्ति,—इति दर्शयति ।

वस्तुतस्तु पैठिनसिवचनं शाखान्तरविषयमेव नास्मच्छाखाविषयम् । विभिन्नशाखिनः खल्वाचार्य्या भिन्नानि वचनानि रचयाम्बभूवुः । तन्नास्ति सर्व्वेषामेकविषयत्वम् । अतएव, अवरुद्धकाला भवन्ति,—इत्युक्तम् । भिन्नौ खल्विमावर्थौ,—यस्य कालावरोधो-यच्चास्यप्रायश्चित्तम्—इति । एवमन्यान्यपि वचनानि व्याख्येयानि । केचित् पुनर्निबन्धारः एतदननुसन्धानाद्वा लोकप्रज्ञासंग्रहाद्वा पाण्डित्यातिशयख्यापनाद्वा विभिन्नशाखाविषयाणामपि वचनानां सामञ्जस्याय बह्वायासमकुर्व्वन्त । तदस्माभिरपि कथञ्चित् सामञ्जस्यकरणाय कृतः प्रयत्नः । अन्यथा खल्वर्व्वाचीनाः प्राचीननिबन्धेषु बद्धमानात् पक्षपातात्तास्मत्कृते व्याख्याने न श्रद्दध्युरुपालम्भञ्च कुर्य्युरिति । परमार्थतस्तु विभिन्नविषयाणां वचनानां नास्त्येकविषयत्वम् । अशक्यमस्मादृश्च सर्व्वेषां सामञ्जस्यमिति शक्नुमो वयं प्रदर्शयितुम् । परन्तु ग्रन्थगौरवभयादत्र मूकीभवामः । धीमद्भिरेव तदूहनीयमित्यस्तु किं विस्तरेण ? ॥ ० ॥ ४ ॥ ० ॥

अत ऊर्द्धं पतितसाविचीका भवन्ति ॥ ५ ॥

अतोऽस्मात् कालादूर्द्धं त्रयोऽप्येते पतितसाविचीका भवन्ति । स्वकाले साविच्याम्—गायत्र्यामनुच्यमानायां ये पतन्ति प्रायश्चित्त-

विशेषभागिनो भवन्ति, त इमे पतितसावित्रीका व्रात्याश्च भण्यन्ते ॥ ० ॥ ५ ॥ ० ॥

नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्नैभिर्व्विवहेयुः ॥ ६ ॥

एनः प्रकृत्यन्तरमेतदर्थः। नैतान् इति केचित् पठन्ति। एतान् पतितसावित्रीकान् त्रयाणां प्रकृतत्वाद्बहुवचनम्। नोपनयेयुर्व्रात्यस्तोमात् क्रतोर्व्विना। तथाच स्मृत्यन्तरम्।

"अत ऊर्द्धं त्रयोऽप्येते यथाकालमसंस्कृताः।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः" ॥

इति। उपनयेयुरिति बहुवचनं तत्कर्तृसंसर्गिणामपि प्रायश्चित्तप्रज्ञापनार्थम्। तथाच स्मरणम्।

"व्रात्याचार्य्यस्य भुक्त्वाऽन्नं कृच्छ्रपादेन शुध्यति।
यश्चोपनयते व्रात्यान् त्रिभिः कृच्छ्रैः स शुध्यति"।

इति। एवमुत्तरत्रापि बोद्धव्यम्। नैनानध्यापयेयुः। नैनान् याजयेयुः। अविशेषात् पाकयज्ञैरपि। न एभिः सह विवहेयुः—विवाहं कुर्य्युः। विवाहयेयुरिति पाठे, एभिः सह विवाहं न कारयेयुरिति व्याख्येयम्। उपनयनप्रतिषेधादेव सर्व्वत्र प्रतिषेधे सिद्धे यदि केनचिल्लोभादज्ञानाद्वा उपनीताः स्युः, तथापि नैवोत्तराणि कर्म्माणि पतितसावित्रीकाणां कुर्य्यात्—इति सर्व्वेषां पाठः क्रियते ॥ ० ॥ ६ ॥ ० ॥

यदहरुपैष्यन्माणवको भवति प्रग एवैनं तदहर्भोजयन्ति कुशलीकारयन्त्याप्लावयन्त्यलङ्कुर्व्वन्त्यहतेन वाससाऽऽच्छादयन्ति ॥ ७ ॥

यदहर्यस्मिन्नहनि। माणवकः—इत्यनधीतवेदो भण्यते। तथा चोक्तम्। "अनूचो माणवको ज्ञेयः"—इति। यदहर्माणवकमुपैष्यन् उपनयनं कारयिष्यन् भवति,—यस्मिन्नहन्युपनयनमस्य करिष्यते—इत्यर्थः। तदहस्तस्मिन्नहनि, प्रगे एव प्रातरेव, एनं माणवकं भोजयन्ति। एवकारकरणात् प्रग एवैनं भोजयन्ति, न तु भोजनात् परं कथं कर्म्म,—इत्याशङ्कनीयमित्युपदिशति। किं भोजयन्ति? चौरादिकम्। कस्मात्? "पयोयवाम्नामिक्षाहाराः क्रमशो द्विजातीनाम्"—इति तन्त्रान्तरदर्शनात्,—इति तत्त्वक्ततः।

कुशलीकारयन्ति मुण्डयन्ति। आप्लावयन्ति स्नपयन्ति। अलङ्कुर्व्वन्ति केयूरकुण्डलादिभिः। अहतेनाक्षुण्णेनाम्लदितेन वाससा-वक्ष्यमाणेन वसनेन आच्छादयन्ति। वाससा,—इत्येकवचननिर्द्देशात् अधरीयवसनमेवैतत्। उत्तरीयन्तु,—उपरिष्टात् यदजिनं सूचयिष्यति, तदेव स्यात्। सर्व्वंच बहुवचनात् कर्त्तुरनियमः। असमासकरणादुपन्यासमात्रमेवैतत्, न पुनरेष एव क्रमः। ज्योतिःशास्त्रविरोधात्। तत्र हि भुक्तस्य चौरप्रतिषेधोऽनुशिष्यते। यथा।

"न स्नातमात्रगमनोन्मुखभूषितानां
नाभ्यक्तभुक्तरणकालनिरासनानाम्।
सन्ध्यानिशाकुजदिने च तिथौ च रिक्ते
चौरं हितं न नवमेऽह्नि न चापि विद्याम्"॥

इति। तस्मादादौ कुशलीकारयन्ति, तत आप्लावयन्ति, ततो-भोजयन्ति। एवमन्ये। वयन्तु पश्यामः। असमासकरणमेकैकक्रियापरिसमापनानन्तरमपरापरा क्रिया यथा स्यादित्येवमर्थम्। तेन पाठक्रमादेवामूषां क्रियाणां क्रमः प्रत्येतव्यः। ज्योतिःशास्त्रनिषेधस्तु नात्र निविशते। कुतः? आचार्य्यसूत्रावगतक्रमविरोधात्। सामान्यशास्त्रस्य विशेषेतरपरताया न्याय्यत्वाच्च। अतएव समावर्त्तनेऽप्यमुमेव क्रममसूषां क्रियाणां सूचयिष्यति।

'यज्ञोपवीतमपि इदानीमेव देयम्। कुतः? यज्ञोपवीतिनाऽऽचान्तेनैव कृत्यम्—इति वचनात्'—इति केचित्। तदसङ्गतम्। प्रमाणाभावात्। यज्ञोपवीतिना कृत्यम्—इति वचनस्य पुरुषार्थस्यैव सतो यज्ञोपवीतस्य कर्म्मार्थतामात्रमुपदिशति न तु तदपि विदधाति,—इति खल्ववोचाम। किन्तु द्विराचमनमिदानीं कर्त्तव्यम्। "सुप्त्वा भुक्त्वा चुत्वा स्नात्वा विपरिधाय च"—इति वचनात्। यज्ञोपवीतधारणक्रमं परतोवक्ष्यामः ॥ ० ॥ ७ ॥ ० ॥

वाससाऽऽच्छादयन्ति,—इत्युक्तम्। इदानीं ब्राह्मणादीनां वासांसि विशेषतो विधातुमाह,—

क्षौमशाणकार्पासौर्णान्येषां वसनानि ॥ ८ ॥

क्षुमा अतसी, तस्या इदं क्षौमं तसरादि। शणस्येदं शाणम्। कार्पासस्येदं कार्पासम्। ऊर्णा मेषादिलोम, तस्या इदमौर्णम्। पश्चात् द्वन्द्वसमासः। एषां ब्राह्मणादीनामेतानि वसनानि भवन्ति। ब्रह्मचारिणां चिलेऽपि वसनानां चतुष्टयमुपरिष्टादुपपादयिष्यति। तदिदमधरीयवसनविषयं सूत्रम् ॥ ० ॥ ८ ॥ ० ॥

ऐणेयरौरवाजान्यजिनानि ॥ ९ ॥

एणः कृष्णमृगः कृष्णसारश्च भण्यते। रुरुर्गौरमृगः। तथा चोक्तम्।

"अनूचो माणवको ज्ञेयः एणः कृष्णमृगः स्मृतः।
रुरुर्गौरमृगः प्रोक्तस्ताम्बलः शण उच्यते"।

इति। अजश्छागः। एण्या इदमैणेयम्, "एण्याढञ्"—इति पाणिनिस्मरणात्। एणस्येदमित्यर्थे तु ऐणमिति स्यात्। भट्टनारायणस्तु, एणस्येदमित्येवाह। रुरोरिदं रौरवम्, अजस्येदमाजम्। एतान्यजिनानि चर्म्माणि यथाक्रमं ब्राह्मणादीनां भवन्ति। तदिदमुत्तरीयाभिप्रायं सूत्रम्। कुतः? "चर्म्माण्युत्तरीयाणि"—इति ग्रन्थान्तरसूचणात् ॥ ० ॥ ९ ॥ ० ॥

मुञ्जकाशताम्बल्यो रशनाः ॥ १० ॥

मुञ्जकाशौ प्रसिद्धौ। ताम्बलः शणः। कुतः? 'ताम्बलः शण उच्यते'—इति वचनात्। केचित्तु,—'मुञ्जकाशतासून्यो रशनाः'—इति सूत्रपाठं मन्यन्ते। ताम्बलः शण उच्यते—इत्यत्रापि, तासूनः शण उच्यते,—इति पठन्ति। उभयथाऽप्यर्थो न भिद्यते। तदेतन्मय्यो रशनाः मेखलाः यथाक्रमं ब्राह्मणादीनां भवन्ति। तथा मनुः।

"मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्य्या विप्रस्य मेखला।
क्षत्रियस्य च मौर्व्वी ज्या वैश्यस्य शणतान्तवी।
मुञ्जालाभे तु कर्त्तव्या कुशाश्मान्तकवल्वजैः।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा"।

इति ॥ ० ॥ १० ॥ ० ॥

पार्णवैल्वाश्वत्थादण्डाः ॥ ११ ॥

पर्णः पलाशः। विल्वाश्वत्थौ प्रसिद्धौ। ब्राह्मणादीनां यथाक्रमं पार्णादयोदण्डा भवन्ति। दण्डोदधातेर्धारयतिकर्म्मणः। अत्रापि स्मृत्यन्तरोक्तो विशेषो द्रष्टव्यः। यथा मनुः।

"केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः।
ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः।
ऋजवस्ते तु सर्व्वे स्युरव्रणाः सौम्यदर्शनाः।
अनुद्वेगकरा नृणां सत्वचो नाग्निदूषिताः"।

इति ॥ ० ॥ ११ ॥ ० ॥

इदानीमुक्तानां वसनानां विषयव्यवस्थामुपदिशति,—

क्षौमꣳशाणं वा वसनं ब्राह्मणस्य कार्पासं क्षत्रियस्याविकं वैश्यस्य ॥ १२ ॥

स्पष्टार्थं सूत्रम् ॥ ० ॥ १२ ॥ ० ॥

एतेनैवेतराणि द्रव्याणि व्याख्यातानि ॥ १३ ॥

एतेनैवानुसारेण इतराण्यपि द्रव्यानि,—अजिन-रशना-दण्ड-रूपाणि, ब्राह्मणादीनां यथाक्रमं व्याख्यातान्युक्तानि। तथाच, ऐणेयमजिनं मौञ्जी रशना पार्णोदण्डश्च ब्राह्मणस्य, रौरवमजिनं काशी रशना वैल्वोदण्डश्च क्षत्रियस्य, आजमजिनं ताम्बली रशना आश्वत्थोदण्डश्च वैश्यस्य ॥ ० ॥ १३ ॥ ० ॥

अलाभे वा सर्वाणि सर्वेषाम् ॥ १४ ॥

स्वस्वजात्युक्तवसनादीनामलाभे सर्वाणि वसनादीनि सर्व्वेषां भवन्ति यथालाभम् ॥ ० ॥ १४ ॥ ० ॥

पुरस्ताच्छालाया उपलिप्तेऽग्निरुपसमाहितो भवति ॥ १५ ॥

व्यक्तभाष्यं सूत्रम् ॥ ० ॥ १५ ॥ ० ॥

अग्ने व्रतपत इति हुत्वा पश्चादग्नेरुदगग्रेषु दर्भेषु प्राङाचार्य्योऽवतिष्ठते ॥ १६ ॥

'यथा पाणिग्रहणे तथा चूड़ाकर्म्मण्युपनयने'—इत्यतिदेशादुपनयनकर्म्मणः पुरस्ताच्चोपरिष्टाच्च महाव्याहृतिभिस्तस्य आहुतयो भवन्ति। तदाहुतिचतुष्टयं हुत्वा, अग्ने व्रतपते—इत्यादिपञ्चभिर्मन्त्रैः (अनादेशादाज्येन) पञ्चाहुतीश्च हुत्वा आचार्य्यः पश्चादग्नेरुदगग्रेषु दर्भेषु प्राङ्मुख ऊर्द्धस्तिष्ठति। हुत्वा आचार्य्योऽवतिष्ठते—इति श्रवणात् कर्त्तन्तरानुपदेशाच्च आचार्य्य एव जुहोति। मन्त्रन्तु माणवक एव जपति। कस्मात्? व्रतं चरिष्यामि—इत्यादिमन्त्रलिङ्गात्।

तस्मात्,—'करणत्वादाचार्य्य एव मन्त्रं जपति'—इति ब्रुवतो भरताऽनादेयवचनैव। व्रतान्ते व्रतमचार्षमित्यादेर्ब्रह्मचारिपाठस्य स्वयमेव वर्णनादत्रापि तथैव वर्णयितुमुचितत्वाच्च। 'व्रतं चरिष्यामि'—इति मन्त्रलिङ्गे तु ऋत्विक्स्थानीयत्वादाचार्य्यस्य याज्यस्थानीयत्वाच्च माणवकस्य मन्त्रैरग्न्यादिप्रार्थना ब्रह्मचारिणो नाचार्य्यस्य। तथाच, 'यां वै काञ्चन यज्ञऋत्विज आशिषमाशासते सा यजमानस्यैव'—इत्यप्यस्थान एव तस्याः संरम्भः। आचार्य्यमाणवकयोः ऋत्विग्यजमानस्थानीयत्वे आचार्य्यस्य मन्त्रपाठे च प्रमाणस्यैवाभावात्। अधिकञ्च पूर्वमेवोक्तमिति नेह पुनरुच्यते।

अपच, व्रतं चरिष्यामि—इति मन्त्रस्य साकाङ्क्षत्वान्निरा-काङ्क्षीकरणाय व्रतनामकालपरिणामयोरादेशः कर्त्तव्यः ;—एतद्व्रत-मियत्कालिकम्—इति। कुतः ?

"ब्रह्मचारी व्रतादेशे व्रतनाम प्रवाचयेत्।
चरिष्ये यावदन्ताय साविचे चान्तकीर्त्तनम्"।

इति गृह्यासंग्रहवचनात् ॥ ० ॥ १६ ॥ ० ॥

अन्तरेणाग्न्याचार्य्यौ माणवकोऽञ्जलिकृतोऽभिमुख-आचार्य्यमुदगग्रेषु दर्भेषु ॥ १७ ॥

अन्तरेणशब्दो मध्यवचनः। तद्योगाच्च 'अग्न्याचार्य्यौ'—इति षष्ठ्यर्थे द्वितीया। अग्न्याचार्य्ययोर्मध्यदेशे 'माणवकः' अञ्जलिकृतः कृताञ्जलिः, अञ्जलिश्चात्र प्रसारितो न मुकुलितः। कथं ज्ञायते ? उपरिष्टात् तस्यापां पूरणोपदेशात्। अभिमुख आचार्य्यम्, आचा-र्य्याभिमुखः—प्रत्यङ्मुखः—इत्येतत्। उदगग्रेषु दर्भेषु 'अवतिष्ठते'—इत्यनुवर्त्तनीयम् ॥ ० ॥ १७ ॥ ० ॥

तस्य दक्षिणतोऽवस्थाय मन्त्रवान् ब्राह्मणोऽपाम-ञ्जलिं पूरयति ॥ १८ ॥

तस्य अनन्तरोक्तस्य माणवकस्य, दक्षिणतो दक्षिणस्यां दिशि न दक्षिणपार्श्वे। कस्मात् ? माङ्गलिकत्वात्। प्रत्यङ्मुखस्य माणव-कस्य दक्षिणपार्श्वे खल्ववस्थाने दक्षिणामुखत्वमवस्थातुः स्यात्। तच्चामङ्गलम्। तस्मात्, प्राची सौम्याऽपराजिता—इति परिशिष्टा-नुग्रहाच्च, यथोदङ्मुखत्वं भवति तथाऽवस्थातव्यम्। अवस्थाय ऊर्द्धः

स्थिला। कः? मन्त्रवान् अधीतवेदो ब्राह्मणः। किं करोति? अपामद्भिरञ्जलिं माणवकस्य पूरयति। मन्त्रानुपदेशाद् व्याहृतिभिः ॥ ० ॥ १८ ॥ ० ॥

उपरिष्टाच्चाचार्य्यस्य ॥ १९ ॥

उपरिष्टात् माणवकाञ्जलिपूरणात् परस्तात्, आचार्य्यस्याञ्जलिमद्भिः पूरयति। स एव ब्राह्मणः ॥ ० ॥ १९ ॥ ० ॥

प्रेक्षमाणोजपत्यागन्त्रा समगन्महीति ॥ २० ॥

माणवकं प्रेक्षमाणः आगन्त्रा—इति अवमानं मन्त्रं जपति। कोजपति? आचार्य्यः। कस्मात्? स्वस्ति चरतादयम्—इति मन्त्रलिङ्गात्। परस्मात् सिंहावलोकितन्यायेनानुषङ्गाच्च ॥ ० ॥ २० ॥ ० ॥

जपित्वा चाचार्य्यः,—

ब्रह्मचर्य्यमागामिति वाचयति ॥ २१ ॥

ब्रह्मचर्य्यमिति मन्त्रं माणवकं पाठयति ॥ ० ॥ २१ ॥

कोनामासीति नामधेयं पृच्छति तस्याचार्य्यः ॥ २२ ॥

कोनामासि,—इति तस्य माणवकस्य नामधेयमाचार्य्यः पृच्छति ॥ ० ॥ २२ ॥ ० ॥

किं कृत्वा?—

अभिवादनीयं नामधेयं कल्पयित्वा ॥ २३ ॥

अभिवादनं पादग्रहणमित्यनर्थान्तरम्। तत्र हितमभिवाद-

नीयं नामधेयं तदानीमेवाचार्य्यः कल्पयित्वा। अभिवादनीयमिति करणात् सर्वचैवाभिवादनकाले इदमेव नामोच्चारणीयमिति-गम्यते ॥ ० ॥ २३ ॥ ० ॥

अभिवादनीयं नाम विशिनष्टि,—

देवताश्रयं वा नक्षत्राश्रयं वा ॥ २४ ॥

देवताश्रयं हरिप्रभृतिकं वा, नक्षत्राश्रयं शतपदचक्रोक्तजन्म-कालीननक्षत्रपादानुसारि वा ॥ ० ॥ २४ ॥ ० ॥

गोत्राश्रयमप्येके ॥ २५ ॥

गोत्राश्रयं शाण्डिल्यः—इत्यादिरूपमपि नामैके आचार्य्याम-न्यन्ते। 'गोत्राश्रयमित्येके'—इति पाठेऽपि व्यक्त एवार्थः। एवञ्च, इदानीमेवाभिवादनीयनामकल्पनानन्तरं नाम-पृच्छासूचणान्माणव-कोऽप्येतदेव नाम कथयेदित्यर्थादवगम्यते ॥ ० ॥ २५ ॥ ० ॥

माणवकेन असुकनामाऽस्मीति नाम्नि कथिते,—

उत्सृज्यापामञ्जलिमाचार्य्यो दक्षिणेन पाणिना दक्षिणं पाणिꣳसाङ्गुष्ठं गृह्णाति,—देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याꣳहस्तं गृह्णाम्य-सावितिं ॥ २६ ॥

अपामञ्जलिमुत्सृज्य त्यक्त्वा आचार्य्यः स्वेन दक्षिणेन पाणिना माणवकस्य दक्षिणं पाणिं साङ्गुष्ठमङ्गुष्ठसहितं गृह्णाति देवस्य ते—इति मन्त्रेण। मन्त्रपाठानन्तरं हस्तग्रहणं बोद्धव्यम्। असाविति सर्वनामस्थाने च सम्बोधनविभक्त्यन्तं माणवकनाम प्रयोज्यम्।

हस्तं गृह्णामि अमुकशर्म्मन्,—इति। एवमन्यत्रापि असावित्यत्र संबोधनविभक्त्या नामग्रहणं बोद्धव्यम्। अत्रच, आचार्य्यस्येव माणवकस्यापि जलाञ्जल्युत्सर्गो बोध्यः। कुतः? अविशेषेणोपदेशात्। अतएव माणवकस्य साङ्गुष्ठदक्षिणपाणिग्रहणमाञ्जस्येनोपपद्यते। क्त्वाप्रत्ययस्य तु पूर्व्वापरीभावमात्रमर्थो न पुनरेककर्त्तृकत्वमपि,—इत्यधस्तादुपपादितम्। आचार्य्यस्यापि जलाञ्जल्युत्सर्गाद्चैककर्त्तृकत्वमप्यस्त्येव, परमेकमात्रकर्त्तृकत्वमेव नास्ति,—इति न किञ्चिदनुचितम्।

इदानीं गृहीतमाणवकहस्तस्याचार्य्यस्य, अग्निस्ते हस्तमग्रहीदितिमन्त्रजपो भवदेवभट्टाद्यनुमतः। प्रमाणन्तु मृग्यम्। मन्त्रब्राह्मणेऽप्यस्मिन्नवसरे मन्त्रोऽयं न पठ्यते ॥ ० ॥ २६ ॥ ० ॥

अथैनं प्रदक्षिणमावर्त्तयति सूर्य्यस्यावृतमन्वावर्त्तस्वासाविति ॥ २७ ॥

अथेति तद्देशनियमार्थम्। अथ तस्मिन्नेव देशे प्रत्यङ्मुखमवस्थितम् एनं माणवकं प्रदक्षिणं यथा भवति तथा आवर्त्तयति—प्रादक्षिण्येन प्राङ्मुखं करोति, आचार्य्यः, सूर्य्यस्येतिमन्त्रेण। तस्मिन्नेव देशेऽवस्थित आचार्य्यः—इति वा वर्णनीयम्। अत्राप्यसावित्यत्र पूर्व्ववन्नामग्रहणम् ॥ ० ॥ २७ ॥

दक्षिणेन पाणिना दक्षिणमंसमन्ववमृश्यानन्तर्हितां नाभिमभिमृशेत् प्राणानां ग्रन्थिरसीति ॥ २८ ॥

आचार्य्यः स्वेन दक्षिणेन पाणिना माणवकस्य दक्षिणमंसम्

अन्वक्मृश्य स्पृष्ठा व्याहृतिभिरित्यर्थः। अनन्तर्हिताम्-अन्तर्धानरहिताम्—वसनाद्यनाच्छादितामित्येतत्। नाभिं अभिमृशेत् आभिमुख्येन स्पृशेत्, प्राणानामितिमन्त्रेण। असावितिमन्त्रस्थाने द्वितीयान्तं माणवकनाम ग्रहीतव्यम्। एवमन्यचापि असुमिति मन्त्रस्थाने द्वितीयान्तमाणवकनामग्रहणं कर्त्तव्यम् ॥ ० ॥ २८ ॥ ० ॥

उत्सृप्य नाभिदेशमहुर इति ॥ २९ ॥

सर्पतिर्गतिकर्म्मा। नाभिदेशमिति द्वितीया समीपार्था। उत्सृप्य करं नाभिदेशसमीपमूर्द्धं नीत्वा,—माणवकस्योदर एवावस्थाप्येत्येतत्।

एवं वा—

नाभिदेशमिति व्यत्ययात् पञ्चम्यर्थे द्वितीया। नाभिदेशात् करमुत्सृप्य,—ऊर्द्धमुदरं नीत्वा—इत्यर्थः। परतो हृदयदेशोत्सर्पणस्य सूचणात् इदानीं नाभिदेशादूर्द्धं हृदयदेशाच्चाधस्तात् करस्यावस्थानमवगम्यते। पूर्व्ववन्नाभिमित्यनभिधाय नाभिदेशमित्यभिधानात् उत्सृप्येतिकरणाच्च यस्मिन् प्रदेशे नाभिस्तं प्रदेशमूर्द्धं नीत्वेति तथैवावगम्यते। तदेवं कृत्वा, अहुर इति मन्त्रं जपत्याचार्य्यः। भट्टनारायणोऽप्याह। 'अहुर इति जाठरोऽग्निरुच्यते। तस्मात् नाभिदेशोपरि जाठराग्निस्थानमुदरमालभ्य जपेत्—इति। तदधिष्ठातृत्वात्तस्य'—इति। केचित् 'असुर' इति पठन्ति। असुर—इति वायुनाम—इति व्याचक्षते च। अत्राप्यसुमित्यत्र द्वितीयान्तं माणवकनामोच्चार्यम् ॥ ० ॥ २९ ॥ ० ॥

उत्सृप्य हृदयदेशं कृशन इति ॥ ३० ॥

उत्सृप्य जठरादूर्द्धं हृदयदेशं करं नीत्वा,—तमालभ्येत्यर्थः। कृशन इति मन्त्रं जपत्याचार्य्यः। कृशनशब्देन हृदयपुरुषो-भण्यते। तस्मात् हृदयमालभ्य जपति ॥ ० ॥ ३० ॥ ० ॥

दक्षिणेन पाणिना दक्षिणमꣳसमन्वालभ्य प्रजापतये त्वा परिददाम्यसाविति ॥ ३१ ॥

आचार्यो दक्षिणेन पाणिना माणवकस्य दक्षिणमंसं स्पृष्ट्वा प्रजापतये इति मन्त्रं जपति। असावित्यत्र सम्बोधनविभक्त्या माणवकनामग्रहणम् ॥ ० ॥ ३१ ॥ ० ॥

सव्येन सव्यं देवाय त्वा सवित्रे परिददाम्यसाविति ॥३२॥

आचार्य्यः सव्येन वामेन पाणिना माणवकस्य सव्यमंसमन्वालभ्य देवाय त्वा—इति मन्त्रं जपति। अत्रापि पूर्ववन्नामग्रहणम् ॥ ० ॥ ३२ ॥ ० ॥

अथैनꣳसंप्रेष्यति ब्रह्मचार्य्यस्यसाविति ॥ ३३ ॥

अथेति पूर्वप्रकृतार्थम्। अथ पूर्वप्रकृतमंसयोर्गृहीतमेवैनं माण-वकं संप्रेष्यति समादिशति आचार्यः। संप्रेषयति,—इति पाठेऽपि तथैवार्थः। किं समादिशति? ब्रह्मचार्य्यस्यसाविति। इतः प्रभृति त्वं ब्रह्मचार्यसि, अतो ब्रह्मचर्यनियमं मधुमांसवर्जनादिकं कुरु आब्रह्म-चर्यपरिसमाप्तेरित्यर्थः। अत्रापि पूर्ववन्नामग्रहणम् ॥ ३३ ॥ ० ॥

किमेष एवादेशः? न। किन्तर्हि?—

समिधमाधेह्यपोऽशान कर्म्मकुरु मा दिवा स्वाप्सी-रिति ॥ ३४ ॥

यत्तु वक्ष्यति,—अस्तमिते समिधमादधाति,—इति; तां समिधं सायं प्रातराधेहि । यच्च श्रुतावभिहितम्,—'तस्माद्वा एतदश्नन्नग्निष्यन् पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधाति'—इति; तदिदमादिश्यते,—अपोऽशान—इति । अप उदकम् अशान भक्षय भोजनकालात्पुरस्तादुपरिष्टाच्चेत्यर्थः । मन्त्रौ तु शाखान्तरादुपादेयौ,—अमृतस्योपस्तरणमसि स्वाहेति पुरस्तात्, अमृतस्यापिधानमसि स्वाहेति चोपरिष्टात् । अपर आह,—'अपोऽशान—इत्याचमनमेव समादिश्यते तेषु तेषु निमित्तेषु'—इति । अन्ये तु, 'आपोशान'—इति पठन्तः 'कर्म्मकुरु'—इत्युत्तरेणास्यैकवाक्यतां मन्यमाना वर्णयन्ति,—'भोजनपूर्व्वापरयोर्जलपानरूपं यदापोशानं विहितम्, तत् कर्म्म कुरु'—इति । तदनाकरम् । कर्म्मपदस्यैवमनर्थकं स्यात् । पठ्यमानमन्त्रकाण्डेऽपि 'अपोशान'—इत्येवमेवायमादेशः पठ्यते । तस्मात्, अन्यच्च यत् किञ्चिद्विहितं कर्म्म—गुरुशुश्रूषादिलक्षणम्, तत् कुरु,—इत्यपर एवायमादेशः । मा दिवा स्वाप्सीः, दिवा स्वापं मा कार्षीरिति । गुरुणा चैवमादिष्टो ब्रह्मचारी सर्व्वत्रैव वाढम्—इति ओँ—इति वा ब्रूयात् । तच्चादेशमनुपालयेत् । तदाह कर्म्मप्रदीपः ।

"ब्रह्मचारी समादिष्टो गुरुणा व्रतकर्म्मणि ।
वाढमोमिति वा ब्रूयात्तत्तथैवानुपालयेत्" ।

इति ॥ ० ॥ ३४ ॥ ० ॥

उदगग्नेरुत्सृप्य प्राङाचार्य्य उपविशत्युदगग्रेषु दर्भेषु ॥३५॥

उदगुत्तरस्यामग्नेरुत्सृप्य गत्वा। प्राङ् प्राङ्मुखः। स्पष्टमन्यत्। उदङग्नेरितिपाठे उदङ्मुखोऽर्थादग्नेरुत्तरतो गत्वा प्राङ्मुख उपविशतीति व्याख्येयम् ॥०॥ ३५॥०॥

प्रत्यङ्माणवको दक्षिणजान्वक्तोऽभिमुख आचार्य्यमुदगग्रेष्वेव दर्भेषु ॥ ३६ ॥

माणवकस्तु दक्षिणजान्वक्तोभूमिगतदक्षिणजानुकः आचार्याभिमुखः प्रत्यङ्मुख उदगग्रेषु दर्भेषु उपविशति। अग्नेरुत्तरत एव ॥०॥ ३६॥०॥

अथैनं त्रिः प्रदक्षिणं मुञ्जमेखलां परिहरन् वाचयतीयं दुरुक्तात् परिवाधमानेत्यृतस्य गोप्त्रीति च ॥ ३७॥

अथ अनन्तरमेव—उपविष्टमेव, एनं माणवकं वाचयत्याचार्यः। किं वाचयति? इयं दुरुक्तादिति ऋतस्य गोप्त्रीति च मन्त्रद्वयम्। किं कुर्व्वन् वाचयति? मुञ्जमेखलां तस्य कटिदेशे त्रिःप्रदक्षिणं परिहरन् प्रादक्षिण्येन वारत्रयं परिवेष्टयन्। परिहरन्—इति वर्त्तमाननिर्द्देशात् परिहरणसमकालत्वं मन्त्रवाचनस्य। सत्यामपि परिहरणावृत्तौ सकृदेव मन्त्रपाठः स्यात्। कस्मात्? "एकद्रव्ये कर्म्मावृत्तौ सकृदेव मन्त्रवचनं कृत्वा"—इति वचनात्।

"अस्मिन्नवसरे प्रसिद्धा यज्ञोपवीतमिच्छन्ति"—इति कर्कोपाध्यायाः। "गृह्यानुक्तमपि यज्ञोपवीतमस्मिन्नेव समये परिधापयेत्।

मेखलाऽनन्तरम्—'कार्पासमुपवीतं स्यात्'—इति मनूक्तेः। 'पवित्रञ्चास्मै प्रयच्छति'—इति जातूकर्णात्। 'यज्ञोपवीतिनं कृत्वा'—इति शांख्यायनाच्च"—इति तत्त्वकारः। भवदेवभट्टप्रभृतयोऽप्येवम्। तच,—

"मेखलामजिनं दण्डमुपवीतं कमण्डलुम्।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत्"।

इति मनुनोपवीतग्रहणस्यापि मन्त्रवत्त्वाभिधानात् गृह्ये च तदनुपदेशात् शाखान्तरान्मन्त्रमुपादध्यात्—यज्ञोपवीतमसि—इत्येवमादिम्। अजिनमपि इदानीमेव परिधापयेत्—इति भवदेवरघुनन्दनौ। वस्तुतस्तु अजिनधारणक्रमं वक्ष्यामः॥ ०॥ ३७॥ ०॥

अथोपसीदत्यधीहि भोः सावित्रीं मे भवाननुब्रवीत्विति॥ ३८॥

अथेति पूर्वोक्तविशिष्टानन्तर्यद्योतनार्थम्। अथ यज्ञोपवीतधारणानन्तरम्। माणवक आचार्यमुपसीदति—कृताञ्जलिपुट आचार्यगतचक्षुरुपसन्नो भवति। अधीहि—इत्यनेन। अधीहि अध्यापय। भोरिति आचार्यसम्बोधनम्। अध्ययनस्यानेकत्वात् विशेषप्रतिपत्तये पुनरुच्यते,—सावित्रीम्—इति। सावित्रीं गायत्रीम्॥०॥ ३८॥०॥

माणवकेनैवमभिहितः खल्वाचार्यः,—

तस्मा अन्वाह,—पच्छोऽर्द्धर्चश ऋक्श इति॥ ३९॥

तस्मै माणवकाय, अन्वाह अनुब्रूयात्। अनुरुपसर्गः। कामन्तु-

ब्रूयात् ?—सावित्रीम्। कथम् ? प्रथमन्तावत्, पच्छः—ऋचः पादं पादं कृत्वा। ततोऽर्द्धर्चशः—ऋचोऽर्द्धमर्द्धं कृत्वा। ततः ऋक्शः—सर्व्वामृचम्। ऋक्शः—इत्यत्र, 'सर्व्वाम्'—इत्येव केचित् पठन्ति। एवन्तावत् सावित्रीमनुब्रूयात् ॥ ० ॥ ३९ ॥ ० ॥

महाव्याहृतीश्च विहृताॐकारान्ताः ॥ ४० ॥

महाव्याहृतीश्च अन्वाह—इत्यनुषज्यते। कथम्भूताः ? विहृताः विशेषेण हृताः पृथक् कृताः—पृथक् पृथगित्येतत्। विहृताः,—इति पाठे, विहृताः पृथग्भूताः न संहृताः—इति स एवार्थः। विकृताः—इति केचित् पठन्ति। तत्रापि तथैव व्याख्येयम्। ॐकारान्ताः। ॐकारः प्रणवोऽन्ते यासां तादृशा ॐकारान्ताः। महाव्याहृतीः—इति कृत्वा ॐकारान्ताः—इति करणात्तासामन्त एव ॐकारोऽवगम्यते। पवमानमन्त्रकाण्डेऽपि, अस्मिन्नेवावसरे व्याहृतीनां परत एव ॐकारः पठ्यते। तथाच, भूः ॐ, भुवः ॐ, स्वः ॐ—इत्येव मनुब्रूयादिति भट्टनारायणोपाध्यायाः। ॐ भूः,—इत्यादिरूपमिति भवदेवभट्टाः। उभयमतानुरोधी वीरेश्वरस्तु ॐ भूः ॐ,—इत्यादिरूपम्—इत्याहस्म। यद्यपि पवमानमन्त्रकाण्डे तिसृणां महाव्याहृतीनां परत एवोङ्कारः पठ्यते, तथापि चतुर्थीहोममन्त्रपाठवत् निदर्शनमात्रेण तथा पाठः। कथं ज्ञायते ? 'विहृता ॐकारान्ताः'—इति वचनात् विहृतानामोङ्कारान्तत्वागतेः। अन्यथा विहारोपदेशोऽनर्थक एव स्यात्। शिष्टाश्च प्रतिव्याहृत्येवोङ्कारं कुर्व्वन्ति ॥ ० ॥ ४० ॥ ० ॥

वार्क्षंश्चास्मै दण्डं प्रयच्छन् वाचयति—सुश्रवः सुश्रवसं मा कुर्विति ॥ ४१ ॥

वृक्षस्यायं वार्क्षः तं वार्क्षम्, प्राप्तदण्डानुवादेन प्रदानमात्रविधानात् पार्णादिरूपम्—इत्यर्थः। तमिमं दण्डम् अस्मै ब्रह्मचारिणे प्रयच्छन् ददत् सुश्रवः—इत्येतं मन्त्रं वाचयति ब्रह्मचारिणमेव। चशब्दादजिनमपि इदानीमेव प्रयच्छति। कस्मात्? "सुश्रव-इति दण्डं प्रदाय अजिनं प्रयच्छति"—इति स्वशाखाभेदे पठितत्वात्। तस्मात्—आचार्येणानुपदेशादिच्छया यस्मिन् कस्मिंश्चित् क्रमे धारणमजिनस्य,—इत्ययुक्तं वचनम्। अजिनधारणस्यापि मनुना मन्त्रवत्त्वोपदेशात् तन्मन्त्रस्य स्वशाखायामभावात् 'मित्रस्य चक्षुर्व्वरुणं बलीयः'—इति तैत्तिरीयशाखापरिपठितोद्रष्टव्यः। अपरे पुनरेतदविदांसोभाषन्ते,—मन्त्रानुपदेशादमन्त्रकमजिनस्य धारणम्—इति।

"वार्क्षंश्चास्मै दण्डं प्रयच्छन्नादिशति"—इत्युपरिष्टाद्गोदानादिषु दण्डप्रदानादेशयोः सहोपदेशादिहापि इदानीमाचार्य आदिशति—इति बोद्धव्यम्। निर्द्देशसामान्यात्। एतदर्थमेवोभयत्र तुल्यवन्निर्द्देशः। तस्मात्तदपि चकारेण समुच्चीयते अविशेषात्। ते चादेशाः परतो वक्ष्यन्ते। ब्रह्मचारी च सर्व्वत्र पूर्व्ववत् बाढ़म्—इति ॐ— इति वा ब्रूयात्। अन्ये तु मन्यन्ते, स्वशाखाभेदे पाठादेव इदानीमजिनप्रदानं सिध्यति, तदर्थं चशब्दोनातीव प्रयोजनवान्, तस्मात् वक्ष्यमाणादेशसमुच्चयार्थ एव चशब्दः—इति ॥ ० ॥ ४१ ॥ ० ॥

अथ भैक्षं चरति ॥ ४२ ॥

अथशब्दो विशिष्टमानन्तर्यं द्योतयति। कथञ्चाम? दण्डमजिनञ्च प्रतिगृह्यादेशांश्चाङ्गीकृत्य भास्करमुपस्थाय अग्निं प्रदक्षिणीकृत्य अथानन्तरं भैक्षं भिक्षाकदम्बकं चरति आहरति। तथाच मनुः।

"प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम्।
प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि"।

इति ॥०॥ ४२ ॥०॥

किं यामेव काञ्चिदग्रे भिक्षेत? न। कान्तर्हि?

मातरमेवाग्रे, द्वे चान्ये सुहृदौ, यावत्यो वा सन्निहिताः स्युः ॥ ४३ ॥

मातरं जननीमेव अग्रे प्रथमं भिक्षेत। द्वे च अन्ये सुहृदौ—स्निग्धहृदये स्वसाद्ये भिक्षेत। यावत्यो वा योषितः सन्निहिताः सन्निधौ स्थिताः स्युः भवेयुः, न चैनं विमानयन्ति, तावतीर्वा भिक्षेत। तथाच मनुः।

"मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं न विमानयेत्"।

इति। सन्निहिताः—इति करणात् तत्रस्थ एव भिक्षेत न पुनः स्थानान्तरं गत्वा—इति बोद्धव्यम्। 'भवति! भिक्षां मे देहि'—इति ब्राह्मणस्य भैक्षचरणप्रयोगः। 'भिक्षां भवति! मे देहि'—इति क्षत्रियस्य। 'भिक्षां मे देहि भवति!'—इति वैश्यस्य।

तथाच गृह्यान्तरम्। "भवत्पूर्व्वां ब्राह्मणो भिक्षेत, भवन्मध्यां राजन्यो, भवदन्त्यां वैश्यः"—इति। गौतमोऽप्याह। "आदिमध्यान्तेषु भवच्छब्दः प्रयोज्योवर्णानुपूर्व्व्येण"—इति।

"आदिमध्यावसानेषु भवच्छब्दोपलक्षिता।
ब्राह्मणक्षत्रियविशां भैक्षचर्य्या यथाक्रमम्" ॥

इति च स्मृत्यन्तरम् ॥०॥ ४३ ॥०॥

आचार्य्याय भैक्षं निवेदयति ॥ ४४ ॥

ब्रह्मचारी—इत्येव। चतुरक्षरार्थः। संस्कारार्थं भैक्षस्य निवेदनमात्रं न पुनराचार्याय दानमेव। कस्मात्? वृत्त्यर्थत्वाद्भैक्षचरणस्य। मनुरपि स्मरति।

"समाहृत्याय तद्भैक्षं यावदर्थममायया।
निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः"।

इति। अश्नीयात्—इत्यत्रापि प्रचीनमेव कर्म्मपदमनुषञ्जनीयं निराकाङ्क्षत्वार्थम्। 'भैक्षं भोः'—इत्ययं भैक्षनिवेदनप्रयोगः। तथाच गृह्यान्तरम्। "भैक्षं भोरित्याचार्याय भैक्षं निवेद्य दत्तं प्रतिगृह्णीयात्"—इति। तस्मात् आचार्यः पुनरस्मै भैक्षं प्रदाय कर्म्मशेषं समापयेदिति बोद्धव्यम्। कुतः? परतो ब्रह्मचारिण एव कर्म्मोपदेशादिदानीमाचार्यकर्म्मणोऽवसानावगतेः ॥०॥ ४४ ॥०॥

अवसितमुपनयनकर्म्म। प्रासङ्गिकमिदानीं ब्रह्मचारिणः कर्त्तव्यमनुवर्त्तामहे। स खल्वयं ब्रह्मचारी,—

तिष्ठत्यहःशेषं वाग्यतः ॥ ४५ ॥

वाग्यतः संयतवागङ्गः शेषमवशिष्टं तिष्ठति,—वक्ष्यमाणकर्मार्थम्
॥ ० ॥ ४५ ॥ ० ॥

अस्तमिते समिधमादधात्यग्नये समिधमहार्षमिति ॥ ४६ ॥

अस्तमिते सवितरि, (स्मृत्यन्तरप्राप्तं सन्ध्योपासनं कृत्वा) अग्नये समिधमितिमन्त्रेण समिधमुक्तलक्षणामादधाति अग्नौ प्रक्षिपति। इयमेवात्र प्रधानाहुतिः। ततश्चात्रापि पुरस्ताच्चोपरिष्टाच्च इन्धनार्थं समिद्भवति। तथाच कर्मप्रदीपः।

"समिदादिषु होमेषु मन्त्रदैवतवर्जिता।
पुरस्ताच्चोपरिष्टाच्च इन्धनार्थं समिद्भवेत्"।

इति। स खल्वयं चिप्रहोमः स्यादिति द्रष्टव्यम्। अत्र च अस्तमिते अस्तमिते,—इति वीप्सा बोद्धव्या। कस्मात्? समावर्त्तनपर्यन्तमेवाग्नौ समिदाधानस्य स्मृत्यन्तरे उपदेशात्। तथाच मनुः।

"अग्नीन्धनं भैक्षचर्यामधः शय्यां गुरोर्हितम्।
आसमावर्त्तनात् कुर्यात् कृतोपनयनो द्विजः"।

इति। आचार्योऽप्युपरिष्टाद्वक्ष्यति,—"मेखलाधारणभैक्षचर्यदण्डसमिदाधानोदकोपस्पर्शनप्रातरभिवादा इत्येते नित्यधर्माः" —इति।

सायमारब्धत्वात् कर्मणः अस्तमिते,—इत्येव सूचितं न प्रातरित्यपि। प्रातः खल्वपवर्गः कर्मणः—इत्यारम्भे सूचिते असूचितोऽपि तदपवर्गोऽवगम्यत एव। अतो लाघवार्थं प्रातरित्यवचनं न प्रात-

होमानन्तुज्ञानार्थम्। तस्मात् सायं प्रातश्च समिधमादध्यात् तथाच मनुः।

"प्रातराहृत्य समिधं सन्निदध्यादिहायसि।
सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः"।

इति। "सायं प्रातः समिधमादध्यात्"—इति च गृह्यान्तरम्। तस्मात् प्रातः समिदाधानं नास्ति,—इत्यसङ्गतं वचनम्। समिदाधानानन्तरञ्चाग्निमाचार्यञ्चाभिवादयेत्। तथाच गृह्यान्तरम्। "उभयत्राग्निं समिध्य गोत्रनामनी प्रोच्याग्निमभिवाद्याचार्यमभिवादयेत्"—इति ॥ ० ॥ ४६ ॥ ० ॥

अथेदानीं ब्रह्मचारिणो भोजनकालः। कुतः?

"कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया"।

इति स्मरणात्। स खल्वयं ब्रह्मचारी उपनयनकर्म्मण ऊर्द्धम्—

चिरात्रमक्षारलवणाशी भवति ॥ ४७ ॥

व्याख्यातं सूत्रम् ॥ ० ॥ ४७ ॥ ० ॥

तस्यान्ते सावित्रश्चरुः ४८ ॥

तच्छब्देनोपनयनव्रतस्य परामर्शः। तस्योपनयनव्रतस्य न पुनरुपनयनकर्म्मणः, न वा सन्निहिततरस्य चिरात्रस्य। कुतः? तस्येत्यानर्थक्यापत्तेः। अन्ते—इत्येतावतैव निर्व्वाहात्। गोदानादिव्रतान्तराणामन्ते होमान्तरस्य वक्ष्यमाणत्वादुपनयनव्रतान्तेऽपि कस्यचिदभ्युपगन्तुमुचितत्वाच्च। तथाच गृह्यान्तरम्। "महाप्रवचनव्रतान्ते सावित्रश्चरुः गोदानादीन्यनुप्रवचनीयानि व्रतान्यैन्द्रस्थालीपाकान्तानि भवन्ति"—इति। तस्मात्—उपनयनकर्म्मण-

चतुर्थेऽह्नि सावित्रीचरुहोमः—इति भवदेवभट्टमतम्, उपनयनकर्मदिन एव आचार्यो माणवकाय भैक्षं प्रदाय सावित्रचरुहोमं कुर्यात्—इति रघुनन्दनमतस्वामञ्जतमेव। 'उपनयनरूपव्रतस्यान्ते सावित्रश्चरुः'—इति रघुनन्दनस्य स्वव्याख्याऽप्येवं व्याकुप्येत। किञ्च। स खल्वयं व्रतान्ते सावित्रं चरुं व्याख्याय पुनरुपनयनकर्मणोऽनन्तरमेव तं वर्णयन् व्रतकर्मणोर्विवेकमविद्वांसमिवात्मानं ख्यापयति। भट्टभाष्येपुक्तम्—'तस्य व्रतस्य न कर्मणः न च सन्निधानात् चिराचस्य। कुतः? अव्यक्तं प्रधानगामि,—इति वचनात्। अन्यथा अस्यान्ते—इति ब्रूयात्'—इति। अलमति प्रसङ्गेन।

सविता देवता अस्येति सावित्रश्चरुः कर्त्तव्यः,—इति प्रसङ्गादिहोच्यते। सवित्रे त्वा जुष्टं निर्व्वपामीति निर्व्वापः। सवित्रे स्वाहा—इति प्रधानहोमः ॥ ० ॥ ४८ ॥ ० ॥

अवसिता प्रासङ्गिकी कथा। प्रकृतमिदानीमनुवर्त्तामहे—

यथार्थम् ॥ ४९ ॥

उपनयनकर्मणः परिसमाप्तिरनेनोच्यते ॥ ० ॥ ४९ ॥ ० ॥

गौर्दक्षिणा ॥ ५० ॥

उपनयनकर्मण एव नोपनयनव्रतस्य। कुतः? उपनयनकर्मणोऽनन्तरम् "आचार्याय वरोदक्षिणा"—इति गृह्यान्तरसूचणात्। अस्माच्च गृह्यान्तरात् दक्षिणेयमाचार्याय दातव्या। तस्मात् ब्रह्मचारिणे भैक्षप्रदानानन्तरमेवाचार्यः कर्मशेषं समापयेत्—इति

भट्टनारायणाद्यनुमतं समीचीनमवोचाम। समिदाधानस्य प्रधान-कर्म्मान्तरतयोपनयनकर्म्मानङ्गत्वात् अहःशेषस्थितेस्तादर्थ्याच ॥ ० ॥ ५० ॥ ० ॥

इयमपरा सूत्रद्वययोजना,—

यथार्थम् ॥ ५१ ॥

प्रकृतस्य साविचचरोरवसाने यथार्थं यथाप्रयोजनं यथाप्राप्त-मित्येतत्। किमनेनोक्तं भवति? एतदनेनोक्तं भवति। उपनयन-व्रतान्ते साविचहोमं कृत्वा, अग्ने व्रतपते—इत्यादिमन्त्रैः सूचयि-ष्यमाणविशेषैराज्येन व्रतसमापकहोमञ्च कृत्वा, तन्त्रं समापयेत्—इति। स खल्वयमाज्यहोमः सर्व्वेष्वेव व्रतान्तेषु स्यादिति वक्ष्यामः॥ ० ॥ ५१ ॥ ० ॥

गौर्दक्षिणा ॥ ५२ ॥

इयं दक्षिणाऽप्युपनयनव्रतस्यैव। एतदपि परस्तादुपपादयि-ष्यामः। अस्यामपि वर्णनायामुपनयनकर्म्मणः प्राचीनैव परिसमाप्तिः, दक्षिणा च गौरेव स्यात्, पूर्वोक्तकारणात्—इति न कश्चिद्विरोधः। परन्तु साविचचरोः कर्म्मक्रमस्यासूचणात् यथार्थमित्यस्य कर्म्मापवर्ग-परत्वावगतेश्च पूर्व्वैव योजना समीचीनेति प्रतिपद्यामहे। अतिक्रान्त-संबन्धश्चाचार्य्यस्यानुमत इत्यावेदितमधस्तात् ॥ ० ॥ ५२ ॥ ० ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मज-श्रीचन्द्रकान्ततर्कालङ्कारस्य कृतौ गोभिलीयगृह्यसूत्रभाष्ये द्वितीयप्रपाठकस्य दशमी खण्डिका ॥ ० ॥

॥ समाप्तश्चायं द्वितीयः प्रपाठकः ॥

